BIBLIOTHECA INDICA.

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES No 1262

तत्त्वचिन्तामणि दीधिति-विवृति



TATTVACINTĀMANI DIDHITI-VIVRITI

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY

MAHĀMAHOPĀDHYĀYA KAMAKHYANATHA TARKAVAG'ISA

[illegible]

[illegible]

Calcutta:

PRINTED [illegible] AT THE SANSKRIT PRESS,

5, Nandakumar Choudhury's 2nd Lane

[illegible]

ASIATIC SOCIETY OF BENGAL, [illegible] PARK STREET

1910

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, Mr BERNARD QUARITCH,

11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND Mr OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock*

BIBLIOTHECA INDICA

Sanskrit Series

*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	Rs. 1	
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1	
*Agni Purāṇa, Fasc. 6-14 @ /10/ each	5	
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14	
Aitereya Lochana	2	
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each	2	
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/	1	
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	1
*Atharvana Upanishad, Fasc. 4 5 @ /10/ each	1	
Atmatattaviveka, Fasc. I @ /10/ each	0	1
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3	
Avadana Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-6 @ 1/ each	13	
Bālam Bhatti, Vol. I, Fasc. 1-2, Vol. 2, Fasc. 1 @ /10/ each	1	
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc. 1-2 @ /10/ each	3	
*Bhāmatī, Fasc. 4-8 @ /10/ each	3	
Bhātta Dīpikā Vol. I, Fasc. 1-6, Vol. 2, Fasc. 1, @ /10/ each	4	
Baudhyostotrasangraha (Tib. & Sans.)	2	
Brahma Sutra, Fasc. 1 @ /10/ each	0	1
Bṛhaddēvatā Fasc. 1-4 @ /10/ each	2	
Bṛhaddharma Purāṇa Fasc. 1-6 @ /10/ each	3	1
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each	3	
Çri Cantinātha Charita Fasc. 1-3	0	1
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each	8	
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each	14	
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each	3	
Ditto Vol. VII, Fasc. 1-3 @ /10/	1	1
Çatasāhasrikā Prajñāpāramitā Part, I Fasc. 1-12 @ /10/ each	8	
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25, Vol. III, Part I, Fasc. 1-18, Part II, Fasc. 1-10, Vol. IV, Fasc. 1-6 @ /10/ each	36	1
Ditto Vol. 4, Fasc. 7, @ 1/4/ each	1	
Ditto Vol. IV, Fasc. 8-9 @ /10/	1	
...vartika, (English) Fasc. 1-7 @ 1/4/ each	8	1
...Sūtra of Āpastamba, Fasc. 12-17 @ /10/ each	3	1
...to Çāṅkhāyana, Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-4, ... III, Fasc. 1-4, Vol. 4, Fasc. 1 @ /10/ each	10	
...Bhāshyam, Fasc. 1-3 @ /10/ each	1	1
...na Kriyā kaumudī, Fasc. 1-2 @ /10/ each	1	
...dadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	
Ditto Āchārasāra Vol. II, Fasc. 1-4 @ /10/ each	3	
Gobhilīya Gṛhya Sutra, Vol. I @ /10/ each	3	
Ditto Vol. II, Fasc. 1-2 @ 1/4/ each	2	
Ditto (Appendix) Gobhila Parisista	2	

श्रीरामः ।

अनुमानखण्डस्य

तत्त्वचिन्तामणिः ।

प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वा-
दुपमानात् प्रागनुमानं निरूप्यते ।

तत्त्वचिन्तामणिदीधितिः ।

ओं नमः सर्व्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

अध्ययन-भावनाभ्यां
सारं निर्णीय निखिलतन्त्राणाम् ।
दीधितिमधिचिन्तामणि
तनुते तार्किकशिरोमणिः श्रीमान् ॥

परदुष्टनयान्निवर्त्तमाना
मननास्वाद्यरसा विशुद्धबोधैः ।
रघुनाथकवेरपेतदोषा
कृतिरेषा विदुषां तनोतु मोदम् ॥

न्यायमधीते सर्व्वस्तनुते कुतुकान्निबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः ॥

मान्यान् प्रणम्य विहिताञ्जलिरेष भूयो-
भूयो विधाय विनयं विनिवेदयामि ।
दूष्यं वचो मम परं निपुणं विभाव्य (१)
भावावबोधविहितो न दुनोति दोषः ॥

गादाधरी विवृतिः ।

अभिवन्द्य मुहुः समादरात् पदपाथोजयुगं पुरद्विषः ।
विवृणोति गदाधरः सुधीरतिदुर्व्वोधगिरः शिरोमणेः ॥

प्रारीप्सितग्रन्थसमाप्तिपरिपन्थिप्रत्यूहव्यूहविध्वंसपटीयसीं परमेश्वरप्रणतिं शिष्यशिक्षार्थमादौ निबध्नाति, 'ओमिति, समस्तैरकारोकारमकारैः सन्धिवशेन प्रणवभावमावहद्भिरव्ययतया लुप्तचतुर्थीकैः प्रत्येकशक्त्युपस्थापितस्य वासुदेवादिदेवत्रयस्याभेदेन परमात्मनो विशेषणत्वमत्राभिहितम् । अत्र जगतः पालनादिकर्त्तृत्वं नाकारादिपदार्थतावच्छेदकमुद्देश्यतावच्छेदकस्य परम- [illegible] तद्रूपतया अन्वयानुपपत्तेः (२) । अपि तु

---

(१) तथाच निपुणतरविभावनया दोषा स्वयमेव यास्यन्तीति भावः ।

(२) घटो घट इति वाक्यात् शाब्दबोधवारणाय उद्देश्यतावच्छेदक-विधेयतावच्छेदकयोरैक्ये शाब्दबोधस्याप्रामाणिकत्वमवश्यमङ्गीकरणीयं तथाच तद्वृत्तिविशेष्यतावच्छेदकतासम्बन्धेन शाब्दं प्रति विधेयतावच्छेदकभेदस्य हेतुत्वात् प्रकृते तद्बाधादिति भावः ।

विग्रहविशेषवत्त्वमेव, पदार्थस्य परमात्मन एकत्वेऽपि पदार्थतावच्छेदकानां नारायणादिशरीराणां भेदो द्वन्द्वस्य साधुतामुपपादयति (१)। यद्यपि जातिविशेषावच्छिन्नशरीराणां स्वनिष्ठचेष्टानुकूलयत्नवत्त्वरूपपरम्परासम्बन्धेन प्रवृत्तिनिमित्ततापेक्षया धर्म्मान्तराविशेषितानामेव शरीरवृत्तिजातिविशेषाणाम् समवायेन तत्त्वमुचितं तथापि "सर्व्वं वेत्ति विष्णुः" इत्यादिप्रामाणिकप्रयोगानुरोधात् विष्ण्वादिपदस्यात्मनि शक्तेर्निरूढ़लक्षणाया वा आवश्यकत्वात् तत्पर्य्यायस्याकारादेरपि शरीरविशेषावच्छिन्नात्मपरता युज्यत एव, न तु तत्तत्स्थले शरीरपरत्वे योग्यता कथञ्चिन्निर्व्वहति शरीरस्य समवायेन ज्ञानाश्रयत्वविरहात्, ईश्वरबुद्धेर्व्याप्यवृत्तितया अवच्छेदकत्वस्य आख्यातार्थतास्वीकारेऽप्यप्रतीकारात् । स्वसमानाधिकरणप्रयत्नासाधारणकारणकचेष्टाश्रयत्वादेराख्यातार्थत्वे (२) गौरवात् शरीरविशेषा एव प्रणवार्थाः, तेषाञ्च निपातार्थतया भेदान्वय एव (३) परमात्मनीति तु न

---

(१) नील-घटयोरभेद इत्यत्र द्वन्द्वस्य साधुत्वनिर्वाहाय पदार्थभेदस्येव पदार्थतावच्छेदकभेदस्यापि द्वन्द्वसमासनिर्वाहकत्वमवश्यमभ्युपगन्तव्यमिति तात्पर्य्यम् ।

(२) प्रयत्नासाधारणकारणचेष्टाश्रयत्वानिवेशे भगवच्छरीरस्य वस्तुमात्रं प्रति साधारणकारणतया सर्वविषयकभगवज्ज्ञानसमानाधिकरणप्रयत्नं प्रत्यसाधारणकारणताकचेष्टाश्रयत्वस्य भगवत इव पुरुषान्तरस्यापि सत्त्वात् सर्वं वेत्ति विष्णुरिति प्रयोगस्येव सर्वं वेत्ति चैत्र इति प्रयोगस्य प्रामाण्यापत्तिः । प्रयत्नासाधारणकारणत्वञ्च देहत्वावच्छिन्नकार्य्यतानिरूपितस्वसमानाधिकरणप्रयत्नं प्रत्यसाधारणकारणत्वमिति तादृशप्रयोगस्य न प्रामाण्यमापादयितुं शक्यमिति सुधीभिर्विभाव्यम् ।

(३) सविशेषणे तु द्वन्द्वपदवाच्यपदार्थभेदस्य सम्बन्धेनान्वय इत्येतदर्थः ।

प्रत्यपवादिका इति न निरुध्यते। वस्तुतस्तु (१) स्वावधिकोत्कर्ष-वत्तया ज्ञापनं नमस्कारः तदेकदेशज्ञानान्वयि विषयत्वं विषयित्वं (२) वा चतुर्थ्यर्थः, गुरुं प्रणमतीत्यादौ तादृशज्ञानविषयतया गुरुप्रभृतेः कर्म्मत्वेऽपि प्रकृते ज्ञानस्य धात्वनुपस्थाप्यतया भगवतो न कर्म्मता, "नारायणं नमस्कृत्य" इत्यादौ नारायणादेः कर्म्मत्वं प्रयत्नेनोप-पादनीयम् (३)। नमस्करोति प्रणमतीत्यादौ समभिव्याहृतस्य कर्त्तुरेव स्वावधिकोत्कर्षबोधको व्यापारः प्रतीयते न तूच्चारयितु-रेव। प्रकृते केवलान्नमःपदात् प्रयोक्तुरेव तादृशव्यापारः प्रतीयते इति मदवधिकोत्कर्षवत्तया भगवज्ज्ञानानुकूलो मदीयो व्यापार-इत्याकारकः शाब्दबोधः। 'विष्टम्येति, विष्टम्भो धृतिः, सा च

---

(१) ननूक्तरीत्या प्रयोक्तृव्यापारस्य नमस्कारत्वे गुरुं नमस्करोतीत्यादौ का गतिः, एवं गुरुं प्रणमतीत्यादौ द्वितीयानुपपत्तिश्च गुरोर्धात्वर्थतावच्छेदकफला-भावात् कर्म्मत्वानुपपत्तेरित्यत आह, 'वस्तुतस्त्वि'ति।

(२) विषयत्वस्य चतुर्थ्यर्थत्वे चैत्राय नमो न मैत्राय इति नञ्समभिव्याहार-स्थले [illegible]

(३) प्रकृते "नारायणं नमस्कृत्य" इत्यादौ [illegible]

पतनविरोधिसंयोगः (१)। यथा निराधारमपि आकाशे विहङ्गमा-दीनां शरीरधारकप्रयत्नाभिघातात् पतनं तथा ब्रह्माण्डादीनां गुरुतराणामपि प्रयत्नवदीश्वरसंयोगादेव न पतनमिति (२) विश्व-धृतिकर्तृत्वं भगवतोऽनायासमेव। यत्नविशेषविशिष्टं पतनानुत्पाद-प्रयोजकत्वम् एवञ्च भालविशालमन्देहकपरमाणुत्वादि यथा भूतानां कर्मिता मुखं व्यादाय सर्पितोऽखिलमेव समासकालान्तरमेव ज्ञातव्य-यार्थः, न तूत्तरकालीनत्वम्। भगवतो भूतभावकत्वम "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्य-व्यय ईश्वरः"॥ इत्याद्युपनिषदोऽपि प्रमाणयन्ति (३)। 'अख-ण्डेति, अत्र नित्यसुख-ज्ञानवते इति नित्यसुखज्ञानात्मकाय इति वा व्याख्यानं वेदान्तिनामेव शोभते, न तु नैयायिकानां तैर्नित्य-सुखस्यात्मनि ज्ञान-सुखाभेदस्य वानभ्युपगमात्। अतस्तन्मते अखण्डा दुःखासङ्गिनः (४) आनन्दो यस्मात् स, अखण्डानन्दः एवम्भूत उपासनारूपो बोधो यस्येत्येव व्याख्येयम्। अथ वा ग्रन्थ-कृता नित्यसुखाभिव्यक्तिर्मुक्तिरिति भट्टमतस्य परिष्कृतत्वात् तद-वलम्ब्यैव एतदभिहितं तथा चाखण्डस्य नित्यस्य आनन्दस्य बोधः साक्षात्कारो यस्मादिति व्युत्पत्त्या भगवत उपासनाविषयतया मुक्तिप्रयोजकत्वमेवाखण्डेत्यादिना प्रतिपादितम्। 'पूर्णाय' इत्यस्य,

---

(१) सा च पतनविरोधिव्यापारः, स चेश्वरप्रयत्नस्तत्संयोगो वेति पा।

(२) तथा च तस्य संयोगस्य विजातीयसंयोगत्वेन प्रतिबन्धकत्वमिति भावः।

(३) प्रमापयन्तीति पा०।

(४) दुःखानवच्छेदकीभूतशरीरावच्छिन्न इत्यर्थः।

त्वमिव स्वीयसुखेच्छावदन्यत्वमिति (१) कुसुमाञ्जलिप्रकाशे भगवतोऽङ्गषट्कव्याख्यानावसरे (२) वर्द्धमानोपाध्यायैरभिहितम् । 'परमेति, परमत्वमुत्कर्षः, स चात्मन्तरावधिकः, सर्व्वविषयकनित्यज्ञानादिमत्त्वमेव ईश्वरस्य, एवञ्चार्थत एव तस्यात्मत्वलाभेऽपि आत्मपदसमभिव्याहारेणैव उक्तोत्कर्षपरतालाभ इति न तद्वैयर्थ्यम् । वस्तुतस्तु आत्मपदं ज्ञानावच्छिन्नस्य (३) वाचकं न तु सुखादिसमवायिकारणतावच्छेदकीभूतद्रव्यत्वव्याप्यजातिविशेषावच्छिन्नस्य, सुखादिसमवायिकारणतारहितस्य ईश्वरस्य तादृशजातिसत्त्वे मानाभावात्, सुखत्वावच्छिन्नं प्रति आत्मत्वेन हेतुताया अनभ्युपगमेऽपि (४) धर्म्मादिविरहेणानात्मनि सुखाद्यापादनासम्भवेन तादृशजाताविव युक्तेर्दुर्लभत्वाच्च (५) एवञ्च यथा परमसुन्दर इत्यादौ पदार्थतावच्छेदकसौन्दर्य्यादिगत उत्कर्षः परमपदेन

(१) स्वीयसुखेच्छावदन्यत्वमित्यत्र स्वीयत्वं सुखविशेषणं सुखविशिष्टेच्छावदन्यत्वम् इति फलितार्थः । इच्छाया सुखवैशिष्ट्यं स्वसमानाधिकरणत्व-स्वविषयकत्वोभयसम्बन्धेन, भगवदिच्छाया सुखसमानाधिकरणत्वविरहात् न तस्य सुखविशिष्टेच्छावत्त्वमिति ।

(२) भगवतोऽङ्गषट्कञ्च, "सर्व्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अनन्तशक्तिश्च विभोर्विधिज्ञा षडाहुरङ्गानि महेश्वरस्य" इति ॥

(३) अत सातत्यगमने इति गत्यर्थकधातोर्ज्ञानार्थकतायामविवादेन तदुत्तरौणादिकमनिन्प्रत्ययसाध्यात्मपदेन ज्ञानवान् बोध्यत इति भावः ।

(४) परन्तु आत्मन समवायिकारणत्वनिर्व्वाहाय द्रव्यत्वेन कारणत्वमवश्यमङ्गीकर्त्तव्यमिति ।

(५) न च "न वारे पत्युः कामाय पतिः प्रियो भवति किन्त्वात्मनस्तु कामाय" इत्यात्मपदगर्भितश्रुतिरेव तादृशजातिसत्त्वे मानमिति वाच्यम् । शक्यतावच्छेदकत्वेन जातिसिद्धेरपसिद्धान्तत्वात् ।

[illegible] तथात्वाभि [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
इति ध्येयम्। प्रत्यक्षानन्तरमनुमानाभिधाने सङ्गतिरपेक्षितेति(१) न तु तत्प्रदर्शने [illegible] प्रत्यक्षोपजीवकत्वादित्यादिना [illegible]-सङ्गतिप्रदर्शनमफलम्। न च प्रत्यक्षानन्तरमनुमानं निरूप्यते इत्यभिधाने तत्पूर्वमेव शिष्याणां निरूपितमित्याकाङ्क्षोदयात् निरूपणपौर्वापर्यनियामकस्य प्रत्यक्षानुमानयोरुपजीव्योपजीवक-भावस्य प्रदर्शनमावश्यकमिति वाच्यम्। निरूपणीयोपजीव्योप-जीवकभावस्य निरूपणक्रमनियामकतायाः स्वयं दूषणीयतया स्वमते क्रमनियामकाकाङ्क्षया तदभिधानामङ्गतमित्याशङ्कां परि-जिहीर्षुः सङ्गतिप्रदर्शनस्य प्रत्यक्षानुमानग्रन्थैकवाक्यताप्रतिपत्ति-प्रयोजनकत्वं निरूपणप्रतिज्ञाया निष्फलत्वशङ्कानिराचिकीर्षया तस्याः शिष्यावधानफलकत्वञ्च दर्शयति, 'पूर्व्वापरे'त्यादि।

चिन्तामणिदीधितिः।

पूर्व्वापरग्रन्थैकवाक्यताप्रतिपत्तये शिष्याणामव-धानाय च सङ्गतिं प्रदर्शयन् अनुमाननिरूपणं प्रति-जानीते, 'प्रत्यक्षमि'त्यादि। अत्रोपजीव्योपजीवक-

(१) तथाच यन्निरूपणानन्तरं यन्निरूपणीयं भवति तत् तन्निरूपितसङ्गति-मद्भवतीति नियमात् तदपेक्षितमिति भावः।

भावः फलतः स्वरूपतश्च प्रत्यक्षफलस्यानुमित्यनुव्यवसायादेरनुमित्युपजीवकत्वेऽपि न सर्व्वा प्रत्यक्षप्रमितिस्तथा, अनुमितयस्तु सर्व्वाः साक्षात् परम्परया वा व्याप्त्यादिप्रत्यक्षोपजीविकाः पुरस्कृतश्चायमुपजीवकतोत्कर्षः ।

गादाधरी विवृतिः ।

'एकवाक्यत्वं' साकाङ्क्षत्वे सति एकार्थप्रतिपत्तिपरत्वं, तथाच जैमिनिसूत्रं, "अर्थैक्यादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यात्" इति, (१) एकार्थप्रतिपादकयोर्घटोऽस्ति-कलसोऽस्तीत्यादिवाक्ययोरेकवाक्यतावारणाय साकाङ्क्षत्वनिवेशः, तदुत्थाप्याकाङ्क्षानिवर्त्तकत्व-तन्निवर्त्तनीयाकाङ्क्षोत्थापकत्वान्यतररूपवत्त्वमेव तत्साकाङ्क्षत्वं, प्रकृते च प्रत्यक्षग्रन्थोत्थाप्यायाः किमस्योपजीवकमित्याकारिकाया उपजीवकज्ञानविषयिण्या आकाङ्क्षाया विषयसिद्धिसम्पादनेन निवर्त्तकत्वमनुमानग्रन्थस्येति निरुक्तसाकाङ्क्षतानिर्व्वाहः, भूतलं घटवदित्युक्ते को घट इत्याकाङ्क्षया प्रत्युक्तस्य कम्बुग्रीवादिमान् इत्युत्तरस्य तदेकवाक्यतावारणाय अर्थैक्यनिवेशः (२)। यद्यपि तादृशवाक्ययोरपि यं कञ्चिदर्थमादायार्थैक्यमस्ति, तथापि परस्परसहकारेण विशिष्टैकार्थप्रतिपादकत्वं दलद्वयार्थः। प्रकृते च

---

(१) "विभागे पृथक्पठने स्यादिदं । विभागे विशिष्य पठने इति क्वचित् पुस्तके पाठः ।

(२) एकार्थत्वञ्च विशिष्टैकप्रतिपत्तिजनकत्वं तदर्थः ।

प्रत्यक्षपरिच्छेदानुमानपरिच्छेदयोर्मिलित्वा विशिष्टैकार्थविषयक शाब्दबोधाजनकत्वेऽपि चत्वारि प्रमाणानीत्यप्रामाण्यशङ्कानास्कन्दितनिश्चयं प्रति परिच्छेदचतुष्टयस्यैव कथञ्चिदुपयोगितया (१) तादृशप्रतिपत्तिप्रयोजकाभिप्रायविषयत्वरूपं (२) अर्थैक्यं निराबाधमेव। एतादृशैकवाक्यताघटकसाकाङ्क्षताज्ञानं सङ्गतिज्ञानाद् भवति, यत् यदर्थसङ्गतार्थकं भवति तत् तत्साकाङ्क्षमिति व्याप्तेः सङ्गतिज्ञानस्य साकाङ्क्षत्वानुमितिसामग्रीघटकत्वात्, प्रत्यक्षोपजीवकमित्यनभिधाय प्रत्यक्षोपजीवकत्वादिति पञ्चम्यन्ताभिधानं उपजीवकत्वस्य सङ्गतित्वलाभाय। प्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपस्य परम्परया प्रयोजकत्वस्य हेतुपञ्चम्यर्थतया प्रत्यक्षानन्तरानुमानाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपानुमानसङ्गतित्वस्य लाभात्। वस्तुतो दर्शितपञ्चम्यर्थस्य जिज्ञासाघटितत्वात् साकाङ्क्षतालाभायैव पञ्चम्यभिधानम्। अतएव सङ्गतित्वेन सङ्गतेरेकवाक्यताव्याप्यत्वे उपजीवकत्वरूपतदवान्तररूपेणापि तद्व्याप्यताया आवश्यकत्वात् सङ्गतित्वज्ञानं विनापि एकवाक्यताप्रतिपत्तिसम्भवात् सङ्गतित्वलाभाय पञ्चम्यन्ताभिधानमनर्थकमित्यपि निरस्तम्। न च पञ्चम्यर्थान्वयबलात् प्रत्यक्षोपजीवकत्वज्ञानजन्यजिज्ञासायाः अनुमानाभिधानप्रयोज

(१) प्रत्यक्षादिचतुष्टयस्य प्रमाणत्वमनङ्गीकुर्वता परेषां मतखण्डनेन उपयोगितेत्यर्थः।

(२) चत्वारि प्रमाणानि इति प्रतिपत्तिप्रयोजकाभिप्रायविषयत्वरूपमित्यर्थः।

कतालाभेऽपि जिज्ञासायां प्रत्यक्षग्रन्थोत्थाप्यत्वस्य अनुमानग्रन्थनिवर्त्तनीयत्वस्य चालाभान्निरुक्तसाकाङ्क्षत्वलाभो न सम्भवत्येवेति वाच्यम्। जिज्ञासायां प्रत्यक्षोपजीवकत्वज्ञानजन्यत्वलाभे तादृशज्ञानप्रयोजकीभूतप्रत्यक्षग्रन्थप्रयोज्यत्वस्यानुमानाभिधानप्रयोजकत्वलाभे अनुमानप्रतिपादकग्रन्थनिवर्त्तनीयत्वस्य चार्थतो लाभात्। अनुमानग्रन्थे प्रत्यक्षग्रन्थैकवाक्यताप्रतिपत्तिश्च उभयोरेकग्रन्थान्तर्गतत्वज्ञानसम्पादनेन, समस्तचिन्तामणिग्रन्थज्ञानाधीनप्रत्यक्षादिचतुष्टयधर्म्मिकप्रमाणेतरभेदपरिच्छेदरूपफलविशेषेच्छावतोऽधीतप्रत्यक्षपरिच्छेदस्य शिष्यस्य तादृशफलोपयोग्यनुमानपरिच्छेदाध्ययनप्रवृत्तावुपयुज्यते।

केचित्तु एकवाक्यत्वं निःश्रेयसरूपैकफलप्रयोजकत्वं, तत्प्रतिपत्तिश्चानुमानग्रन्थज्ञानधर्म्मिकमुक्तिरूपेष्टसाधनताज्ञानरूपा (१) शिष्यप्रवृत्तावुपयुज्यते। जायते च सा सङ्गतिमदर्थप्रतिपादकत्वरूपहेतुमत्ताज्ञानजनकात् सङ्गतिप्रदर्शनादिति व्याकुर्व्वन्ति। तदसत्, उक्तहेतोस्तादृशैकवाक्यताशून्य-निःश्रेयसानुपयोगि शास्त्रसाधारणतया व्यभिचारित्वात्। निःश्रेयसत्वं परित्यज्य फलत्वरूपेण फलप्रवेशे फलस्योत्कटेच्छाप्रयोजकरूपविशेषाज्ञानात् प्रेक्षावत्प्रवृत्त्यनुपयोगितापत्तेः (२) एकफलकत्वस्य एकवाक्यतापदार्थताविरहाच्च।

(१) अनुमानग्रन्थोक्तमुक्तिरूपेष्टसाधनताज्ञानविषय इत्याशयिका, यथाश्रुतार्थत्यागश्च निरुक्तहेतुमत्त्वनुमानग्रन्थे साध्यत्वायै।

(२) इच्छाविषयतावच्छेदकविशेषधर्म्मावच्छिन्नसाधनताज्ञानाधीनप्रवृत्तेरनुपपत्तेरित्यर्थः। इदमत्रावधेयं सामान्यतो व्यापकताज्ञानेऽपि फलस्य मुक्तित्वे लाघवमितिनामकज्ञानसहकारात् विशेषरूपेण मुक्तिसाधनताज्ञानमपि सम्भवतीति।

'शिष्याणामिति, 'अवधानं' अनुमाननिरूपणात्मकस्य "तत्र व्याप्तिविशिष्टेत्यादिप्रकृतशब्दस्य विशिष्य शुश्रूषा, निरूपणत्वेन सामान्यतस्तादृशशब्दे प्रमाणतत्त्वप्रतिपादकज्ञानविषयत्वावगता-वपि विशिष्य तत्श्रवणे बुभुत्सितार्थप्रतिपादकत्वाग्रहात् (१) विशिष्य तत्शुश्रूषा न सम्भवतीति, (२) अनुमानमिदानीं निरूप्यते इति प्रतिज्ञाय तदभिधाने च विशिष्य प्रकृत-निरूपणे अनुमानविषयकत्वग्रहेण बुभुत्सितप्रमाणतत्त्वप्रतिपाद-कता प्रकृतशब्दश्रवणे विशिष्य गृह्यत इति तादृशशुश्रूषारूपा-वधानं निर्वहतीति तत्फलकत्वं प्रतिज्ञायाः तादृशावधानं विशिष्य तत्श्रवणे शिष्यप्रवृत्तावुपयुज्यते, विरोधिन्याद्यानुपूर्वी-सामग्र्या विघटनेन (३) शब्दश्रवण एव वा। न च सङ्गति-प्रदर्शनानुमाननिरूपणप्रतिज्ञयोः प्रत्येकमुक्तप्रयोजनद्वयान्वये च-कारासङ्गतिरिति वाच्यम्। 'प्रत्यक्षोपजीवकत्वादित्यादिसमुदित-वाक्यस्यैव प्रतिजानीत इति प्रतिज्ञापदेन विवक्षितत्वात्। अन्यथा 'प्रत्यक्षवित्यादीति क्रियाविशेषणान्वयायोगात्, एकपदार्थ एव तदुभयान्वयेन तत्सङ्गतेः। एकदेशस्यैकवाक्यताप्रतिपत्त्यादिफल-

---

(१) प्रमाणतत्त्वप्रतिपादकत्वाग्रहादित्यर्थः।

(२) यदनुमाननिरूपणं भवति तत् प्रमाणतत्त्वप्रतिपादकज्ञानविषयो भवतीति सामान्यतो ज्ञाने "व्याप्तिविशिष्टेत्यादिशब्दोऽपि अनुमाननिरूपणत्वेन भात-ज्ञितेतच्छब्दत्वेन प्रमाणतत्त्वप्रतिपादकज्ञानविषयत्वं नावगतमिति विशिष्य तत्-श्रवणे इच्छा न निर्वहतीति भावः।

(३) इच्छाघटितसामग्र्या बलवत्त्वादिति भावः।

त्वेनापि समुदाये तत्फलकत्वाबाधात्, सङ्गतिभिन्नांशप्रतिपादनद्वारा नैकवाक्यताप्रतिपादकत्वं उक्तप्रतिज्ञावाक्यस्य किन्तु सङ्गत्यंशप्रतिपादनद्वारेति तस्य सङ्गतिप्रदर्शनरूपताप्रतिपत्तये 'सङ्गतिं प्रदर्शयन्' इत्यभिहितम्। "धातुसम्बन्धे प्रत्ययाः"(१) इत्यनेन समभिव्याहृतक्रियासमानकालीनतायामनुशिष्टशतृपदात् सङ्गतिप्रदर्शन-प्रतिज्ञयोरेककालीनत्वलाभेनार्थतस्तदभेदप्रतीतेः। 'प्रतिजानीते' इति अव्यवहितोत्तरकालकर्त्तव्यतया बोधयतीत्यर्थः, लट्प्रत्ययस्य वर्त्तमानसामीप्यार्थकत्वादिति भावः।

'प्रत्यक्षोपजीवकत्वादिति, पञ्चम्या ज्ञापकत्वरूपहेतुतापरत्वाभिमानेन निरूपणक्रमनियामकाकाङ्क्षया उपजीव्योपजीवकभावप्रदर्शनमिति साम्प्रदायिका वर्णयन्ति, तन्मतेनैव प्रथमतोऽनुवर्त्तमानः फलीभूतप्रत्यक्षानुमितिप्रमयोः प्रत्यक्षानुमान-प्रमाणयोश्च कार्य्य-कारणभावस्य प्रमा-तत्करणनिरूपणक्रमनियामकतामाह, 'अत्रेति प्रत्यक्षानुमानग्रन्थपौर्व्वापर्य्य इत्यर्थः, नियामक इति शेषः, नियामकत्वमेव वा समन्वयः। 'फलतः' फलयोः, प्रत्यक्षानुमितिप्रमयोरिति यावत्, 'अत्र' अनयोः प्रत्यक्षानुमानयोरित्यर्थः, 'फलतः' फलघटितपरम्परासम्बन्धेन, 'स्वरूपतः' साक्षात् सम्बन्धेन, वर्त्तत इति शेषः। तथाच उभयथैव स निरूपणक्रमनियामक इति केचित्। 'अत्रेति इदं पदं प्रत्यक्षोपजीवकत्वादिति ग्रन्थ-

---

(१) धातुसम्बन्धे समभिव्याहृतक्रियासमानकालीनत्वरूपार्थे लडादयः प्रत्यया भवन्तीत्यर्थः।

परं समर्थस्यैव प्रतिपाद्यत्वं, तथाच फलयोः प्रमाणयोश्च उपजीव्योपजीवकभावः क्रमनियामकतया ग्रन्थप्रतिपाद्य इत्यर्थः, उपजीव्यत्वस्य शब्दतः साक्षादलाभेऽपि उपजीवकतानिरूपकत्वेनार्थतस्तल्लाभान्न विरोध इत्यपरे। ननु प्रत्यक्षानुमित्योरुपजीव्योपजीवकभावस्य तन्निरूपणपौर्व्वापर्य्यनियामकता तदैव सम्भवति यद्युपजीवकत्वमानन्तर्य्याभिधानव्याप्यं भवेत्। व्याप्तिश्च यत् प्रत्यक्षोपजीवकं भवति तत् प्रत्यक्षनिरूपणाव्यवहितोत्तरनिरूपणविषय इति विशेषतः, यत् यदुपजीवकं भवति तत् तन्निरूपणाव्यवहितोत्तरनिरूपणविषयः इति सामान्यतो वा ग्राह्या, उभयत्र प्रत्यक्षानन्तरमनिरूपिते तदुपजीवकपदार्थान्तरे व्यभिचारः (१)। तदव्यवहितनिरूपणविषयत्वे सतीति (२) विशेषणं हेतौ निवेश्य तादृशव्यभिचारवारणेऽपि प्रथमे दृष्टान्ताभावः, व्यतिरेकदृष्टान्तः सुलभ इति चेत्, तदा अनुमानत्वमेव प्रत्यक्षनिरूपणानन्तरनिरूपणनियामकं किं नोच्यते अप्रयोजकत्वशङ्का पुनस्तुल्यैवेति द्वितीयपक्ष एवादरणीयः (३) तत्रापि अनुमित्युपजीवकस्य तदनुव्यवसाय-

---

(१) प्रत्यक्षानन्तरमनिरूपिते प्रत्यक्षजन्यसंस्काररूपपदार्थान्तरे व्यभिचार इत्यर्थः।

(२) साध्याविशेषस्य अप्रयोजकत्वशङ्कायाश्च वारणायात्र उत्तरत्वमनिवेश्य अव्यवहितत्वमात्रं निवेशितं भट्टाचार्य्येण, निरूपणाव्यवहितत्वञ्च निरूपणविशिष्टत्वं, वैशिष्ट्यञ्च स्वोत्पत्त्यनधिकरणत्व-स्वध्वंसानधिकरणत्व-स्वप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वरूपत्रितयसम्बन्धेन। स्वोत्पत्तिक्षणस्य, स्वोत्तरतृतीयक्षणस्य, स्वपूर्व्वतृतीयक्षणस्य च वारणाय सम्बन्धत्रय निवेशितमिति।

(३) सामान्यव्याप्तौ साधनसजातीये साध्यसजातीयव्याप्तिनिश्चयात् अनुमित्या-

तदात्मकोपनयादिजन्योपनीतप्रत्यक्षादेः तन्निरूपणाव्यवहितोत्तर-निरूपणेन व्यभिचारो दुर्व्वार इत्याशङ्कां निराचिकीर्षुः प्रत्यक्ष-प्रमानिष्ठानुमित्युपजीवकतातो अनुमितिनिष्ठप्रत्यक्षोपजीवक-तायामानन्तर्य्याभिधानव्याप्यतावच्छेदकं विशेषमाह, 'प्रत्यक्ष-फलस्येति, 'तथा' साक्षात् परम्परया वा अनुमित्युपजीविका, 'अनुमितयस्त्विति, यादृशानुमितिकारणमनुमित्यादिरूपमेव तत्र साक्षात् प्रत्यक्षोपजीवकत्वासम्भवात् 'परम्परया वेति, तथाचोप-जीवकत्वमत्र जन्य-जन्यादिव्यावृत्तं कार्य्यत्वरूपं (१) न विवक्षितं अपि तु तत्साधारणं प्रयोज्यत्वमेवेति (२) न दोषः। 'अयं' निरूपणविषयतावच्छेदकप्रमाविभाजकधर्म्मावच्छिन्नत्वरूपः (३) उपजीवकतानिष्ठ उत्कर्षः, 'पुरस्कृतः' आनन्तर्य्याभिधान-प्रयोजकतावच्छेदकतया आदृत इत्यर्थः, त्वर्थेन चकारेणाविभाज-कावान्तररूपावच्छिन्नत्वस्य पुरस्कृतत्वं व्यवच्छिन्नं, तथाच प्रत्यक्ष-त्वावच्छेदेन प्रत्यक्षे नानुमित्युपजीवकता अस्तीति प्रत्यक्षं प्रागेव

धादकसम्पर्कितनिश्चयात् एकविशेषस्थले व्यभिचारदर्शनेऽपि विशेषान्तरस्थले व्याप्ति-निश्चयसम्भवेन तत्र व्यभिचारसंशयनिवृत्त्यर्थं अनुकूलतर्कापेक्षा नास्तीति हृदय-प्रघट्टकस्य तात्पर्य्यम्।

(१) जन्य-जन्यादिव्यावृत्त तत्कार्य्यत्वञ्च तद्विषयकयावद्वृत्तिनिरूपकत्वे सति तद्वृत्तित्वे सति च तद्भिन्ननिष्ठवृत्तित्वानिरूपकत्वरूपम्।

(२) जन्य-जन्यादिसाधारणं प्रयोज्यत्वञ्च तद्भिन्ननिष्ठवृत्तित्वानिरूपक-त्वमात्रं स्वरूपसम्बन्धविशेषो वेति।

(३) प्रमाविभाजकत्वञ्च प्रमात्वव्याप्यधर्म्मप्रकारकज्ञानगोचरत्वानिरूपक-त्वानवच्छिन्नावच्छेदकत्वरूपम्।

परं समर्थ्यस्य प्रतिपाद्यत्वं, तथाच फलतः प्रमाणयोरुपजीव्यो पजीवकभावः क्रमनियामकतया अत्राभिप्रेत इत्यर्थः, उपजीव्यत्वस्य शब्दतः साक्षादलाभेऽपि उपजीवकतानिरूपकतयार्थतस्तल्लाभान्न विरोध इत्यपरे। ननु प्रत्यक्षानुमित्योरुपजीव्योपजीवकभावस्य तन्निरूपणपौर्वापर्यनियामकता तदैव सम्भवति यद्युपजीवकत्वमानन्तर्याभिधानव्याप्यं भवेत्। व्याप्तिश्च यत् प्रत्यक्षोपजीवकं भवति तत् प्रत्यक्षनिरूपणाव्यवहितोत्तरनिरूपणविषय इति विशेषतः, यत् यदुपजीवकं भवति तत् तन्निरूपणाव्यवहितोत्तरनिरूपणविषयः इति सामान्यतो वा ग्राह्या, उभयत्र प्रत्यक्षानन्तरमनिरूपिते तदुपजीवकपदार्थान्तरे व्यभिचारः (१)। तदव्यवहितनिरूपणविषयत्वे सतीति (२) विशेषणं हेतौ निवेश्य तादृशव्यभिचारवारणेऽपि प्रथमे दृष्टान्ताभावः, व्यतिरेकदृष्टान्तः सुलभ इति चेत्, तदा अनुमानत्वमेव प्रत्यक्षनिरूपणानन्तरनिरूपणनियामकं किं नोच्यते अप्रयोजकत्वशङ्का पुनस्तुल्यैवेति द्वितीयपक्ष एवादरणीयः (३) तत्रापि अनुमित्युपजीवकस्य तदनुव्यवसाय-

---

(१) प्रत्यक्षानन्तरमनिरूपिते प्रत्यक्षजन्यसंस्काररूपपदार्थान्तरे व्यभिचार इत्यर्थः।

(२) साध्याविशेषस्य अप्रयोजकत्वशङ्कायाश्च वारणायात्र उत्तरत्वमनिवेश्य अव्यवहितत्वमात्रं निवेशितं भट्टाचार्येण, निरूपणाव्यवहितत्वञ्च निरूपणविशिष्टत्वं, वैशिष्ट्यञ्च स्वोत्पत्त्यनधिकरणत्व-स्वध्वंसानधिकरणत्व-स्वप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वरूपत्रितयसम्बन्धेन। स्वोत्पत्तिक्षणस्य, स्वोत्तरतृतीयक्षणस्य, स्वपूर्वतृतीयक्षणस्य च वारणाय सम्बन्धत्रयं निवेशितमिति।

(३) सामान्यव्याप्तौ साधनसजातीये साध्यसजातीयव्याप्तिनिश्चयात् अनुमित्या-

तदात्वकोपनयादिजन्योपनीतप्रत्यक्षादेः तन्निरूपणाव्यवहितोत्तरम-निरूपणेन व्यभिचारो दुर्व्वार इत्याशङ्कां निराचिकीर्षुः प्रत्यक्ष-प्रमानिष्ठानुमित्युपजीवकतातो अनुमितिनिष्ठप्रत्यक्षोपजीवक-तायामानन्तर्य्याभिधानव्याप्यतावच्छेदकं विशेषमाह, 'प्रत्यक्ष-फलस्येति, 'तथा' साक्षात् परम्परया वा अनुमित्युपजीविका, 'अनुमितयस्त्विति, यादृशानुमितिकारणमनुमित्यादिरूपमेव तत्र साक्षात् प्रत्यक्षोपजीवकत्वासम्भवात् 'परम्परया वेति, तथाचोप-जीवकत्वमत्र जन्य-जन्यादिव्यावृत्तं कार्य्यत्वरूपं (१) न विवक्षितं अपि तु तत्साधारणं प्रयोज्यत्वमेवेति (२) न दोषः। 'अयं' निरूपणविषयतावच्छेदकप्रमाविभाजकधर्म्मावच्छिन्नत्वरूपः (३) उपजीवकतानिष्ठ उत्कर्षः, 'पुरस्कृतः' आनन्तर्य्याभिधान-प्रयोजकतावच्छेदकतया आदृत इत्यर्थः, त्वर्थेन चकारेणाविभाज-कावान्तररूपावच्छिन्नत्वस्य पुरस्कृतत्वं व्यवच्छिन्नं, तथाच प्रत्यक्ष-त्वावच्छेदेन प्रत्यक्षे नानुमित्युपजीवकता अस्तीति प्रत्यक्ष प्रागेव

धावच्छिन्नमितिनियमात् एकविशेषस्थले व्यभिचारसंशयेऽपि विशेषान्तरस्थले व्याप्ति-निश्चयसम्भवेन तत्र व्यभिचारसंशयनिवृत्तये अनुकूलतर्कापेक्षा नास्तीति हृदि-स्थादरस्य तात्पर्य्यम्।

(१) जन्य-जन्यादिव्यावृत्तं तत्कार्य्यत्वञ्च तद्विषयकज्ञानप्रयोज्यनिरूपकत्वे सति तद्व्याप्यत्वे सति च तद्विषयनिश्चयपूर्व्वसर्गीणनिरूपकत्वरूपम्।

(२) जन्य-जन्यादिसाधारणं प्रयोज्यत्वञ्च तद्विषयनिश्चयपूर्व्वसर्गीणनिरूपक-त्वमात्रं तदुत्तरत्वविशेषो वेति।

(३) धर्म्मविभाजकत्वञ्च प्रमात्वसामान्यव्याप्यधर्म्मप्रकारकज्ञानेतरवैशिष्ट्यानिरूपक-ज्ञानविषयतावच्छेदकत्वम्।

निरूपितं, तथाविधानुमितित्वावच्छेदेन चानुमितौ प्रत्यक्षोपजीवकत्वमस्तीति सा पश्चान्निरूपितेति भावः।

चिन्तामणिदीधितिः।

यद्यपि सकलमेव प्रत्यक्षफलमुपजीवत्यदृष्टजननीं समय-मत्कर्त्तव्यतादिपरिच्छेदिकामनुमितिं, ईश्वर-प्रत्यक्षन्तु न फलम्।

गादाधरी विवृतिः।

प्रत्यक्षेऽपि निरूप्यतावच्छेदकफलविभाजकधर्मावच्छेदेनादृष्टद्वारानुमितिप्रयोज्यत्वमस्तीत्याशङ्कते, 'यद्यपीति, 'अदृष्टजननीं' स्वजनकादृष्टप्रयोजिकां, 'समय.' पदसङ्केतः, 'मत्कर्त्तव्यता' स्वकृतिसाध्यता, (१) 'तत्परिच्छेदिका' तद्विषयिणीं, शब्दाधीनायामदृष्टजनकयागादिगोचरप्रवृत्तौ प्रवृत्तिपरवाक्याधीनवाक्यार्थबोधोपचितः (२), तत्र चेदम्पदमवार्थे शक्तं शक्तिभ्रमाजन्यलक्षणाग्रहाजन्यैतद्विषयकशाब्दबोधजनकत्वादित्यनुमानाधीनशक्तिग्रहोपचितः (३)। अन्यत्र च (४) इदं मत्कर्त्तव्यं मत्कृतिं विना अनुत्पद्यमानत्वे सति मदिष्टसाधनत्वादित्याद्यनुमानाधीन-

---

[illegible] मदिष्टसाधनत्वाद्युपलक्षणं। मदिष्टसाधनता च आदिपदाद् [illegible]।

२ [illegible]।

३ [illegible]।

४ [illegible]।

क्षतिसाध्यताधीरपेक्षितेति प्रवृत्ति-द्वाराऽदृष्ट-प्रयोजिकानुऽमितिः जन्यमात्रं प्रत्येव प्रयोजिका अदृष्टस्य कार्य्यमात्रं प्रति हेतुत्वादिति भावः । नन्वेवमपि प्रमाविभाजकप्रत्यक्षत्वान्वयस्य भगवत्प्रत्यक्षस्य नित्यतया अनुमित्यनुपजीवकत्वान्न निरूप्यतावच्छेदकधर्म्मावच्छेदेन प्रत्यक्षेऽनुमित्युपजीवत्वसम्भव इत्यत आह, 'ईश्वरेति, 'न फलमिति, तथाच तत्साधारणं प्रत्यक्षत्वं न फलविभाजकमतिप्रसक्तत्वात् अपि तु जन्यप्रत्यक्षत्वमेव तदेव निरूप्यतावच्छेदकं तदवच्छेदेन चानुमित्युपजीवकत्वमक्षतमेवेति भावः (१) ।

चिन्तामणिदीधितिः ।

तथापि दृष्टद्वारकमिह तथात्वमादरणीयमितरस्याविनिगम्यत्वात् सर्वज्ञानुमितिकरणमिन्द्रियापेक्षोत्पत्तिकम् अनुमितिं भावयतोऽपीश्वरज्ञानस्य तत्करणतानिर्व्वाहकप्रत्यासत्तिविरहेणातत्त्वात्, सर्वं पुनरिन्द्रियं नानुमानाधीनजन्म मनः-श्रवणयोरजन्यत्वात् दृष्टद्वारा वा तथात्वमादरणीयम् । नचोत्पत्तिमदपीन्द्रियं दृष्टद्वारकमनुमानमपेक्षते ।

(१) केचित्तु [illegible]

निरूपितं, तथाविधानुमितित्वावच्छेदेन चानुमितौ प्रत्यक्षोपजीवकत्वमस्तीति सा पश्चान्निरूपितेति भावः।

चिन्तामणिदीधितिः।

यद्यपि सकलमेव प्रत्यक्षफलमुपजीवत्यदृष्टजननीं समय-मत्कर्त्तव्यतादिपरिच्छेदिकामनुमितिं, ईश्वरप्रत्यक्षन्तु न फलम्।

गादाधरी विवृतिः।

प्रत्यक्षेऽपि निरूप्यतावच्छेदकफलविभाजकधर्म्मावच्छेदेनादृष्टद्वारानुमितिप्रयोज्यत्वमस्तीत्याशङ्कते, 'यद्यपीति, 'अदृष्टजननीं' स्वजनकादृष्टप्रयोजिकां, 'समयः' पदसङ्केतः, 'मत्कर्त्तव्यता' स्वकृतिसाध्यता, (१) 'तत्परिच्छेदिकां' तद्विषयिनीं, शब्दाधीनायामदृष्टजनकयागादिगोचरप्रवृत्तौ प्रवृत्तिपरवाक्याधीनवाक्यार्थबोधोऽपेक्षितः (२), तत्र चेदम्पदमत्रार्थे शक्तं शक्तिभ्रमाजन्यलक्षणाग्रहाजन्यैतद्विषयकशाब्दबोधजनकत्वादित्यनुमानाधीनशक्तिग्रहोऽपेक्षितः (३)। अन्यत्र च (४) इदं मत्कर्त्तव्यं मत्कृतिं विना अनुत्पद्यमानत्वे सति मदिष्टसाधनत्वादित्याद्यनुमानाधीन-

---

(१) आदिपदेन मदिष्टसाधनत्वाद्युपग्रहः। मदिष्टसाधनता च आदिपदाद् ग्राह्या इति वा।

(२) स्वर्गकामोऽश्वमेधेन यजेतेत्यादिवाक्य प्रवृत्तिपरम्।

(३) अपभ्रंशे लाक्षणिकपदे च व्यभिचारवारणाय हेतौ अजन्तान्तविशेषणद्वयम्।

(४) शब्दानधीनप्रवृत्तावित्यर्थः।

क्षतिसाध्यताधीरपेक्षितेति प्रवृत्ति-द्वाराऽदृष्ट-प्रयोजिकानुऽमितिः जन्यमात्रं प्रत्येव प्रयोजिका अदृष्टस्य कार्य्यमात्रं प्रति हेतु-त्वादिति भावः । नन्वेवमपि प्रमाविभाजकप्रत्यक्षत्वाश्रयस्य भग-वत्प्रत्यक्षस्य नित्यतया अनुमित्यनुपजीवकत्वान्न निरूप्यतावच्छे-दकधर्म्मावच्छेदेन प्रत्यक्षेऽनुमित्युपजीवत्वसम्भव इत्यत आह, 'ईश्वरेति, 'न फलमिति, तथाच तत्साधारणं प्रत्यक्षत्वं न फल-विभाजकमतिप्रसक्तत्वात् अपि तु जन्यप्रत्यक्षत्वमेव तदेव निरूप्यता-वच्छेदकं तदवच्छेदेन चानुमित्युपजीवकत्वमक्षतमेवेति भावः (१) ।

चिन्तामणिदीधितिः ।

तथापि दृष्टद्वारकमिह तथात्वमादरणीयमितर-स्याविनिगम्यत्वात् सर्वस्यानुमितिकरणमिन्द्रियापेक्षोत्-पत्तिकम् अनुमितिं भावयतोऽपीश्वरज्ञानस्य तत्-कारणतानिर्व्वाहकप्रत्यासत्तिविरहेणातत्त्वात्, सर्वं पुन-रिन्द्रियं नानुमानाधीनजन्म मनः-श्रवणयोरजन्यत्वात् दृष्टद्वारा वा तथात्वमादरणीयम् । नचोत्पत्तिमदपीन्द्रियं दृष्टद्वारकमनुमानमपेक्षते ।

---

(१) ईश्वरेति [illegible] -[illegible] । ननु नित्यानित्य[illegible] जन्यप्रत्यक्ष-[illegible] तथाच [illegible] ननु नित्यानित्य-

गादाधरी विवृतिः।

'दृष्टद्वारकम्' दृष्टमात्रद्वारकम्, अदृष्टाद्वारकमिति यावत्, तेन दृष्टस्य यागादेरनुमितिद्वारत्वेऽपि न क्षतिः। अदृष्टाद्वारकत्वञ्च स्वजनकादृष्टजनकानिरूपितत्वं, स्वं हेतुमत्तयाभिमतं, 'तथात्वम्' उपजीवकत्वम्, 'इह' आनन्तर्य्याभिधाने, 'आदरणीयं' नियामकतया स्वीकरणीयं, तथाच (१) यत् स्वजनकादृष्टाजनकयन्निरूपितनिरूपणविषयतावच्छेदकप्रमितिविभाजकधर्म्मावच्छिन्नोपजीवकतावत् तत्तन्निरूपणाव्यवहितोत्तरनिरूपणविषय इत्येव व्याप्तिरादरणीया। तत्र च न व्यभिचारावकाश इति भावः। नन्वदृष्टद्वारकोपजीवकताया आनन्तर्य्याभिधाननियामकत्वमङ्गीकृत्य प्रत्यक्षमेव किं पश्चान्न निरूप्यते इत्यत आह, 'इतरस्येति अदृष्टद्वारकोपजीवकत्वस्येत्यर्थः, 'अविनिगम्यत्वात्' विनिगमनाया-अविषयत्वात्, (२) तथाचादृष्टद्वारा प्रवृत्त्यौपयिकोपादानप्रत्यक्षो-

---

साधारणधर्म्मस्य कार्य्यतावच्छेदकत्वे अतिविरहात् प्रत्यक्षत्वमेव तादृशो धर्मः तथाच कथमदृष्टद्वाराऽनुमित्युपजीवकत्वसम्भव इत्यत आह, 'ईश्वरेति' 'न च न तादृशप्रत्यक्षसाधारणप्रत्यक्षत्वं जन्यतावच्छेदकं नित्यानित्यसाधारणधर्म्मस्य तथात्वे अपसिद्धान्तप्रसङ्गात् तथाच जन्यप्रत्यक्षत्वमेव कार्य्यतावच्छेदकतावच्छेदकेनादृष्टद्वारा अनुमित्युपजीवकत्व सम्भवतीति भाव इति प्राहुः। इ[illegible] कस्मिंश्चित् पुस्तके अधिक पाठो वर्त्तते।

१ पूर्व्वग्रन्थे निरूपितत्वाभ्यासाविषयात तत्परित्यागेन [illegible] [illegible] टाजनकत्व विशेषणम् व्याप्तिमाह, तथाचेत्यादिना, फलतः [illegible] उपजीवकताया हेतुमतोऽनुमितिजनकादृष्ट [illegible] न दोषः।

२ [illegible] निगमना, तदभावादित्यर्थः।

पजीवकताया अनुमितौ सत्त्वेनादृष्टद्वारकोपजीवकत्वस्य तुल्यतया आनन्तर्य्याभिधाननियामकत्वं न सम्भवतीति भावः। प्रत्यक्षप्रमाणस्य चक्षुरादेरप्यदृष्टद्वारा समयादिपरिच्छेदकानुमानोपजीवकत्वात् स्वरूपनिष्ठोपजीवकतायाः कथमानन्तर्य्याभिधाननियामकत्वमित्याशङ्कां परिजिहीर्षुरनुमाननिष्ठोपजीवकतायां विशेषं दर्शयति, 'सर्व्वमिति, यत्प्रमाणं स्वनिष्ठप्रामाण्यग्रहार्थं यत्प्रमाणान्तरमपेक्षते तदपि तदुपजीवकमुच्यते, प्रकृते च तादृशोपजीवकत्वमविवक्षितं नित्येनापीन्द्रियेण प्रामाण्यग्रहार्थमनुमानापेक्षणादिति स्वोत्पत्तौ तदपेक्षितत्वरूपमुपजीवकत्वमेवेति स्फुटीकर्त्तुं इन्द्रियोपजीवकमित्यनभिधाय 'इन्द्रियापेक्षोत्पत्तिकमित्यभिहितम् (१)। एतावता(२) एतदेव परीक्षाक्षता मद्दोत्तरभावेन यदभिहितं तत् स्वाभिधानसौष्ठवमादर्शितम् (३)। एवञ्च निरूपणीयतावच्छेदकानुमितिकरणत्वादिरूपप्रमाणविभाजकरूपावच्छेदेनोपजीवकत्वमेवानन्तर्य्याभिधाननियामकं वाच्यमित्याशयः। नन्वनुमितिं प्रति भगवज्ज्ञानस्योपादानप्रत्यक्षत्वेन (४) व्याप्तिज्ञानत्वेन च कारणत्वात्तदप्यनुमितिकरणम्

(१) [illegible]

(२) [illegible]

(३) [illegible]

(४) [illegible]

अथ च नित्यतया प्रत्यक्षानुपजीवकम् इति ज्ञानमनुमितिकरण-त्वावच्छेदेन प्रत्यक्षोपजीवकत्वाशङ्कया तस्यानुमितिसाधारण-कारणत्वाभावं व्यवस्थापयति, 'अनुमितिमिति, 'भावयतोऽपि' उपादानप्रत्यक्षविषयया जनयतोऽपि, 'तत्करणतेति अनुमितित्वाव-च्छिन्ननिरूपितकारणतानिर्वाहकतत्समवायिसमवेतत्वरूपप्रत्यास-त्तिविरहेण इत्यर्थः। 'अतत्त्वात्' अनुमितित्वावच्छिन्नाकरण-त्वात्। अयमभिप्रायः प्रत्यक्षानुमानोपमान-शब्दाः प्रमाणा-नीत्यत्रात्म-शरीरादिव्यावृत्त प्रमित्यसाधारणकरणत्वमेव प्रमाण-पदेन विवक्षितं तच्च प्रमितिविभाजकधर्मावच्छिन्नकरणत्वम्। एवञ्चानुमानपदेनापि अनुमितित्वावच्छिन्नकरणत्वमेव विवक्षितं तदेव च विभाजकम्, ईश्वरज्ञानञ्च न तथा, तथाहि फलायोग-व्यवच्छिन्नव्यापारवत्कारणत्व करणत्वं न तु कारणत्वमात्रं, तथासति छिदानुपधायककुठारादिव्यक्तेरपि तत्करणताप्रसङ्गेन तत्कुठारेण छिनत्तीति प्रयोगापत्तेः। तदर्थञ्च स्वनिरूपककार्य-तावच्छेदकसम्बन्धेन कार्य्याधिकरणे तत्कार्य्योपधायकव्यापार-व्यवहितप्राक्क्षणावच्छेदेन स्वावच्छेदकसम्बन्धेन वर्त्तते यत्त-द्वृत्तित्वविशिष्टकारणत्व (१), स्वं कारणता, इत्यञ्च ईश्वरज्ञान

---

(१) अत्रेदं बोध्यं, चक्षुरादेः प्रत्यक्षकारणतास्थले चक्षुरादेः केन सम्ब- कार्य्य-कारणभाव। यदि च द्रव्यचाक्षुषत्वावच्छिन्नं प्रति संयोगेन चक्षुषो हे- लौकिकविषयत्वञ्च कार्य्यस्य सम्बन्धस्तदा न करणत्वनिर्व्वाह चाक्षुषोपधाय- व्यापाराव्यवहितप्राक्कालावच्छेदेन संयोगसम्बन्धेन चक्षुषो द्रव्येऽवर्त्तमानत्वा- न च निर्व्विकल्पकद्वारापि चक्षुषो जनकत्वसम्भवात् निर्व्विकल्पकरूपव्यापाराव्यव- हितप्राक्कालावच्छेदेन द्रव्ये चक्षुषो वर्त्तमानतया नानुपपत्तिरिति वाच्यम्।

या उपादानप्रत्यक्षविषया कारणता तदवच्छेदकविषयतासम्बन्धेन तस्यानुमितिसमवायिनि वृत्तावपि तस्या जन्यत्वावच्छिन्ननिरूपितायाः अनुमितित्वावच्छिन्नानिरूपितत्वात् अनुमितित्वावच्छिन्ननिरूपिता च या व्याप्तिज्ञानत्वावच्छिन्नकारणता

प्रति निर्व्विकल्पकं प्रति चक्षुषोऽकारणत्वापत्तेः। यदि च लौकिकालौकिकचाक्षुषसामान्यं प्रति चक्षुषो हेतुत्वमतेऽपि तत्र कारणस्य कालिकसम्बन्धेन कार्य्यस्याव्यवहितपूर्व्वत्वं, तदापि न कारणत्वनिर्व्वाहः, स्वनिरूपितकार्य्यतावच्छेदकसम्बन्धेन कार्य्याधिकरणे पूर्व्वक्षणे कार्य्योपधायकसंयोगरूपव्यापाराव्यवहितपूर्व्वकालावच्छेदेन कारणस्यासत्त्वात्। एवं कुठारेऽपि छिदाकारणत्वमनुपपन्नं तत्रापि संयोगरूपव्यापाराव्यवहितप्राक्कालावच्छेदेन कुठारादेः काष्ठादावसत्त्वात् कालिकसम्बन्धेनापि कार्य्यपूर्व्वक्षणे व्यापाराव्यवहितप्राक्कालावच्छेदेन कुठाराद्यसत्त्वाच्च इति चेदत्र केचित्, चक्षुरादावव्यवहितपूर्व्वत्व-कालिकसम्बन्धाभ्यां कार्य्य-कारणभावः। तत्राव्यवहितपूर्व्वत्वञ्च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वं तच्च स्थूलकालस्यापि, प्रतियोगिदेशाधिकरणघटितव्यापकत्वञ्च कारणनिष्ठकं एवञ्च कार्य्याधिकरणे स्थूलकाले संयोगरूपव्यापाराव्यवहितप्राक्कालावच्छेदेनापि चक्षुरादेर्व्विद्यमानतया न कारणत्वहानिः। एवं कुठारस्यापि बोध्यमित्याहुः।

परे तु [illegible] चाक्षुषं प्रति [illegible]सम्बन्धेन चक्षुषो हेतुत्वं, [illegible] चक्षुषो [illegible] कुठारस्य [illegible] संयोगेन [illegible] [illegible]। [illegible]

तदवच्छेदकसमवायसम्बन्धेन तस्यानुमितिसमवायिन्यस्मदाद्यात्मन्यवृत्तेर्नानुमितित्वावच्छिन्नकारणत्वमिति, तथाच तादृशकरणत्वावच्छेदेन प्रत्यक्षप्रमाणोपजीवकत्वमक्षतमेवेति एवं जन्यज्ञानत्वावच्छिन्नकरणस्य मनःप्रभृतेः प्रत्यक्षानुपजीवकत्वेऽपि न क्षतिः, उक्तरीत्या तस्याप्यनुमितित्वावच्छिन्नाकरणत्वात् ।

केचित्तु प्रमाणतावच्छेदकधर्म्मावच्छिन्नोपजीवकत्वस्य आनन्तर्य्याभिधानप्रयोजकत्वाभिमानेन ईश्वरज्ञानस्य कार्य्याधिकरणाप्रत्यासन्नत्वेनाकरणत्वेऽपि अनुमितिकरणतावच्छेदकव्याप्तिज्ञानत्ववत्तया निरुक्तोपजीवकत्वस्यानन्तराभिधाननियामकतानुपपत्तिरिति दूष्यपक्षयन्ति, नित्यस्येत्यादिनियमस्यानुरोधेन(१) जन्यव्याप्तिज्ञान-

---

जनकतया विवक्षणीयतया फलसामानाधिकरण्यप्रवेशस्यावश्यकतया एतावान् प्रयास इति ध्येयमित्याहुः ।

अत्र केचित् समादधिरे, कुठारेण छिनत्तीत्यादौ कुठारादेः करणत्वानुपपत्तिः, तादृशच्छिदोपहितकुठारादिसंयोगाव्यवहितप्राक्क्षणावच्छेदेन तादृशच्छिदाधिकरणे वृक्षादौ संयोगसम्बन्धेन कुठारादेरवृत्तेरिति चेत्, न, प्रथमसंयोगस्य छिदानुपहितत्वात् । तादृशच्छिदात्वावच्छिन्नं प्रति कालिकसम्बन्धेनैव वा कुठारादित्वेन कारणत्वात् कुठारादिसंयोगत्वेन कारणत्वान्तरकल्पनादेन व्यभिचारविरहादिति ध्येयम् ।

नवीनास्तु अत्राव्यवहितप्राक्क्षणत्व उत्पत्तिक्षणसाधारणमवश्यं वाच्यं, अन्यथा चाक्षुषादिव्यापारचक्षुःसंयोगाव्यवहितप्राक्क्षणावच्छेदेन स्वावच्छेदकीभूतसंयोगेन चक्षुषोऽवर्त्तमानत्वात् तत्राव्याप्त्यापत्तिः स्मरणात्मकपरामर्शजन्यानुमितिकरणेऽव्याप्तिश्च । तच्च तादृशव्यापारप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वे सति तादृशव्यापाराधिकरणसमयध्वंसानधिकरणत्वं, तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिक्षणोत्पत्तिकत्वं वा इति न कोऽपि दोष इति प्राहुः ।

(१) नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव इति नियमानुरोधेनेत्यर्थः ।

त्वमेवानुमितिकारणतावच्छेदकं, 'अतस्त्वादित्यस्य अनुमितिकरण-तावच्छेदकरूपत्वाभावादित्यर्थः, प्रत्यासत्तिघटितफलोपधायक-ताया जन्यत्वविशिष्टतादृशरूपव्यापकतया तदभावस्य तादृशरूपा-भावहेतुता इति मनागधिकं च। तदसत्, उक्तरीत्यैव सामञ्जस्यात्।

'सर्व्वं पुनरिति, तथाच प्रत्यक्षत्वावच्छिन्नकारणत्वावच्छेदेन नानुमानोपजीवकत्वमिति नानुमानानन्तरम् प्रत्यक्षनिरूपणा-पत्तिरितिभावः। 'नानुमानोपजीवकमिति परित्यज्य नानुमाना-धीनजन्येत्यभिधाने बीज पूर्व्वोपदर्शितमेव। अनुमितिस्वरूपयोग्य-मात्रस्य तत्करणत्वमभ्युपेत्यादृष्टद्वारकोपजीवकत्वस्यानन्तर्य्याभिधान-नियामकतामङ्गीकरोति, 'दृष्टद्वारा वेति, तथाच ईश्वरज्ञानस्यानु-मितिकारणत्वेपि न क्षतिः, निरूप्यतावच्छेदकसामानाधिकरण्ये-नाऽदृष्टाद्वारकोपजीवकताया एवानन्तर्य्याभिधाननियामकत्वोप-गमात् यावत्तु अनुमितिकरणेषु प्रत्यक्षोपजीवकताविरहेऽपि क्षति-विरहात्। 'न चोत्पत्तिमदपीति, यद्यपि [illegible]-पयित्वमनुमान [illegible] [illegible] [illegible] [illegible] भवति तथापि इदानीं [illegible] [illegible] [illegible]-[illegible] [illegible]-[illegible]। [illegible] [illegible]-[illegible] [illegible]-[illegible] [illegible]-

कमदृष्टाद्वारकत्वमुपजीवकतानियामकमनन्तराभिधाने ध्येयम्। अथवा 'पुरस्कृतत्वाद्यमित्यादिग्रन्थस्य एवं आशयः, 'अग्रे' निरूपणतावच्छेदकावच्छिन्नत्वरूपोत्कर्षः पुरस्कृतः फलस्य स्वरूपस्य चानन्तर्याभिधानप्रयोजकतावच्छेदकतया आदृतः, एवञ्च प्रमितिविभाजकधर्मावच्छिन्नत्वस्य विशिष्यानिवेशात् दृष्टान्तासौलभ्यमपि बोध्यम्। निरूप्यतावच्छेदकञ्च सर्व्वत्र विभाजकरूपमेव, येन रूपेण विभागः क्रतस्तद्रूपावच्छिन्नस्यैव लक्षणादेराकाङ्क्षितत्वात्। 'यद्यपी' त्यादिकं पूर्व्ववत्। ननु फलस्यानुमितेर्निरूप्यतावच्छेदकानुमितित्वावच्छेदेन प्रत्यक्षफलोपजीवकत्वेऽपि स्वरूपेऽनुमितिकरणे तादृशप्रत्यक्षप्रमाणोपजीवकत्वमसिद्धम् ईश्वरज्ञानस्यापि व्याप्तिज्ञानत्वेनानुमितिकरणत्वात् तस्य च नित्यतया अनुपजीवकत्वादतः प्रमाणस्यानन्तराभिधाने विभाजधर्म्मसमानाधिकरणमुपजीवकत्वमेव नियामकं वाच्यं, तच्च न सम्भवति चक्षुरादौ दीपदानादिगोचरप्रवृत्त्यौपयिकानुमानोपजीवकताया अदृष्टाद्वारकत्वविशेषणेन व्यावृत्तावपि खण्डचक्षुरादिनिष्ठायाः चक्षुर्दर्पणादिप्रवृत्त्यौपयिकानुमाननिरूपितमहाचक्षुर्नाशादिद्वारकोपजीवकताया अदृष्टाद्वारकतया निरुक्तोपजीवकतायाश्चानन्तराभिधानव्यभिचारित्वादित्याशङ्कां अनुमितिं प्रति ईश्वरज्ञानस्य करणत्वनिराकरणेनानुमितिकरणत्वावच्छिन्ने प्रत्यक्षप्रमाणोपजीवकतां व्यवस्थापयन्निराकुरुते, 'सर्व्वमित्यादिना, 'अनुमितिमित्यादेः पूर्व्वोपदर्शित एवार्थः, तथाच निरूप्यतावच्छेदकरूपावच्छिन्नोपजीवकत्वमेव सर्व्वत्रानन्तराभिधानप्रयोजकमिति भावः। एतादृशो-

पजीवकत्वस्य प्रत्यक्षेऽसत्त्वं दर्शयन् शङ्कितव्यभिचारविरहं स्फुटयति, 'सर्व्वं पुनरिन्द्रियमिति, 'मनः-श्रवणयोरजन्यत्वादिति, तथाच प्रत्यक्षप्रमितिकारणत्वावच्छेदेन अविशेषितमुपजीवकत्वमेव नास्ति सुतरामेवादृष्टाद्द्वारकत्वविशेषितं तत्। तादृशस्य जन्येऽपीन्द्रिये क्वचिदेव (१) सत्त्वादिति भावः। यदि च परमेश्वरज्ञानस्यापि स्वरूपयोग्यतामात्रेण कारणत्वमुपेयते, तदा स्वरूपेऽवच्छेदकावच्छेदेन उपजीवकत्वमसिद्धमिति अन्यादृशमेवोपजीवकत्वम् (२) अनन्तराभिधानविषयत्वनियामकं वाच्यं तच्चानुमाननिरूपितमदृष्टद्वारा प्रत्यक्षेऽक्षतमिति व्यभिचार इत्याशयेनाह, 'दृष्टद्वारा वेति स्वरूपनिष्ठमदृष्टाद्द्वारकं प्रयोज्यव्यावृत्तं कार्य्यत्वरूपमुपजीवकत्वमेवादरणीयमित्यर्थः। चक्षुर्दर्पणादिप्रवृत्त्यौपयिकानुमानस्य चान्यथासिद्धतया चक्षुरादिषु न तत्कार्य्यत्वमिति भावः।

चिन्तामणिदीधितिः।

अथोपजीव्यं निरूप्यैवोपजीवकं निरूप्यतइति न नियमः क्वचित्कार्य्यं निरूप्यापि कारणनिरूपणादिति चेत्, किन्ततः, न हि सङ्गतिरनन्तराभिधानव्याप्ता, आनन्तर्य्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो-

---

(१) [illegible]।

(२) नानाविधकारणदेवोपजीवकत्वमिदम्। इत्येव तद्धेन पाठो दृश्यते। [illegible]

न्यर्थः सङ्गतिः, जायते च कार्य्ये कारणे वा ज्ञाते कारणत्वस्य कार्य्यत्वस्य वा ज्ञानात्किमस्य कारण कार्य्यं वेति जिज्ञासा अतस्तयोर्द्वयोरपि सङ्गतित्वमित्य न्योपजीवकतायाम्तुल्यत्वेऽपि न क्षतिरिति मन्तव्यम्

गादाधरी विवृतिः ।

एतावता उपजीवकत्वस्य आनन्तर्य्याभिधाननियामकताम किञ्चित् परिष्कृत्य तं परित्यक्तुकामोदर्शितसामान्यनिय व्यभिचारमाशङ्कते, 'अथेति, उपजीवकमुपजीव्यनिरूपणानन्त निरूपणविषयएवेति नियमोनेत्यर्थः, 'कार्य्यं निरूप्यापि कारणनिरूपणात् प्रागेव कार्य्यनिरूपणादित्यर्थः। यथा अ ग्रन्थेऽनुमानात् प्रागेवानुमितिर्निरूपितेति भावः। व्यभिचार स्यात्ततस्तत्तदुपजीवकताभेदात्मकविशेषणान्तरप्रक्षेपेण वारण सम्भवेऽपि अप्रयोजकत्वं दुर्व्वारमेवानुमानात् पूर्व्वमेवानुमिते रिव बाधकाभावेन प्रत्यक्षात् प्रागेवानुमानस्य निरूपणसम्भवा तावतापि निरूपणीययोस्तयोरुपजीव्योपजीवकभावाव्याघाता दिति हृदयम्। ज्ञापकत्वरूपहेतुतायाः प्रत्यक्षोपजीवकत्वादिति पञ्चम्यर्थतोपगम एव दर्शितनियमाभावे विरुध्यते स्वज्ञानजन्य जिज्ञासाद्वारा प्रयोजकत्वरूपं हेतुत्वञ्च नियमाभावेप्यविरुद्धमेवे त्याशयेन समाधत्ते 'किञ्चात इति, 'अतः' दर्शितनियमभावात्। किमनिष्टं न किञ्चिदपीत्यर्थः। नन्वेवमुपजीवकत्वस्य सङ्गति त्वानुपपत्तिः सामान्यतोऽनन्तराभिधानव्याप्यस्यैव सङ्गतित्वादि-

ताभिधानं तथा (१) इत्युच्यते तदा प्रयोजकान्तमनर्थकमिति चेत्, न, यन्निरूपणानन्तरं कदाचिदपि कस्यचिद्यद्धर्म्मावच्छिन्न धर्म्मप्रकारकज्ञानेच्छा न जायते अपि तु कालान्तर एव जाता तस्य तत्सङ्गतित्ववारणायैव प्रयोजकान्तसार्थक्यात्। न च कालस्यानवधित्वात् पुंसाञ्चासंख्यत्वात् तादृशधर्म्म एव दुर्लभ इति वाच्यम्। तादृशधर्म्मसम्भावनयाऽतिव्याप्तिसन्देहेन तद्वारणविशेषणदानौचित्यात्। वस्तुतस्तु जिज्ञासुमेकं पुरुषं प्रति सङ्गतमपि अतादृशमन्यं प्रति असङ्गतमिति यं प्रतिपादयितुम् आनन्तर्य्याभिधानं तादृशाभिधानप्रयोजकतत्पुरुषीयजिज्ञासाजनकज्ञानविषयोऽर्थस्तं प्रति सङ्गतिरिति पुरुषविशेषनियन्त्रितमेव सङ्गतित्वं निर्व्वाच्यं तथाच यन्निरूपणानन्तरं यद्धर्म्मावच्छिन्नस्य विशेषजिज्ञासा यस्य पुंसो न जाता अपि तु अन्यस्याभिधानानन्तरमेव तस्य धर्म्मस्य तं प्रति तत्सङ्गतित्ववारणाय तदुपादानमावश्यकं, आनन्तर्य्याभिधानप्रयोजकज्ञानविषयत्वस्य निवेशने पटादिकं निरूप्य प्रतिपाद्यस्य जिज्ञासामन्तरेणैव यत्रासम्बद्धघटाभिधानं केनचित् कृतं तत्रास्य घटज्ञानं भवतु इत्याकारकेच्छाजनकीभूतवक्तृघटादिज्ञानविषयघटत्वादावतिप्रसङ्गः तादृशज्ञानस्यापि घटादिबुबोधयिषाद्वारा पटाद्यभिधानानन्तरघटाद्यभिधानप्रयोजकत्वात् अतः प्रयोजकजिज्ञासाजनकेति (२), परकीयज्ञान-

(१) असम्बद्धप्रलाप।

(२) ननु जिज्ञासोपादानेपि वक्तुर्घटादिज्ञानाद्युत्पन्नजिज्ञासामादाय वहोष-तादवस्थ्यवारणाय जिज्ञासायां प्रतिपाद्यपुरुषीयत्वनिवेशनमावश्यकं एवञ्चेत्

गोचरेच्छा च न जिज्ञासा ज्ञातुमिच्छा जिज्ञासा इतिव्युत्पत्त्या स्वीयज्ञानगोचरेच्छाया एव तत्त्वात् (१)। जिज्ञासाया आनन्तर्याभिधानप्रयोजकत्वञ्च शब्दप्रयोगात्मकाभिधानानुकूलवक्तृबुबोधयिषानुकूलं यत् प्रतिपाद्यस्यासिद्धत्वज्ञानं तत्सम्पादकीभूतस्यासिद्धत्वव्याप्येच्छाविषयत्वप्रतिपादकस्य किं प्रत्यक्षोपजीवकमित्यादिप्रश्नवाक्यस्य (२) व्यवहर्त्तव्यज्ञानविधया निर्व्वाहकं यज्जिज्ञासाप्रत्यक्षं विषयविधया तदानुकूल्येन। न च जिज्ञासाजनकत्वोपादानेऽपि उक्तस्थले कथञ्चित् वक्तुर्घटादिज्ञानानुकूलघटादिजिज्ञासाजनकज्ञानविषयेऽतिप्रसङ्गो दुर्व्वार एवेति वाच्यम्। प्रतिपाद्यपुरुषीयजिज्ञासाया एव तल्लक्षणघटकत्वात् (३)। अथैवमपि अनुमानाद्यनन्तरोपमानादिनिरूपणे यथा उपमानादिजिज्ञासायाः प्रयोजकत्वं तथा तादृश-

---

जिज्ञासां निवेश्य तत्र प्रतिपाद्यपुरुषीयत्वनिवेशनमनादृत्य आनन्तर्याभिधानप्रयोजकज्ञाने प्रतिपाद्यपुरुषीयत्वनिवेशनादेव तद्दोषवारणसम्भवेन जिज्ञासापदनिवेशनसफलमिति चेत्, न, यत्र वक्तुर्घटादिज्ञानं प्रतिपाद्यपुरुषीयघटादिज्ञानजन्यबुबोधयिषाधीनं तत्र घटाभिधानानन्तरघटाभिधानप्रयोजकीभूतं यत् वक्तृबुबोधयिषानुकूलघटज्ञानं तद्विषयीभूतघटत्वादावतिप्रसङ्गवारकतया जिज्ञासापदनिवेशस्यावश्यकत्वात्। न च तथापि तत्रैव आनन्तर्याभिधानप्रयोजिका या प्रतिपाद्यपुरुषीयघटज्ञानानुकूलजिज्ञासा तज्जनकज्ञानविषये घटत्वेऽतिप्रसङ्गतादवस्थ्यमिति वाच्यम्। जिज्ञासया यन्निरूपितं यत् प्रयोजकत्वं तस्य तादृशजिज्ञासायामसत्त्वान्न तद्दोषतादवस्थ्यमिति विभावनीयम्।

(१) सन्प्रत्ययस्य क्रियैककर्त्तृकेच्छाप्रतिपादकत्वादिति भावः।

(२) जिज्ञासाबोधकवाक्यस्येत्यर्थः।

(३) शब्दप्रयोज्यनिरूपणजन्यबोधाश्रयत्वेनाभिप्रायविषयः प्रतिपाद्य इत्यर्थः, वक्तृपदं वक्तृपरम्।

तस्य कारणतारूपसङ्गतित्वेन लक्ष्यतैवेति वाच्यम्। निरूप्यनिष्ठ-
कारणत्वादीनामेव सङ्गतित्वादनुमानादिज्ञाननिष्ठेष्टसाधनतायाः
प्रत्यक्षानुमानादिसङ्गतित्वविरहात्। न च जिज्ञासां प्रति असाधा-
रणकारणत्वेनैव निवेशनीयं इष्टसाधनताज्ञानन्तु उपायेच्छामात्रं
प्रत्येव जनकमिति न तस्य जिज्ञासायामसाधारण्यमिति न तज्जन-
कतामादाय इष्टसाधनत्वेऽतिव्याप्तिरिति वाच्यम्। जिज्ञासाया
असाधारणकारणत्वं हि जिज्ञासात्वघटितधर्म्मावच्छिन्नकार्य्यतानि-
रूपितकारणत्वं तच्च ज्ञानगोचरेष्टसाधनताज्ञानस्याप्यक्षतमेव ज्ञान-
गोचरेच्छात्वस्यैव तज्जन्यतावच्छेदकत्वात् एकोपायधर्म्मिकेष्टसाध-
नताज्ञानात् अन्योपायविषयकेच्छानुदयात् उपायविशेषविषयक-
त्वमनन्तर्भाव्यैव इष्टसाधनताधिय उपायेच्छाहेतुत्वकल्पनात्। यदि
च समानविशेष्यताप्रत्यासत्त्यैव इष्टसाधनताज्ञानस्य हेतुत्वकल्पने-
ऽतिप्रसङ्गवारणसम्भवात् विशिष्टज्ञानादिरूपोपायविषयकत्व-
मिष्टसाधनताधीजन्यतावच्छेदककोटौ न निविशते तदापि जिज्ञा-
सात्वघटितधर्म्मेष्टसाधनताज्ञानजन्यतावच्छेदकः फलज्ञान-
विषयज्ञान [illegible] जनकताविशेषणत्वात् इष्टसाधनताज्ञान-
जन्यतावच्छेदकमिति तुल्यं तदा [illegible] एव इष्टसाधनताज्ञा-
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

च्छाया अनुत्पादस्यानुभवसिद्धत्वादिति वाच्यम्। विशेषधर्म्म प्रकारेण घटज्ञानं भवतु इत्याकारकतादृशजिज्ञासाजनकतादृश ज्ञानत्वावच्छिन्नधर्म्मिकेष्टसाधनताज्ञानस्य घटत्वादिरूपसामान्य धर्म्मप्रकारकतानियमात् सामान्यधर्म्मप्रकारकज्ञानाभावस्थले तादृ शेष्टसाधनताज्ञानाभावनियमात्तत एव तथाविधेच्छानुत्पादोपपत्ते रुक्तयुक्त्या सामान्यधर्म्मप्रकारकज्ञानस्य कारणत्वान्तरासिद्धेरिति चेत्, न, जनकज्ञानविषयेत्यनेन जनकीभूतेष्टसाधनताज्ञानीय ज्ञाननिष्ठविशेष्यतायां विषयिसम्बन्धेन यदवच्छेदकत्वं तन्निरूपिता- वच्छेदकतात्मकविषयताविशेषस्य विवक्षितत्वात् (१) तादृशविष यताविशेषलाभायैवार्थपदं, किमस्योपजीवकमित्यादिजिज्ञासा- प्रयोजकीभूतोपजीवकत्वाद्येकदेशोत्तरवर्त्तित्वादिवारणाय तादृश- विषयतापर्य्याप्त्यधिकरणत्व निवेशं तल्लाभायैव वा तत् (२)। यद्यपि जिज्ञासानिरूपितज्ञाननिष्ठविशेष्यतावच्छेदकतावच्छेदकत्वविशेष-

(१) ननु एतादृशनिवेशे जिज्ञासेत्यस्य वैयर्थ्यं, अनन्तराभिधानप्रयोजकेच्छा निवेशेनैव सामञ्जस्यात्। न च फलेच्छामादायातिप्रसङ्गः, जिज्ञासामद्वारीकत्वे त्यनेनैव वारणात्। न च वक्तृबुबोधयिषामादायातिप्रसङ्गः इति वाच्यम्। प्रति पाद्यपुरुषीयत्वाभावेन तदिच्छाया असम्भवात्। यत्तु अनन्तराभिधानप्रयोजिका या कण्ठताल्वभिघातविषयिणी प्रतिपाद्यपुरुषेच्छा तामादाय तज्जनकज्ञानविषये अतिप्रसङ्ग इति तत्तुच्छं, तज्जनकज्ञानविशेष्यताया ज्ञानावृत्तित्वेन ज्ञाननिष्ठत्व विशेष्यताविशेषणत्वेनैव वारणात् तद्विशेष्यताया संयोगवृत्तित्वात् अवच्छेदकताया विषयतासम्बन्धावच्छिन्नत्वासम्भवात् इति चेत्, न, प्रश्नवाक्यप्रयोजिका या प्रति पाद्यबुबोधयिषा तस्याः प्रतिपाद्येच्छागोचरवक्तृबोधविषयकत्वेन तामादा तज्जनकज्ञानविषये अतिप्रसङ्गादिति ध्येयम्।

(२) अर्थपदमित्यर्थः।

लाभाय, उपोद्घातादिपञ्चकभिन्नत्वे सतीति पूरणीयं, तथाच उपोद्घातादिपञ्चकभिन्नसङ्गतिः प्रसङ्ग इति पर्य्यवसितोऽर्थः, तेनाधेयत्वाधिकरणत्वघटत्वादीनामपि स्थलविशेषे सङ्गतिसामान्यलक्षणाक्रान्ततया प्रसङ्गाद्यनन्तर्भावे उक्तसङ्गतिपरिगणनविरोध इति निरस्तम्। तेषां सर्व्वेषामेव यथाव्याख्यातप्रसङ्गलक्षणाक्रान्ततया तत्रैवान्तर्भावात्। उक्तरूपञ्च विभाजकमात्रमतस्तथाविधरूपेण तादृग्धर्म्माणां निरूपणप्रयोजकजिज्ञासाविषयतावच्छेदकत्वविरहेऽपि न क्षतिः। एवं सङ्गत्यन्तरेऽपि बोध्यम्। यद्यपि भेदमनिवेश्य सर्व्वा सङ्गतिः प्रसङ्ग एवान्तर्भावयितुं शक्यते तथापि विभाजकस्य स्वतन्त्रेच्छतया न पर्य्यनुयोगावसरः। उपोद्घातः प्रकृतोपपादकत्वं, तदुक्तं "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्व्वुधाः" इति। प्रकृतसिद्ध्यर्थां प्रकृतोपपादकविषयिणीं किमस्योपपादकमिति चिन्ताम् उपोद्घातम् उपोद्घातसङ्गतिनिर्व्वाहिकां विदुरित्यर्थः। तादृशजिज्ञासामादायैव उपपादकत्वे सङ्गतिलक्षणसमन्वयादिति भावः। उपपादकत्वञ्च निर्व्वाहकत्वं, तच्च क्वचित् प्रकृतघटकसाधकतया यथा विशिष्टपरामर्शत्वस्यानुमितिजनकतावच्छेदकत्वम् अनुमितिलक्षणघटकं तत्साधकतया तदुपपादकत्वे तत्साधकयुक्तेरिति युक्त्यभिधानरूपतद्व्यवस्थापनलक्षणोपोद्घातसङ्गतिः, क्वचिच्च तद्घटकतया यथा आचारप्रयोजकत्वं वेदस्य, साक्षात्प्रवर्त्तकस्य वाक्यार्थज्ञानजनकत्वगर्भमिति प्रवर्त्तकज्ञानम् आचारप्रयोजकत्वघटकत्वेन प्रकृतोपपादकमिति उपोद्घातसङ्गत्या विधिवादे प्रवर्त्तकज्ञाननिरूपणम्। सामान्यप्रत्यासत्तेर्विशिष्टपरामर्श

नाया [illegible]

[illegible]

जिज्ञासा [illegible]

सम्भवतीति [illegible]

[illegible] प्रयोजकनिरूपणनिरूपकः [illegible]

प्रत्यक्षानुमानपदार्थयोरुपजीव्योपजीवकभावसम्बन्धज्ञानादनन्त-
पदार्थत्वरूपसङ्गतज्ञानं [illegible]
मानपदार्थः क इति जिज्ञासया अनुमितिकरणमनुमानपदार्थ
इति निरूपणादुपजीवकत्वे सङ्गतित्वनिर्वाहात् एवञ्च पूर्वोत्तर-
निरूपणविषययोः सम्बन्ध एव सङ्गतिः, न तु निरूपणयो[illegible]
एतदनुसारेणैव प्रसङ्गादिसङ्गतिस्वरूपाण्यूह्यानि। इत्थञ्च उप-
जीवकत्वस्यानन्तर्याभिधानाव्याप्यस्यापि सङ्गतित्वे च तुल्यत्वे
प्रत्यक्षसाधारणत्वेऽपि न व्यभिचारः इति क्रमः।

चिन्तामणिटीकेति।

लाघवायाचैवोपमानस्य सङ्गतिं दर्शयति, 'वहु-
वादीति, सुप्रसिद्धतया निरसनीयाल्पवादिविप्रति-
पत्तिकत्वेन सुप्रतिपदतया चानुमान एव व्युत्पित्सोः
प्रथमं जिज्ञासा नोपमानेऽप्रसिद्धत्वात् निरसनीयवहु-
वादिविप्रतिपत्तिकत्वेनातिदुरूहत्वाच्च। औत्सर्गिकीं
रीतिमनुरुध्य चेदं तेन प्रथमं कस्यचिद्दुरूहे जिज्ञासो-

द्वयेऽपि न क्षतिः। तथाचावावसरसङ्गत्योपमाननिरूपणमिति भावः। यथा चावसरस्य सङ्गतित्वं तथा व्यक्तमाकरे।

गादाधरी विवृतिः।

ननु न्यूनतापरिहारायानुमानोपमानयोरपि सङ्गतिप्रदर्शनमुचितमिति 'बहुवादिसम्मतत्वादुपमानात् प्रागित्यपि तत्सङ्गतिप्रदर्शनपरमेव भविष्यति सा च वाक्यमुपमानग्रन्थे एव न दर्शितेत्याशङ्कायामाह, 'लाघवायेति अनुमानस्येवोपमानस्यापि प्रत्यक्षसङ्गततया प्रत्यक्षनिरूपणाव्यवधानेनोपमानमेव किं न निरूप्यते उपमाननिरूपणानन्तरमप्यनुमाननिरूपणसम्भवादिति क्रमनियामकाकाङ्क्षाया इदानीमुदयात् तन्निवृत्तये यत् क्रमनियामकमभिधानञ्च तावतैव सङ्गतिलाभोऽपि भवतीति प्रत्यासत्त्या सङ्गति प्रदर्शनापेक्षयाऽत्र क्रमनियामकाभिधानस्य सङ्गतिपरत्वे लाघवमिति भावः। बहुवादिसम्मतत्वस्य प्राथमिकजिज्ञासाविषयत्वेन [illegible]

तज्ज्ञानस्य बह्वायाससाध्यत्वेन (१) प्रथमतो बलवानुद्वेगो भवतीति सूची-कटाहन्यायादिति तेन तत्सामग्र्या वा प्रतिबन्धात् तादृगर्थे प्रमतो जिज्ञासा इति भावः । 'औत्सर्गिकीं' प्रायिकीम्, 'इष्टं' दुरूहत्वज्ञानस्य बलवद्द्वेषसम्पादकतया जिज्ञासाविरोधित्वम् । 'कस्यचिदिति, तज्ज्ञानाधीनसुख-दुःखयोर्न्यूनाधिकभावज्ञानरहितस्येत्यादिः । नन्वेतावता क्रमनियामकलाभेऽपि सङ्गतिर्न इत्येवोत्तरग्रन्थस्य सङ्गतित्वविरहादित्याकाङ्क्षायामाह, 'तथा चेति, अनुमाने उपमानापेक्षया प्रथमिकजिज्ञासाविषयत्वप्रयोजकबहुवादिसम्मतत्वकथनेन विरोधीभूतानुमानजिज्ञासाया विषयनिष्ठानिवृत्तौ सत्यामुपमानं निरूपणीयमिति सूचनादिति भावः । ननु विरोधिजिज्ञासानिवृत्तिरवसरः स च नोपमानाभिधानप्रयोजकजिज्ञासाविषयतावच्छेदक इति कथं तत्र दर्शितलक्षणसमन्वय इत्यत आह 'यथा चेति, 'तथा चक्तमिति, अयमाशयः विरोधिजिज्ञासानिवृत्तिर्नावसरः अपि तु तन्निवृत्तौ सत्यां वक्तव्यत्वेन तत्र च किमिदानीं वक्तव्यमिति जिज्ञासाजनकज्ञानविषयताना [illegible] । यद्यपि तादृशजिज्ञासाविषयतायां जिज्ञासानिवृत्ति [illegible] नावच्छेदकमिति तेन रूपेण सङ्गतित्वं नापि [illegible], तथापि न [illegible] जिज्ञासा [illegible] इति ।

[illegible]

चिन्तामणिदीधितिः ।

शब्दान्तरसमयग्राहकं सप्रवृत्तिनिमित्तकत्वबोधकं सामान्यतोदृष्टमन्ततोऽदृष्टजनकप्रवृत्त्यौपयिकञ्चानुमानमपेक्षते निखिलमेवोपमानमितीहाप्युपजीवकत्वमेव सङ्गतिरित्यपि केचित् ।

गादाधरी विवृतिः ।

सार्व्वभौमानां मतमाह, 'शब्दान्तरे'ति, द्वितीयान्तस्यानुमानमित्यस्य प्रथमोक्तं तथाविधत्वं विशेषणं, 'शब्दान्तरसमयग्राहक'मिति अतिदेशवाक्यस्य उपमान[illegible]गवयादिपदभिन्नगवादिपदस्य शक्तिग्राहक, गोपदं गोत्वविशिष्टबोधकं [illegible] [illegible]त्वादित्याद्याकारकमित्यर्थः, तादृशानुमानं विना गोपदस्य [illegible] [illegible] उपमानानवतारात् (१)' तस्योपमानादि[illegible] आह । 'सप्रवृत्तिनिमित्तकत्वे'ति [illegible] [illegible] [illegible]

[illegible]

गौरवं जातिविशेषस्य तथात्वे लाघवमिति लाघवप्रतिसन्धानवशेन सामान्यतः सप्रवृत्तिनिमित्तकत्वव्याप्यतया गृहीतादपि लिङ्गादि शेषतो जातिविशेषप्रवृत्तिनिमित्तकत्वानुमितिसम्भवात्। मिश्रा न्तिभिस्तु व्यापकतावच्छेदकरूपेणैव साध्यमनुमितौ भासत इति नियममवलम्ब्य उपमानप्रामाण्यं व्यवस्थाप्यते उपमानेन च गवया दिपदे विशेषतः गवयत्वादिप्रवृत्तिनिमित्तकत्वग्रहः सम्भवति, गवयत्वादिप्रकारकसादृश्यज्ञानात् तेन रूपेण पदवाच्यत्वे गृह्यमाणे तदवच्छेदेनैव ग्रहात्तादृशग्रहेऽपि गवयपदशक्तिरवश्यं किञ्चिद्धर्माव- च्छिन्ना तत्रानतिप्रसक्तस्य गोसादृश्यादेस्तत्तद्व्यक्तित्वानाञ्चावच्छे दकत्वे गौरवं जातिविशेषस्य तथात्वे लाघवमित्याकारकस्तर्कोऽ- पेक्षितः, अन्यथा तत्तद्व्यक्तित्वादिप्रकारेणापि सादृश्यज्ञानसम्भवात् तेषामपि प्रवृत्तिनिमित्ततासिद्धिप्रसङ्गात् तादृशलाघवज्ञानसम्पा- दनेन दर्शितसामान्यतोदृष्टस्यापि तथाविधोपमानोपजीव्यत्वमित्य- वधेयम्। उक्तानुमानयोः सादृश्यज्ञानरूपोपमानानुपजीव्यतया तस्याप्युपजीव्यमनुमानान्तरमाह, 'अन्यत इति, 'अदृष्टेति अदृष्ट- नियामिका विहितक्रियागोचरप्रवृत्तिस्तत्प्रयोजकसमयादिपरि- च्छेदकमनुमानमित्यर्थः, उपमानस्याप्यदृष्टजन्यत्वादिति भावः। निखिलोपमानस्यैव निरूपणीयतया सङ्गतिमत्त्वमपेक्षितमतोनि- खिलमित्युक्तं, अनुमानेऽप्यदृष्टद्वारा समयादिपरिच्छेदकोपमानोप- जीवकतायाः क्वचित् सत्त्वादुपमाननिष्ठउपजीवकतायास्ततोविशेष- दर्शनाय निखिलमिति तु न सत्, अनादौ संसारे सर्व्वत्रैवानुमाने- ऽतिपरम्परया कदाचित् कस्यचित् शक्तिपरिच्छेदकोपमानस्य

मूलतासम्भवेन तादृशविशेषासम्भवात्। यत्र प्रत्यक्षादिरूपकृति-साध्यताज्ञानाधीना प्रवृत्तिरुपमानजनकीभूतादृष्टजनिका तत्रानु-मानोपजीवकताया अपि उक्तरीत्यैवोपपादनीयत्वात्। 'केचिदित्य-स्वरससूचनाय, स च बहुवादिसम्मतत्वकथनस्य उपजीवकत्वसङ्गति-लाभासम्पादकतया तस्यानुपयोगितापातात्। नचोपमानापेक्षया अनुमानस्य बहुवादिसम्मतत्वोक्तौ उपमानं काणादादिभिरनुमान-एवान्तर्भावितमिति लभ्यते तावता तन्मतनिराकरणायानुमान-भिन्नत्वेन उपमानं निरूपणीयमित्यस्य लाभेनानुमाननिरूपणोप-जीवकताया उपमाननिरूपणे लाभ इति तदुक्तेरुपजीवकत्वसङ्ग-तिलाभोपयोगिता इति वाच्यम्। निरूपणयोरुपजीव्योपजीवक-भावस्यासङ्गतित्वात्, क्रमनियामकतालाभायैव तदुक्तिर्न तु सङ्गति-लाभायेति चेत्तथापि उपमानसङ्गत्यप्रदर्शनेन मूलस्य न्यूनताया-दुर्व्वारत्वात्।

चिन्तामणिदीधितिः।

सम्भवति चेह निरूपणयोरपि कार्य्य-कारणभावः। अथ तत्पूर्व्वकमित्यादिसूत्रे प्रत्यक्षपूर्व्वकत्वेनानुमाननिरू-पणात्तच्छब्देन व्याप्त्यादिप्रत्यक्षपरामर्शात्, अत्रापि सह-चारप्रत्यक्षजन्यत्वादिना तन्निरूपणात् तस्य च प्रत्यक्ष-निरूपणाधीनत्वात्, एवमनुमानभिन्नत्वेनोपमाननिरू-पणमप्यनुमाननिरूपणापेक्षमिति सङ्क्षेपः।

६

गादाधरी विवृतिः ।

स्वमते सङ्गतेर्निरूपणपौर्व्वापर्य्यानियामकतया तन्नियामकाकाङ्क्षया निरूपणयोः कार्य्य-कारणभावं दर्शयति, 'सम्भवति चेति, 'इह' प्रत्यक्षानुमानयोः, समस्ययोर्निरूपणान्वयि वि॰ यत्व, 'निरूपणयोः' 'निरूपणपदार्थघटकज्ञानयोः। 'अथ तत्पूर्व्वकमित्यादीति "अथ तत्पूर्व्वकमनुमानं त्रिविधं पूर्व्ववत् शेषवत् सामान्यतो दृष्टञ्चेति विभाजकसूत्र इत्यर्थः, तत्पूर्व्वकमित्यादि कारणलिङ्गकं कार्य्यलिङ्गक तदन्यलिङ्गकञ्चेत्यर्थः (१)। ननु सौत्रं क्रमनियामकं प्राप्तं प्रकृते तु किं तथा इत्याकाङ्क्षायामाह, 'अत्रापीति चिन्तामणिग्रन्थेऽपीत्यर्थः। यद्यपि व्यभिचारज्ञानाभाव सहकृतं सहचारदर्शनं व्याप्तिग्राहकं इत्युक्तं अत्र च 'व्यभि विशेष्यमिति कथं तन्निरूपणस्य हेतुत्व, तथापि प्रत्यक्षमप्रतिपाद्य प्रत्यक्षं व्याप्तिग्राहकमिति परो बोधयितुं न शक्यते इति तत्रापि प्रत्यक्षनिरूपण हेतुरिति भावः। 'तस्य चेति प्रत्यक्षघटितविशेषण-पुरस्कारेणानुमाननिरूपणस्य चेत्यर्थः, 'प्रत्यक्षनिरूपणेति, विशिष्ट ज्ञानस्य विशेषणज्ञानाधीनत्वादिति भावः। 'अनुमानभिन्नत्वेनेति वैशेषिकादिमतनिराकरणाय, तेन रूपेणैवोपमानस्य निरूपणीयत्वादिति भावः।

---

(१) देशोऽयं दृष्ट्वा सम्पत्स्यते मेघोन्नतिमत्त्वादित्यनुमानं कारणलिङ्गकम्। देशोऽयं दृष्ट्वा सम्पन्न नदीवृद्धिमत्त्वात् इत्यनुमानं कार्य्यलिङ्गकम्। इदं द्रव्यं पृथिवीत्वादित्याद्यनुमानं तदन्यलिङ्गकम्।

अनुमानचिन्तामणिः ।

तत्र व्याप्तिविशिष्टपक्षधर्म्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणमनुमानं तच्च लिङ्गपरामर्शो न तु परामृश्यमाणं लिङ्गमिति वक्ष्यते ।

चिन्तामणिदीधितिः ।

तत्र लक्षण-स्वरूप-प्रामाण्यादिभिरनुमाने निरूपणीये कारणस्य क्रियाभेदभिन्नमूर्त्तिकतया क्रियालक्षणपूर्व्वकं तल्लक्षणमाह 'व्याप्तीत्यादिना ।

गादाधरी विवृतिः ।

'तत्रेत्यादिराहेत्यन्त एको ग्रन्थः, 'तत्र' प्रतिज्ञायां, सप्तम्यर्थो-निरूपणान्वयि विषयत्वं, 'लक्षणे'ति, 'लक्षण' इतरभेदानुमापकरूपम्, 'स्वरूप' लक्षणघटकोपयोगि अनुमितिकारणतावच्छेदकरूप (१) तच्च लिङ्गपरामर्शत्वं (२) 'प्रामाण्यं' प्रत्यक्षाद्यतिरिक्तप्रमितिकरणत्वम्, 'आदिपदात् विभाजकरूपपरिग्रहः (३) 'निरूपणीये' प्रतिपादनीये (४) तल्लक्षणम् अनुमानलक्षणं,

'आह' इत्यन्वय., सतिसप्तम्या: प्रयोजकतामर्थः (१) लक्षणाभिधानस्य निरूपणात्मकतया प्रयोज्य-प्रयोजकभावाभावेऽपि 'सविशेषणे हीति न्यायात् (२) निरूपणघटकप्रतिपत्त्यंशे लक्षणाभिधानस्य प्रयोज्य-प्रयोजकभावे तात्पर्य्यं, स्वरूपादिप्रतिपत्तावपि (३) तदभिधानप्रयोजकाकाङ्क्षोत्थापकतया लक्षणाभिधानस्य प्रयोजकत्वं बोध्यम्। ननु प्रमाणलक्षणात् प्रागेव कथं प्रमा लक्षिता। न च प्रमाणलक्षणस्य प्रमाघटिततया तामपरिज्ञाय तज्ज्ञातुं न शक्यते इति प्रमालक्षणप्राथम्ये वीज, तथा सति अनुमितिलक्षणघटकव्याप्त्यादेरपि प्रथमं निरूपणापत्तेरित्याकाङ्क्षायामनुमितिलक्षणप्राथम्ये वीजान्तरमाह, 'करणस्येति अनुमानस्येत्यर्थः, 'क्रियाभेदेति क्रियाया अनुमितेर्यो भेदः प्रत्यक्षविजातीयत्वं तद्भिन्नमूर्त्तिकतया तदधीनं यत्प्रत्यक्षकरणताभिन्नप्रमाणान्तरव्यवहारौपयिकं प्रमित्यन्तरकरणतात्मकं स्वरूपं तद्वत्तया, तथाच प्रत्यक्षानन्तरम् अनुमानं निरूप्यते इति प्रतिज्ञातः प्रत्यक्षतोऽनुमानं प्रमाणान्तरमित्यस्य लाभात् तत्र काथन्तानिवृत्तये (४) तत्प्रमाणान्तरतानिर्व्वाहकप्रमितिवैलक्षण्यलाभाय तल्लक्षणाभिधानमेव प्रथमत उचितमिति भावः।

---

(१) यथा पीते पायसे तृष्णाशान्तिरित्यत्र सतिसप्तम्या. प्रयोजकत्वमर्थः।

(२) "सविशेषणे हि विधि-निषेधौ सति विशेष्ये बाधे विशेषणमुपसंक्रामत." इति न्यायादित्यर्थ। सविशेषणे विशेषणविशिष्टे इत्यर्थः।

(३) आदिपदेन प्रामाण्यपरिग्रह.।

(४) जिज्ञासानिवृत्तय इत्यर्थ।

चिन्तामणिदीधितिः ।

अत्र व्याप्तिविशिष्टत्व-पक्षधर्म्मत्वसामानाधिकरण्याव गाहिज्ञानजन्यत्वमर्थः, कर्म्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वात् । ज्ञान पदोपसन्धानेन च बाधिताबाधितसाधारणज्ञानलाभात् न भ्रान्तानुमित्यव्याप्तिरित्याहुः ।

गादाधरी विवृति ।

उपाध्यायव्याख्यामुपन्यस्यति 'अत्रेत्यादिना 'आहुरित्यन्तेन, 'अत्र' एतल्लक्षणे, 'अर्थ इत्यनेनान्वयः, एतल्लक्षणवाक्यप्रतिपाद्यार्थ इत्यर्थः । अथवा व्याचक्षते इत्यर्थकेनाहुरित्यनेनान्वयः । 'व्याप्तीति (१) व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्म्मत्वावगाहिज्ञानजन्यत्वमर्थः । प्रकृत्यर्थतावच्छेदकरूपभावार्थ एव तल्प्रत्ययस्यानुशिष्टत्वात् सामानाधिकरण्यस्यातथाभूतस्य प्राधान्येन ज्ञानान्वयासम्भवात् यथा श्रुतासङ्गतेः, उक्तार्थेऽपि सामानाधिकरण्यान्त नोपलक्षणं किन्तु विशेषणमतो ज्ञानेन समं तस्यान्वयात् केवलपक्षधर्म्मताविषयकधीनिरासः । व्याप्तिवैशिष्ट्यसामानाधिकरण्यं व्याप्तिविशिष्टसम्बन्धित्वं तत्प्रतियोगिकत्वपर्य्यवसितं, पक्षधर्म्मत्वं पक्षानुयोगिकसम्बन्धः, पक्षसम्बन्धपदस्य प्रतियोगितया पक्षानुयोगिकसम्बन्धावच्छिन्नमात्रबोधकत्वात् । प्रतियोगित्वानुयोगित्वयोः सम्बन्ध-

---

(१) इत आरभ्य कतिस्वच्छात्रुभावनेनेत्यन्तं उपाध्यायमतस्य क्रोडपत्रम् । स पाठ कुत्र कुत्र पुस्तके नास्ति ।

सम्बन्धतया विशेषण-विशेष्यांशे भानोपगमात्, प्रतियोगित्वादे-र्ज्ञानान्वयेऽपि पक्ष-व्याप्त्योः सम्बन्धसंसर्गविधयाऽवगाहमानस्य परामर्शस्य नासंग्रहः। व्याप्तिविशिष्टप्रतियोगिकत्वादेः सम्बन्ध-विशेषणतया तन्निष्ठविषयतायामवच्छेदकतया ज्ञानेनान्वयः, न तु विषतया साक्षादेव। तथासति विशृङ्खलतावत्समूहावलम्ब-नजन्येऽतिप्रसङ्गात्, विषयांशे सम्बन्धविधया यद्भासते प्रकार इव तत्रापि विषयतावच्छेदकत्वं विषयतानिरूपितविषयतापर्य्यवसित-मक्षतमेवेति सम्बन्धविषयताया व्याप्तिविशिष्टप्रतियोगिकत्वाद्य-वच्छिन्नत्वनिर्व्वाहः। यदि च तादृप्येणैव पक्षसम्बन्धः स्वाव-च्छिन्नबोधकपदोत्तरतल्प्रत्ययार्थः, प्रकृत्यर्थस्य तत्प्रतियोगिक-त्वन्तु सम्बन्ध एव न तु प्रकारस्तथाच व्याप्तिविशिष्टप्रतियोगि-कत्वस्य विषयत्वान्वयिपक्षसम्बन्धविशेषणताविरहेण तत्प्रकारत-त्त्वेण विषयत्वान्वयासम्भवात् सम्बन्धविषयतायां न तदवच्छिन्न-त्वलाभसम्भव इति मन्यते, तदा व्याप्तिविशिष्टस्यैव सम्बन्धविषय-तायामवच्छेदकतयाऽन्वयो विवक्षणीयः, तस्यैव सम्बन्धविशेषण-तया लक्षणार्थे प्रवेशात्। यद्यपि कर्म्मधारयलभ्यस्याभेदेन व्याप्ति-विशिष्टविशिष्टस्य पक्षधर्म्मस्यैव पक्षसम्बन्धांशे विशेषणतया तादृ-शस्यैव ज्ञानान्वयो दर्शितदिशा स्वीकार्य्यः तथाच यादृशपरामर्शः पक्षधर्म्मे व्याप्तिरिष्टाभेदमवगाहते तस्यैव संग्रहः न तु व्याप्ति-संसर्गावगाहिन इति तत्रान्येऽव्याप्तिः, एवं लक्षणवाक्यजन्यबुद्धौ व्याप्तिवैशिष्ट्यस्य पदार्थतावच्छेदकतया प्रकारत्वेन तत्सम्बन्ध-सम्बन्धस्यापि भानमावश्यकं सम्बन्धसम्बन्धस्यापि नियमेन विशिष्ट-

वुद्धौ भानवादिनाम्। तथाच विशिष्टपदार्थघटकस्य तस्यापि ज्ञानान्वयध्रौव्यं विशेषणान्तर्गतस्योपलक्षणत्वायोगादिति व्याप्ति वैशिष्ट्यं यत्र संसर्ग एव तादृशपरामर्शस्य दुःसंग्रहतैव तादृशपरामर्शे संसर्गसंसर्गसंसर्गान्तरभानस्यातिनिर्युक्तिकतया अनवस्थाभयेन च केनाप्यनभ्युपगमात्। तथापि व्याप्तिविशिष्टे धर्म्मिणि प्रकारतया भासमानवैशिष्ट्यविशेषणतापन्ना व्याप्तिरपि तेन संसर्गेण तत्प्रकारतया भासते विशेषणतयोपस्थितस्य स्वान्तेऽन्वय विशेषणत्वानभ्युपगमात्, एवं व्याप्यविशेषितस्य प्रतियोगितया सम्बन्धविशेषणत्वे इतरविशेषणतापन्नस्य व्याप्यस्यापि प्रतियोगितया सम्बन्धविशेषणत्वमिति स्वीकृत्यैवं व्याख्यातम्, एवं सति व्याप्तिविशेषितधर्म्मिणो ज्ञानान्वयसाम्प्रदाने सम्बन्धे विशेषणत्व व्याप्तिवैशिष्ट्यविशेषितधर्म्मिणोऽभेदेन व्याप्यविशेषितस्य पक्षसम्बन्धविशिष्टस्य चोपलक्षणत्वमित्यतः सर्व्वसामञ्जस्यात्। इत्थमेव दण्डांशे लौहित्यप्रकारकज्ञाने विशिष्टविषयान्वयपरस्य लौहित्यविशिष्टदण्डं जानातीति वाक्यस्य प्रामाण्यनिर्व्वाह इत्यलमतिसूक्ष्मानुधवनेन। उपाध्यायमतस्य क्रोड़पत्रमिदम्।

अत्र उभयसामानाधिकरण्यावगाहित्वं एकधर्म्मिण्युभयसम्बन्धावगाहित्वं, सम्बन्धसम्बन्धस्यापि विशिष्टधीविषयतायाः प्राचीनैरुपगमात् अनुमितिजनकविशिष्टपरामर्शे व्याप्त्यादिसम्बन्धतया भासमानस्यापि तत्सम्बन्धस्य सम्बन्धो हेतौ भासते इति व्याप्तिवैशिष्ट्य-पक्षधर्म्मत्वयोः सामानाधिकरण्यावगागाहिता तत्र निर्व्वहतीति लक्षणसमन्वयः। पक्षधर्म्मता च पक्षानुयोगिकी

तावच्छेदकसम्बन्धः न तु पक्षवृत्तित्वं, पक्षविशेष्यकपरा-
र्शस्य पक्षवृत्तितानवगाहित्वात् तत्रापि सम्बन्धतया पक्षनिरू-
ताधेयत्वभानोपगमे पक्षस्य प्रकारतापत्तेः। न च पक्षानु-
गिकसम्बन्धविवक्षणे पक्षविशेष्यकपरामर्शे तादृशसम्बन्धस्य
म्बन्धः पक्ष एव भासते व्याप्तिसम्बन्धस्य सम्बन्धश्च हेताविति-
कस्मिन्नुभयसम्बन्धावगाहित्वरूपसामानाधिकरण्यावगाहिता-
नर्वाह इत्याशङ्कनम्। विशिष्टबुद्धौ विशेष्ये सम्बन्धस्यानुयोगित्व-
पसम्बन्धो विशेषणे च तस्य प्रतियोगित्वरूपसम्बन्धो भासते
ति सिद्धान्तात्, पक्षविशेष्यकपरामर्शेऽपि हेतौ व्याप्तिसम्बन्धानु-
ोगित्वस्य पक्षानुयोगिकसम्बन्धप्रतियोगित्वस्य च भानेनैकत्र तदु-
भयसम्बन्धावगाहिताया अक्षतत्वात्। न चैवं व्याप्यविशेष्यकपरा-
र्शसंग्रहः तत्र हि हेतौ पक्षानुयोगिकसंयोगादिरूपहेतुताव-
च्छेदकसम्बन्धो न पक्षरूपविशेषणस्य सम्बन्धतया भासते विशेष्ये
म्बन्धानुयोगित्वस्य विशेषणे च तत्प्रतियोगित्वस्य भाननियमात्
तादृशज्ञानस्य हेतु-पक्षयोर्बाधितसंयोगाद्यनुयोगित्व-प्रतियोगित्वा-
वगाहितया भ्रमत्वप्रसङ्गात् (१) तद्वैपरीत्ये च विशेष्य-विशेषण-
भाववैपरीत्यप्रसङ्गात् (२) भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्व-
योरेव विशेष्यत्व-विशेषणत्वात्मकत्वात्, परन्तु स्वानुयोगिक संयो

(१) तादृशपरामर्शे हेतुपक्षयोः प्रतियोगिनि अनुयोगित्वस्य अनुयोगिनि प्रति-
योगित्वस्य चावगाहितास्वीकारे भ्रमत्वापत्तिरित्यर्थः।

(२) पक्षे अनुयोगित्वस्य भाने प्रतियोगित्वस्य भानोपगमे तत्र हेतोः पक्षे
विशेष्यत्वस्य भाने विशेषणत्वस्य च प्रसङ्गादित्यर्थः।

गादिप्रतियोगितावच्छेदकसम्बन्धेन तथा भासते (२) म [illegible]
तावच्छेदकसम्बन्धः न तत्प्रतियोगिक इति वाच्यम् ।
सम्बन्धतया तत्र संयोगादिसम्बन्धाविच्छिन्नप्रतियोगि
तावभानेऽपि विशेषणीभूतसम्बन्धतया तत्र तद्भानादि [illegible]
व्याप्तिवैशिष्ट्यानुयोगित [illegible]
योगित्वभानेन उभयसामानाधिकरण्यावगाहितानिर्वाहात्
विशिष्यैक एव वा परामर्शः सर्व्वत्रानुमितिहेतुः । नन्वेवं
धूमो वह्निव्याप्यो द्रव्यवान् पर्व्वत इति ज्ञानजन्यानुमिति
स्तादृशज्ञानस्यापि धूमाद्यात्मकैकहेतौ [illegible] सम्बन्धावगाहि
त्वात् एकविषयतानिरूपितोभयसम्बन्धविषयतापर्य्यन्तस्य लक्षण
वाक्यतोऽलाभात् तद्विवक्षणे च तथाविधव्याप्तिवैशिष्ट्य [illegible]
विषयतानिवेशनेनैवोपपत्तौ मिथोऽवच्छिन्नद्वन्द्वोपेक्षाया निर्व्वा
पत्तेः (२) । न [illegible] ना
करणं तथाच [illegible] वैशिष्ट्य [illegible]
जन्यत्वमर्थः, तत्सम्बन्धत्वञ्च तत्प्रतियोगिकत्वमेव, [illegible]
केवलपक्षधर्म्मतादिज्ञानस्य च वस्तुगत्या व्याप्तिवैशिष्ट्यवान्
धूमादिः [illegible]
प्रसङ्गः,

स्यैव वैशिष्ट्यानवगाहित्वे विशेषणं विवक्षितमिति (१) कश्चित-ज्ञानस्य (२) व्याप्त्यादिघटिततादृशविशिष्टनिरूपितविषयिताशून्यत्वेन लक्षणाघटकत्वादिति वाच्यम्। व्याप्तिविशिष्टहेतुमान् पक्ष इत्येतादृशपरामर्शे संयोगाद्यंशे भासमानहेतुप्रतियोगिकत्वनिरूपितविषयिताया व्याप्तिवैशिष्ट्यप्रतियोगिकत्वरूपविशिष्टविषयनिरूप्यत्वेऽपि पक्षसम्बन्धनिष्ठत्वस्य विशेषणकोटावप्रवेशेन तद्घटितोक्तविशिष्टविषयनिरूपितत्वाभावेन (३) तदसंग्रहात्। पक्षसम्बन्धनिष्ठत्वस्योपलक्षणत्वे च तदविषयकज्ञानवारणासम्भवात्, (४) भावप्रत्ययेन वा अवगाहित्वविशिष्टतया एकपदार्थतावच्छेदकनिष्ठमपरतत्सामानाधिकरण्यं वक्तुं प्रतिपादनीयं भावरूपार्थ एव तदनुशासनात्, प्रकृत्यर्थासाधारणधर्मस्यैव च भावार्थत्वात्, न हि नीलोत्पलत्वमित्यादौ उत्पलत्वनिष्ठनीलिमादिसामानाधिकरण्यं प्रकृत्यर्थासाधारणधर्मः, तस्य नीलोत्पलादिरूपप्रकृत्यर्थेऽवर्त्तमानत्वात्। न चैकपदार्थनिष्ठापरपदार्थतावच्छेदकसम्बन्ध एव पदार्थतावच्छेदकद्वयसामानाधिकरण्यं प्रकृते च

(१) [illegible]

(२) [illegible]

(३) [illegible]

(४) [illegible]

गादिप्रतियोगित्वरूपमाधेयत्वमेव तथा भासते (२) स च न हेतुतावच्छेदकसम्बन्धः न वा पक्षानुयोगिक इति वाच्यम्। सम्बन्धसम्बन्धतया तत्र संयोगादिरूपहेतुतावच्छेदकसम्बन्धप्रतियोगित्वस्य हेतावभानेऽपि विशेषणीभवत्पक्षसम्बन्धतया तत्र तज्ज्ञानादेव एकत्र व्याप्तिवैशिष्ट्यानुयोगित्व–पक्षानुयोगिकहेतुतावच्छेदकसम्बन्धप्रतियोगित्वभानेन उभयसामानाधिकरण्यावगाहितानिर्व्वाहात् पक्षविशेषणक एव वा परामर्शः सर्व्वत्रानुमितिहेतुः। नन्वेवमपि धूमो वह्निव्याप्यो द्रव्यवान् पर्व्वत इति ज्ञानजन्येऽतिव्याप्तिः स्यात् तादृशज्ञानस्यापि धूमाद्यात्मकैकहेतौ तदुभयसम्बन्धावगाहित्वात् एकविषयतानिरूपितोभयसम्बन्धविषयतापर्य्यन्तस्य लक्षणघटकत्वे तु लाभात् तद्विवक्षणे च तथाविधव्याप्तिवैशिष्ट्य-पक्षसम्बन्धविषयतानिवेशनैवोपपत्तौ मिथोऽसाकाङ्क्षोपितायां निर्व्वीजतापत्तेः (२)। न चोभयसामानाधिकरण्यमेकनिष्ठापरसामानाधिकरण्यत्वात् पक्षसम्बन्धनिष्ठव्याप्तिवैशिष्ट्यवत्सम्बद्धत्वावगाहिज्ञानजन्यत्वमेव, तत्सम्बन्धस्य तत्प्रतियोगिकत्वमेव, उक्तसमूहालम्बनस्य हेतुत्वपक्षधर्म्मतादिज्ञानस्य च वस्तुगत्या व्याप्तिवैशिष्ट्यवान् धूमत्यादि पक्षसम्बन्धनिष्ठतत्प्रतियोगिकत्वावगाहित्वेऽपि नातिप्रसङ्गः, तत्प्रकारत्वेन यादृशवैशिष्ट्यमुपस्थाप्यते तादृशविशिष्ट-

---

[illegible] सम्बन्धेन भासत इत्यर्थः ।

(२) [illegible] वह्निव्याप्यो द्रव्यवान् पर्व्वत इत्यादि [illegible]
[illegible]
[illegible] ।

स्यैव वैशिष्ट्यमवगाहित्वे विशेषणं विवक्षितमिति (१) कथित-ज्ञानस्य (२) व्याप्त्यादिघटिततादृशविशिष्टनिरूपितविषयिताशून्यत्वेन लक्षणाघटकत्वादिति वाच्यम् । व्याप्तिविशिष्टहेतुमान् पक्ष इत्येतादृशपरामर्शे संयोगाद्यंशे भासमानहेतुप्रतियोगिकत्वनिरूपितविषयिताया व्याप्तिवैशिष्ट्यवत्प्रतियोगिकत्वरूपविशिष्टविषयनिरूप्यत्वेऽपि पक्षसम्बन्धनिष्ठत्वस्य विशेषणकोटावप्रवेशेन तद्घटितोक्तविशिष्टविषयनिरूपितत्वाभावेन (३) तदसंग्रहात् । पक्षसम्बन्धनिष्ठत्वस्योपलक्षणत्वे च तदविषयकज्ञानवारणासम्भवात्, (४) भावप्रत्ययेन वा अवगाहित्वविशेषणतया एकपदार्थतावच्छेदकनिष्ठमपरतत्सामानाधिकरण्यं वायं प्रतिपादनीयं भावरूपार्थ एव तदनुशासनात्, प्रकृत्यर्थासाधारणधर्म्मस्यैव च भावार्थत्वात्, न हि नीलोत्पलत्वमित्यादौ उत्पलत्वनिष्ठनीलिमादिसामानाधिकरण्यं प्रकृत्यर्थासाधारणधर्म्मः, तस्य नीलोत्पलादिरूपप्रकृत्यर्थेऽवर्त्तमानत्वात् । न चैकपदार्थनिष्ठापरपदार्थतावच्छेदकसम्बन्ध एव पदार्थतावच्छेदकद्वयसामानाधिकरण्यं प्रकृते च

---

(१) व्याप्तिविशिष्टपक्षधर्म्मतापदेन पक्षसम्बन्धनिष्ठव्याप्तिवैशिष्ट्यवत्प्रतियोगिकत्वमुपस्थाप्यते तादृशप्रतियोगिकत्वस्य वैशिष्ट्यनिरूपितत्वं अवगाहित्वे निवेशितमित्यर्थः ।

(२) समूहालम्बनस्य वैशिष्ट्यपक्षधर्म्मताज्ञानस्य चेत्यर्थः ।

(३) पक्षसम्बन्धनिष्ठत्वघटितपक्षसम्बन्धनिष्ठव्याप्तिवैशिष्ट्यवत्प्रतियोगिकत्वनिरूपितत्वाभावेनेत्यर्थः ।

(४) पक्षतावच्छेदकत्वमेव प्रकारविधया पक्षसम्बन्धविषयकवह्निव्याप्तिविशिष्टहेतुमानित्याकारकनिर्दिष्टज्ञानावच्छेदकस्य प्रसङ्गात्मकत्वात् तथापि तादृशव्याप्तिविशिष्टप्रतियोगिकत्वावगाहित्वादिति भावः ।

पक्षसम्बन्धप्रतियोगिनिष्ठव्याप्तिवैशिष्ट्यानुयोगित्वमेव (१) तथा (२
तच्च प्रकृत्यर्थासाधारणधर्म्मएवेति वाच्यम्। पृथिवीत्वमित्यादित
गन्धाद्यप्रतीतिः, प्रकृत्यर्थतावच्छेदकधर्म्मस्यैव भावार्थत्वस्वीकारे
कथितस्य (३) प्रकृत्यर्थधर्म्मत्वेऽपि प्रकृतिजन्यबोधे प्रकारताविरहे
भावार्थत्वानुपपत्तेः। न च "कृत्तद्धितसमासेभ्यः सम्बन्धावगमस्तु
तल्भ्याम्" इत्यनुशासनात् भावार्थभिन्नोप्युक्तसम्बन्धः (४) तत्
प्रत्ययार्थ एवेति वाच्यम्। तथा सत्यत्र उत्पलत्वं नास्तीत्यादि
वाक्यजबोधस्यात्र नीलोत्पलत्वमित्यादिवाक्यजबोधे ग्राह्याभावा
नवगाहितया स्वतो विरोधितानुपपत्तेः। न चेष्टापत्तिः, अनुभ
विरोधापत्तेः। परामर्शविषयव्याप्तिवैषिष्ट्यानुपयोगित्वस्य विः
पणकोटौ पक्षसम्बन्धप्रतियोगिनिष्ठत्वाभानात् तस्य निरुक्तविः
ष्टविषयकत्वासम्भवेन तल्प्रत्ययेन तादृशविशिष्टार्थप्रत्यायनसम्भ
ऽप्यप्रतीकाराच्च (५)। अथ सामानाधिकरण्यान्तेन (६) व्याप्ति
वैशिष्ट्यसामानाधिकरण्यावच्छिन्नपक्षधर्म्मत्वमेव विवक्षितं पदा

---

(१) तथाच पक्षसम्बन्धप्रतियोगिनिष्ठव्याप्तिवैशिष्ट्यानुयोगित्वत्वावच्छि विषयकत्वं ज्ञाने विवक्षितमिति न पूर्व्वोक्तदोष। न चैतत्कल्पे विशिष्टप मर्शासंग्रह इत्तित्वान्तस्योपलक्षणत्वे तदविषयकज्ञानसंग्रह इत्यादिकं कथं नो मिति वाच्यम्। भावप्रत्ययस्येदृशार्थबोधकतैव न सम्भवतीति किमपरदूष णेत्यभिप्रायेणेदमिति, उत्तरत्र पुनरेतद्दोषोदर्शित इति।

(२) एकपदार्थनिष्ठापरपदार्थतावच्छेदकसम्बन्ध इत्यर्थः।

(३) पक्षसम्बन्धप्रतियोगिनिष्ठव्याप्तिवैशिष्ट्यानुयोगित्वस्य।

(४) पक्षसम्बन्धप्रतियोगिनिष्ठव्याप्तिवैशिष्ट्यानुयोगित्वरूप सम्बन्ध इत्यर्थः

(५) तथाच व्याप्तिविशिष्टहेतुमान् पक्ष इत्यादिपरामर्शासंग्रह इति भावः।

(६) व्याप्तिविशिष्टत्व-पक्षधर्म्मत्वोभयसामानाधिकरण्यभागेन।

तावच्छेदकद्वयसामानाधिकरण्यवचनत्वात् (१) इत्यस्यापि एकपदार्थतावच्छेदकसमानाधिकरणपरपदार्थतावच्छेदकबोधकत्वादित्यर्थः इति न विरोधः। उक्तञ्च (२) यज्ञपत्युपाध्यायैरेव तदुत्तरतल्प्रत्ययश्च व्याप्तिविशिष्टत्वे सति पक्षधर्म्मत्वं भावमाहेति (३)। एवञ्च सामानाधिकरण्यान्तर्भावेन न भावप्रत्ययार्थता (४) नीलोत्पलत्वमित्यादित उत्पलादौ नीलाद्यभेदान्वये नीलाभिन्नोत्पलादेः प्रकृतितो लाभात्, तादृशोत्पलादीतरावृत्तित्वसहितसकलतादृशोत्पलवृत्तित्वेन चान्यलभ्यप्रकृत्यर्थं परित्यज्य इतरांशे प्रकृत्या भावप्रत्ययेन बोधनात्, (५) नीलाभिन्नोत्-

---

(१) ननु सामानाधिकरण्यान्तर्भावे उक्तार्थकत्वे तत्र पदार्थतावच्छेदकद्वयसामानाधिकरण्यार्थकत्वादितिग्रन्थविरोध एकपदार्थतावच्छेदकसामानाधिकरण्यविशिष्टपरपदार्थतावच्छेदकवचनत्वादित्येव वक्तुमुचितत्वादित्यत आह एकपदार्थतावच्छेदकेत्यादि।

(२) तादृशतल्प्रत्ययस्य तादृशार्थबोधकत्वे प्रमाणमाह, उक्तञ्चेति।

(३) व्याप्तिविशिष्टसामानाधिकरण्यपक्षधर्म्मत्वबोधक इत्यर्थः।

(४) विशेषणतावच्छेदकसामानाधिकरण्यघटितार्थत्वं न कर्म्मधारयोत्तरतल्प्रत्ययस्येत्यर्थः, परन्तु केवलं तदितरावृत्तित्वसहितसकलतद्वृत्तित्वमेव, [illegible] नीलोत्पलत्वमित्यादितो विशेषणतावच्छेदकनीलत्वसामानाधिकरण्य[illegible] विशेष्यतावच्छेदके लाभ इत्यत आह नीलोत्पलत्वमित्यादित इति, [illegible] इति भावः।

(५) [illegible]

[illegible]

[illegible]

[illegible]

[illegible] नीलोत्पलत्वमित्यादौ [illegible]

[illegible] भावः।

पलादिवृत्तित्वरूपनीलिमादिसामानाधिकरण्यस्य उत्पलत्वादौ लाभनिर्व्वाहात् प्रकृते च (१) तदितरावृत्तित्वांशः साकल्यांशश्च उपलक्षणतयैव विवक्षितः न तु ज्ञानान्वयिविषयविशेषणतया अतः परामर्शस्य तदविषयकत्वेऽपि न क्षतिः। व्याप्तिवैशिष्ट्यसामानाधिकरण्यञ्च व्याप्तिविशिष्टप्रतियोगिकत्वमेव, पक्षधर्म्मपदस्य प्रतियोगितासम्बन्धेन पक्षानुयोगिकसमभिव्याहृतव्याप्तिघटकहेतुसम्बन्धावच्छिन्नपरतया प्रकृत्यर्थतावच्छेदकताघटकसम्बन्धेनैव च प्रकृत्यर्थवृत्तितायाभावप्रत्ययेन बोधनात् (२) प्रतियोगितासम्बन्धेन प्रकृत्यर्थवृत्तिताया एव तत्पदोत्तरभावप्रत्ययतोलाभात् तस्याच तत्प्रतियोगिकत्वरूपत्वात्, तत्सम्बन्धविधया भासमाने संयोगादौ तत्प्रतियोगिकत्वस्य तदीयसम्बन्धविधया भानात्। व्याप्तिविशिष्टप्रतियोगिकत्वमपि सम्बन्धविषयतायामवच्छेदकमिति व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षधर्म्मपदार्थतावच्छेदकपक्षसम्बन्धविषयताकत्वरूपं विशिष्टविषयकत्वं परामर्शेऽप्यक्षतमेवेति चेदेवमपि व्याप्तिविशिष्टोयः पक्षधर्म्मस्तस्य तत्त्वेन तत्प्रतियोगिकत्वरूपसम्बन्धे विशेषणतया पक्षधर्म्मत्वावच्छिन्नविशेषिततत्प्रतियोगिकत्वावच्छिन्नविषयताया एव विशिष्टान्वयबलेन लाभात् परामर्शे च पक्षधर्म्मत्वावच्छिन्नस्य पक्षांशेऽप्रकारतया तदवच्छिन्नप्रतियोगिकत्वावच्छिन्नसम्बन्धविषयताकत्वविरहेण तद-

---

(१) एवञ्च लक्षणवाक्यप्रतिपाद्यावगाहिता परामर्शे सङ्गमयति, प्रकृते चेत्यादिना परामर्शेऽक्षतमित्यन्तेन।

(२) भावप्रत्यये इत्यादि।

संग्रहात्। यदि च पक्षधर्म्मत्वमप्युपलक्षणमुच्यते तदापि अभेद सम्बन्धेन उपपक्षधर्म्मांशे प्रकारीभवतो व्याप्तिविशिष्टत्वावच्छिन्नस्य उपलक्षणत्वे तदन्तर्गतव्याप्तेरपि तथात्वेन तदविषयकज्ञानाद्वृत्तेः तस्य विशेषणत्वध्रौव्यात्(१)पक्षांशे प्रकारीभवति हेतौ व्याप्तिप्रकारकपरामर्शस्यासंग्रह. अभेदसम्बन्धेन व्याप्तिविशिष्टस्य हेतुविषयतानवच्छेदकत्वात् एवं भावप्रत्ययार्थप्रविष्टं सकलतद्वृत्तित्व तन्निष्ठभेदप्रतियोगितानवच्छेदकत्वरूपं साकल्यघटितस्य तस्यान्याद्दशस्य दुर्व्वचत्वात्, नानाव्यक्तिकस्य गुरुत्वादेर्यत्र प्रकृत्यर्थतावच्छेदकता तत्र प्रत्येकं प्रकृत्यर्थनिष्ठभेदप्रतियोगितावच्छेदकस्यापि तस्यानुगततदवच्छेदकावच्छिन्नस्य(२) तादृशभेदप्रतियोगितानवच्छेदकत्वमुपेयते नातस्तदसंग्रहः, अन्यथा यथाश्रुतेऽप्यनिस्तारात् कस्याश्चिदपि गुरुत्वादिव्यक्तेः सकलगुरुत्वादिमद्वृत्तित्वात्। न चैवं गुरुत्वमित्यादितो गन्धादेरपि बोधापत्तिः तस्यापि गुणत्वाद्यवच्छिन्नस्य गुर्व्वादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वात् इति वाच्यम्। गुणत्वाद्यवच्छिन्ने तदितरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वरूप-

---

(१) व्याप्तिविशिष्टत्वावच्छिन्नस्य विशेषणतया 'व्याप्तत्वादिरूपं' [illegible] तादृश-विशिष्टत्वस्य [illegible] प्रतियोगितावच्छेदकत्वविषयताकत्वस्य निवि-ष्टान्वयबोधाभावात् तादृशपरामर्शे च व्याप्तिविशिष्टत्वावच्छिन्नस्य पक्षांशे प्रकारतया [illegible] प्रतियोगिताविशिष्टावच्छेदकत्वविषयताकत्वविरहात् तदसंग्रह इति भावः।

(२) प्रकृत्यर्थतावच्छेदकावच्छिन्ननिष्ठभेदप्रतियोगितावच्छेदकत्वे [illegible]। कुत्रचिन्नैव पाठो दृश्यते।

घटत्वादौ प्रकृत्यर्थस्य भावः । इतरभेदप्रतियोगितानवच्छेद-कत्वस्य घटत्वादिनिष्ठस्यापि प्रकृत्यर्थता [illegible] तज्ज्ञापकत्वाद्यविवक्षितया न बोधनिर्वाहः, अतो [illegible] धर्मत्वमेव प्रवृत्तिनिमित्तमुच्यते, धर्मत्वञ्च प्रकृत्यर्थतावच्छेद-कताघटकसम्बन्धेन सम्बन्धत्वमेव, घटत्वमित्यादितो द्रव्यत्वादि-बोधप्रसङ्गः रूपादिबोधप्रसङ्गश्च भवतामपि समानः, द्रव्य-त्वादेरपि घटत्वादिविशिष्टतया घटेतरवृत्त्यभावप्रतियोगिता-वच्छेदकत्वात् घटरूपादेरपि घटरूपत्वावच्छिन्नस्य घटनिष्ठभेद-प्रतियोगितानवच्छेदकत्वात्, एवं गुरुत्वमित्यादितो गुरुत्वस्य नियतरसादिबोधो भवतामपि दुर्वारः, तदितरावृत्तित्वादिना भासमाने धर्मे तत्तत्प्रकृत्यर्थतावच्छेदकनिष्ठाधेयत्वसम्बन्धेन प्रकृ-त्यर्थस्यान्वयमुपगम्य तद्वारणे च धर्मत्वेन भासमानेऽपि धर्मत्वे प्रकृत्यर्थतावच्छेदकनिष्ठत्वसहितनिरूपितत्वसम्बन्धेन प्रकृत्यर्थान्वय-मुपगम्य तत्तत्प्रकृत्यर्थतावच्छेदकनिष्ठाधेयताया धर्मान्तरेष्वस-त्त्वेन तादृशातिप्रसङ्गो वारणीयः (३) । एवञ्च व्याप्तिविशिष्टाभिन्न-

---

(१) ननु इतरत्वादौ भावप्रत्ययस्य खण्डशक्तिः न तु विशिष्टे, तथा वैशि-ष्ट्यस्यान्वयबललभ्य तथाच एकधर्मावच्छेदेन अवच्छेदकत्वानवच्छेदकत्वे विप-र्यये, एव कुत्रचित् भागविशेषः परित्यज्यते च अतोनोक्तदोषाणामवसर इत्यत आह, लाघवाच्चेति ।

(२) उक्तातिप्रसङ्गः उभयमते समानः, परन्तु मन्मते शक्यतावच्छेदकस्य लाघवं विनिगमकमिति भावः ।

(३) नन्वत्र कल्पे लाघवेन प्रकृत्यर्थतावच्छेदकनिष्ठाधेयतासम्बन्धेन प्रकृत्यर्था-न्वयः कथं न स्वीकृतः । न च घटे घटत्वमित्यादिवाक्यस्य निराकाङ्क्षतापत्तिरिति

पक्षधर्म्मप्रतियोगिकत्वेन पक्षसम्बन्धे व्याप्तिविशिष्टपक्षधर्म्मतापदेन बोध्यमाने अभेदेन पक्षधर्म्मान्वयिनि व्याप्तिविशिष्टे विशेषणतापन्न-व्याप्तिवैशिष्ट्यस्यापि पक्षधर्म्मे विशेषणतया भानमुपेयं एकविशेषण-तयोपस्थितस्य पदार्थतावच्छेदकस्य स्वातन्त्र्येणैव इतरविशेषण-तया अभानात् अन्यथा घटं जानातीत्यादौ घटत्वादिविशिष्टनिरू-पितविषयिताशालिज्ञानपर्य्यन्तस्य तात्पर्य्यविषयत्वेऽपि लाभासम्भ-वात् पदार्थतावच्छेदकघटत्वादेः स्वावच्छिन्ननिरूपितत्वसम्बन्धेन विषयितायामन्वयेनैव तल्लाभनिर्व्वाहात्। एवञ्च व्याप्तिवैशिष्ट्य-विशेषित-व्याप्तिविशिष्टाभिन्नत्वोपलक्षित-पक्षधर्म्मप्रतियोगिकत्व-मेव विषयतावच्छेदकतया विवक्षितमिति पक्षधर्म्मे व्याप्तिवि-शिष्टाभेदानवगाहिपरामर्शस्यापि संग्रहः। वह्निव्याप्यधूमवा-निति ज्ञाने व्याप्तिवैशिष्ट्यस्य धूमांशेऽप्रकारत्वेऽपि तदंशे सम्बन्धतया भानादेव धूमनिष्ठावच्छेदकतारूपविषयितायामवच्छेदकत्वसम्भ-वात् तद्घटितव्याप्तिविशिष्टधूमप्रतियोगिकत्वविशिष्टहेतुतावच्छेद-कसम्बन्धविषयकत्वमव्याहतं (१)। न च व्याप्तिविशिष्टस्य हेतोः

वाच्यम्। घटत्वमित्यनेन आधेयतावद्घटीयमित्याकारकस्याधेयत्व-घटोभय-प्रकारकस्य बोधस्य जननात् घटे इत्यनेन च घटप्रकारकाधेयताविशेष्यकबोध-जननात् घटे घटत्वमित्यनेन घटाधेयत्वोभयधर्म्मितावच्छेदकक-घटविशिष्टाधेयता-प्रकारकबोधजनने बाधकाभावः विधेयांशे अधिकावगाहिबोधस्योपगमात् अन-भ्युपगमे भवन्मतेपि समानम्। अत्रेदं बोध्यं, घटत्वत्वं नास्तीत्यनुगतप्रतीत्युप-पत्ति, घटत्वत्वस्य आधेयतासम्बन्धेन घटत्वविशिष्टाधेयताघटोभयात्मकतया तद-भावस्य अनुगतसम्बन्धेन निर्वक्तुमशक्यत्वादिति ध्येयम्।

(१) व्याप्तिवैशिष्ट्यविषयताघटितव्याप्तिवैशिष्ट्यविषयतानिरूपितविषयतानि-रूपितप्रतियोगिकत्वविषयतानिरूपितपक्षसम्बन्धविषयताकत्वरूपं व्याप्तिविशिष्टा

संयोगादिरूपसम्बन्धांशे सम्बन्धतया भासमाने तत्प्रतियोगिकत्वे तादृशहेतोः सम्बन्धान्तराभानात् तस्यापि च संयोगादौ सम्बन्धान्तराभानात् तदीयसम्बन्धान्तरघटित(१) व्याप्तिविशिष्टप्रतियोगिकत्वविशिष्टसंयोगादिविषयकत्वं (२) वह्निव्याप्यधूमवानिति बुद्धेर्दुरुपपादमेवेति वाच्यम्। तदवच्छिन्नविषयताकत्वरूपतद्विशिष्टविषयकत्वस्य तदीयसम्बन्धाभानेऽप्यव्याहतेः। अन्यथा गुरुमते ज्ञानस्य विशिष्टविषयकत्वानुपपत्तेस्तैर्विशिष्टबुद्धौ सम्बन्धभानानुपगमात्। न च वैशिष्ट्यांशे विशेषणीभवन्त्या व्याप्तेर्व्याप्तिविशिष्टेत्यादिवाक्यजन्यबुद्धौ सम्बन्धस्य सम्बन्धोऽप्येतन्मते विषय इति तद्घटितमेव विशिष्टं (३) व्याप्तिविशिष्टपक्षधर्मतापदार्थः, एवं व्याप्तिविशिष्टस्य हेतोः संयोगादिसम्बन्धांशे भासमानतत्प्रतियोगिकत्वांशेऽपि सम्बन्धान्तरभानमावश्यकं तथाच तद्घटितव्याप्तिविशिष्टप्रतियोगिकत्वस्य पक्षसम्बन्धनिष्ठविषयतावच्छेदकत्वं लक्षणवाक्यलभ्यमिति

भिन्नत्वोपलक्षितव्याप्तिवैशिष्ट्यविशेषितहेतुप्रतियोगिकत्वविशिष्टहेतुतावच्छेदकसम्बन्धावगाहित्वं लक्षणवाक्यैकदेशप्रतिपाद्यं तादृशपरामर्शात्मकज्ञानेऽक्षतमित्यर्थः।

(१) तादृशधूमीयसम्बन्धान्तरं निरूपितत्व प्रतियोगिकत्वस्य स्वरूपं तद्घटितेत्यर्थः।

(२) लक्षणवाक्यप्रतिपाद्यं व्याप्तिविशिष्टधर्म्मिनिष्ठावच्छेदकतानिरूपितनिरूपितत्वनिष्ठावच्छेदकतानिरूपितप्रतियोगिकत्वनिष्ठावच्छेदकतानिरूपितस्वरूपसम्बन्धनिष्ठावच्छेदकतानिरूपितसंयोगादिनिष्ठसंसर्गताकत्वरूपम्।

(३) वैशिष्ट्यांशे व्याप्तेः सम्बन्धः प्रतियोगित्वं तस्य सम्बन्धोऽनुयोगित्वं प्रतियोगित्वं तद्घटितमेव विशिष्टं व्याप्तिप्रतियोगिकप्रतियोगिकत्वविशिष्टवैशिष्ट्याश्रयनिरूपितप्रतियोगिकत्वावच्छिन्नहेतुतावच्छेदकसम्बन्ध इत्यर्थः।

तादृशविशिष्टस्य च स्वं व्याप्यादेः संसर्गतया तद्वैशिष्ट्यावगाहि परामर्शीयविषयतावच्छेदकता तत्र वैशिष्ट्यांशे व्याप्तिप्रतियोगिकत्वमात्रस्य (१) संसर्गमर्यादया भानेन तत्र तदीयसम्बन्धान्तराभानात्। पक्षसम्बन्धांशे भासमानवैशिष्ट्यप्रतियोगिकत्वांशेऽपि हेतो सम्बन्धान्तराभानादिति वाच्यम्। सम्बन्धान्तरावच्छिन्ने वैशिष्ट्यांशे(२) व्याप्यादेः सम्बन्धान्तरस्यानिरूपकस्य भानेऽपि तस्य वैशिष्ट्यनिष्ठविषयतावच्छेदकत्वाविरहेणैव सामञ्जस्यात्। नहि यस्मिन् विषये यस्य यत्सम्बन्धस्य भानं तन्निष्ठविषयताया तदीयतत्सम्बन्धावच्छिन्नत्वं विशिष्टवैशिष्ट्यबोधे भासत एव इति नियमः प्रामाणिकः, घटं जानातीत्यादिवाक्यजन्यघटत्वादिविशिष्टवैशिष्ट्यबोधे घटादिविषयताया समवायानुयोगित्वावच्छिन्नत्वभानस्यापि नियमेनाभ्युपगमात्। अथ व्याप्तिघटकहेतुतावच्छेदकसम्बन्धावच्छिन्नपरपक्षधर्मपदोत्तरभावप्रत्ययस्य उक्तरीत्या(३)प्रकृत्यर्थतानवच्छेदकसम्बन्धान्तर(४)व्यावृत्तहेतुप्रतियोगिकत्वबोधकतया सम्बन्धान्तरस्यातद्वत्त्वेन(५) तत्संसर्गकहेतुमत्ताज्ञानवारणेऽपि हेतुतावच्छेदकसम्बन्धसंसर्गकनिर्धर्मितावच्छेदकज्ञानवारणमशक्यमेव, तस्यापि

---

(१) मात्रपदेन प्रतियोगिकत्वे व्याप्तिनिरूपितत्वस्य व्यवच्छेदः।

(२) वैशिष्ट्यांशे प्रतियोगिकत्वरूपवैशिष्ट्यांशे, व्याप्यादेरित्यादिपदेन व्याप्तिविशिष्टहेतोः परिग्रहः।

(३) प्रकृतार्थतावच्छेदकतानिष्ठत्वसहितनिरूपितत्वसम्बन्धेन प्रकृत्यर्थस्य स्वावच्छेदकतावच्छेदकधर्मे अन्वयमुपगम्येत्यर्थः।

(४) व्याप्तिघटकसम्बन्धातिरिक्तसम्बन्धेत्यर्थः।

(५) तादृशहेतुप्रतियोगिकत्वनिरूपितत्वेनेत्यर्थः।

विशिष्टप्रतियोगिकत्वावच्छिन्नतादृशसम्बन्धविषयकत्वात् । न च पक्षपदस्य धर्म्मितावच्छेदकविशिष्टार्थकतया पक्षधर्म्मतापदेन धर्म्मितावच्छेदकविशिष्टधर्म्म्यनुयोगिकत्वावच्छिन्नससर्गबोधनात् तदवच्छिन्नसंसर्गावगाहिज्ञानमेव ज्ञानान्तार्थं इति निर्धर्म्मितावच्छेदकज्ञानव्यावृत्तिरिति वाच्यम् । पक्षधर्म्मतापदेन पक्षधर्म्मप्रतियोगिकत्वेनैव पक्षसम्बन्धबोधनात् पक्षानुयोगिकत्वेन सम्बन्धस्य तदबोध्यत्वात् । मैवम् । यतः संशयवारणाय ज्ञानपदस्य निश्चयार्थकत्वमावश्यकं, निश्चयत्वञ्च विपरीतकोटिधर्म्मितावच्छेदकतानापन्नधर्म्मावच्छिन्नविशेष्यताकज्ञानत्वं, तथाच तादृशविशेष्यताकत्वावच्छेदेन व्याप्तिविशिष्टप्रतियोगिकसम्बन्धावगाहित्वस्य विवक्षणात् (१) हेतुमत्तांशे निर्धर्म्मितावच्छेदकज्ञानं न लक्षणघटकमिति, एवञ्च पक्षपदस्यानुपादानेऽपि सामञ्जस्यात्तदुपादानं धर्म्मपदस्य हेतुतावच्छेदकसम्बन्धप्रतियोगिपरत्वलाभायेत्यवधेयम् (२) । अथवा (३)

---

(१) यथाश्रुते पर्व्वतो वह्निव्याप्यवान् वा महानसं धूमवद्वेत्यादिसंशयवारणसमर्थमेव तादृशव्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नतादृशसम्बन्धविषयकत्वात् विपरीतकोटिधर्म्मितावच्छेदकतानापन्नधर्म्मावच्छिन्नविशेष्यताकत्वाद्वेत्यतस्तादृशविशेष्यताकत्वावच्छेदेन तादृशावगाहित्वस्य विवक्षणं, तथाच तादृशज्ञाने तादृशावगाहित्वाभावात् तद्वारणं, यादृशविषयताया यादृशविषयतायाः साक्षान्निरूप्यनिरूपकभावः तादृशविषयताघटितावगाहिताद्वयोरेव ज्ञाननिष्ठयोरवच्छेद्यावच्छेदकभाव इति सिद्धान्तात् ।

(२) प्रतियोगितासम्बन्धेन हेतुतावच्छेदकसम्बन्धावच्छिन्नपरत्वलाभाय सम्बन्धसामान्यावच्छिन्नपरत्वे प्रकृत्यर्थतावच्छेदकनिष्ठाधेयतायाः सम्बन्धान्तरे सत्त्वेन तादृशाधेयत्वविशेषितनिरूपितत्वसम्बन्धेन प्रकृत्यर्थविशेषितप्रतियोगिकत्वावच्छिन्नसंसर्गान्तरावगाहिज्ञानजन्ये दोषवारणं तु स्फुटमेवेत्यवधेयम् ।

(३) पक्षपदसार्थक्याय कल्पान्तरमाह, अथवेति ।

धर्म्मान्तरविशिष्टावच्छिन्नबोधकप्रकृतिकभावप्रत्ययः प्रकृत्यर्थताव-च्छेदकधर्म्मांस्ताद्रूप्येणैव बोधयति (१)। गुरुत्वमेकत्वमित्यादितोजातिविशेषपुरस्कारेणैव गुरुत्वैकत्वादिगुणबोधनात्। उक्तञ्च गुणविवृतौ (२) दीधितिकृता "प्रतीतिस्तु ताद्रूप्येण धर्म्मत्वेन वा" इति, न च शक्त्यानन्त्यप्रसङ्गान्नायं पक्षः साधुरिति वाच्यम्। तदादीनामुपलक्षणीभूतबुद्धिविषयतावच्छेदकत्वेन प्रवृत्तिनिमित्तघटत्वाद्यनुगमेन शक्त्यैक्यवत् प्रकृतेऽपि प्रकृत्यर्थतावच्छेदकतावच्छेदकत्वरूपोपलक्षणेन प्रकृत्यर्थतावच्छेदकतावच्छेदकजातिविशेषादीनामनुगममम्भवेन शक्त्यैक्यसम्भवाद्विशेषरूपेण लक्षणाया एव वोपगन्तव्यत्वात्। तादृशभावप्रत्ययार्थे च प्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकताघटकसम्बन्धेन (३) सम्बद्धत्वं संसर्गतया भासते तथाच प्रकृते पक्षानुयोगिकसम्बन्धावच्छिन्नविशिष्टानुयोगिकसम्बन्धावच्छिन्नबोधकपक्षधर्म्मपदोत्तरभावप्रत्ययस्य पक्षानुयोगिकसम्बन्धत्वेनैव तादृशसम्बन्धबोधकतया पक्षपदस्य च धर्म्मितावच्छेदकावच्छिन्नपरतया धर्म्मितावच्छेदकविशिष्टानुयोगिकत्वावच्छिन्नव्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नसम्बन्धावगाहिज्ञानलाभात् सामञ्जस्यम्। सम्बन्धांशे विशेषण-

(१) न तु प्रकृत्यर्थविशेषितधर्म्मत्वेनेति शेषः।

(२) उदयनाचार्य्यप्रणीतगुणकिरणावलीविवृतौ।

(३) प्रकृत्यर्थतावच्छेदकताघटकसम्बन्धः प्रतियोगित्वं तेन सम्बद्धत्वं प्रतियोगिकत्वमेव, एतेनान्वयबलेन व्याप्तिविशिष्टधर्म्मिप्रतियोगिकत्वावच्छिन्नसम्बन्धलाभो दर्शितः।

प्रतियोगिकत्वं यथा विशेषणस्य सम्बन्धतया भासते तथा विशेष्यानुयोगिकत्वमपि विशेष्यस्य सम्बन्धतया भासते। अतः पक्षहेतुसम्बन्धविधया भासमानस्य संयोगादेर्व्विषयता हेतुप्रतियोगिकत्वेनेव पक्षतावच्छेदकावच्छिन्नानुयोगिकत्वेनाऽप्यवच्छिन्नेति न किञ्चिदनुपपन्नम्। 'पदार्थतावच्छेदकद्वयेति अन्वयबलेन एकपदार्थतावच्छेदकविशेषितधर्म्मिसंसर्गोपरागेणापरपदार्थतावच्छेदकबोधकत्वादित्यर्थः। ननु कर्म्मधारयलभ्यव्याप्तिविशिष्टाभिन्नपक्षधर्म्मरूपप्रकृत्यर्थान्वितपक्षसम्बन्धरूपतल्प्रत्ययान्तार्थस्य लक्षणवाक्यार्थघटकस्याप्रसिद्ध्या ह्रदोवह्निमानित्यादिभ्रमानुमिताव्याप्तिरित्याशङ्कायां समाधत्ते, 'ज्ञानपदेति, 'ज्ञानपदोपसन्धानेन' ज्ञानबोधकपदसमभिव्याहारनियन्त्रितव्युत्पत्तिविशेषेण, 'बाधिताबाधितसाधारणतज्ज्ञानलाभात्' पक्षधर्म्मतांशे बाधिताबाधितसाधारणस्य व्याप्तिवैशिष्ट्यसामानाधिकरण्यस्य ज्ञानलाभात्। अयमाशयः। ज्ञानबोधकपदसमभिव्याहृतस्य विषयविशेषणतया स्वार्थबोधकस्याऽपि पदस्य विषये स्वार्थानन्वयनिश्चयदशायां विषयाविशेषणतयैव ज्ञानविषयतावच्छेदकतया स्वार्थबोधकत्वं व्युत्पत्तिसिद्ध, कथमन्यथा विशेषदर्शिनोऽपि भ्रान्तिज्ञालोहितवह्निज्ञानवानयमित्यादिवाक्यं प्रयुञ्जते, तथाच वह्निव्याप्तिविशिष्टप्रतियोगिकत्वविषयतानिरूपितह्रदसम्बन्धविषयताशालिज्ञानत्वेन स्वमालकपरामर्शस्याऽप्युक्तलक्षणवाक्यालाभः। अथ लोहितवह्निं जानातीत्यादौ लोहितवह्न्यादिपदार्थस्याभेदेनान्वये तात्पर्य्यानुपगमे समासासाधुत्वेन तात्पर्य्यस्यावश्यकत्वेऽपि तद्वाक्य-

प्रामाण्यनिर्वाहाय लोहितपदस्य तत्र लौहित्यादिना भासमाना र्थकत्वमुपेयते, तत्र तत्पदशक्तिविरहेऽपि ज्ञानविषयबोधकतत्त- दर्थकपदस्य तत्त्वेन भासमाने निरूढलक्षणोपगमात्। तेन रूपेण भासमानत्वञ्च तत्प्रकारतानिरूपकविषयतावत्त्वं तादृशविषयता- वच्छेदेन च वह्न्यादेर्विषयतानिरूपकत्वं विषयितार्थकविभक्ति- समभिव्याहारात् प्रतीयते, अतो वह्निः शुक्ल इत्यादि प्रमाया- लोहितो वह्निरित्यादिज्ञानान्तरीयलौहित्यादिप्रकारतानिरूपक- विषयतावद्वह्न्यादिविषयकत्वेऽपि न तज्ज्ञानपरोक्षवाक्यस्य प्रामाण्यापत्तिः लौहित्यादिविशेष्यतापन्नवह्न्याद्यविषयकवह्न्यादि- निष्ठतद्विषयितायाः लौहित्यादिविशेष्यतापन्नानिरूपितत्वात्। द्रव्यत्वादिनिष्ठघटाद्यनुयोगिकाधिकरणतानिरूपकत्वे घटाद्याधे- यतावच्छेदकताया यादृशमवच्छेदकत्वं विषयितायास्तादृश विष- यितानिरूपकतावच्छेदकत्वं विषयतात्मकमपि विषयताया- मविरुद्धमेव। एवञ्च प्रकृतेऽपि व्याप्तिविशिष्टपदं व्याप्तिप्रकारेण भासमानपरं तस्य पक्षधर्म्मे अभेदेनान्वयः, तस्य भावप्रत्ययार्थे पक्षसम्बन्धे स्वप्रतियोगिकत्वेन भासमानत्वं सम्बन्धः, यस्य विशे- षणस्य येन सम्बन्धेन विशेष्ये अन्वयः ज्ञानविषयतया भासमाने विशेष्ये स्वीयतत्सम्बन्धोपरागेण भासमानत्वस्यैव तद्विशेषणसम्बन्ध- तया भानमिति व्युत्पत्तेः, अराजकीये धननिष्ठस्वत्वे राजकीयत्व- भ्रमरूपज्ञानदशायां राज्ञो धनं ज्ञानातीत्यादिविशेषदर्शिवाक्ये षष्ठ्यर्थ- स्वत्वे निरूपितत्वसम्बन्धेन राज्ञोऽन्वये योग्यतानुपपत्त्या निरूपित- त्वेनैव भासमानत्वस्य तत्र तत्सम्बन्धताया उपगन्तव्यत्वात्।

तथाच व्याप्तिप्रकारेण यद्भासते तत्प्रतियोगिकत्वेन भासमान-पक्षसम्बन्धावगाहिज्ञानजन्यत्वलाभान्न भ्रान्तानुमित्यव्याप्तिर्न वा तत्र लक्षणवाक्यालक्षणबोधानुपपत्तिरिति चेत्, न, एवमपि पक्ष-धर्म्मपदस्य यथाश्रुतार्थपरतया आवश्यकत्वाद्वह्निव्याप्यजलवान् ह्रद इत्यादिपरामर्शजन्यभ्रमानुमितिसंग्रहेऽपि वह्निव्याप्यधूमवान् ह्रद इत्यादिभ्रमजन्यानुमितेर्दुःसंग्रहत्वात्। तत्र व्याप्तिप्रकारेण भासमानधूमे वास्तवपक्षधर्म्मताविरहात् पक्षधर्म्मपदस्य पक्षधर्म-त्वेन भासमानार्थकत्वे पक्षसम्बन्धस्य प्रकृत्यर्थतानवच्छेदकतया तदुत्तरभावप्रत्ययेन बोधनासम्भवात्, तेन रूपेण भासमानत्वरूप-प्रकृत्यर्थतावच्छेदकस्य भावप्रत्ययेन विवक्षणे परामर्शस्य तद-नवगाहितया असामञ्जस्यात् (१)। एवञ्च गुणादिरूपपक्षानु-योगिकहेतुतावच्छेदकसंयोगादिसम्बन्धाप्रसिद्धावपि गुणादिरूप-पक्षे संयोगादिना हेतुमत्ताभ्रमजन्यानुमितौ नाव्याप्तिः। पक्षा-नुयोगिकत्वविषयतानिरूपितसंयोगादिविषयताशालित्वेन तादृश-भ्रमस्यापि लक्षणवाक्यतो लाभात्। इदञ्चापाततः पदार्थद्वया-भेदविवक्षायामेव कर्म्मधारयस्य साधुतया अत्र पक्षधर्म्मे व्याप्ति-विशिष्टाभेदाविवक्षाया कर्म्मधारयानुपपत्तिः, तद्विवक्षायाञ्च भ्रमस्थले विवक्षितलक्षणवाक्यार्थाप्रसिद्ध्याऽव्याप्ति दुष्टैव, एतदभिप्रायेणैव भ्रमानुमित्यव्याप्तिं मणिकृद्दूषयति,

---

(१) पक्षधर्म्मपदस्य [illegible]। [illegible]

उक्तवाक्यस्य (१) चाप्रामाण्यमिष्टमेव, किन्तु लोहितं वह्निं जानातीत्यस्यैव प्रमाणत्वम्।

चिन्तामणिदीधितिः।

तन्न परामर्शेन नियमतो व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यग्रहे मानाभावात् गौरवेण च तद्विषयत्वेनाहेतुत्वात्, सम्बन्धसम्बन्धाग्रहेऽपि विशिष्टज्ञानत्वस्योपपादितत्वात्, भ्रमस्थले च तादृशसामानाधिकरण्याप्रसिद्ध्या तज्ज्ञानासम्भवात्, असत्ख्यातिनिरासात्। अवान्तरवाक्यार्थायोग्यत्वनिर्णये महावाक्यार्थज्ञानानुदयात् विषाणे शशसम्बन्धाभावनिश्चयदशायां शशविषाणजन्यमिदं कार्मुकं इति शाब्दबुद्धेर्भ्रमणापि दुरुपपादत्वात्।

गादाधरी विवृतिः।

सांसर्गिकविषयताया: संसर्गावच्छिन्नत्वं निर्युक्तिकमित्याशयेन दूषयति, 'परामर्शेनेति परामर्शत्वस्य व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यग्रहत्वव्याप्यत्वे मानाभावादित्यर्थः। व्याप्तिविशिष्टधूमसंयोगी वह्निव्याप्यधूमवांश्च पक्ष इत्यादिसमूहालम्बनपरामर्शस्य व्याप्तिसम्बन्ध-पक्षसम्बन्धप्रकारकतया तत्सम्बन्धावगाहित्वं प्रामाणिकमे

(१) लोहितवह्निं जानातीति वाक्यस्येत्यर्थः।

इति नियमत इत्युक्तं, तथाच यत्र व्याप्तिवैशिष्ट्यं पक्षधर्म्मता च संसर्गतयैव भासते तज्जन्यानुमितावव्याप्तिर्यथाश्रुतलक्षण इति भावः। ननु तादृशज्ञानादनुमितिर्न भवत्येव तादृशसामानाधिकरण्यविषयकत्वेनैव परामर्शस्यानुमितिहेतुत्वात्तथाच क्वाव्याप्तिरित्यत आह, 'गौरवेण चेति, व्याप्तिविशिष्टहेतुविशिष्टपक्षज्ञानत्वेनैव लाघवेन हेतुत्वात् व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यविषयकत्वेन हेतुत्वे सामानाधिकरण्यविषयकत्वस्याधिकस्य निवेशात्, तथाच तदुभयसामानाधिकरण्यानवगाहिनोऽपि विशिष्टज्ञानादनुमित्युपपत्तिर्निष्प्रत्यूहैवेति भावः। ननु सम्बन्धसम्बन्धावगाहिज्ञानत्वमेव विशिष्टज्ञानत्वं न तु सम्बन्धज्ञानत्वमेव दण्डपुरुष-संयोगा इत्यादिसमूहालम्बनस्यापि तथात्वापातात् तथाचानुमितिजनकज्ञाने विशेषणीभूतव्याप्ति-साधनयोः संसर्गसंसर्गानवगाहित्वे तद्विशिष्टज्ञानत्वमेव तस्य नोपपद्यत इति कथमनुमितिजनकत्वमित्यत आह, 'सम्बन्धसम्बन्धेति, 'अग्रहेऽपि अविषयीकरणेऽपि, 'विशिष्टज्ञानत्वस्येति। अयमाशयः। सम्बन्धसम्बन्धावगाहिज्ञानत्वमपि न विशिष्टज्ञानत्वं सम्बन्धसम्बन्धमादायापि समूहालम्बनसम्भवात्[1] यदि तु प्रकारत्वेनैव तद्विशिष्टधीत्वं, प्रकारत्वञ्च विषयताविशेषः। न च संसर्गांशनिर्विशेष्यतादिविशिष्टज्ञानादौ प्रकारत्वादिकं दुर्वचं स्यात् तथापि प्रकारताया नाति-

[1] [illegible]

संसर्गिकविषयतानिरूपितविषयतात्वं यदि तदा विशेष्यताया अपि तथात्वादतिप्रसङ्ग. अपि तु संसर्गविषयतानिरूपितप्रतियोगित्व-विषयतानिरूपितविषयतात्वमेव, विशेष्यता च तादृशानुयोगित्व विषयतानिरूपितैव न तु तादृशप्रतियोगित्वविषयतानिरूपिता विशेषणांश एव संसर्गप्रतियोगिताभानादिति नातिप्रसङ्गः (१) एवं प्रतियोगित्वस्थानेऽनुयोगित्वं निवेश्य विशेष्यतात्वं निर्व्वाच्यमिति संसर्गीयप्रतियोगित्वानुयोगित्वरूपसंसर्गान्तरभानं विशिष्टबुद्धावा-वश्यकमिति वाच्यम्। संसर्गतात्ववत्प्रकारतात्व-विशेष्यतात्वयोरपि स्वरूपसम्बन्धविशेषात्मकत्वात्। विशिष्टबुद्धेः संसर्गसंसर्गावगाहि-तानियमेऽपि उक्तरीत्या भ्रमानुमितावव्याप्तिर्निष्प्रत्यूहैवेत्याशये-नाह, 'भ्रमस्थले चेति, 'तज्ज्ञानासम्भवादिति व्याप्तिवैशिष्ट्यसमा-नाधिकरणपक्षधर्मत्वज्ञानासम्भवादित्यर्थः। तथाच तादृशविशिष्ट-ज्ञानजन्यत्वं लक्षणवाक्यार्थः, तस्य भ्रमानुमितिसाधारण्यमशक्य-मेव भ्रमस्य व्याप्तिवैशिष्ट्यसमानाधिकरणपक्षधर्मताविषयकत्वा-सम्भवेन लक्षणवाक्यार्थानन्तर्भावादिति भावः। ननु भ्रमेऽसदेव वैशिष्ट्यं भासते इति टीकाकारानुमतं (२) तथाच वह्निव्याप्यधूमवान् ह्रद इति भ्रमस्य व्याप्तिविशिष्टधूमादिप्रतियोगिक-ह्रदानुयोगिका-सद्वैशिष्ट्यविषयकत्वमव्याहतमेवेति कथं तादृशज्ञानासम्भव उच्यते इत्यत आह, 'असदिति, 'असत' 'ख्यातिनिरासात्' ज्ञानविषयत-

(१) [illegible] ।

(२) [illegible] ।

निरासात्, ज्ञानविषयताव्यापकत्वस्य सत्त्वे व्यवस्थापनादिति यावत् । यदि चासतो ज्ञानविशयत्वसत्त्वेऽपि अभावाधिकरणताया अपसिद्धान्तत्वात् ज्ञानविषयत्वसमानाधिकरणाभावाप्रतियोगित्वरूपं तद्व्यापकत्वं सत्त्वेऽक्षतमेव इति नार्थतोऽसत्ख्यातिनिरासस्सम्भव इति मन्यते तदा सद्वृत्तित्वे ज्ञानविषयतात्वव्यापकत्वमेव विवक्षणीयम्, असत्ख्यातिवादिनाम् (१) असद्वैशिष्ट्यज्ञानविषयत्वस्य पारमार्थिकत्वात् । न च भ्रमस्य सन्मात्रविषयकत्वे भ्रमत्वव्याघात इत्याशङ्क्य (२) तथात्वेऽपि व्यधिकरणप्रकारकत्वेन भ्रमत्वनिर्व्वाहात् । इदञ्च वस्तुगतिमनुरुध्याभिहितं (३) वस्तुतोऽसद्वैशिष्ट्यभानेऽपि न प्रकृते निस्तारः अलीकस्य (४) संसर्गतयैव विषयताया वाचस्पत्यनुमतत्वात् तन्मतानुसरणेऽपि असत्याव्याप्तिर्वैशिष्ट्यसमानाधिकरणपक्षधर्म्मतायाः तल्प्रत्ययान्तेन प्रतिपादनासम्भवात् (५) अपरमार्थिकधूमप्रतियोगिकह्रदानुयोगिक-

---

(१) नन्वसद्वैशिष्ट्यविषयत्वमप्यसत् तत्राभावाधिकरणताया अपसिद्धान्तत्वात् विषयताघटकाभावाप्रतियोगित्वरूपं व्यापकत्वं सद्वृत्तित्वेऽक्षतमेवेति नार्थतोऽसत्ख्यातिनिरास इत्याशङ्क्याह, यदीति ।

(२) असत्सम्बन्धविषयकस्य भ्रमत्व इत्यभिमानेनेदमाशङ्का, तथाच तदभाववद्विशेष्यकत्वावच्छिन्न-तत्प्रकारकत्वस्यैव भ्रमत्वं न त्वसद्वैशिष्ट्यविषयकज्ञानत्वमिति भावः ।

(३) अन्यथात्र ख्यातिविषयत्वनिरसनेनेवोद्देश्यमतस्य दूषणेनासत्ख्यातिनिरासादित्युक्तम् ।

(४) वस्तुतस्तु ख्यातिविषयत्वेऽपि भ्रमानुमित्यादेरनुद्धार इत्याह, अलीकस्येति ।

(५) अन्यथा पदरञ्जनाभावादिति भावः ।

वैशिष्ट्यावगाहिभ्रमात्मकपरामर्शजन्यत्वस्य लक्षणवाक्यतोऽलाभात् लक्षणस्यासङ्घटितत्वेनाभ्रान्तस्य तत इतरभेदानुमानासम्भवाच्च। भ्रान्तपुरुषीयानुमानस्य(१) चातिप्रसक्तादिनापि सम्भवात्। ननु व्याप्तिविशिष्ट-पक्षधर्म्मयोरभेदो लक्षणवाक्यतः प्रतीयतां तथापि न तदंशस्य लक्षणघटकत्वमुपेयते अतिव्याप्त्याद्यवारकत्वादवश्य विवक्षणीयव्याप्तिविशिष्टप्रतियोगिकत्वादिविषयतानिरूपितसंसर्गीयविषयतामात्रनिवेशेनैव सामञ्जस्यात्, लक्षणवाक्यप्रतिपाद्यताया लक्षणघटकतानियतत्वे ज्ञानान्तकर्म्मधारयपक्षेऽपि अवश्य विवक्षणीयस्य ज्ञानविशेषणव्याप्तिप्रकारकत्वांशे पक्षधर्म्मताविषयकत्वावच्छिन्नत्वस्य निवेशेनैव सामञ्जस्यात् लक्षणवाक्यलभ्यस्य ज्ञानांशे पक्षधर्म्मताविषयकत्वविशेषणस्य वैयर्थ्येन लक्षणदोषात्। एवञ्च भ्रमानुमितौ न लक्षणाव्याप्तिशङ्का इत्याशयेनायोग्यताज्ञानादिशेषदर्शिनां नोक्तवाक्याद्भ्रमानुमितौ लक्षणग्रहः सम्भवतीति विशेषदर्शिनं प्रति प्रकृतवाक्यानर्थक्यमिति दूषणान्तरमाह, 'अवान्तरे'ति पक्षधर्म्माद्यंशेऽविशेषणस्य व्याप्तिवैशिष्ट्यादेर्न्यानन्तरेण ज्ञानान्वयसम्भवः व्युत्पत्तिविरोधात्, अपि तु तत्तद्विशेषणतापन्नस्यैव इति तत्र तदनन्वयनिश्चयोऽवान्तरवाक्यार्थायोग्यतानिश्चयः तस्मिन् सति समुदायलक्षणवाक्यजन्यमहावाक्यार्थज्ञानासम्भवादित्यर्थः। महावाक्यार्थयोग्यताज्ञानस्य अवान्तरवाक्यार्थविषयकत्वनैयत्येनावान्तरवाक्यार्थधीविरोधिनोऽयोग्यता-

१ ननु भ्रान्तपुरुषीयेतरभेदानुमानार्थमेव लक्षणमिदं वक्तव्यमित्यत आह भ्रान्तेत्यादि।

ज्ञानस्य सत्तामात्रार्थत्वे तत्साध्यानिर्णयेन निर्णीतत्वाभावादिति भावः । तद-
पेक्षया दृष्टान्तेन स्फुटयति, 'विषाण' इति, 'गगनकुसुमासत्त्वादि'ति, गगन
विषाणजन्यमिति वाक्यजन्यसम्बन्धप्रकारकबोधाभिप्रायेण, गगन-
विषाणजन्यमिति वाक्यजन्यबोधस्य विषाणांशेऽपि गगनसम्बन्ध
गगनसम्बन्धप्रकारकतया सम्बन्धांशे निरवच्छिन्नत्वेन तदभिधानात् ।
समासे व्यासक्तौ, समानप्रकारकत्वानुभवजनकत्वानुरोधेन पदान्तरानु-
पपत्तेः पूर्वपदस्य सम्बन्धे एव लक्षणा, समासे व्युत्पत्तिवैचित्र्येण
नामार्थयोरपि भेदान्वयस्याभ्युपगमादित्याशयेनेदमित्यपि कश्चित् ।
गगनसम्बन्धविशिष्टविषाणपरसमासघटितवाक्यजन्यबोधपरतया
व्याख्यानं पुनरसदेव, तथा सति विषाणे गगनसम्बन्धस्य पदार्थतया
अवान्तरवाक्यार्थत्वायोगात् ।

चिन्तामणिदीधितिः ।

न चात्र प्रमाप्रस्तावात् प्रमैव लक्ष्या यदि च सल्लिङ्गकपरामर्शादपि भ्रान्तानुमितिस्तदा चरमज्ञान-पदं प्रमापरमिति वाच्यम् । अव्याप्यपक्षधर्मयोस्त-त्त्वावगाहिना परामर्शेन जनितायां वस्तुतः साध्यव-त्पक्षावगाहितया प्रमायामव्याप्तेर्लिङ्गोपहितलैङ्गिक-भाननिरासेनांशिकभ्रमत्वस्याप्ययोगात्, परमेश्वर-तादृशज्ञानजन्यत्वस्य चातिप्रसञ्जकत्वात् । अतएव व्याप्तिविशिष्टे पक्षधर्मता तज्ज्ञानं वेत्यादिकमपास्तम् ।

गादाधरी विवृतिः ।

भ्रमानुमितेरलक्ष्यतया नाव्याप्तिप्रसक्तिरित्याशङ्कते, 'न चेति, 'प्रमाणप्रस्तावात्' प्रमाणतत्त्वमत्र विविच्यते इत्युपक्रमेण प्रमाणस्य निरूपणीयत्वात्, तन्निरूपणोपयोगितया प्रमैवानुमितिर्लक्षणीया। यद्यपि ह्रदो वह्निमानित्याद्यनुमितेरपि ह्रदत्वाद्यंशे प्रमात्वेऽपि विधेयांशे प्रमात्वविवक्षणे लिङ्गोपधानमतेऽपि धूलीपटलादौ व्याप्यत्वावगाहिज्ञानजन्यायां पर्व्वतादिपक्षकवह्न्याद्यनुमितौ विधेयांशे प्रमात्वस्याक्षततया लिङ्गोपहितेत्याद्यग्रिमग्रन्थासुस्थितिर्यावद्भ्रमभेदकूटविवक्षणे तु ह्रदो वह्निमान् पर्व्वतश्च वह्निमानित्यादिसमूहालम्बनानुमितेरलक्ष्यतापातेनातिप्रसङ्गस्तथापि भ्रमान्यवृत्तिविषयितावत्त्वमेव प्रमात्वमिह विवक्षणीयं उक्तसमूहालम्बनज्ञानीयवह्निमत्पर्व्वतादिविषयिता समूहालम्बनानात्मिकाया पर्व्वतो वह्निमान् इत्यनुमितावपि वर्त्तते, ज्ञानव्यक्तिभेदेन विषयिताभेदानुपगमादतस्तस्या लक्ष्यतैव, ह्रदो वह्निमानित्यनुमितिनिष्ठाया ह्रदादिविषयताया अपि भ्रमत्वघटकतया भ्रमत्वनैयत्यमेवातो न तस्याः लक्ष्यत्वम् ।

यद्यपि अत्रापि 'लिङ्गोपहितेत्यादिग्रन्थासङ्गतिरस्ति, तथाहि लिङ्गोपाधानपक्षेऽपि शुद्धपर्व्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवह्न्यादिप्रकारताया: तादृशप्रकारताशालिसंशयनिवृत्त्यर्थं तादृशसिद्धिप्रतिबन्धकत्वार्थञ्च स्वीकरणीयत्वात् तादृश्याश्च उक्तरूपत्वात् तादृशानुमितेर्लक्ष्यत्व दुष्परिहरमेवेति तथापि तादृशविषयितायां परामर्शजन्यतावच्छेदकत्वमपि विवक्षणीयं अन्यथा

इदन्त्वादिविषयतामादाय भ्रान्तानुमितेरपि तत्त्वतापातात् तथाच तादृशस्थले बाधाभावादेव तत्त्वावच्छेदकत्वात् इत्यपि चेन्न ।

ननु गन्धप्रागभावकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादावंशे बाधस्थले या पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्याव-गाहिन्यनुमितिस्तत्रैवातिव्याप्तिः तादृशानुमितेः साध्यस्य पक्ष-तावच्छेदकावच्छिन्नांशे भ्रमरूपतया फलरूपत्वात् पक्षतावच्छेदक-विशिष्टेऽपि पक्षे गन्धव्याप्यतया पृथिवीत्वादिरूपहेतुमत्तावगाहिनः परामर्शस्य प्रमात्वेन व्याप्तिविशिष्टप्रतियोगिक-पक्षसम्बन्धावगाहि-त्वादुक्तलक्षणस्यापि सत्त्वादित्यत आह, 'यदि चेति, सर्वत्र पक्ष-धर्म्मताबलात् पक्षतावच्छेदक-साध्ययोः सामानाधिकरण्यमेव भासते न तु तयोरवच्छेद्यावच्छेदकभावोपि तेन विनापि हेतो-र्व्याप्तिपक्षधर्म्मत्वोपपत्तेस्तद्भासकबलाभावादित्यभिधाय उक्तबाधा-सङ्करस्थलस्य यज्ञपतिना दूषितत्वात् तन्मते न सल्लिङ्गकपरामर्शाद्-भ्रमानुमितिः अपि तु मिश्रादिमत एवेत्यतः 'यदि चेत्युक्तम् । न च बाधितवह्नौ लाघवज्ञानसत्त्वे सल्लिङ्गकपरामर्शादपि बाधितो वह्निः पक्षे भासते इति सर्व्वेषामेवानुमतम् परन्तु तादृशानुमिते-र्व्यापकतानवच्छेदकविशेषधर्म्मप्रकारकत्वं प्राचीना नानुमन्यन्ते, अतएव सामान्यधर्म्मावच्छिन्ननिरूपितव्याप्तिबलप्रवृत्तानुमाने विशेषबाधस्यादोषत्वं समानप्रकारकत्वेन विरोधित्वं व्यवस्थाप्य व्युत्पादितमुपाध्यायैर्बाधग्रन्थे, तावतापि च बाधितविषयकलाघव-ज्ञानजन्यानुमितेस्तदभाववति तत्प्रकारत्वरूपभ्रमत्वावच्छिन्नभेद-घटितप्रमात्वं दुरुपपादमेवेति यदि चेत्यसङ्गतमेवेति वाच्यम् ।

तदवच्छिन्नाभाववति तदवच्छिन्नप्रकारकत्वावच्छिन्नभेदघटितप्रमात्वस्य लक्ष्यताप्रयोजकत्वोपगमे पर्व्वतादौ वह्नित्वादिना बाधितवज्ज्ञादिविषयकानुमितेर्लक्ष्यतासम्भवेन तत्सङ्गतेः। न चोक्तप्रमात्वस्य लक्ष्यतानियामकत्वे जलपर्व्वतो वह्निमान्, पर्व्वतो जलवह्निमान् इत्याद्यनुमितौ स्वरूपतो भासमानविषयांशे भ्रमरूपायां विशिष्टपक्षाद्यप्रसिद्ध्याऽव्याप्तिर्दुर्व्वारैव तत्रापि तादृशप्रमात्वसत्त्वादिति वाच्यम्। तदभाववति स्वरूपतस्तत्प्रकारकभ्रमभेदमपि प्रमात्वशरीरे निवेश्य तद्वारणसम्भवात्।

केचित्तु यत्किञ्चिद्विधेयतावच्छेदकावच्छिन्नवत्पक्षावगाहित्वलक्षणपारिभाषिकप्रमात्वेनैव लक्ष्यताया विवक्षितत्वात् लाघवज्ञानाधीनोक्तानुमितौ महानसीयत्वादेः प्रकारत्ववादिमतेऽपि वह्नित्वस्यैव विधेयतावच्छेदकतया पक्षस्य तदवच्छिन्नवत्त्वमेव तादृशप्रमात्वानपायात्,गन्धप्रागभावकालावच्छिन्नो घटो गन्धवान् इत्यादौ नव्यनये तादृशकालावच्छिन्नगन्धसमवायस्य संसर्गत्वात्, तेन सम्बन्धेन पक्षे विधेयाभावान्न तस्य लक्ष्यत्वम्। न चेदृशप्रमात्वस्य लक्ष्यतानियामकत्वे लिङ्गोपधानमतेऽप्यव्याप्यादिलिङ्गकानुमितेरलक्ष्यताप्रसक्तया लिङ्गोपहितेत्याद्यग्रिमग्रन्थोनावतरतीति वाच्यम्। इदानीं लाघवज्ञानजन्यानुमितेरलक्ष्यत्वे क्षतिविरहात्, भ्रमान्यवृत्तिविषयतावत्त्वमेव लक्ष्यतानियामकं वाच्यमित्याशयादित्याहुः (१)।

'प्रमापरमिति, अत्रापि लक्ष्यतानियामकं यादृशप्रमात्वं तदेव

---

(१) केचित्त्वित्यादिः आहुरित्यन्तः पाठो बहुषु पुस्तकेषु नास्ति।

षिवक्षणीयं अतः किञ्चिदंशे प्रमात्वमादाय नातिप्रसङ्गस्य दुर्व्वारता। 'अव्याप्यापक्षधर्म्मयोरिति अव्याप्यधूलीपटलादौ व्याप्यत्वावगाहिना अपक्षधर्म्मे च महानसत्वादौ पक्षधर्म्मत्वावगाहिना परामर्शेन जनिताया वस्तुगत्या वह्न्यादिमति पर्व्वतादौ वह्निमत्त्वाद्यवगाहिन्यां प्रमानुमितावव्याप्तिरित्यर्थः। तज्जनकपरामर्शस्य व्याप्तिविशिष्टप्रतियोगिक-पक्षानुयोगिकसम्बन्धानवगाहित्वात् धूलीपटलादिसम्बन्धस्य व्याप्यप्रतियोगिकत्वात् महानसत्वादिसम्बन्धस्य पक्षाननुयोगिकत्वादिति भावः। नन्वनुमितौ पक्षांशे व्याप्यत्वेन लिङ्गभानोपगमादुक्तानुमितेर्यथायोगं व्याप्ति-पक्षधर्म्मतांशे भ्रमरूपतयाऽलक्ष्यतैवेति कथमव्याप्तिरत आह, 'लिङ्गोपहितेति लिङ्गविशिष्टपक्षे साध्यभानस्य ग्रन्थकृता (१) निराकार्य्यत्वेन उक्तानुमितेर्व्याप्त्याद्यंशे भ्रमत्वस्याप्ययोगादित्यर्थः। लिङ्गोपहितभाने परामर्शजन्यतावच्छेदककोटावव्यहितोत्तरत्वादिकं न निवेश्यते लिङ्गविषयताया जन्यतावच्छेदकत्वोपगमेनैव व्यभिचारवारणसम्भवादित्यादिरीत्या (२) लाघवसम्भवेऽपि मणिकृता तदा सम्मतेः तदीयलक्षणं तन्मतमवलम्ब्य व्याख्यातुमुचितमिति भावः। ननूक्तानुमितिष्वपि व्याप्तिविशिष्टधूमादिप्रतियोगिकपर्व्वतानुयोगिकसम्बन्धावगाहिभगवज्ज्ञानजन्यत्वसत्त्वान्नाव्याप्तिरित्यत आह,

---

(१) मणिकृतेति पा०।

(२) वह्निव्याप्यालोकपरामर्शोत्तरानुमिते पूर्व्वं वह्निव्याप्यधूमपरामर्शसत्त्व-निबन्धनव्यभिचारवारणं सम्भवतीति भावः।

वच्छिन्नकारणताघटितलक्षणस्य प्रत्यक्षविशेषाद्यतिव्याप्तिवारणायोपगमेऽसम्भव एव स्यात् कथमुक्ताव्याप्त्यभिधानम्। यदि किञ्चिल्लिङ्ग-साध्यकानुमितिः प्रमात्मकपरामर्शादेव तदा तत्त्वोक्तरूपेण हेतुतासम्भवान्नासम्भव इत्युच्यते, तदा तादृशानुमितिजनकपरामर्शकारणताघटितजातिघटितलक्षणोपगमेनोक्ताव्याप्तेरपि नावकाशः।

वस्तुतस्तु विषयतायां विशिष्टान्वयबलात् उक्तवाक्यतो व्याप्यवच्छिन्नहेतुनिष्ठावच्छेदकताकपक्षसम्बन्धविषयताकत्वेनापि परामर्शलाभात् तद्रूपस्यैव कारणतावच्छेदकत्वविवक्षया नासम्भवो नाप्युक्तस्थलेऽव्याप्तिः तद्रूपस्य भ्रमसाधारणत्वात् वास्तवव्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धस्य लक्षणवाक्यजन्यबोधेऽवश्यं भानेन तद्विषयकत्वेन परामर्शोपस्थितावपि तस्य न कारणतावच्छेदकत्वम्, अपि तु कारणतासामानाधिकरण्यमेव, कूटलिङ्गकपरामर्शसाधारणोक्तरूपावच्छिन्नकारणताया भगवज्ज्ञाने वास्तवव्याप्यप्रतियोगिकतादृशसम्बन्धावगाहित्वसामानाधिकरण्यसत्त्वेन कूटलिङ्गकप्रमानुमितिपरलक्षणवाक्ये नावान्तरवाक्यार्थायोग्यत्वमपि लक्षणवाक्यतो व्याप्तिविशिष्टप्रतियोगिकत्वविशिष्टपक्षसम्बन्धावगाहिज्ञानवृत्तित्वेन कारणत्वे भासमाने व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षसम्बन्धावगाहिज्ञानत्वावच्छिन्नत्वेनापि तद्भासते तथाच व्याप्तिविशिष्टप्रतियोगिकत्वविशिष्ट-पक्षसम्बन्धावगाहिज्ञानवृत्तित्वोपलक्षितव्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षसम्बन्धावगाहिज्ञानत्वावच्छिन्नत्वविशेषितजनकताया लक्षणघटकत्वादीश्वरज्ञानवृत्तिजनकतायाश्च तादृशत्वात् तादृशानुमितौ लक्षणसमन्वयः

प्रत्यक्षादावतिव्याप्तिवारणस्य सम्भवतीति ध्येयम्। 'अतएव' भ्रमजन्यानुमितावव्याप्तेरेव, व्याप्तिविशिष्टे या पक्षधर्म्मतेति सप्तमीतत्पुरुषेण वास्तवव्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धाव-गाहित्वरूपकर्म्मधारयपक्षीयार्थ एव पर्य्यवसानात् व्याप्तिविशिष्टे यत्पक्षधर्म्मताज्ञानमिति ज्ञानान्तेन विषयत्वार्थकसप्तमीतत्पु-रुषसमासेन च वास्तवव्याप्तिविशिष्टविषयकपक्षसम्बन्धज्ञानस्य लाभाद्वह्निव्याप्यधूलीपटलवान् पर्व्वत इत्यादिज्ञानासंग्रहादिति भावः। 'आदिपदाद्व्याप्तिविशिष्टा व्याप्तिसमानाधिकरणा या पक्षधर्म्मता इत्यादिसमासपरिग्रहः। यद्यपि वक्ष्यमाणज्ञानान्त-कर्म्मधारयपक्षे प्रकारितारूपस्येव तत्प्रकारकज्ञानविषयत्वरूपस्य ।[illegible] वैशिष्ट्यस्य विवक्षया ज्ञानान्तसप्तमीतत्पुरुषपक्षेऽपि व्याप्तिविशेष्यतापन्नहेतुविषयकत्वावच्छेदेन पक्षधर्म्मताविषयक-ज्ञानपर्य्यवसानादुक्ताव्याप्तिपरीहारः सम्भवति यत्र व्याप्तेर-प्रसिद्धिः तत्रापि व्याप्तिपदस्य वक्ष्यमाणकल्पे विलक्षणप्रकारिता-यामिव एतत्कल्पे विलक्षणप्रकारतानिरूपितविशेष्यतायां लक्षणा-मुपगम्याव्याप्तिपरीहारसम्भवः, पक्षधर्म्मत्वाप्रसिद्धिस्थलेऽपि वक्ष्य-माणैव गतिस्तथापि व्याप्तिपदलक्षणाया आवश्यकत्वे तत्पुरुषम-पेक्ष्य लाघवात् (१) कर्म्मधारय एवाश्रयितुमुचित इत्याशयेन तत्पुरुष-उपेक्षितः।

---

(१) तथाच ज्ञानान्ततत्पुरुषे लक्षणाद्वयं कर्म्मधारये पुनरेका लक्षणेति लाघव-मिति भावः।

चिन्तामणिदीधितिः ।

व्याप्तिविशिष्टस्य पक्षधर्म्मस्येति द्वन्द्वाश्रयणाद्व्याप्तिविशिष्टत्व-पक्षधर्म्मत्वावगाहिज्ञानजन्यत्वं लभ्यते पदार्थयोरभेदेऽपि पदार्थतावच्छेदकभेदेनैव प्रमाण-प्रमेयेत्यादिसूत्रे अन्यत्र च द्वन्द्वस्य दर्शनात् पदार्थद्वयाभेदबोधकाच्च कर्म्मधारयाद्भेदाभेदोदासीनपदार्थद्वयबोधजनकत्वेनैव द्वन्द्वस्य भेदात्। विशिष्टपदस्य धर्म्मपरतया वा व्याप्तिवैशिष्ट्य-पक्षधर्म्मत्वयोर्लाभात्। न चैवमालोको वह्निव्याप्यो धूमवान् पर्व्वत इति ज्ञानजन्येऽतिप्रसङ्गः, एकत्र तदुभयावगाहित्वस्योक्तत्वादिति केचित्।

गादाधरी विवृतिः ।

मिश्रोक्तद्वन्द्वपक्षं दूषयितुमुपन्यस्यति, 'व्याप्तीति, 'व्याप्तिविशिष्टत्व-पक्षधर्म्मत्वावगाहीति व्याप्तिसम्बन्ध-पक्षसम्बन्धविषयकेत्यर्थः, "द्वन्द्वात् पर इत्यादिन्यायेन (१) भावप्रत्ययार्थेन व्याप्तिविशिष्टस्याप्यन्वयादिति भावः। एवञ्च सम्बन्धविधया व्याप्तिवैशिष्ट्याद्यवगाहिज्ञानस्य तत्सामानाधिकरण्यानवगाहित्वेऽपि तदवगाहित्वस्याक्षतत्वान्नासंग्रहः। यद्यपि व्याप्तिवैशिष्ट्यादेः ज्ञानविषयत्वान्वये

---

(१) द्वन्द्वान्तरः पूर्वं वा यत् श्रूयते स लभते प्रत्येकमभिसम्बन्धं इति न्यायादित्यर्थः ।

व्याप्त्यादेरुपलक्षणत्वेऽतिप्रसङ्गात् (१) विशेषणत्वेनोपगमस्तथा तथाच तद्विशिष्टस्य वैशिष्ट्यादेर्ज्ञानविषयत्वान्वये वैशिष्ट्यानुयोगिक-विशेषणवैशिष्ट्यस्यापि तदन्वय आवश्यक इति संसर्गतया व्याप्त्यादिवैशिष्ट्यावगाहिज्ञानं दुःसंग्रहमेव, विशेषणसंसर्गस्य तदन्वयोपगमे च उपाध्यायमतेऽपि नोक्तपरामर्शसंग्रहः उक्त रीत्या लक्षणवाक्यजन्यबोधे व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यस्य तत्संसर्गतयैव भानात्। तथापि ससर्गभानोपगमे एतन्मते सकल-परामर्शसंग्रहः, उपाध्यायमते च व्याप्त्यादिवैशिष्ट्यं यत्र संसर्गतया भासते तस्य तावता संग्रहेऽपि भ्रमस्थले उभयसामानाधिकरण्या-प्रसिद्धा अव्याप्तिर्दुर्वारैवेति विशेषः। अथाभ्युपगम्यतां संसर्गविशे-षणप्रतियोगिकत्वस्य संसर्गतया भानं तथापि तद्विषयताया अनु-मितिकारणतावच्छेदककोटिनिवेशे मानाभाव इति वक्ष्यमाणाति-प्रसङ्गस्य वारणाय येन रूपेण परामर्शस्य लक्षणवाक्याल्लाभस्तस्य जनकतावच्छेदकताया विवक्षणीयतया संसर्गानुयोगिकसंसर्गविषय-त्वघटितलक्षणवाक्यप्रतिपाद्यतावच्छेदकरूपस्य चानुमितिजनकता-नवच्छेदकतया असम्भव इति चेन्न, प्रकारतात्वस्य संसर्गप्रतियोगि-त्वविषयतानिरूपितविषयतात्वरूपतया प्रकारतात्वेन व्याप्तिप्रकार-तानिवेशेन संसर्गप्रतियोत्वविषयताया अपि कारणतावच्छेदक-गर्भे निवेशात् वैशिष्ट्यानुयोगिकसंसर्गविशेषावच्छिन्नत्वेनोपस्थित-व्याप्तिविषयताघटितसमुदाये तादृशसम्बन्धावच्छिन्नत्वस्योपलक्षण-

(१) वैशिष्ट्यवद्वह्निमान् पर्वत इत्यादिज्ञानजन्ये अतिप्रसङ्गादिति भावः।

नियामकम्। एतेन मेय-वाच्ययोरभेद इत्यादौ मेयादिपदप्रतिपाद्ये वाच्यादिपदप्रतिपाद्यत्वावच्छिन्नभेदासत्त्वेऽपि न क्षतिः (१) गगनाकाशयोरभेद इत्यादौ च गगनादिपदं तद्वाच्यत्वावच्छिन्नपरमिति पदार्थतावच्छेदकभेदेन द्वन्द्वः। अथ द्वन्द्वबाधार्थं स्वरूपैकशेषानुशासनमित्युक्तं समस्यमानपदानामानुपूर्व्वीभेदरूपवैरूप्यस्य द्वन्द्वनियामकतां स्वीकृत्यैव स्वरूपाणां द्वन्द्ववारणसम्भवादिति चेन्न, न हि द्वन्द्वबाध एव स्वरूपैकशेषफलं; किन्तु तदननुशासने घटा इत्यादौ बहुत्वान्वयानुपपत्तिः सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति व्युत्पत्तेरेकघटपदेन बहुघटबोधनासम्भवात्,(२) सकृदर्थं गमयतीत्यस्यानेकशक्तिविषयाबोधकत्वार्थकत्वेऽपि इन्द्र-चन्द्रादिपदे इन्द्र इत्यादावगतिः, एकशेषानुशासने तु तत्र बहुपदेभ्य एव बहूनां बोधः। बहुपदाश्रवणञ्च इतरेषां लोपात्, एकशेषस्य इतरलोपपर्य्यवसितत्वात्। अत्राहुः स्वरूपैकशेषः कृतद्वन्द्वानामेव न तु द्वन्द्वापवादकता तस्य तथा सति सविभक्तिकानामेव द्वन्द्वसम्भवात् सविभक्तिकानामेकशेषस्य वाच्यतया श्रूयमाणपदोत्तर सविभक्तेरसम्भवानापत्तेः, लुप्तपदानां श्रूयमाणबहुवचनाद्युत्पत्तितया तदर्थान्वितबहुत्वबोधकतायास्तत्रानुपपत्तेश्च। समासान्तर द्वन्द्वलोपगमे च समासान्तर्गतसकलपदानामेव विभक्त्युत्पत्त्या सामञ्जस्यात्। न च कृतद्वन्द्वानामेकशेषोपगमे पादौ

[illegible] शब्दार्थविषयतया। वाच्यपदप्रतिपाद्यविशिष्ट [illegible]।

[illegible] बाधकमनुसर्त्तव्य [illegible]।

सरसाः इत्यादौ द्वन्द्वस्य प्राप्तिर्युद्धे-सेनाङ्गानां तुरङ्गमत्वः इत्यादि-
सूत्रैरेकवद्भावप्रसक्त्या बहुवचनानुपपत्तिरिति वाच्यम्। तत्र सूत्रे
द्वन्द्वपदस्य एकशेषाविषयो यो द्वन्द्वस्तत्परत्वोपगमात्। वस्तुतस्तु
नैतत् एवैकशेषः। तत्प्रवृत्तेरप्रामाणिकत्वात्, सति तात्पर्ये
तदनुसंहितादेकपदात् युगपदनेकार्थबोधस्येष्टत्वादिति।
'नन्वेवं' नीलघटयोरभेद इत्यादौ, अत्र पदार्थतावच्छेदकगतमेव
द्वित्वादिकं द्विवचनादिना प्रत्याय्यते तादृशार्थकत्वेनैव वा द्विवचना-
दिकं, दर्भैस्स्तरत इत्यादौ बहुवचनवत्, तत्रापि प्रकृत्यर्थगत-
गुणादिकमादाय बहुत्वबोधकत्वमिति तु न युक्तं गुणादेरप्रकृत्यर्थ-
त्वात् तत्राधारबहुत्वबोधापत्तेरतिप्रसङ्गात् (१) अजहत्स्वार्थ-
लक्षणया गुणादीनामपि प्रकृत्यर्थतोपगमे तुल्यार्थपरपदोत्तर-
बहुवचनस्य तत्प्रकृतिकबहुत्वार्थकत्वाविवादात् इत्यत उक्तमनुना-
नन्वस्त्वेवं। नन्वेकधर्मिकबोधकपदयोरपि द्वन्द्वोपगमे द्वन्द्वस्य
कर्मधारयेऽप्यनुपपत्तिः, नाष्टपदद्वयसमासस्यैव कर्मधारय-
त्वादित्यत आह, 'पदार्थेति। तथाच वस्तुतोऽभिन्नधर्मिकबोध-
कपदद्वयघटितसमासत्वं न कर्मधारयत्वम् अपि तु एकपदार्थेऽपरपदा-
र्थाभेदबोधकसमासत्वमेवेति भावः। 'भेदाभेदोदासीनत्वं भेदा-
भेदप्रकाराविषयत्वं, भेदोपादानं दृष्टान्तविधया, अभेदबोधकत्वस्य
हैव कर्मधारयविशेषणत्वे, कर्मधारयत्वेऽभेद इव द्वन्द्वत्वे
पदार्थस्य तत्राप्यन्वयस्य यो भेदो स्वपदार्थे भासते इति तत्र-

---

१ [illegible]

गादाधरी विवृतिः ।

'एवमपि' एकत्रोभयावगाहिताविवक्षणेऽपि । नन्वेकधर्म्मावच्छिन्नधर्म्मिण्युभयावगाहित्वविवक्षणान्न धूमो वह्निव्याप्यो द्रव्यं पर्व्वतवृत्ति इति ज्ञानजन्येऽतिप्रसङ्ग इत्यत आह, 'एकरूपेणेति, 'मीमांसकमतानुप्रवेशादिति. मीमांसकैर्यथा वह्निव्याप्यवानयमित्यादिव्याप्यतावच्छेदकानवगाहिपरामर्शादनुमितिरपलप्यते धूमो वह्निव्याप्यो धूमवान् पर्व्वत इत्यादिसमूहालम्बनाच्चानुमितिरूपेयते तेषामेकरूपेण व्याप्ति-पक्षधर्म्मताज्ञानस्यानुमितिहेतुत्वात् तयोक्तरीत्या लक्षणं व्याचक्षाणेनाऽपि तत्र तत्रानुमितिरपलपनीया स्वीकार्य्या च । अन्यथा (१) अव्याप्त्यतिव्याप्त्योः प्रसङ्गादित्यर्थः । तथाच विशिष्टपरामर्शत्वेनानुमितिहेतुत्ववादिनां नैयायिकानां नोक्तरूपावच्छिन्नहेतुताया लक्षणे प्रवेशसम्भव इति न्यायमतेऽव्याप्त्यादिदोष आवश्यक एवेति भावः । यद्यपि धर्म्मिनिरूपकैकविषयत्वावच्छिन्नतदुभयविषयताविवक्षणे (२) न समूहालम्बनजन्येऽतिप्रसङ्ग, न वा व्याप्यतावच्छेदकानवगाहिपरामर्शजन्यानुमित्यसंग्रहः, तथापि व्याप्तिपक्षधर्म्मत्वाप्रसिद्धिस्थलेऽव्याप्ति-

---

(१) [illegible]

(२) [illegible]

ैयर्थ्यप्रदर्शनासङ्गतिः, यदि च ज्ञानत्वस्य तदुभयाभाववद्वृत्तितया विशेषणान्तरविशिष्टज्ञानत्वरूपपरामर्शत्वे तदभावो दुर्घट इति द्व्यापकतात्वरूपव्याप्तिरेव निवेशनीया इत्युच्यते, तदाप्युभयत्वावच्छिन्नविशेषणतया व्यापकताप्रवेशे व्याप्तिवैशिष्ट्यविषयकत्वत्वावच्छिन्नविशेषणतया तदप्रवेशाद्वैयर्थ्यं दुर्वारमेव, एवमुभयविषयकत्वनियतकारणतानिवेशेऽप्युपपत्तेः तन्नियतधर्मावच्छिन्नत्वनिवेशनमप्यफलं, नियतत्वांशस्य लक्षणवाक्यादनुपस्थित्या तद्घटितलक्षणालाभश्चेति दूषणमप्यपास्तम्। एवं केषाञ्चित् उभयविषयकत्वव्याप्यतत्तद्व्यक्तित्वावच्छिन्नविषयादिकारणतामादाय परामर्शानुव्यवसायादावतिव्याप्तिवारणायानेकवृत्तित्वं विषयताघटितधर्मावच्छिन्नत्वं वा कारणतायां कार्यतायां वा अधिकं निवेश्यं इत्यपि प्रलपितमनुपादेयम्। यत्राङ्कुरविशेषसाध्यकस्थले एक एव परामर्शः तत्रानेकवृत्तित्वस्य उभयविषयकत्वावच्छिन्नत्वस्य च कारणताविशेषणत्वेऽव्याप्तिरेव तद्व्यक्तित्वेनैव हेतुत्वात्। न च योगिना तद्विषयकज्ञानस्यावश्यं सत्त्वात् तत्साधारणतद्विषयकत्वेन हेतुत्व कल्पनीयं तत्रोभयवृत्त्यपीति वाच्यम्। यत्र भ्रमरूप एव तादृशपरामर्शस्तत्र तद्व्यक्तित्वेनैव हेतुत्वादव्याप्तेर्दुर्वारत्वादिति तत्र जातिघटितलक्षणमेव शरणीयम्। पक्षधर्मताविषयकत्वमात्रनियतधर्मावच्छिन्नकारणताप्रवेशे साधारणधर्मवत्ताज्ञानजन्यतामादाय संशये प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानजन्यतामादाय धूमवत्पर्वतो नास्तीत्यभावप्रत्यक्षे घटवानित्यादिविशिष्टवैशिष्ट्यबोधे चातिव्याप्तेः व्याप्तिवैशिष्ट्यविषयकत्वा-

पादानमावश्यकमित्याशयेन पक्षधर्म्मतांशवैयर्थ्यमाह, 'पक्षेति'
न च व्याप्तिवैशिष्ट्यविषयकत्वनियतधर्म्मावच्छिन्नकारणताति-
वह्निव्याप्यो धूमो द्रव्य न वेत्याकारकसंशये व्याप्तिविषयकत्वं
ज्ञानजन्यतामादायातिव्याप्तिरिति वाच्यम्। पक्षधर्म्मतापदो-
दानेऽपि तद्दोषतादवस्थ्यात् तादृशधर्म्मिज्ञानादेरपि धर्म्मितावच्छे-
धर्म्मिवृत्तित्वावगाहित्वात्। न च स्वधर्म्मितावच्छेदकतापर्य्याप्ति-
कारणधर्म्मावच्छिन्नवृत्तितावगाहित्वनिवेशान्न दोष इति वाच्यं
तादृशधर्म्मितावच्छेदकावच्छिन्ने कोटिद्वयसहचरितधर्म्मव-
ज्ञानस्य तथात्वाद्व्याप्तिविषयकत्वाच्च तज्जन्यतामादायातिप्रसङ्ग-
दुर्व्वारत्वात्। न च तादृशदोषवारणाय विशेषणान्तरप्रक्षेप आव-
श्यकस्तथाच व्याप्तिवैशिष्ट्यविषयकत्वघटितलक्षणे व्याप्यविषयक-
त्वस्य चरमज्ञाने व्याप्यविषयकवृत्तित्वस्य जन्यतायां वा निवेशे
पक्षधर्म्मत्वघटितलक्षणेऽपि यदंशे पक्षधर्म्मतावगाहिज्ञानं जन्य-
तदंशे पक्षधर्म्मत्वानवगाहित्वस्य चरमज्ञाने, तदनवगाहिवृत्तित्वस्य
जन्यतायां वा निवेशनेन प्रतीकारः सम्भवतीति, धूमवत्त्वव-
नास्तीत्याद्यभावप्रत्यक्षादौ धूमाद्यंशे पक्षधर्म्मताज्ञानत्वेन हेतुत्वे
तादृशप्रत्यक्षादेरपि तदंशे पक्षधर्म्मत्वावगाहित्वात् साधार-
धर्म्माद्यंशे पक्षधर्म्मतावगाहिज्ञानजन्ये संशयेऽपि सामग्र्यां
साधारणधर्म्मांशे पक्षधर्म्मताभानात् प्रत्यक्षे उपस्थितवन्मा-
सामग्र्या नियतत्वात् चरमज्ञानपदस्य निश्चयपरत्वात् संश-
यस्यादृष्टमात्रजन्यतया कार्य्यतानवच्छेदकत्वमिति मतं द
न्यत्रातिव्याप्त्यसम्भवेनेति एकतरपदोपादानवैयर्थ्यादित्यभिप्रा-

नैवोचितमिति वाच्यम्। एवं सति सादृश्यांशे स्वविषयधर्म्मिवृत्तिताज्ञानजन्यायां तत्र तदनवगाहिन्यामुपमितौ अतिव्याप्तेर्दुर्व्वारत्वात्।

चिन्तामणिदीधितिः।

व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्म्मताज्ञानं तज्जन्यमिति तु स्यात्। यद्यप्यत्रापीन्धनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणेन्धनवानित्यादिपरामर्शजन्येऽव्याप्तिरखण्डव्याप्तेरप्रसिद्धेः भ्रमानुमितेर्लक्ष्यत्वे चात्राकाशमात्मन इत्यादौ सुतरां तथा, तथापि तावत्पदार्थानां तथाविधपरस्परोपश्लेषावगाहित्वं विवक्षितम्।

न च व्यतिरेकिण्यव्याप्तिः, व्यभिचारधीविरोधिधीविषयत्वेनान्वय-व्यतिरेकव्याप्त्योरनुगमात्।

गादाधरी विवृतिः।

मिश्रोक्तज्ञानान्तकर्मधारयपक्षमवलम्ब्य समाधातुमुपक्रमते, 'व्याप्तिविशिष्टमिति, व्याप्तिविशिष्टत्वं यदि व्याप्त्याश्रयत्वं तदानुमितिजनकज्ञानमात्रस्य न तदात्वम् अपि तु लिङ्गस्यैव इत्यत ऽतिरतस्तद्व्याचष्टे, 'व्याप्तिप्रकारकमिति, विशिष्टपदेन प्रकारितारूपवैशिष्ट्याश्रयस्य व्याप्तिपदेन वा लक्षणया व्याप्तिप्रकारिताया विवक्षितत्वादिति भावः। नन्वेवं व्याप्तेः पक्ष-

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

तया भानात् तद्विषयकत्वेन [illegible]
दकभावः स्यात् न तु व्याप्तिप्रकारकत्वे[illegible], तत्र पक्ष
स्यानुयोगिक एव सम्बन्धो व्याप्यपक्षांशे भाने तादृशसम्बन्धान
नुमितावव्याप्तिरपि दुर्वारा तादृशसम्बन्धे व्याप्त्यंशानुयोगि
सम्बन्धस्य पक्षधर्मतापदार्थस्याभानात् पक्षांशे हेतुतावच्छेदकस
म्बन्धेन हेतुप्रकारकज्ञानपर्यन्तत्वाच्च पक्षधर्मताया ज्ञानमिति समास
वाक्यप्रतिपादनमिति न तस्य पक्षधर्मताज्ञानशब्दार्थता। अत
व्युत्पत्त्यनादरे चालं समासविशेषमाश्रित्य व्याख्ययेति। अताह
पक्षे धर्मतया हेतुतावच्छेदकसम्बन्धेन यज्ज्ञानमिति तृतीया
समासगर्भसप्तमीसमासादरात् (१) पक्षविशेष्यकत्वावच्छिन्नहेतुता

धर्मतया ज्ञानं धर्मताज्ञानं पक्षे धर्मताज्ञानं पक्षधर्मताज्ञानमिति
॥ त्यर्थः।

वच्छेदकसम्बन्धावच्छिन्नप्रकारताकत्वविशिष्टज्ञान पक्षधर्म्मताज्ञान-पदार्थः। पक्षधर्म्मतयेत्यत्र तृतीयाया अवच्छिन्नप्रकारताकत्वार्थकत्वात् तत्र व्याप्तिप्रकारकत्वान्वये च हेतुनिष्ठनिरूपितप्रकारताकत्वावच्छिन्नव्याप्तिप्रकारकत्ववज्ज्ञानलाभः। व्याप्ति-हेत्वोः साक्षात् विशेष्य-विशेषणभावेन तद्विषयकत्वयोरनुमितिजनकपरामर्शेऽवच्छेद्यावच्छेदकभावोऽक्षत एवेति सर्व्वत्रानुमितौ लक्षणसमन्वयः। एवमपि व्याप्तिपदप्रतिपाद्यविशिष्टार्थाप्रसिद्धिस्थलेऽव्याप्तिरित्याशङ्कते, 'यद्यपीति, वह्निव्याप्येन्धनवानित्याकारकज्ञानविषयः साध्याभाववदवृत्तित्वरूपव्याप्तिरपि सा च हेत्वन्तरे प्रसिद्धैव इति हेतुसमानाधिकरणेत्यादिव्याप्तेर्विशेषशब्देनोल्लेखः। 'अखण्डव्याप्तेरिति विशेषण-विशेष्यभावापन्नप्रकृतहेत्वादिसामानाधिकरण्यान्त-तत्तत्पदार्थस्तोमात्मकव्याप्तिपदार्थाप्रसिद्धेरित्यर्थः। अखण्डेत्यनेन व्याप्तिघटकहेत्वादिपदार्थानां खण्डशः प्रसिद्धिमात्रमिति सूचितं, तावतैव समाधानमुपपत्स्यते इत्यपि। अत्र व्याप्यप्रसिद्धिः साध्यतावच्छेदके स्वविशिष्टहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वासत्त्वेन, अत्र हेतुव्यापकतावच्छेदकत्वस्य इन्धनत्वादौ वह्नित्वावच्छिन्नसामानाधिकरण्यस्य प्रकृतहेतावपि प्रसिद्ध्या व्याप्तिविशिष्टेत्यनेन साध्यतावच्छेदके प्रकृतहेतुव्यापकतावच्छेदकत्वावगाहित्वे सति प्रकृतहेतौ तादृशसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यावगाहित्वविवक्षणे न दोष इत्यतो व्यापकत्वादिघटकपदार्थानामपि खण्डशो निवेशाद्यावृत्तिसाध्य-हेतुकस्थलेऽव्याप्तिं शङ्कते, 'भ्रमानुमितेरिति, भ्रमस्य पूर्व्ववदलक्ष्यत्वसम्भवात्

हिताघटितलक्षणसमन्वयः क्वापीति वाच्यम्। सर्व्वत्र विषये भ्रमस्य भ्रमजन्यानुमितेश्चाप्रामाणिकतया यत्साध्य-लिङ्ग-पक्षकः परामर्शोऽनुमितिजनकपरामर्शो वा प्रमारूप एव तत्साध्य-पक्ष-लिङ्गकानुमितौ लाघवेन व्याप्तिघटकतत्तत्पदार्थान् खण्डशोऽनिवेश्य विशिष्टव्याप्त्यादेरेव विषयताया अनुमितिजनकतावच्छेदकत्वोपगमात् तादृशजनताघटितजातिघटितलक्षणस्य व्याप्तिपदार्थघटितस्य निष्प्रत्यूहत्वात्। न च प्रमेयत्व-केवलसामानाधिकरण्यत्वादिना व्याप्त्यवगाहिज्ञानवारणाय तादृशानुमितिजनकतायामपि हेत्वादिपदार्थानां परस्परोपश्लेषावगाहित्वमेवावच्छेदकमुपगन्तव्यमिति वाच्यम्। प्रमेयत्वाद्यवच्छिन्ननिरूपितविषयिताया अनुमितिजनकतावच्छेदकतापर्य्याप्त्यधिकरणहेत्वादि-सामानाधिकरण्यान्तपदार्थस्तोमघटितविशिष्टपदार्थप्रतियोगिकसम्बन्धत्वविरहेण विषयतासम्बन्धेन तादृशविशिष्टविषयस्य प्रमेयत्वादिना व्याप्त्यवगाहिज्ञानव्यावर्त्तकतया ततोऽनुमित्यप्रसङ्गात्, स्वरूपतो येषां व्याप्तिघटकता रूपान्तरेण तदवगाहितावत्पदार्थस्तोमात्मकव्याप्तिज्ञानवारणाय स्वरूपतस्तत्तत्पदार्थप्रकारकत्वनिवेशस्यावश्यकत्वात् न विशिष्टव्याप्तिनिवेशसम्भव इत्यपि न वाच्यं विशेषणानवच्छिन्नतत्तत्पदार्थघटितविशिष्टनिरूपितविलक्षणविषयताया एव विषयितात्वेन जनकतावच्छेदकतापर्य्याप्त्यधिकरणतादृशविशिष्टविषयसम्बन्धतया तादृशविषयेणोक्तज्ञानव्यावृत्तेः। अतएव दीधितिकारोऽपि परामर्शग्रन्थे अन्यथाख्यात्यनभ्युपगन्तृमते व्यापकताघटकपदार्थानां खण्डशः परस्परोपश्लेषावगाहित्वमनिवेश्याऽपि

'लक्षणत्वे चेति, [illegible] प्रतिज्ञानयोरुभय [illegible] नुमितिसमानाकारत्वानियमेन [illegible] 'सुतरां' हेतुव्यापकत्व साध्यसामानाधिकरण्ययोः [illegible] दानेऽपि, 'तथा' अव्याप्तिः, [illegible]-साध्यसामानाधिकरण्यो प्रसिद्धया हेतुव्यापकत्व-साध्यसामानाधिकरण्ययोरपि [illegible] सिद्धेरिति भावः। भ्रमानुमितेरलक्षणत्वेऽपि वास्तवव्यापकत्वाद्यव-गाहित्वनिवेशे धूमत्वादिना पदार्थान्तरावगाहिधूमव्यापकवह्नि-समानाधिकरणधूमवानयमित्यादिज्ञानजन्यायां प्रमानुमितावव्याप्तिः धूमाधिकरणाद्यनवगाहनेन तादृशज्ञानस्य वास्तवधूमाधिकरणादिघटितव्यापकत्वाद्यनवगाहित्वादिति तु नाशङ्कनीयं, तादृशभ्रमजन्यानुमितावपि भ्रमानात्मकस्य वह्निव्याप्यधूमवान् पर्व्वत इत्याकारकवास्तवव्यापकत्वाद्यवगाहिपरामर्शस्य स्वरूप-योग्यतामादाय यथाश्रुतलक्षणसमन्वयात्। इदञ्च जात्यघटित यथाश्रुतलक्षणाभिप्रायेण, जातिघटितनिष्कृष्टलक्षणस्य प्रमा-त्मकपरामर्शजन्यानुमितिवृत्तिजातिमादाय सर्व्वत्र लक्षणसम-न्वयसम्भवात्। न च (१) परामर्शानुव्यवसायादावतिव्याप्ति-वारणाय व्याप्तिप्रकारकपक्षधर्म्मतानिश्चयत्वावच्छिन्नजनकतानिरू-पितजन्यताया विवक्षणीयतया धूमलिङ्गकपरामर्शस्यापि उक्त-भ्रमसाधारण्याय व्याप्तिघटकतावत्पदार्थानामपि परस्परोपश्लेषा-वगाहिनिश्चयत्वेनैव जनकत्वस्योपगम्यत्वात् न वास्तवव्याप्त्यवगा-

(१) जातिघटितलक्षणस्याप्रसिद्धिमाशङ्कते न चेति।

रता या अधिकरणप्रकारता तन्निरूपिता या वृत्तित्वप्रकारता
वं रीत्यैव निवेशः एवञ्च एकपदार्थनिष्ठावच्छेद्यावच्छेदकभावा-
न्नविषयताद्वयनिवेशापेक्षया एकविषयतां निवेश्य कारणताव-
च्छेदकनिर्व्वचने लाघवमित्यपि वदन्ति। तच्चिन्त्यं तथा सति
तादण्डवत्पुरुषवानयमित्यादिज्ञानानां पुरुषादिप्रकारतानिरू-
पितदण्डादिविशेष्यताकत्वेन पुरुषाभाववान्दण्ड इत्यादिनिश्चय-
रतिबध्यत्वप्रसङ्गात् तत्र गत्यन्तरानुसरणे च (१) गौरवादिति।
इदन्तु बोध्यं व्याप्तिघटकसाधनतावच्छेदकादिसकलपदार्थानां
विषयताविशेषणत्वेन खण्डशो निवेशो न सर्व्वत्र। जात्य-
घटितलक्षणस्य साध्यादिभेदेन भिन्नत्वात् सलिङ्गजायां कूटलिङ्ग-
जायां वा यल्लिङ्गक-यत्साध्यकानुमितौ व्यापकताघटकसाधनताव-
च्छेदकमारभ्य यद्विशेषणपर्य्यन्तांशे प्रमात्मक एव परामर्शो-
हेतुस्तद्विशेषणविशिष्टपर्य्यन्तविषयस्य विशिष्टत्वेनैव विषयिता-
विशेषणतया कारणतावच्छेदकताया लाघवेन उचितत्वात्।
सकलपदार्थविषयितानां कारणतानवच्छेदकतया तद्घटित-
धर्म्मावच्छिन्नकारणताया लक्षणे निवेशासम्भवात् तथाच तादृश-
विशिष्टविषयिताघटितधर्म्मावच्छिन्नकारणताघटितमेव लक्षणं, यत्र
च व्यापकताघटकसाधनतावच्छेदकाद्यंशे भ्रमादप्यनुमितिस्तत्रैव
सकलपदार्थानां खण्डशो निवेश इति। मूलस्थव्याप्तिपदमपि

---

(१) दण्डनिष्ठविशेष्यतात्वेन पुरुषप्रकारतात्वावच्छिन्ननिरूपिता या दण्ड-निष्ठविशेष्यता तच्छालिज्ञानत्वस्य प्रतिबध्यतावच्छेदकत्वस्वीकारे गौरवादित्यर्थः।

विशिष्टविषयपुरस्कारेण व्यापकताज्ञानहेतुता सम्भवतीति हेत्वनुरोधेन व्यापकत्वस्यापि खण्डशो निरुक्तिस्तेषा परम्परिच्यते इत्यनेन दर्शयिष्यति, विशिष्टविषयस्य प्रमामात्रनिष्ठजनकतावच्छेदकत्वाभिप्रायेणैव च व्य... ...त्वमनां ... वह्निव्याप्यधूमत्पर्व्वतनिश्चयत्वावच्छिन्नकारणतेत्यादिना ... घटितलक्षणमभिधास्यते । तत्र वह्न्यादिपदं ... तत्र व्यां... मित्यलं पल्लवितेन । 'तावत्पदार्थानां तथाविधपरस्परोपश्लेषावगाहित्वमिति साधनाधिकरणादिपदार्थानामधिकरणाधेयत्वादिपदार्थांशे तत्तत्सम्बन्धावगाहित्वमित्यर्थः, तत्तदंशे तेन सम्बन्धेन तत्प्रकारकत्वमिति यावत्, तेनात्मादीनां समवायसम्बन्धाप्रसिद्धावगीनोक्तभ्रमानुमित्यसंग्रहः, हेत्वादिप्रकारतापि हेतुतावच्छेदकावच्छिन्नत्वेनैव निवेश्या अतो धूमत्वादिना धूलीपटलादिभ्रमसंग्रहः । यद्यप्येवमपि अधिकरणं धूमीयं वृत्तिरधिकरणीया इत्यादिविशृङ्खलरीत्या तावत्पदार्थराशिमवगाहमाना धीर्न व्यावृत्ता तथापि धूमादिप्रकारतानिरूपितविशेष्यत्वावच्छिन्ना या अधिकरणप्रकारता तन्निरूपितविशेष्यत्वावच्छिन्ना या वृत्तित्वप्रकारता इत्यादिरीत्या साध्याधिकरणवृत्तित्वप्रकारतापर्य्यन्तनिवेशात्तदाव्यावृत्तिः, उक्तसमूहालम्बनतो विशिष्टप्रकारकधियो वैलक्षण्यस्यावतत्रान्तरा भासमानाधिकरणादिपदार्थविशेषणनिरूपितविशेष्यत्वविशेष्यान्तरनिरूपितप्रकारत्वयोरवच्छेद्यावच्छेदकभावोपगमात् ।

केचित्तु एकविशेष्यतापन्नस्य यत्रापरांशे प्रकारता तत्र तन्निरूपितप्रकारता विशेष्यतयोरभेद एव तथाच धूमादिप्रकारतानिरू-

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR BERNARD QUARITCH, 11, GRAFTON STREET, NEW BOND STREET, LONDON, W, AND M[R] HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMA[NY]

*Complete copies of those works marked with an asterisk * cannot be suppli[ed] of the Fasciculi being out of stock*

BIBLIOTHECA INDICA

Sanskrit Series

Rs

*Advaita Brahma Siddhi, Fasc 2, 4 @ /10/ each

Advaitachintā Kaustubha, Fasc 1-3 @ /10/ each

*Agni Purāṇa, Fasc 6-14 @ /10/ each

Aitareya Brāhmaṇa, Vol I, Fasc 1-5, Vol II, Fasc 1-5; Vol III Fasc 1-5, Vol IV, Fasc 1-8 @ /10/ each

Aitareya Lochana

*Aṇu Bhāṣhya, Fasc 2-5 @ /10/ each

Aphorisms of Sāṇḍilya, (English) Fasc 1 @ 1/-

Aṣṭasāhasrikā Prajñāpāramitā, Fasc 1-6 @ /10/ each

*Atharvana Upanishad, Fasc 4 5 @ /10/ each

Atmatattvaviveka, Fasc I @ /10/ each

Açvavaidyaka, Fasc 1-5 @ /10/ each

Avadana Kalpalatā, (Sans and Tibetan) Vol I, Fasc 1-7, Vol II Fasc 1-7 @ 1/ each

Bālam Bhattī, Vol I, Fasc 1-2, Vol 2, Fasc 1 @ /10/ each

Baudhāyana S'rauta Sūtra, Fasc 1-3 Vol II, Fasc 1-3 @ /10/ each

*Bhāmatī, Fasc 4-8 @ /10/ each

Bhātta Dīpikā Vol I, Fasc 1-6; Vol 2, Fasc 1, @ /10 each

Baudhyostatrasangraha

Bṛhaddēvatā Fasc 1-4 @ /10/ each

Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each

Bodhicaryāvatāra of Çantideva, Fasc 1 5 @ /10/ each

Cri Cantinatha Charita, Fasc 1-3

Çatadūṣaṇī, Fasc 1-2 @ /10/ each

Catalogue of Sanskrit Books and MSS, Fasc 1-4 @ 2/ each

Çatapatha Brāhmaṇa, Vol I, Fasc 1-7, Vol II, Fasc 1-5, Vol II Fasc 1-7 Vol 5, Fasc 1 4 @ /10/ each

Ditto Vol 6 Fasc 1-3 @ 1/4/ each

Ditto Vol VII, Fasc 1-5 @ /10/

Çatasāhasrikā Prajñāpāramitā Part, I Fasc 1-14 @ /10/ each

*Caturvarga Chintāmaṇi, Vol II, Fasc 1-25, Vol III Part I, Fasc 1-18 Part II, Fasc 1-10 Vol IV Fasc 1-6 @ /10/ each

Ditto Vol 4, Fasc 7 8 @ 1/4/ each

Ditto Vol IV, Fasc 8-9 @ /10/

Çlokavartika, (English) Fasc 1 7 @ 1/4/ each

*Çrauta Sūtra of Āpastamba, Fasc 1-17 @ /10/ each

Ditto Çānkhāyana, Vol I, Fasc 1-7, Vol II, Fasc 1-4, Vol III, Fasc 1-4, Vol 4 Fasc 1 @ /10/ each

Çrī Bhāṣhyam, Fasc 1-3 @ /10/ each

Dāna Kriyā kaumudī, Fasc 1-2 @ /10/ each

Gad[ādha]ra Paddhati Kālasāra Vol I, Fasc 1-7 @ /10/ each

पक्षधर्म्मतानिश्चयस्य निवेशनीयत्वादित्यर्थः, यथाश्रुतविषयानुगमो नादरणीयः भ्रमासंग्रहात् (१)। रूपान्तरेण व्याप्तिविषयकज्ञानजन्ये (२) अतिप्रसङ्गात् प्रतिबन्धकतावच्छेदकविषयिताशालिज्ञानस्य तादृशविषयतावद्विषयकत्वेन निवेशस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वाच्च। व्याप्यवच्छिन्नहेतुविषयतैव वा व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वेन निवेशनीया, तत्प्रतिबन्धकत्वेन पक्षधर्म्मताज्ञानमेव कथं न निवेश्यते इति चेन्न, तथा सति धूमो वह्निव्याप्यो द्रव्यवान्पर्व्वत इत्यादिज्ञानाव्यावृत्तेः प्रतिबन्धकतावच्छेदकविषयतानिरूपितविशेष्यत्वावच्छिन्ना या हेतुविषयता तन्निरूपितपक्षविषयताशालित्वेन प्रतिबन्धतावच्छेदकहेतुविषयतावच्छिन्नतत्प्रकारतानिरूपितपक्षविषयताशालित्वेन वा ज्ञाननिवेशस्यावश्यकत्वात्।

चिन्तामणिदीधितिः।

भवति हि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणधूमत्वे वह्न्यभावव्यापकीभूताभावप्रतियोगित्वे वा गृहीते नियमतो वह्निव्यभिचारधीप्रतिरोधः तथाविधधूमसमानाधिकरणत्वादिकन्तु न तथा रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहात्। व्यति-

---

(१) यत्र व्याप्तिघटकपदार्थांशे भ्रमात्मकं परामर्शं तदसंग्रहात्। भ्रमानुमितेर्मिथ्यात्वे प्रमानुमितौ सत्पदोल्लेखाभावाद् लक्षणसमन्वयो न स्यात्। रूपान्तरेणेति।

(२) प्रमेयवद्धूमवान् पर्वत इति ज्ञानजन्ये इत्यर्थः।

पक्षधर्मतानिश्चयस्य निवेशनीयत्वादित्यर्थः. यथाश्रुतनिवेशो नादरणीयः भ्रमासंग्रहात् (१)। रूपान्तरेण व्याप्तिविशिष्टपक्ष-जन्ये (२) अतिप्रसङ्गात् प्रतिबन्धकतावच्छेदकविषयिताशालि-ज्ञानस्य तादृशविषयताविशिष्टप्रयोजकत्वेन निवेशस्य गिरौ विटनेन नाग्निकासमयतुल्यत्वात्; व्याप्यत्वावच्छिन्नहेतुविषयतैव वा व्यभिचार-धीप्रतिबन्धकतावच्छेदकत्वेन निवेशनीया. तत्प्रतिबन्धकतायां पक्षधर्मताज्ञानत्वेन कथं न निवेश्यते इति चेत्, तथा सति वह्निव्याप्यो धूमवान् पर्वत इत्यादिज्ञानाव्यावृत्तेः प्रतिबन्धकता-वच्छेदकविषयतानिरूपितविशेष्यत्वावच्छिन्ना या हेतुविषयता तन्निरूपितपक्षविषयताशालित्वेन प्रतिबन्धकतावच्छेदकहेतुविषय-तावच्छिन्नप्रकारतानिरूपितपक्षविषयताशालित्वेन वा ज्ञान-निवेशस्यावश्यकत्वात् ।

चिन्तामणिदीधितिः ।

भवति हि धूमसमानाधिकरणात्यन्ताभावाप्रति-योगिवह्निसमानाधिकरणधूमत्वे वह्निव्याप्यतावच्छेदकधूमता-भावप्रतियोगित्वे वा गृहीते नियमतो वह्निव्यभिचारधी-प्रतिरोधः तथाविधधूमसमानाधिकरणात्यन्ताभावादिकन्तु न तथा रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहात् । व्यति-

(१) [illegible] । [illegible] रूपान्तरेण [illegible] मते च ।

(२) [illegible] ।

रेकसहचारेणान्वयव्याप्तिग्रहणाश्रयणाद्वा। न च भ्रम-
संशयोत्तरप्रत्यक्षं प्रति विशेषदर्शनस्य हेतुतामते तत्रा-
तिव्याप्तिः, तथाविधनिश्चयत्वेन हेतुताया विवक्षित-
त्वात् विशेषदर्शनस्य च भ्रमादिविरोधित्वेन तत्त्वानि-
त्युक्तत्वात्।

गादाधरी विवृतिः।

अत्र व्यापकताज्ञानस्य कथञ्चित् व्यभिचारधीविरोधित्वेऽपि
साध्याभावव्यापकाभावप्रतियोगित्वज्ञानस्य तद्विरोधित्वे मान-
भावः ग्राह्याभावाद्यनवगाहित्वात् हेत्वभावप्रतियोगिकाभावत्वे
हेतौ साध्याभावसामानाधिकरण्यावगाहिनीं हेत्वभावे साध्या-
भावसमानाधिकरणाभावप्रतियोगित्वमवगाहमानां (१) धियं
प्रति हेत्वभावे साध्याभावसमानाधिकरणाभावाप्रतियोगित्वरूप-
साध्याभावव्यापकत्वज्ञानस्य विरोधित्वेऽपि हेतुतावच्छेदकरूपेण
हेतौ साध्याभावसामानाधिकरण्यधियं प्रति तस्यातथात्वात् (२)
हेत्वभावाभावत्वेन हेतुधर्मिकव्यभिचारधीनिवेशे च हेतुव्यापक-
साध्यसामानाधिकरण्यज्ञानासंग्रहः हेत्वभावाभावत्वेन हेतुविषय-
कतत्समानाधिकरणाभावप्रतियोगित्वग्रहे तेनैव रूपेण तद्विषयक-
तत्समानाधिकरणाभावाप्रतियोगित्वज्ञानस्य प्रतिबन्धकत्वादित्या-

(१) हेत्वभावाभावत्वावच्छिन्ने साध्याभावसामानाधिकरण्यग्रहे तत्पर्यवसि-
(२)। हेत्वभावे साध्याभावसमानाधिकरणाभावप्रतियोगित्वस्यावगाहनादिति
२०।

(२) हेत्वभावे साध्याभावव्यापकत्वज्ञानस्याप्रतिबन्धकत्वादित्यर्थः।

शङ्का मणिमन्त्रादिन्यायेन एकविधव्यभिचारधियं प्रति उभयविधव्याप्तिज्ञानस्य प्रतिबन्धकताव्यवस्थापकं तत्सत्त्वे फलानुत्पादनियममाह, 'भवति हीत्यादि. रासभादौ धूमव्यापकवह्निसामानाधिकरण्यग्रहेऽपि वह्निव्यभिचारग्रहात् (१) वह्निसमानाधिकरणधूमत्वग्रहानुधावनम्। 'वह्निव्यभिचारधीप्रतिरोधः' तद्ग्रहसमानधर्म्मिकवह्निव्यभिचारग्रहानुत्पादः। नन्वत्र प्रतिबन्धकतावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः, व्यापकसमानाधिकरण्यघटकसामानाधिकरण्यांशस्य व्यभिचाराविघटकतया व्यापकताविषयकत्वस्यैव तद्धियो व्यभिचारधीविरोधितावीजत्वात्, सामानाधिकरण्यविषयतायाः प्रतिबन्धकतावच्छेदकशरीरेऽनन्तर्भावेन प्रतिबन्धकतावच्छेदकतया धूमव्यापकत्वविषयतायास्तदवच्छिन्नवह्निविषयताया वा उपादेयतया तादृशविषयतया च समं पक्षविशेषणतापन्नहेतुविषयत्वादेर्निरूप्य-निरूपकभावविरहेण दर्शितरूपेण परामर्शनिवेशासम्भवात्, अतोऽत्र यादृशविषयताकनिश्चयत्वव्यापकं प्रतिबन्धकत्वं तादृशत्वमेव प्रतिबन्धकतावच्छेदकत्वं वाच्यं तथाच धूमव्यापकवह्निसमानाधिकरणधूमसामानाधिकरण्यादिविषयताकनिश्चयत्वस्यापि धूमधर्म्मिकव्यभिचारधीप्रतिबन्धकताव्याप्यतया तद्विषयताया अपि तदात्मकत्वेनैवेति वह्निव्याप्यधूमसमानाधिकरणरासभवानिति ज्ञानजन्येऽतिप्रसङ्गः। न च एवंविशिष्टतया भासमानो तादृग्धर्म्मस्तादृग्धर्म्मादि व्यभिचार-

१ [illegible]

ज्ञानमेव विवक्षितं मतोनागं दोष इति भावः। तादृश भवान् धूमवांश्च पक्ष इति समूहालम्बनस्य तादृशव्याप्यांशे त्याशङ्का पक्षविशेषणतापन्नेतीयं विषयता प्रतिबन्धकतावच्छेदिका प्रतिबन्धकतावच्छेदकविषयतानिरूपिता वा व्याप्त्यवच्छेद धर्मावच्छिन्नधर्मिकव्यभिचारज्ञानस्य प्रतिबन्धकतावच्छेदकत्वे प्रतिबन्धकतावच्छेदकविषयतानिरूपितत्वेन वा मेय निवेश्या इत्याशयेन समाधत्ते, 'तथाविधधूमेति वह्निव्याप्यधूमसामानाधिकरण्याद्यवच्छिन्नरासभादिविषयत्वन्तु, न तथा' न व्याप्त्यवच्छेदकावच्छिन्नधर्मिकव्यभिचारज्ञानप्रतिबन्धकतावच्छेदकत्वादिमदित्यर्थः। एवमपि धूमव्यापकवह्निसमानाधिकरणरासभसमानाधिकरणधूमवानयमित्यादिज्ञानाव्याप्तिरित्यत आह, 'व्यतिरेकेति।

परे तु ननु वह्नित्वाद्यवच्छिन्नधर्मिकधूमत्वाद्यवच्छिन्नव्यापकत्वग्रहत्वेनैव धूमो वह्निव्यभिचारीत्यादिव्यभिचारज्ञानप्रतिबन्धकता लाघवादावश्यकत्वाच्च न तु धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्तिज्ञानत्वेन गौरवात् मानाभावाच्च, तथा व्याप्तिविषयता न व्यभिचारधीप्रतिबन्धकतावच्छेदिका। अथ इदन्त्वावच्छिन्ने तादृशधूमत्वादिरूपव्याप्तिग्रहे तदवच्छिन्ने व्यभिचारग्रहानुदयात् समानधर्मिकव्यभिचारज्ञान प्रति तादृशव्याप्तिज्ञानत्वेनापि मणिमन्त्रादिवत् पृथक्प्रतिबन्धकता वाच्या, तथा च तादृशव्याप्तिविषयताया व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वमक्षतमेव। न च धर्मितावच्छेदकत्वनिरूपितविरोधि-

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

(१) [illegible]

(२) [illegible]

घटितत्वाविशेषात्, किञ्चाग्रे वा धूमत्वाद्यवच्छिन्ने धूमव्या-
पकवह्निसामानाधिकरण्यादिना, तदादिग्रहदशायामपि व्यभिचार-
धीप्रतिबन्धकतायामेवेष्टत्वोपगमे वह्निव्याप्यधूमसमानाधिकरण-
रासभवानयं धूमव्यापकवह्निसमानाधिकरणरासभवानयमित्या-
दिज्ञानजन्येऽतिप्रसङ्गो दुर्वार इत्याशङ्का मणिग्रन्थादिनाऽपि
प्रतिबन्धकतावारकस्यानवगमत्वानुभवानुरोधेन धूमव्यापकवह्निस-
नाधिकरणधूमत्वादिरूपव्याप्यत्वग्रहे तद्धर्मितावच्छेदकावच्छिन्नं
व्यभिचारधीर्नोत्पद्यत इति निर्विवादानुभवात्तद्ग्रहस्य समा-
धर्मितावच्छेदकव्यभिचारधीप्रतिबन्धकत्वमावश्यकं वह्निव्याप्य-
धूमसमानाधिकरणो रासभ इत्यादिज्ञानदशायाञ्च रासभादौ वह्नि-
व्यभिचारग्रहस्यैवानुभवात् न तथाविधधूमसामानाधिकरण्यादि-
ज्ञानत्वेनापि प्रतिबन्धकत्वान्तरमिति विशेषमाह, 'भवति ह्येवा-
दिना 'रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहादित्यन्तेन। ननु धूम-
व्यापकवह्निसमानाधिकरणधूमत्वादिग्रहविषये यदि व्यभिचार-
ज्ञानानुत्पादोऽनुभवसिद्धस्तदा वह्निर्धूमव्यापक इत्यादिज्ञानकाली-
नकेवलधूमत्वादिग्रहविषयेऽपि तदनुत्पादस्तथा सामाधिकरण्यांश-
स्याकिञ्चित्करत्वादिति साध्ये धूमादिव्यापकताग्रहकालीनधूमत्वा-
दिग्रहत्वेनैव प्रतिबन्धकत्वमुचितम्। वस्तुतो वह्न्यादौ धूमत्वाद्य-
वच्छिन्नव्यापकताग्रहदशायां धूमत्वाद्यवच्छेदेन वह्न्यव्यभिचार-
स्यापि सुग्रहतया (१) धूमव्यापकवह्निसमानाधिकरणधूमत्वादि-

---

(१) वह्नौ धूमत्वावच्छिन्नसमानाधिकरणाभावाप्रतियोगित्वनिश्चयस्यैव तद-
निरूपितवृत्तित्वावच्छिन्ने वह्न्यभाववद्वृत्तित्वाभावप्रकारकत्वादिति भावः।

शङ्खो न श्वेत इत्याकारकपित्तादिदोषजन्यविपरीतनिश्चयकाले श्वैत्यव्याप्यशङ्खत्वादिदर्शनात् शङ्खः श्वेत इत्यादिचाक्षुषापत्तिरिति वाच्यम्। तादृशदोषस्यैव श्वैत्यादिग्रहप्रतिबन्धकत्वात्। यदि च विनष्टेऽपि दोषे तादृशविपरीतनिश्चयसत्त्वे न श्वैत्यादिप्रत्यक्षं तदास्तु प्रत्यक्षे समानेन्द्रियजन्यस्य दोषविशेषाजन्योपनीतभानभिन्नविपरीतनिश्चयस्य प्रतिबन्धकत्वम् (१), एवं शङ्खः श्वेत इति चाक्षुषनिश्चयोत्पत्तौ सत्यां यत्र दोषसमवधानं तत्र तादृशनिश्चयसत्त्वे यदि दोषान्न शङ्खो न श्वेत इत्यादिचाक्षुषनिश्चयस्तदा तन्निर्व्वाहोऽपि समानेन्द्रियजन्यविपरीतनिश्चयप्रतिबन्धकत्वादेव(२) अतएव साक्षात्कारिभ्रमे साक्षात्कारिविशेषदर्शनमेव विरोधीत्यनेन मणिकृता दोषविशेषजन्यभ्रमे समानेन्द्रियजन्यलौकिकग्राह्याभावज्ञानस्य विरोधिता नान्यविपरीतज्ञानस्य इत्यभिधानं संगच्छते। चक्षुषा वंशे उरगत्वभ्रमेऽपि त्वचा तत्र तदभावग्रहात् समानेन्द्रियजन्यत्वनिवेशनं, शङ्खो न श्वेत इत्यादिनिश्चयानन्तरं

---

(१) साक्षात्कारित्वग्रहायोग्यस्य उपनीतमानरूपबाधप्रत्ययस्य लौकिकप्रत्यक्षविरोधित्वनिर्व्वाहाय भिन्नान्तं दोषविशेषजन्यस्य लौकिकप्रत्यक्षत्वस्य कथंमाध्यारोपस्य तद्विरोधितानिर्व्वाहायाजन्यान्तं भेदप्रतियोगिविशेषणं, अत्र भिन्नान्तनिवेशापेक्षया साक्षात्कारित्वव्यञ्जकविषयतावत्त्वनिवेशे लाघवसम्भवात् तत्पक्षपरित्यागे किं बीजमिति चिन्तनीयम्।

(२) वस्तुतः समानेन्द्रियजन्यबोधस्य प्रतिबन्धकत्वं मिश्रैर्नाङ्गीक्रियते एवं विशेषदर्शनवशात् नोक्रम्यते आपत्ति, विपरीतज्ञानविरोधित्वेनैव विशेषदर्शनस्य कारणत्वात्, तत्त्वञ्च विपरीतज्ञानाव्यवहितपूर्व्वत्वशून्यज्ञानोत्पत्तिकत्वविशिष्टत्वं विशेषदर्शनस्य दोषविशेषजन्यज्ञानं प्रति अप्रतिबन्धकतया तदुत्तरं शङ्खो न श्वेत इत्यादिज्ञानोदयात्, तस्य च न विपरीतज्ञानविरोधित्वमिति।

सति विशेषदर्शने चाक्षुषसामग्रीविगमे शङ्खः श्वेत इत्यादिमानसज्ञानमिष्यत एव विशेषदर्शनेन तन्निश्चयनाशे विशेषदर्शनेन प्रतिबन्धात् तादृशनिश्चयान्तरस्य चानुत्पत्त्या तादृशमानसोत्पादस्यावश्यकतया तत्पूर्वक्षणे तदुत्पादोपगमे अनुभवविरोधविरहात्। अस्तु वा तादृशमानसादिसाधारणं लौकिकनिश्चयान्यज्ञानत्वमेवानुमित्यादिसाधारणविपरीतनिश्चयप्रतिबध्यतावच्छेदकं, यत्र सत्यपि चक्षुरादिसन्निकर्षे कराद्यदर्शनसहितदूरत्वादिदोषादयं स्थाणुरित्यादिभ्रमः ततः करादिदर्शने नायं स्थाणुरित्यादिलौकिकनिश्चयस्तत्रैव भ्रमोत्तरप्रत्यक्षे विशेषदर्शनत्वेन हेतुता। न च तत्र भ्रमोत्पत्तिक्षणे न कथं तादृशलौकिकज्ञानं विपरीतज्ञानोत्तरप्रत्यक्ष एव विशेषदर्शनहेतुतया तदुत्पत्तिक्षणे प्रत्यक्षोत्पत्तेर्विशेषदर्शनविरहेऽपि दुर्वारत्वात्। यदि च दूरत्वादिदोषेण प्रतिबन्धान्न तदा तदुत्पादापत्तिरिति, तदा भ्रमोत्तरं विशेषदर्शनात् कथं तदुत्पत्तिस्तदापि तद्दोषसत्त्वात् इति चेन्न, विशेषदर्शनसहितस्यैव दूरत्वादेः प्रतिबन्धकत्वेनोभयोपपत्तेः (१)। अस्तु वा तादृशदोषसमवधानकालीनप्रत्यक्षेऽपि विशेषदर्शनस्य हेतुत्वान्तरं विपरीतज्ञानवत्तादृशदोषाणाञ्चाप्रतिबन्धकत्वमिति मते प्रत्यक्षविशेषेऽतिव्याप्तिमाशङ्का निराकरोति, 'न चेत्यादिना. भ्रमो विपरीतनिश्चय.. एतच्च मतं सिद्धान्तिना-

---

(१) कथं तर्हि [illegible] विशेषदर्शनस्य हेतुत्वं निर्वाहकं. तत्र तत्र [illegible] भ्रमो [illegible] भ्रमोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वं बोध्यम्।

नुमत न तूपाध्यायानां तेविंशेषदर्शनाभावविशिष्टसंशयसाधारण-विपरीतज्ञानप्रतिबन्धकतामुपगम्य संशयाद्युत्तरं प्रत्यक्षनिश्चय-वारणात्। न च विशेषदर्शनाभावविशिष्टग्राह्याभावज्ञानत्वेन विशिष्टबुद्धिप्रतिबन्धकत्वे बाधनिश्चयकाले लिङ्गपरामर्शरूपविशेष-दर्शनात् अनुमित्यापत्तिर्विशिष्टाभावसत्त्वात् एवं निश्चयत्वानिवे-शात् संशयोत्तरं संशयानुपपत्तिः योग्यतासंशयस्य शाब्दबोध-प्रतिबन्धकतापत्तिश्च प्रतिबध्यतावच्छेदके निश्चयत्वप्रवेशेन संशयो-त्तरसंशयोपपादने बाधनिश्चयोत्तरमपि संशयापत्तिरिति वाच्यम्। परोक्षज्ञाने बाधनिश्चयस्य प्रतिबन्धकत्वान्तरकल्पनेन बाधनिश्चय-दशायामनुमित्यापत्तिवारणात्, प्रत्यक्षनिश्चयत्वस्यैव च संशया-दिसाधारणविपरीतधीप्रतिबध्यतावच्छेदकतया ग्राह्यसंशयोत्तर शाब्दबोधाद्युपपत्तेः। न चैवं बाधनिश्चयोत्तरं संशयस्यापत्तिः, अनुमित्यादिसाधारणबाधनिश्चयप्रतिबध्यतावच्छेदकगर्भे प्रत्यक्ष निश्चयान्यत्वस्य प्रवेशनीयतया संशयस्य निश्चयप्रतिबध्यतोपपत्तेः। न च प्रत्यक्षनिश्चयान्यबुद्धौ विपरीतनिश्चयत्वेन प्रतिबन्धक-त्वान्तरस्य एतन्मतेप्यावश्यकत्वे प्रत्यक्षनिश्चये विशेषदर्शनाभाववि-शिष्टविपरीतज्ञानाभावहेतुताकल्पनापेक्षया विशेषदर्शनस्य लघो-र्हेतुत्वकल्पनमेवोचितमिति वाच्यम्। व्याप्तेः सम्बन्धादिभेदेन भिन्नतया व्याप्यदर्शनस्याननुगमेन व्यभिचारात् तद्धेतुत्वकल्पना-सम्भवात्, नानाविधविशेषदर्शनाभावकूटविशिष्टविपरीतज्ञाना-भावस्यानुगतत्वाच्च। अन्यथा (१) अत्रैवान्यताप्युत्तेजकहेतुतया

(१) तत्तद्विशेषदर्शनाभावकूटत्वावच्छिन्नाभावत्वादिना कथञ्चिदुपपत्तावित्यर्थः।

तावच्छेदकस्य तत्तद्विपरीतज्ञानाव्यवहितोत्तरत्वाभावकूटगर्भतागौरवं दुर्व्वारम्।

यत्तु विशेषदर्शनजन्यप्रत्यक्षं व्याप्यधर्म्मविशिष्टधर्म्मिविशेष्यकमेव, तदनुत्तरन्तु न तथा, तथाच तथात्वातथात्वयोर्विशेषदर्शन-विपरीतज्ञानाभावजन्यतावच्छेदकप्रवेशेनैव व्यभिचारवारणे नानन्तर्य्यप्रवेश इति, तदपि न, करादिमान् पुरुष इत्यादिनिश्चयकालीनकरादिमत्तारूपावच्छेदकधर्म्मनिश्चयस्य पुरुषतादिनिश्चायकतया तज्जन्यनिश्चये विपरीतज्ञानाभावव्यभिचारस्यानन्तर्य्यमनिवेश्य दुर्व्वारत्वात्, करादिमत्तावच्छिन्नाविशेष्यकत्वस्य विपरीतज्ञानाभावजन्यतावच्छेदकत्वे करादिमान् पुरुष इत्यादिनिश्चयशून्यकालीनकरादिमत्ताग्रहोत्तरजातस्य करादिमान् पुरुष इत्यादिप्रत्यक्षस्यासंग्रहप्रसङ्गात्।

यत्तु विपरीतज्ञानविरोधित्वेनैव विशेषदर्शनादीनां हेतुता तत्त्वञ्च (१) विपरीतज्ञानाव्यवहितपूर्व्वत्वशून्यक्षणवृत्तित्वविशिष्टत्व. तदवच्छिन्नञ्च निश्चयपूर्व्वं सर्व्वत्रैव सुलभमिति सामान्यतो निश्चयत्वमेव तज्जन्यतावच्छेदकमिति विपरीतज्ञानानुत्तरप्रत्यक्षे तदभावहेतुतापि नास्ति। न चैवं विशेषदर्शनोत्पत्तिकाले संशयाद्यनुत्पत्त्या तत्पूर्व्वक्षणेऽपि उक्तकारणसत्त्वाद्विशेषदर्शनानन्तरमिव तदुत्पत्तिक्षणेऽपि निश्चयो जायतामिति वाच्यम्। इष्टत्वात्। न च यत्र संशयाद्युत्तरसत्यपि विशेषदर्शने न संशयादिः तत्र

(१) विपरीतज्ञानविरोधित्वञ्चेत्यर्थः।

निश्चयापत्तिरिति वाच्यम्। विपरीतकोटिनिवर्त्तकविशेषदर्शनाद्यसत्त्वे उपस्थिततत्कोटिज्ञानोत्पत्तेर्बाधविरहेणावश्यकत्वादिति। तदप्यसत्। अव्यवहितपूर्व्वत्वस्य तत्तत्क्षणघटिततया गौरवादिति. एवं विशेषदर्शनानां हेतुत्वं दीधितिकाराणामप्यननुमतं संशयोत्तरविशेषदर्शनासत्त्वे संशयजनककोट्युपस्थितिधर्म्मिज्ञानादिघटितसामग्रीवशात् संशयस्योत्पादेन संशयान्यज्ञानत्वरूपनिश्चयत्वावच्छिन्नापत्त्ययोगात् तत्सामग्र्यभावसहितज्ञानसामान्यसामग्र्या एव तज्ज्ञानान्यज्ञानत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात्। अथैवं संशयसामग्र्यभावस्य निश्चयोत्पत्तावपेक्षणे संशयप्रयोजकविशेषदर्शनस्याभावो विशेषदर्शनं तन्निश्चयहेतुरिति आयातमिति चेन्न, तत्प्रयोजकाभावस्य तदन्यत्वावच्छिन्नाजनकस्यापि तदन्यत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात् अन्यथा पटज्ञानान्यघटज्ञानत्वावच्छिन्नोत्पत्तावपेक्षितस्य पटादिज्ञानसामग्र्यभावस्य पटज्ञानान्यज्ञानत्वावच्छिन्नहेतुताप्रसङ्गात्। विपरीतनिश्चयानन्तरञ्च तेन प्रतिबन्धादेव न प्रत्यक्षं विपरीतनिश्चयस्य प्रत्यक्षसाधारणलौकिकसन्निकर्षाद्यजन्यविशिष्टबुद्धित्वावच्छिन्नं प्रत्येव प्रतिबन्धकत्वात्, विपरीतनिश्चयानन्तरं विशेषदर्शने सत्यपि तन्नाशानन्तरमेव प्रत्यक्षं जायते (१)।

यत्तु भूतले घटो नास्तीति शाब्दादिनिश्चयानन्तरं लौकिक-

(१) मिश्रादिमते विपरीतनिश्चयोत्तरं विशेषदर्शने तदव्यवहितोत्तरक्षणे प्रत्यक्षनिश्चय एतन्मते तृतीयक्षणे इति क्षणविलम्बस्य शपथनिर्णेतव्यत्वादिति भावः।

सन्निकर्षवशात् घटावगाहितत्संशयः कथं नोत्पद्यते लौकिकसन्निकर्षाजन्यतज्ज्ञानस्यैव तदभावनिश्चयप्रतिबध्यत्वात् अतो लौकिकनिर्णयान्यतद्वत्ताज्ञानत्वं तदभावनिश्चयाभावजन्यतावच्छेदकं वाच्यम् एवमपि यादृशसामग्रीबलात् लौकिकप्रत्यक्षे घटो भासते तत्सहितघटाभावोपस्थित्यादिसहितघटाभावभानसामग्रीतो बाधकाले संशयापत्तिर्दुर्व्वारैवेति निश्चयेऽपि विशेषसामग्र्यन्तरं कल्पनीयम्, तच्च निरुक्तविपरीतज्ञानविरोधित्वावच्छिन्नमेवेति (१) विशेषदर्शनस्यापि तेन रूपेण हेतुत्वमायातीति। तदसत्, लौकिकसामग्र्या बलवत्या विपरीतकोटिभानप्रतिबन्धकत्वादुक्तसंशयापत्त्ययोगात्, तत्प्रतिबन्धकत्वाकल्पने उक्तबाधनिश्चयानन्तरं लौकिकसन्निकर्षाद्यत्र वास्तवो घटादिनिश्चयस्तत्र घटाभावभानप्रतिबन्धकासत्त्वेन तज्ज्ञानापत्त्या संशयापादनस्य ब्रह्मणोऽपि दुर्व्वारत्वात् इति विशेषदर्शनहेतुतायां विवादान्मत इत्युक्तम्। संशयोत्तरप्रत्यक्षनिश्चये विशेषदर्शनहेतुत्वे घटादिप्रकारकमानसेच्छाविरहविशिष्टघटाभावादिशाब्दसामग्र्या योग्यतासंशयात्मकघटादिसंशयघटिताया घटादिमानसं प्रति प्रतिबन्धकत्वं न कल्प्यते इति लाघवं (२) तदानीं घटाभावादिमानसे तादृशशाब्द-

(१) तथाच प्रत्यक्षं द्विविधं लौकिकनिर्णयभिन्नं लौकिकनिर्णयात्मकञ्च, तत्र पूर्व्वस्मिन् बाधाभावः उत्तरत्र विपरीतज्ञानविरोधित्वावच्छिन्नञ्च कारणमिति विशेषसामग्रीविरहान्नापत्तिरिति भावः।

(२) संशयानन्तरं घटाभावव्याप्यवत्ताज्ञाने घटाभावशाब्दसामग्रीसत्त्वे न घटाभावमानसमतः समानविषये शाब्दसामग्र्याः प्रतिबन्धकत्वमवश्यं कल्प्यं, तथाच तत्प्रकारकमानसे तदभावशाब्दसामग्र्याः प्रतिबन्धकत्वाकल्पनमेव लाघवमिति भावः।

सामग्र्याः प्रतिबन्धकतया मानसघटादिविशिष्टसंशयस्य विशेषदर्शनरूपकारणविरहेणैव घटादिमानसनिश्चयस्य च वारणसम्भवात्। विशेषदर्शनसत्त्वे च तस्य विपरीतकोटिशाब्दधीप्रतिबन्धकत्वात् शाब्दधीसामग्र्यभावाज्जायत एव मानसमिति केचिन्मिश्रमतं परिष्कुर्वन्ति। ननु दीधिकारादिमतेऽपि व्याप्यवद्धर्मिनिश्चयस्य विशेषणज्ञानादिविधया तदुत्तरप्रत्यक्षहेतुतया तथाविधनिश्चयत्वेन हेतुत्वाविवक्षादशायां तादृशप्रत्यक्षेऽतिव्याप्तेरावश्यकत्वात् विशेषदर्शनस्य हेतुतामत इत्यभिधानमयुक्तमिति चेन्न, निश्चयत्वेन हेतुत्वविवक्षणे मिश्रान्यमते नातिव्याप्तिर्मिश्रमते च तादृशनिश्चयत्वेनापि प्रत्यक्षविशेषहेतुतेत्याशयेन तथाविधाभिधानात्। अग्रे च तादृशनिश्चयत्वेन हेतुत्वविवक्षामात्रेण न समाधानम्, अपि तु तद्विवक्षया प्रत्यक्षे तादृशनिश्चयत्वेन हेतुताविरहप्रदर्शनेन चेति सामञ्जस्यात्। अथवा (१) तादृशनिश्चयजन्यतावच्छेदकानुभवत्वव्याप्यजातिविवक्षणे (२) नान्यमतेऽतिव्याप्तिरित्याशयेन विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनहेतुतामते अतिव्याप्त्यभिधानम्। 'विशेषदर्शनस्य चेति, 'चः' त्वर्थे, 'भ्रमादिविरोधित्वेन' ग्राह्याभावविरोधित्वेन, 'तत्त्वं' प्रत्यक्ष-

---

(१) यथाश्रुतमभिप्रेत्य सुष्ठु समाधत्ते अथ वेति।

(२) अत्र जन्यता किञ्चिद्धर्मावच्छिन्नविशेष्यकत्वावच्छिन्ना ग्राह्या नातस्तत्प्रकारकप्रत्यक्षे तद्विषयकज्ञानत्वेन हेतुत्वात् तादृशजन्यतामादायातिव्याप्तिरिति, किञ्चिद्धर्मावच्छिन्नत्वनिवेशात् सामान्यलक्षणाजन्यप्रत्यक्षे नातिव्याप्तिरिति च विभावनीयम्।

विशेषहेतुत्वं, 'उक्तत्वादि'ति, विशेषदर्शनत्वरूपेण हेतुत्वे अन्धकारे घटसंशये आलोकसमवधानात् तन्निश्चयानुपपत्तिः, एवं कुङ्कुमादौ तैलसंयोगादिरूपव्यञ्जकविरहाधीनसौरभादिसन्देहानन्तरं व्यञ्जकसमवधानेऽपि तन्निश्चयानुपपत्तिश्च। न चालौकिकत्वस्य विशेषदर्शनजन्यतावच्छेदकत्वोपगमात् नेयमनुपपत्तिः तत्र घट-सौरभादेर्लौकिकप्रत्यक्षस्यैव विशेषदर्शनं विनोत्पत्तेरिति वाच्यम्। लौकिकसन्निकर्षवत्यपि यत्र विशेषादर्शनसहितदूरत्वादिदोषप्रयुक्तः पुरुषत्वादिसंशयस्तत्र विशेषदर्शने सत्येव लौकिकप्रत्यक्षोत्पत्तेर्विशेषदर्शनजन्यतावच्छेदकरूपेण लौकिकस्यापि प्रत्यक्षस्य संग्राह्यत्वात्। अतएव विशेषदर्शने अनुमितिसामग्रीसत्त्वात् अनुमितिरेव भविष्यति न प्रत्यक्षमिति कथं तस्य प्रत्यक्षहेतुता इत्याक्षिप्य समानविषये प्रत्यक्षसामग्र्या बलवत्त्वमिति प्रत्यक्षमेव जायते नानुमितिरिति मणिकारेण समाहितमुत्पत्तिवादे (१)। विशेषदर्शनस्यालौकिकप्रत्यक्षमात्रहेतुत्वे तादृशप्रत्यक्षसामग्र्या अनुमितिसामग्र्यपेक्षया हीनबलत्वादसङ्गतेः। यदि च विपरीतज्ञानोत्तरप्रत्यक्षनिष्ठविशेषदर्शनजन्यतावच्छेदकशरीरे अलौकिकत्वनिवेशेऽपि न क्षतिः दूरस्थे धर्म्मिणि पुरुषत्वादिसन्देहोत्पत्तिक्षण एव लौकिकसन्निकर्षात्तन्निश्चयवारणाय दूरत्वादिदोषसमवधानकालीनप्रत्यक्षेऽपि विशेषदर्शनहेतुताया आवश्यकत्वात्तत एव दूरस्थे धर्म्मिणि संशयोत्तरमपि विना विशेषदर्शनं पुरुष-

(१) व्युत्पत्तिवादे इति पा०।

त्वादिनिश्चयवारणसम्भवात् इत्युच्यते। तदापि सम्बन्धादिभेदभिन्न-नानाविधव्याप्यवगाहिविशेषदर्शनावच्छेदकधर्म्मदर्शनसाधारणवि-शेषदर्शनत्वस्यानुगतस्याभावात् न तेन रूपेण हेतुतासम्भव इति विपरीतज्ञानविरोधित्वमेवानुगमकं वाच्यमिति भावः। अथ यदि आलोकसंयोगादिसाधारण्ये विपरीतज्ञानविरोधित्वस्य तदा तत्त्व-मनुपपद्यतां घटवद्भूतलादावालोकसंयोगादिसत्त्वेऽपि तत्र चक्षुः-संयोगाद्यसत्त्वे तत्सत्त्वेऽपि च दूरत्वादिदोषात् घटादिसंशयोत्पत्त्या आलोकसंयोगसत्त्वेन विपरीतज्ञानाविरोधित्वात्। अन्यथा लौकि कप्रत्यक्षकारणान्तरसमवहितालोकसंयोगत्वेन तथात्वे, तथापि तस्यात्मनिष्ठोऽन्यः सम्बन्धः(१) अन्यस्य(२) विशेषदर्शनस्येति उभयो-रनुगतकारणतावच्छेदकसम्बन्धो दुर्ज्ञेय इति देत्, लौकिक प्रत्यक्षकारणालोकसंयोगादिसमवहितात्ममनोयोगस्यैव तादृश-निष्प्रत्यासत्तस्य विपरीतज्ञानप्रतिबन्धकत्वोपगमेन तत्साधारण-तद्रूपावच्छिन्नस्य विशेषदर्शनस्य समवायसम्बन्धेनैव हेतुतासम्भवा-दित्यलमधिकेन।

दिनकरीयटिप्पणी।

एतदपि लिङ्गपरामर्शादिलक्षणातिव्याप्तिवारणाय इति उक्तावनिती नातिव्याप्तिः, तदाविषयकानुमितिं प्रति तत्त्वेनैव तस्य हेतुत्वात्। न चैकलिङ्गपरामर्शादि-

१ ...
२ ...

जन्यन्यायार्थज्ञाने तच्छब्देन सङ्केतितशब्दान्तरेण वा व्याप्यादिविशिष्टोपस्थितिद्वारा जनिते शाब्दबोधेऽतिव्याप्तिः, व्युत्पादयिष्यते च महावाक्यार्थज्ञानस्यावान्तरवाक्यार्थधीजन्यत्वं तदादेश्च विशेषरूपेणोपस्थापकत्वमिति वाच्यम्। तत्रातिरिक्तस्य पदजन्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशान्निश्चयत्वस्याप्रवेशाच्च।

गादाधरी विवृतिः।

तथाविधनिश्चयत्वेन हेतुताविवक्षणस्य प्रयोजनान्तरमपि दर्शयति, 'अतएवेति, 'लिङ्गवत्त्वादिलक्षणः' वह्निव्याप्यधूमवत्त्वादिघटितः, यः 'अतिदेशवाक्यार्थः' सादृश्यविशिष्टे पदवाच्यत्वादिबोधकवाक्यप्रतिपाद्योऽर्थः, तद्विषयकं यज्ज्ञानं वह्निव्याप्यधूमवत्पर्वतसदृशो महानसपदवाच्य इत्यादिज्ञानं तज्जन्यायाम् अयं महानसपदवाच्य इत्याद्युपमितौ वस्तुगत्या साध्यव्याप्यत्वावच्छिन्नहेतुप्रकारकं पक्षविशेष्यकं यत्तादृशं ज्ञानं तज्जन्यत्वेऽपि नातिव्याप्तिरित्यर्थः। 'तथाविधवाक्यार्थेति पदवाच्यत्वविशिष्टवह्निव्याप्यधूमवत्पर्वतसादृश्यावच्छिन्नत्वमिति ज्ञानत्वेनेत्यर्थः। यद्यपि अत-[illegible] तादृशविशिष्टवाक्यार्थघटकतत्तत्पदार्थानां परस्परं वैशिष्ट्यावगाहित्वेनैव उपमितिविशेषहेतुताया वक्तव्यतया पक्षे [illegible] हेतुमत्त्वावगाहिज्ञानत्वमप्युपमितिजनकतावच्छे[illegible] [illegible] व्याप्याभावानवगाहितादृशहेतुमत्तावगाहि[illegible] [illegible]तिजनकतावच्छेदकव्याप्यत्वप्रकारकनिश्चयत्वं [illegible]

घटितसादृश्यावच्छिन्नधर्म्मिकवाक्यार्थज्ञानस्य तद्घटितसादृश्यज्ञान-सहकारेण फलजनकतया उभयत्र सादृश्यघटकधर्म्माणां विशिष्या-वश्यनिवेशनीयत्वात् । न च पर्य्याप्तिविवक्षायामपि धूमवत्त्वेन धूमव्यापकवह्निमत्सादृश्यात्मकतादृशवह्निमद्वृत्तिधूमवत्तानिश्चयज-न्योपमितावतिव्याप्तिः (१) न शक्यते वारयितुमिति वाच्यम् । सादृश्यघटकभेदविषयताया अपि प्रवेशेन विवक्षितनिश्चयत्वे तत्कारणतावच्छेदकतापर्य्याप्तिविरहात् । लाघवाद्भेदाघटितसादृ-श्यज्ञानत्वेनैवोपमितौ कारणत्वमिति तु न वाच्यं, तथा सति गवादा-वपि सादृश्यनिश्चयसत्त्वेन गवयादिपदवाच्यत्वोपमित्यापत्तेः । यदि च वैधर्म्यज्ञानादपि उपमितिः स्वीक्रियते वैधर्म्यस्य च इतर-वैधर्म्यत्वेन ज्ञानं नापेक्ष्यते तदा व्याप्यधर्म्मरूपवैधर्म्यज्ञानजन्यो-पमितावतिव्याप्तिः (२) कारणतावच्छेदकतापर्य्याप्तिनिवेशेऽपि दुर्वारेति तद्वारणप्रकारचिन्त्यः (३) । तद्वावाक्यार्थविषयकशाब्द-

(१) धूमवत्त्वेन धूमव्यापकवह्निमत्सदृशः पर्वतपदवाच्य इत्यतिदेशवाक्यार्थज्ञानं अयं धूमेन धूमव्यापकवह्निमत्सदृश इति सादृश्यज्ञानं ततोऽयं पर्वतपदवाच्य इत्यु-पमितिरित्यतिव्याप्तिरिति भावः ।

(२) यदा [illegible] कण्टकाशीति इतरवैधर्म्य-ज्ञानं ततो [illegible] कण्टकाशी करभपदवाच्य इति [illegible] इति ततोऽयं करभपदवाच्य इति [illegible] इति ततोऽयं करभपदवाच्य इत्युपमिति तदा [illegible] ततोऽयं [illegible] पदवाच्य इति वैधर्म्यज्ञान-[illegible] कारणतावच्छेदकपर्य्याप्तिनिवेशेऽपि वारयितुं न शक्यते इति भावः ।

१ [illegible] इत्यर्थः ।

तिदेशवाक्यार्थज्ञानसहकृतव्याप्यवत्ताघटितसादृश्यज्ञानजन्यायामुप मितौ जनकतावच्छेदके वाप्यांशे पक्षवृत्तित्वावगाहित्वस्याधि कस्य (१) निवेशनेऽपि धर्म्मांशे व्याप्यवत्तावगाहिनिश्चयत्वरूपानु मितिजनकतावच्छेदकावच्छिन्नहेतुताकत्वस्य (२) तादृशोपमिता वक्षतत्वात् अतिव्याप्तेर्वारणाय तादृशनिश्चयत्वपर्य्याप्तहेतुतावच्छे दकताकत्वपर्य्यन्तनिवेशनमावश्यकं (३) तथाच अनुमितिजनक तावच्छेदकता यादृशसमुदाये पर्य्याप्ता तादृशसमुदायस्यैव लक्षणे निवेशनमावश्यकमन्यथा समुदायपर्य्याप्तावच्छेदकताया एकदेशा पर्य्याप्ततया असम्भवापत्तेः। अतएव उक्तनिश्चयत्वघटकाभावदंश स्यापि सार्थकता, एवञ्चाप्रामाण्यज्ञानानास्कन्दितत्वस्य कारण तावच्छेदकत्वमते (४) तदंशोऽपि लक्षणे निवेशनीयः। न च सादृश्यज्ञानस्य उपमितिहेतुतायां पर्व्वतादिवृत्तित्वावच्छिन्नव्या प्यादिविषयता पर्व्वतादिवृत्तित्वावच्छिन्नविषयतात्वेनैव निवेश्या न तु व्याप्यादिविषयतात्वेन प्रयोजनाभावात् तथाचानुमिति जनकतावच्छेदकधर्म्मस्य उक्तोपमितिजनकतावच्छेदककोटिनिवे शोऽपि नास्ति किं पर्य्याप्तिनिवेशनेनेति वाच्यम्। व्याप्यवत्ता-

(१) तद्भिन्नत्वे सति तद्वृत्तिधर्म्मवत्त्वस्यैव तत्सादृश्यत्वात्।

(२) उपमितौ जनकतावच्छेदकधर्म्मितावच्छेदकघटकांशे निश्चयत्वानिवेशेऽपि प्रकारांशे निश्चयत्वनिवेशस्यावश्यकत्वादिति भावः।

(३) तथाच पूर्व्वत्र निश्चयत्वनिवेशनेन नातिव्याप्तिरत्र तु पर्य्याप्तिनिवेशादति व्याप्तिरिति भावः।

(४) अप्रामाण्यज्ञानाभावस्य स्वातन्त्र्येण हेतुत्वं केषाञ्चित् सम्मतमतो न दूषणम्।

घटितसादृश्यावच्छिन्नधर्म्मिकवाक्यार्थज्ञानस्य तद्घटितसादृश्यज्ञान-सहकारिण फलजनकतया उभयत्र सादृश्यघटकधर्म्माणां विशिष्या-वश्यनिवेशनीयत्वात्। न च पर्य्याप्तिविवक्षायामपि धूमवत्त्वेन धूमव्यापकवह्निमत्सादृश्यात्मकतादृशवह्निमद्वृत्तिधूमवत्तानिश्चयज-न्योपमितावतिव्याप्तिः (१) न शक्यते वारयितुमिति वाच्यम्। सादृश्यघटकभेदविषयताया अपि प्रवेशेन विवक्षितनिश्चयत्वे तत्कारणतावच्छेदकतापर्य्याप्तिविरहात्। लाघवाद्भेदाघटितसादृ-श्यज्ञानमेवोपमितौ कारणमिति तु न वाच्यं, तथा सति गवादा-वपि सादृश्यनिश्चयसत्त्वेन गवयादिपदवाच्यत्वोपमित्यापत्तेः। यदि च वैधर्म्म्यज्ञानादपि उपमितिः स्वीक्रियते वैधर्म्म्यस्य च इतर-वैधर्म्म्यत्वेन ज्ञानं नापेक्ष्यते तदा व्याप्यधर्म्मरूपवैधर्म्म्यज्ञानजन्यो-पमितावतिव्याप्तिः (२) कारणतावच्छेदकतापर्य्याप्तिनिवेशेऽपि दुर्व्वारेति तत्कारणप्रकारश्चिन्त्यः (३)। सगवाक्यार्थविषयकसादृ-

(१) धूमवत्त्वेन धूमव्यापकवह्निमत्ता [illegible]

(२) [illegible]

(३) [illegible]

बोधे अवान्तरवाक्यार्थनिश्चयस्य तादृशनिश्चयत्वेनैव हेतुता न विशिष्टपदार्थगोचरशाब्दबोधेऽपि विशिष्टपदार्थोपस्थितेस्तादृश निश्चयत्वेनैव हेतुता न तु विशेषणाभावप्रवेश इत्यभिमानेन इद बोधविशेषेऽतिव्याप्तिमाशङ्कते, 'न चे'त्यादिना, 'उपनयार्थेति' उपनयवाक्यप्रतिपाद्यसाध्यव्याप्यहेतुमत्पक्षरूपावान्तरवाक्यार्थेनेत्यर्थः, 'न्यायार्थज्ञाने' निगमनसहकृतोपनयजन्ये वह्निव्याप्यधूमवानयं धूमज्ञानज्ञाप्यवह्निमानित्यादिमहावाक्यार्थज्ञाने इदं तेन प्रतिज्ञादिपञ्चकवाक्यात्मकन्यायस्य विशिष्टैकार्थज्ञानजनकताया: स्वयं दूषणीयत्वेऽपि न क्षतिः। यद्यपि वह्निव्याप्यधूमवांश्चायमित्याद्युपनयजन्यबोधे व्याप्यत्वेन एवाभेदो धर्मिणि भासते न तु व्याप्यस्य व्याप्यतावच्छेदकसम्बन्धः नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात्। तथाच नातिव्याप्त्यवसरः पक्षांशे व्याप्तिप्रकारकज्ञानस्यैव लक्षणघटकत्वात्, यत्र तादात्म्यसम्बन्धेन धर्मिणि हेतुता तत्र व्याप्यस्य पक्षांशे तेन सम्बन्धेन उपनयप्रतिपाद्यत्वे व्याप्याभेदस्यैव हेतौ भानात् तदंशे व्याप्तिप्रकारकत्वाभावेन नातिव्याप्त्यवसरः, तथापि तादात्म्यसम्बन्धावच्छिन्नव्याप्तिविशिष्टवह्निरूपहेतुपरतच्छब्दघटितस्य सचायमिति वाक्यस्य प्रतिपाद्ये विशिष्टार्थे निगमनार्थस्यान्यस्य वा कस्यचिदर्थस्यान्वयबोधेऽतिव्याप्तिपरोऽयं ग्रन्थः, साध्यव्याप्यहेतुविशिष्टपक्षपर्यन्तपरतच्छब्दजन्यबोधेऽतिव्याप्तिपरश्च 'तच्छब्देने'त्यग्रिमग्रन्थ इति न पौनरुक्त्यम्' व्याप्यविशिष्टपक्षरूपवाक्यार्थज्ञानजन्यतामादाय तद्घटितमहावाक्यार्थबोधे संयोगादिसम्बन्धेन पक्षांशे व्याप्यप्रकारकज्ञानकरणता-

घटितलक्षणस्य अतिव्याप्त्यसम्भवादेव च व्याप्यविशिष्टपक्षात्मक-पदार्थज्ञानजन्यबोधेऽतिव्याप्तिमाह, 'तच्छब्देनेति, तादृशविशिष्टार्थबोधकपदान्तराभावात् सर्व्वनामानुधावनं, सर्व्वनाम्नां विशेषरूपेण पदार्थोपस्थापकतामत एव तज्जन्योपस्थितेः पक्षविशेषक व्याप्तिविशिष्टहेतुप्रकारकनिश्चयरूपतासम्भवः न तु वक्तृबुद्धिस्थत्वेन उपस्थापकतामत इत्यविवादायाह, 'शब्देतितशब्दान्तरेण वेति व्याप्तिविशिष्टहेतुविशिष्टपक्षे आधुनिकसङ्केतशालिना घटादिपदेनेत्यर्थः। इदमुपलक्षणं विशिष्टपक्षलाक्षणिकपर्व्वतादिपदेनेत्यपि बोध्यम्। 'व्याप्यादिविशिष्टोपस्थितिद्वारा' व्याप्यवह्निव्याप्यहेतुविशिष्टपक्षोपस्थितिद्वारा, जनिते वह्निव्याप्यधूमवान् पर्व्वतोऽस्तीत्याकारकशाब्दबोधेऽतिव्याप्तिः। ननूपनयार्थघटितमहावाक्यार्थबोधे कथमतिव्याप्तिः उपनयार्थज्ञानस्य पक्षविशेष्यकव्याप्यप्रकारकज्ञानत्वेन तद्धेतुताया अप्रामाणिकत्वात्, तत्तत्पदार्थज्ञानत्वेन तदन्वयबोधे हेतुत्वादेवानुपस्थितपदार्थान्वयबोधाप्रसक्तेः। न च रागतः सकलपदार्थोपस्थितावपि क्रमान्तरवाक्यार्थज्ञानं विना तद्घटितमहावाक्यार्थज्ञानानुदयात् क्रमान्तरवाक्यप्रतिपाद्यो यावन्विशिष्टार्थस्तद्विषयकज्ञानत्वेन महावाक्यार्थबोधं प्रति हेतुत्वमावश्यकमिति वाच्यम्। [illegible] हेतु-त्वादौ [illegible] विनैव [illegible]र्थघटित[illegible] अन्यथा [illegible] 'व्याप्यादिविशिष्ट' इति, 'महावाक्यार्थज्ञानस्य' [illegible]-

पदार्थसंसर्गविगाहिज्ञानस्य, 'अवान्तरेति तादृशविशिष्टार्थविषयकज्ञानत्वावच्छिन्नजन्यत्वमर्थः। अयम्भावः। यादृशविशेषणविशिष्टस्य विशेष्यस्य विशेषणस्य वा शब्दादुपस्थितिस्तादृशेनैव विशिष्टेन विशेषणान्तरस्य विशेष्यान्तरस्य वा अन्वयबोधोऽनुभवसिद्धः, यत्र युगपदेव एकस्मिन् धर्म्मिणि समूहालम्बनोपस्थितनानाविशेषणान्वयबोधस्तत्र विशेषणाना तुल्यतया भानात् नासौ एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यबोधः, अतो न तत्र विशेषणविशिष्टविशेष्योपस्थितेरपेक्षा, एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यं विशिष्ये वा यत्र विशेषणान्तरविशिष्टस्य वैशिष्ट्यं भासते सत्रोधो विशिष्टविषयकबोधादेव उत्पद्यते, न तु विशृङ्खलसमूहालम्बनात् अतएव इष्टविशेष्यकउपायसाध्यताज्ञानस्य प्रवर्त्तकतामाशङ्का तन्मते (१) विधिवाक्यात् वाक्यभेदभिया (२) कृतिसाध्ययागसाध्यमिष्टमित्येतादृशस्य समूहालम्बनविलक्षणविशिष्टयागविशेषणकबोधस्यैव स्वीकार्य्यतया तदर्थमन्तरा कृतिसाध्यो याग इत्यवान्तरवाक्यार्थबोधस्य कल्पनीयतया गौरवं, उपायविशेष्यकफलसाधनताबोधस्य प्रवर्त्तकत्वे च आहत्यैव (३) एकत्र द्वयमिति रीत्या कृतिसाध्यत्वेष्टसाधनत्वरूपविशेषणद्वयावगाही यागः कृतिसाध्य इष्टसाधनमिति बोधः स्वीक्रियते इति लाघवमित्युक्तं विधिवादे मणिकारेण, विशिष्टेन समसन्यान्वयबोधे विशिष्टधियो हेतुत्वे

(१) इष्टविशेष्यकोपायसाध्यताज्ञानस्य प्रवर्त्तकतामते।

(२) कृतिसाध्यो याग यागसाध्यमिष्टमिति वाक्यभेदभियेत्यर्थः।

(३) साक्षादेवेत्यर्थः।

ताद्दशान्वयतात्पर्य्यधीघटितशाब्दसामग्र्या भिन्नविषयकप्रत्यक्षादिप्रतिबन्धकतायां विशिष्टविषयकैकोपस्थितिर्निर्विश्यते अन्यथा तत्स्थाने विशेषण-विशेष्योपस्थितिद्वयम् अतो लाघवादपि तद्धेतुतासिद्धिः। एवञ्च उपनयप्रतिपाद्यहेतुविशिष्टपक्षविशिष्यकेतरान्वयबोधेऽतिव्याप्तिर्दुर्व्वारैवेति। ननु तदादेर्व्विशेषरूपेणोपस्थापकताया विचारासहत्वात् कथं तदादिपदजन्यशाब्दबोधेऽतिव्याप्तिसङ्गतिः। तथा हि तदादिपदस्य न घटत्व-रूपत्वादिविशेषधर्म्मविशिष्टे (१) शक्तिः नानार्थताप्रसङ्गेन गौरवात्, घटादिकं बुद्धिस्थीकृत्य प्रयुक्ततच्छब्दात् पटादिबोधस्य शक्तिभ्रममन्तरेणापि प्रसङ्गात्। न च वस्तुगत्या यद्रूपावच्छिन्नं बुद्धिस्थीकृत्य यत्पदव्यक्तिः प्रयुक्ता तद्रूपावच्छिन्ने तस्याः शक्तिः अतो नायं दोष इति वाच्यम्। एवमपि पदव्यक्तिभेदेनानन्तशक्तिकल्पनया गौरवात्, यत्पदव्यक्तिप्रयोज्या प्रयोज्यवृद्धप्रवृत्तिर्नोपलब्धा तत्पदव्यक्तौ शक्तेरगृहीतत्वेन ततोऽन्वयबोधानुपपत्तेः अतः सामान्यतः स्वप्रयोक्तृपुरुषबुद्धिस्थे तदादिपदसामान्यशक्तिः कल्पनीया, तथाच तत्त्वेनैवोपस्थितिः सर्व्वनामपदाद्भवति न तु विशेषरूपेण। न च बुद्धिस्थत्वेन शक्यानुगमेऽपि तेन रूपेण व्युत्पत्तौ सत्यां (२) घटत्वादिरूपविशेषधर्म्मपुरस्कारेण बुद्धिस्थत्वज्ञानरूपविशेषदर्शनात् (३) उपलक्षणीभूतघटत्वादिप्रकारेण शक्तिग्रहसम्भव इति तेन रूपेण न तत्पदादुप-

(१) [illegible]

(२) [illegible]

(३) [illegible]

पदार्थसंसर्गावगाहिज्ञानस्य, 'अवान्तरेति तादृशविशिष्टार्थविषयकज्ञानत्वावच्छिन्नजन्यत्वमर्थः। अयभावः। यादृशविशेषणविशिष्टस्य विशेष्यस्य विशेषणस्य वा शब्दादुपस्थितिस्तादृशेनैव विशिष्टेन विशेषणान्तरस्य विशेष्यान्तरस्य वा अन्वयबोधोऽनुभवसिद्धः, यत्र युगपदेव एकस्मिन् धर्म्मिणि समूहालम्बनोपस्थितनानाविशेषणान्वयबोधस्तत्र विशेषणानां तुल्यतया भानात् नासौ एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यबोधः, अतो न तत्र विशेषणविशिष्टविशेष्योपस्थितेरपेक्षा, एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यविशिष्टे वा यत्र विशेषणान्तरविशिष्टस्य वैशिष्ट्यं भासते सबोधो विशिष्टविषयकबोधादेव उत्पद्यते, न तु विशृङ्खलसमूहालम्बनात् अतएव इष्टविशेष्यकउपायसाध्यताज्ञानस्य प्रवर्त्तकतामाश्रित्य तन्मते (१) विधिवाक्यात् वाक्यभेदभिया (२) कृतिसाध्ययागसाध्यमिष्टमित्येतादृशस्य समूहालम्बनविलक्षणविशिष्टयागविशेषणकबोधस्यैव स्वीकार्य्यतया तदर्थमन्तरा कृतिसाध्यो याग इत्यवान्तरवाक्यार्थबोधस्य कल्पनीयतया गौरवं, उपायविशेष्यकफलसाधनताबोधस्य प्रवर्त्तकत्वे च आहत्यैव (३) एकत्र द्वयमिति रीत्या कृतिसाध्यत्वेष्टसाधनत्वरूपविशेषणद्वयावगाही यागः कृतिसाध्य इष्टसाधनमिति बोधः स्वीक्रियते इति लाघवमित्युक्तं विधिवादे मणिकारेण, विशिष्टेन सममन्यान्वयबोधे विशिष्टधियो हेतुत्वे

(१) इष्टविशेष्यकोपायसाध्यताज्ञानस्य प्रवर्त्तकतामते।

(२) कृतिसाध्यो याग यागसाध्यमिष्टमिति वाक्यभेदभियेत्यर्थः।

(३) साक्षादेवेत्यर्थः।

विषयत्वात् न तु तद्विशिष्टप्रकारकत्वेन । शाब्दबोधप्रकारतायां शाब्दबोधविषयतावच्छेदकत्वेन सङ्केतविषयत्वज्ञानं (१) प्रयोजकं, यथा घटत्वस्य घटपदजन्यशाब्दबोधप्रकारतायां घटत्वावच्छिन्नो घटपदजन्यशाब्दबोधविषयतावान् भवतु इत्याकारसङ्केतीयस्य शाब्दबोधविषयतावच्छेदकत्वेन विषयत्वस्य ज्ञानं (२), तादृशसङ्केतग्रहश्च घटत्वावच्छिन्नत्वविषयतानिरूपितसङ्केतीयशाब्दबोधविषयत्वप्रकारतानिरूपितविषयतावान् घट इत्याकारकः, शाब्दबोधप्रकारतावच्छेदकतायाञ्च शाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन सङ्केतविषयत्वज्ञानं (३), यथा लोमत्वस्य पशुपदजन्यशाब्दबोधप्रकारतावच्छेदकताया लोमत्वावच्छिन्नलोमावच्छिन्नः पशुपदजन्यशाब्दबोधविषयतावान् भवतु इत्याकारकसङ्केतीयशाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन विषयत्वज्ञानं तादृशसङ्केतग्रहश्च लोमत्वावच्छिन्नत्वनिष्ठावच्छेदकताकत्वसम्बन्धावच्छिन्नलोमनिष्ठप्रकारतानिरूपितविशेष्यतावच्छिन्ना या शाब्दबोधविषयत्वनिष्ठप्रकारता तन्निरूपितविशेष्यतावान् लोमादिमान् इत्याकारकः । प्रकृते च कृतिप्रकारत्वावच्छिन्नत्वादिजन्यशाब्दबोधविषयो भवतु इत्याकारकसङ्केतीय शाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन विषयत्वं न कृतिप्रकारत्वस्य किन्तु तद्वति

(१) [illegible]
[illegible] ।

(२) [illegible] ।

(३) [illegible]

स्थितिर्दुर्लभा सम्बन्धग्रहप्रकारताया एव स्मृतिप्रकारताप्रयोजकतया प्रकारांशे शक्तिग्रहानपेक्षणादिति वाच्यम् । द्रव्यादिपदात् घटत्वादिप्रकारेण शक्तिभ्रमशून्यस्य शाब्दबोधानुदयात् शक्त्यधीनोपलक्षणीभूतधर्म्मप्रकारकोपस्थितेः शाब्दबोधानुपयोगित्वादित्यत आह, 'तदादेश्चेति,' 'विशेषरूपेणोपस्थापकत्वं' 'व्युत्पादयिष्यत इत्यनुषङ्गेनान्वयः । अयमभिप्रायः । स्वप्रयोक्तृबुद्धिप्रकारत्वेनानुगतीकृतघटत्वादिरूपविशेषधर्म्मविशिष्टे तत्पदशक्तिः अतो न विशेषणभेदेन शक्त्यानन्त्यं न वा विशेषधर्म्मप्रकारकशाब्दबोधोपयोगिविशेषधर्म्मप्रकारकोपस्थितिर्दुर्घटा । न च तादृशबुद्धिविषयत्वविशिष्टे शक्त्यैव बोधोपपत्तौ किमेतावता प्रयासेन विशेषरूपेणोपस्थापकताविरहेऽपि क्षतिविरहादिति वाच्यम् । विशेषधर्म्मप्रकारकसंशयनिवृत्त्यर्थमपि (१) तदादिघटितवाक्यप्रयोगाद्विशेषप्रकारेण शाब्दबोधस्य दुरपह्नवतया तदुपपत्तये तदादेर्व्विशेषरूपेण उपस्थापकताया अवश्योपपाद्यत्वात् । बुद्धिप्रकारत्वेन प्रवृत्तिनिमित्तघटत्वादीनामनुगमेऽपि तादृशधर्म्मस्याशक्यतया तदंशपरित्यागेन निर्व्विशेषणकघटत्वादिप्रकारकबोधोपपत्तिः बुद्धिप्रकारत्वस्याशक्यत्वेऽपि तत्पद बुद्धिप्रकारविशिष्टं बोधयतु इत्याकारकभगवत्सङ्केतरूपशक्तौ तेनानुगतरूपेण घटत्व-पटत्वादिभानात् शक्तेरैक्यं, बुद्धिप्रकारत्वस्य सङ्केतविषयत्वेऽपि तस्य शक्योपलक्षणता न तु शक्यान्तर्भावेन विशेषणत्वं, तदुपलक्षितघटत्वादिप्रकारकत्वेनैव बोधस्य सङ्केत-

(१) तदानेति वाक्यानन्तरं आनयन घटकर्म्मकं न वेति संशयनिवृत्त्यर्थमित्यर्थः ।

सङ्केतेन शाब्दबोधविषयतावच्छेदकतासामानाधिकरण्यस्यैवाव-गाहनात् सङ्केतीयशाब्दबोधविषयतावच्छेदकतासमानाधिकरण्यत्वेनैव विषयत्वमिति तस्य तत्पदजन्यशाब्दबोधप्रकारतानवच्छेदकत्वनिर्व्वाहः। इदञ्च विशिष्टशक्तपदस्थले, उपलक्षितवाचकगगनादिपदस्थले च यद्धर्म्मं धर्म्मितावच्छेदकीकृत्य शाब्दबोधविषयत्वेन सङ्केतविषयत्वग्रहस्तद्धर्म्मप्रकारक एव बोध उत्पद्यते इति तत्र शब्दाश्रयत्वाद्यनियतधर्म्मप्रकारकबोधनिर्व्वाहः।

दीधितिकारास्तु सर्व्वत्रैव शाब्दबोधप्रकारताया तदवच्छेदकतायाञ्च सङ्केतीयशाब्दबोधविषयत्वप्रकारतानिरूपितविशेष्यतावच्छेदकत्व तदवच्छेदकत्वरूपशक्यतावच्छेदकत्व-तदवच्छेदकत्वज्ञानं हेतुः, यथा घट पशुपदस्थले घटत्व-लोमत्वादेः, गगनादिपदस्थले च शब्दाश्रयत्व एव निरुक्तशक्यतावच्छेदकत्वसत्त्वात् शब्दाश्रयत्वप्रकारक एव शक्तिभ्रमाजन्यबोध इति घटपद-गगनपदयोरविशेष इति वदन्ति। तन्मते बुद्धिप्रकारत्वस्य शाब्दबोधप्रकारतानवच्छेदकत्व दुरुपपादम्।

नानार्थहर्य्यादिपदस्थले चोपलक्षणीभवता केनाप्यनुगतरूपेण (१) प्रवृत्तिनिमित्तानामभानात् अशक्यस्वरूपसदनुगतरूपसत्त्वेऽपि शक्तिभेदान्नानार्थतानिर्व्वाहः। बुद्धिप्रकारविशिष्टवाचक तत्पदमिति सर्व्वोपसंहारेण व्युत्पत्तिसौकर्य्यादपूर्व्वचैत्रत्वादिविशिष्टे तदादिघटितवाक्यात् प्रवृत्त्याद्यनुपलम्भेऽपि न तत्प्रकारकशाब्दबोधस्य तदादिपदादनुपपत्तिः। अथ सामान्यतो-

(१) अन्यतमत्वादिनेत्यर्थः।

व्युत्पत्तेश्चैत्रत्वाद्यपूर्व्वधर्म्मविशिष्टगोचरत्वेऽपि स्वरूपतस्तद्धर्म्मप्रकारेण शक्तिग्रहात् स्वरूपतस्तत्प्रकारकोपस्थितेः तादृशशाब्दबोधस्य चानुपपत्तिः, जातिमान् हस्तिपकसम्बन्धी इति ज्ञानात् स्वरूपतो हस्तित्वादिप्रकारकस्मरणानुदयात् स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकसम्बन्धिधिय एव हेतुत्वात्। यत्तु अनुगमकधर्म्मसोपवगात् सामान्यव्युत्पत्त्यधीनं स्वरूपतश्चैत्रत्वादिप्रकारकशक्तिस्मरणं सुघटमिति ततस्तादृशचैत्रत्वादिप्रकारकपदार्थोपस्थिति-शाब्दबोधयोर्नानुपपत्तिरिति। तदसत्। स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकानुभवस्यैव हेतुताया व्यवस्थापनात्सोपवशेन विशिष्टतत्प्रकारकानुभवादविशिष्टतत्प्रकारकस्मरणानुत्पत्तेरिति चेन्न, प्रकरणादिना निर्व्विशेषणकचैत्रत्वाद्यवच्छिन्ने वक्तृबुद्धिविषयताग्रहे बुद्धिविषयतावच्छेदकविशिष्टवाचकं तत्पदमिति स्मृतौ सत्यामविशिष्टचैत्रत्वादिविशिष्टवाचकतायास्तदादिपदेन मानसज्ञानस्यैवान्ततः सम्भवेन सामञ्जस्यात्। न च चैत्रोऽस्य वक्तृर्बुद्धिस्थ इति निश्चयेन चैत्रे विशिष्य तत्पदवाच्यतानिश्चयेऽपि चैत्रत्वविशिष्टे तत्पदवाच्यताया अनिश्चयात् तत्प्रकारकशाब्दबोधानुपपत्तिरिति वाच्यम्। यद्विशिष्टविषयकबुद्धिप्रयोज्यं यत्पदं तत् तद्विशिष्टवाचकमिति सामान्यतोव्याप्तेरवधारणेन प्रकरणाद्यधीनस्य तत्पदविशेषे चैत्रत्वविशिष्टविषयकबुद्धिप्रयोज्यत्वग्रहस्य विशेषदर्शनतया तद्विशिष्टवाचकतासंशयविघटकत्वेन विशिष्टवाचकतायाः सुनिश्चयत्वात्। न चैवमपि स्वप्रयोजकबुद्धिप्रकारत्वे स्वपदार्थस्याननुगमेन सकलतत्पदाद्युपसंहारेण व्युत्पत्तिर्दुर्घटेति यत्पदव्यक्त्यधीनप्रवृत्तिर्नो-

सङ्केतेन शाब्दबोधविषयतावच्छेदकतासामानाधिकरण्येनैवाव-गाहनात् सङ्केतीयशाब्दबोधविषयतावच्छेदकतासमानाधिकरण-त्वेनैव विषयत्वमिति तस्य तत्पदजन्यशाब्दबोधप्रकारतानव-च्छेदकत्वनिर्व्वाहः। इदञ्च विशिष्टशक्तपदस्थले, उपलक्षितवाचक-गगनादिपदस्थले च यद्धर्म्मं धर्म्मितावच्छेदकीकृत्य शाब्दबोधविषय-त्वेन सङ्केतविषयत्वग्रहस्तद्धर्म्मप्रकारक एव बोध उत्पद्यते इति तत्र शब्दाश्रयत्वाद्यनियतधर्म्मप्रकारकबोधनिर्व्वाहः।

दीधितिकारास्तु सर्व्वत्रैव शाब्दबोधप्रकारताया तदवच्छेद-कतायाश्च सङ्केतीयशाब्दबोधविषयत्वप्रकारतानिरूपितविशेष्यता-वच्छेदकत्व-तदवच्छेदकत्वरूपशक्यतावच्छेदकत्व-तदवच्छेदकत्वज्ञानं हेतुः, यथा घट पशुपदस्थले घटत्व-लोमत्वादेः, गगनादिपदस्थले च शब्दाश्रयत्व एव निरुक्तशक्यतावच्छेदकत्वसत्त्वात् शब्दाश्रयत्वप्रका-रक एव शक्तिभ्रमाजन्यबोध इति घटपद-गगनपदयोरविशेष इति वदन्ति। तन्मते बुद्धिप्रकारत्वस्य शाब्दबोधप्रकारतानवच्छेदकत्व दुरुपपादम्।

नानार्थहर्य्यादिपदस्थले चोपलक्षणीभवता केनाप्यनुगतरू-पेण (१) प्रवृत्तिनिमित्तानामभानात् अशक्यस्वरूपसदनुगतरूप-सत्त्वेऽपि शक्तिभेदान्नानार्थतानिर्व्वाहः। बुद्धिप्रकारविशिष्टवाचक तत्पदमिति सर्व्वोपसंहारेण व्युत्पत्तिसौकर्य्यादपूर्व्वचैत्रत्वादि-विशिष्टे तदादिघटितवाक्यात् प्रवृत्त्याद्यनुपलम्भेऽपि न तत्-प्रकारकशाब्दबोधस्य तदादिपदादनुपपत्तिः। अथ सामान्यतो-

(१) अन्यतमत्वादिनेत्यर्थः।

अवान्तरवाक्यार्थबोधस्य महावाक्यार्थबुद्धौ शाब्दत्वजातिपुरस्कारेणैव कारणता न तु पदजन्यत्वेन गौरवात्। न च तथासति विशिष्टविषयकशाब्दबोधादिव विशिष्टे गृहीतवृत्तिकपदजन्यविशिष्टस्मृतेरपि विशिष्टे इतरान्वयबोधोत्पत्त्या तत्र विशिष्टविषयकशाब्दधियो व्यभिचारः स्यादिति तादृशस्मृतिसाधारणपदजन्यत्वेनैव हेतुत्वमुचितमिति वाच्यम्। पदज्ञानजन्यत्वेन स्मृति-शाब्दधियोरनुगमे पदरूपलिङ्गज्ञानजन्यार्थविषयकानुमित्यादितोऽपि शाब्दधीप्रसङ्गात् वृत्तिमत्पदजन्यस्मृतित्व-शाब्दत्वाभ्यां कारणताद्वयस्यावश्यकत्वान्मिथो व्यभिचारस्य चागत्या तत्तत्कारणाव्यवहितोत्तरत्वस्य कार्य्यतावच्छेदके निवेशेनैव वारणीयत्वात्। यत्रावान्तरवाक्यार्थबोधान्महावाक्यार्थधीस्तत्राप्यवान्तरवाक्यार्थाघटकार्थान्तरस्य पदजन्यस्मृतेरवान्तरवाक्यार्थबोधानन्तरमप्यवश्यकल्पनीयतया तस्याः सकलपदार्थविषयकत्वोपगमेन पदार्थस्मृतेरवान्तरवाक्यार्थधीजन्यशाब्दबोधे व्यभिचारवारणन्तु न सम्यक्, विशिष्टे गृहीतवृत्तिकपदाधीनविशिष्टस्मृतेरिव विशेष्यमात्रे गृहीतवृत्तिकपदाधीनाया उद्बोधकान्तरवशाद्विशेषणमवगाहमानाया विशिष्टस्मृतितो व्याप्यविशिष्टपक्षादिविषयकेतरान्वयबोधवारणाय गृहीतविशिष्टवृत्तिकपदजन्योपस्थितित्वेनैव विशिष्टविषयस्मृतेस्तादृशान्वयबोधहेतुताया वक्तव्यतया विशिष्टवृत्तिकग्रहानपेक्षावान्तरवाक्यार्थशाब्दधीजन्यबोधे तस्या व्यभिचारस्यावश्यकत्वात्, प्रकारान्तरेण तद्वारणे (१) तावत्पदार्थविषयकस्मृतिकल्पनाया अकि-

(१) कार्य्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशेन।

श्चिलारत्वात्, अतोप्यवान्तरवाक्यार्थधियश्च शाब्दत्वपुरस्कारे कारणत्वान्तरमावश्यकमिति पदजन्यत्वपदं पदाजन्यबोधव्यावृत्त धर्म्मपरं, तच्च शाब्दत्वादिकमपीति। अधिकप्रवेशेन निरुक्तनिश्च त्वपर्य्याप्तजनकतावच्छेदकताघटितस्य लक्षणस्य नातिव्याप्ति त्युक्ता निश्चयत्वप्रवेशेन पर्य्याप्त्यनिवेशनेऽपि नातिव्याप्तिरित्या 'निश्चयत्वस्येति, परोक्षसंशयानभ्युपगमेन संशयान्यत्वस्य उक्तयुक्त शाब्दत्वादेर्निवेशनीयतया ज्ञानत्वस्य च पदजन्यबुद्धावव्यावर्त्तक त्वादिति भावः।

चिन्तामणिदीधितिः।

न च तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तत्तद्विशेषण तावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात् तादृशे शाब्द बोधे प्रत्यक्षे चातिव्याप्तिः दण्डो रक्तो न वेति संशये रक्तदण्डवानयमिति ज्ञानानुदयादिति वाच्यम् ज्ञानोपरमेऽपि विशिष्टविषयोपधानेनेच्छा-द्वेषयोः कृति साक्षात्कारादिविशेषणविषयकाद्विशिष्टसंस्कारादेव विशि ष्टस्मरणाच्च तद्विषयकगुणानां तत्र हेतुत्वे न्यूनवृत्ति त्वेनन्वय ... संस्कारश्चानुमिति ... संस्कारादिभ्यस्य गुरुतया ज्ञानत्वेनैव हे हेतुत्वात्।

गादाधरी विवृतिः।

व्याप्तिविशिष्टहेतुरूपविशेषणतावच्छेदकविशिष्टस्य तद्विशेषण-धर्म्मितावच्छेदकपर्व्वतत्वाद्यवच्छिन्नस्य वैशिष्ट्यावगाहिनि शाब्द-बोधादौ प्रत्यक्षादिसाधारणविशिष्टवैशिष्ट्यबोधनिष्ठविशेषणताव-च्छेदकप्रकारकनिश्चयजन्यतामादायातिव्याप्तिं शङ्कते, 'नचेत्या-दिना, 'तथापि' अवान्तरवाक्यार्थबोधनिष्ठशाब्दबोधासाधारण-कारणतामादायातिव्याप्तिरुक्तरीत्या वारणेऽपि, 'तत्तद्विशिष्टवैशि-ष्ट्यज्ञानं प्रतीति पर्व्वतत्वादिरूपधर्म्मितावच्छेदकावच्छिन्नविशेषण-तापन्नव्याप्तिविशिष्टधूमादिविशिष्टवैशिष्ट्यज्ञानत्वावच्छिन्न प्रती-त्यर्थः, 'तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन' पर्व्वतत्वाद्य-वच्छिन्नविशेष्यकव्याप्तिविशिष्टधूमादिप्रकारकनिश्चयत्वेन, 'तादृशे' वह्निव्याप्यधूमवत्पर्व्वतवान् देश इत्यादिविशिष्टवैशिष्ट्यबोधरूपे, शाब्दबोधातिव्याप्तेर्व्वारितत्वात् तस्यैव प्रथममुपन्यासः, स्मृति-व्यावृत्तधर्म्मस्य जन्यतावच्छेदकत्वे (१) स्मृतौ नातिव्याप्तिसम्भवः, उपमितेः पदवाच्यत्वावगाहिन्यास्तादृशविशिष्टवैशिष्ट्यबोधरूपता-प्रयासो न सम्भवतीति, अतः प्रत्यक्ष-शाब्दबोधमात्रोपादानम्। अथ किमिदं विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकम् विशिष्टवैशिष्ट्यज्ञानत्वं, न तावद्विशिष्टप्रतियोगिकं यद्वैशिष्ट्यं तद-वगाहित्वं, व्यधिकरणसम्बन्धावगाहिविशिष्टभ्रमासंग्रहात्, नापि विशिष्टप्रकारकत्वं, काञ्चनमयवह्निमानित्यादिभ्रमप्रकारीभूत-

---

(१) विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वे इत्यर्थः।

तत्तानवगाहिनः कथमिव प्रतिबन्धकता ज्ञानस्य इति चिन्त्यं यद्वेदमधिकमन्यत् ।

केचित्तु रक्तदण्डवानित्यादिस्थानीयरक्तत्वादिविशेषणतावच्छेदकदण्डादिनिष्ठा प्रकारता द्विधा, काचिद्दण्डादिविशेषणतावच्छेदकत्वाद्यन्तर्भावेण पर्याप्ता, काचित् केवलदण्डादावेव, तत्र प्रकृतविशेषणतावच्छेदकप्रकारतानाधीना नापत्तिः, पुरुषादिविशेष्यतानिरूपितप्रकारताया रक्तत्वादिवृत्तित्वेऽपि पुरुषो न रक्त इत्यादिधीर्न तादृशप्रकारताकोक्तज्ञानविरोधिनी इतरविशेषणतानवच्छिन्नायाः पुरुषादिविशेष्यतानिरूपितरक्तत्वादिप्रकारतायाः तत्प्रतिबध्यतावच्छेदकत्वादित्याहुः (१) ।

---

(१) तथाच तदभाववत्ताबुद्धिप्रतिबध्यतावच्छेदककोटौ तदितरानिष्ठप्रकारतानवच्छिन्नतन्निष्ठप्रकारताया निवेश्यत्वादिति भावः । न च तथापि रक्तदण्ड इत्यादिस्थानीयप्रकारता रक्तत्वाभाववान् दण्ड इति ज्ञानीयप्रतिबध्यतावच्छेदिका न स्यात् तत्स्थानीयरक्तत्वप्रकारताया रक्तत्वेतरदण्डनिष्ठोभयपर्याप्तप्रकारतावच्छिन्नत्वादिति वाच्यम् । तदितरनिष्ठप्रकारतापदेन तदवृत्तिप्रकारताया विवक्षितत्वात् । न च तथापि रक्तदण्डवान् पुरुष इति ज्ञानस्य भ्रमतापत्तिः रक्तत्वाभाववत्पुरुषनिष्ठविशेष्यतानिरूपितरक्तत्वप्रकारताकत्वादिति वाच्यम् भ्रमत्वघटकीभूततन्निष्ठप्रकारतायामपि तदितरप्रकारत्वानवच्छिन्नत्वस्य निवेशात् । तथाच रक्तदण्डवान् पुरुष इति विशिष्टवैशिष्ट्यबोधीयदण्डनिष्ठप्रकारता एका रक्तत्व-दण्डोभयपर्य्याप्ता, अपरा दण्डमात्रनिष्ठा, एवं रक्तत्वप्रकारता द्विविधा, एका पुरुषविशेष्यतानिरूपिता उभयपर्य्याप्ता, अपरा दण्डविशेष्यतानिरूपिता तन्मात्रपर्य्याप्ता, तादृशप्रकारताद्वयस्यावच्छेद्यावच्छेदकभाव इति । इतरविशेषणतानवच्छिन्नाया इत्यादि भट्टाचार्य्यसन्दर्भोपरि पुनराशङ्केय, क्वचन र दण्डवान् पुरुष इति ज्ञानस्य दण्डाभाववान् पुरुष इति निश्चयप्रतिबध्यता-प्रसक्तिः पुरुषादिविशेष्यतानिरूपितदण्डादिप्रकारताया दण्डादिविशेष्यतानि-

अपरे तु यथा विशेष्यतानिरूपितप्रकारतामात्रं न विशेष्यतावच्छेदकता भूतलं घटवदित्यादौ भूतलत्वादेर्घटादिधर्म्मितावच्छेदकतावद्वैपरीत्यस्यापि प्रसङ्गात्(१). अपि तु विलक्षणैव विषयता सा च प्रकारतात्मिका तदन्यैव वा, एवं विशेषणतावच्छेदक-

---

पितरक्तत्वादिप्रकारतया अवच्छिन्नत्वात्। न चेतरविशेषणतावच्छेद्यतानवच्छेदकदण्डादिप्रकारतात्वविशिष्टाया दण्डादिप्रकारताया पुरुषादिविशेष्यतानिरूपिताया प्रतिबध्यतावच्छेदकत्वोपगमात् नैष दोषः, उक्तस्थले रक्तत्वादिप्रकारतात्वस्यैव दण्डादिप्रकारतानिष्ठदण्डादिविशेष्यतानिरूपितविशेषणतावच्छेद्यतावच्छेदकत्वादिति वाच्यम्। दण्डवद्दण्डवान् इत्यादि ज्ञानस्य दण्डाभाववान् पुरुष इत्यादिनिश्चयप्रतिबध्यतानुपपत्तेः। न च दण्डत्वानवच्छिन्नविशेष्यतानिरूपितविशेषणतावच्छेद्यतानवच्छेदकत्वनिवेशान्नेयमनुपपत्तिरिति वाच्यम्। रक्तदण्डवान् इति ज्ञानस्य रक्तत्वाभाववान् दण्ड इत्यादिनिश्चयप्रतिबध्यतानुपपत्तेः। रक्तत्ववद्रक्तत्ववान् पुरुष इत्यादिज्ञाने रक्तत्वाभाववान् पुरुष इत्यादिनिश्चयस्य प्रतिबन्धकत्वानुरोधेन रक्तत्वावच्छिन्नविशेष्यतानिरूपितविशेषणतावच्छेद्यतानवच्छेदकत्वविशेषणस्यावश्यकतया रक्तत्वादिप्रकारतात्वस्य रक्तत्वानवच्छिन्ना या दण्डत्वावच्छिन्नविशेष्यता तन्निरूपितरक्तत्वविशेषणतावच्छेद्यतानवच्छेदकत्वादिति चेन्न, रक्तत्वावच्छिन्नविशेष्यतानिरूपितविशेषणतावच्छेद्यत्वाभावविशिष्टायाः पुरुषादिविशेष्यतानिरूपितरक्तत्वादिप्रकारतायाः प्रतिबध्यतावच्छेदकत्वोपगमात् रक्तदण्डवान् पुरुष इत्यादौ रक्तदण्डभेदपर्याप्तप्रकारत्वस्य रक्तत्वावच्छिन्नविशेष्यतानिरूपितदण्डत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वादिनिष्ठविशेषणतावच्छेद्यत्वात् न तादृशज्ञानस्य दण्डाभाववान् पुरुष इत्यादिनिश्चयाप्रतिबध्यत्वम्। दण्डवद्दण्डवानित्यादौ दण्डवद्दण्डपर्याप्तप्रकारतात्वस्य दण्डत्वावच्छिन्नविशेष्यतानिरूपितविशेषणतावच्छेद्यत्वाभाववत्त्वात् तादृशज्ञानस्य दण्डाभाववान् पुरुष इत्यादिनिश्चयप्रतिबध्यत्वमिति ध्येयम्।

(१) घटादेर्भूतलत्वादिधर्म्मितावच्छेदकतापत्तेरित्यर्थः।

तापि विलक्षणविषयता तन्निरूपकदण्डादिनिष्ठप्रकारताविशेष-शालिनि बोधे विशेषणतावच्छेदकरक्तत्वादिप्रकारकज्ञानापेक्षा, प्रत्येकोपस्थितिमूलकं रक्तदण्डवानित्यादिज्ञानञ्च न तथाविधविलक्षणप्रकारताशालीति वदन्ति। तदुभयमपि न सम्यगिव प्रतिभाति, विशिष्टज्ञानपूर्व्वक-तदपूर्व्वकयोरविलक्षणाकारकज्ञानयोर्विषयभेदमन्तरेण विषयतावैलक्षण्यस्याननुभवात्। विशिष्टज्ञानकार्य्यतावच्छेदकतया तत्सिद्धिरित्यपि बालप्रलपितं तादृशविलक्षणविषयतासिद्धावेव तन्नियामकतया विशिष्टज्ञानहेतुतासिद्धेः। यदि च विशिष्टप्रतियोगिकविलक्षणसंसर्गावगाहिनि बोधएवान्वय-व्यतिरेकाभ्यां विशिष्टज्ञान हेतुः तज्जन्यतावच्छेदकं यदि विशिष्टप्रतियोगिकत्वावच्छिन्नसंसर्गताकबुद्धित्वं तदा गौरवम् उक्तवैलक्षण्यपुरस्कारेण प्रकारताविशेषस्य कार्य्यतावच्छेदकत्वे च लाघवमिति विशिष्टप्रतियोगिकवैशिष्ट्यावगाहिन्येव ज्ञाने प्रकारताया व्यासज्यवृत्तित्वादिरूपवैलक्षण्यसिद्धिरप्रत्यूहैव इत्युच्यते तदा न विवदामहे इति प्रकृतमनुसरामः। ननु यथा विशेषणतावच्छेदकरक्तत्वाद्यंशे निर्द्धर्म्मितावच्छेदककतद्विशिष्टवैशिष्ट्यबोधे तत्प्रकारकज्ञानत्वेनैव हेतुता न तु तत्र संशयान्यत्वनिवेशः तथा तदंशे सधर्म्मितावच्छेदककविशिष्टवैशिष्ट्यबोधेऽपि तद्धर्म्मितावच्छेदकावच्छिन्नविशेष्यकतत्प्रकारकज्ञानत्वेनैव संशयसाधारणहेतुता स्वीक्रियते निश्चयत्वेन विशेषणतावच्छेदकधीहेतुताया मणिकारादिभिरनभिधानादितिकथमतिव्याप्तिरतस्तया हेतुतामनुभवेन द्रढ़यति, 'दण्डो रक्तो न वेति। ननु दण्डो रक्तो न वेति संशयानन्तरं रक्तदण्डवानिति

निश्चयानुत्पाद एवानुभवसिद्धः स च (१) विशेषणसन्देहे विशिष्टसन्देहस्य औचित्यावर्ज्जितत्वादुपपद्यते निश्चयोत्पत्तौ संशयसामग्रयभावस्यापेक्षितत्वात् रक्तदण्डवानवेति विशिष्टसंशयस्त्वनुभवसिद्ध एवेति निश्चयत्वेन हेतुतायां साधकविरहः बाधकस्य च सत्त्वम् ।

अत्र केचित् । यदि विशेषणतावच्छेदकप्रकारकसंशयादपि विशिष्टवैशिष्ट्यबोध उपेयते तदा अप्रामाण्यशङ्कास्कन्दितादपि ज्ञानात्तदुपगम आवश्यकः ज्ञानाप्रामाण्यसन्देहेन विषयसंशयस्यापि जननात् संशयेऽप्रामाण्यसंशयस्याकिञ्चित्करत्वात् अतोऽप्रामाण्यनिश्चयास्कन्दितज्ञानात् फलवारणाय अप्रामाण्यनिश्चयानास्कन्दितत्वेनैव हेतुता वक्तव्येति अप्रामाण्यज्ञानीयगुरुशरीरनिश्चयत्वनिवेशात् गौरवं इत्यप्रामाण्यज्ञानानास्कन्दितनिश्चयत्वेन हेतुत्वमेवोचितम् विशेषणसंशयाद्विशिष्टसंशयानुपपत्तिरूपबाधकमपि कथञ्चिदुद्धरणीयमिति (२) वदन्ति ।

वस्तुतस्तु संशयस्य विशिष्टवैशिष्ट्यबोधजनकत्वे दण्डो रक्तो न वेति संशयात् रक्तत्व-तदभावायुभयविशिष्टदण्डादिवैशिष्ट्यावगाहिबोधोपि (३) स्यात्, न चेष्टापत्तिः, तादृशज्ञानस्य एकत्र दण्डादिधर्म्मिणि विरुद्धोभयप्रकारकतया रक्तत्वादिनिश्चयत्वासम्भवात् विशेष्यान्तरविशेषणतापन्नधर्म्मिकसंशयस्य चानुभवविरुद्धतया तत्र

(१) तादृशनिश्चयानुत्पादस्येत्यर्थः ।

(२) उद्धरणप्रकारश्चानुपदमेव स्फुटं दर्शयिष्यति ।

(३) रक्तोरक्तदण्डवान् पुरुष इति बोधापत्तिरित्यर्थः ।

तापि विशेषणविषयता तद्विशिष्टदण्डादिनिष्ठप्रकारताविशेष-शालिनि बोधे विशेषणतावच्छेदकरक्तत्वादिप्रकारकज्ञानापेक्षा, प्रत्येकोपस्थितिमूलकरक्तदण्डवानित्यादिज्ञानन्तु न तथा विल-क्षणप्रकारताशालीति वदन्ति। तदुभयमपि न सम्यगिव प्रतिभाति, विशिष्टज्ञानपूर्वक-तदपूर्वकयोरविलक्षणाकारकज्ञानयोर्विषयभेद-मन्तरेण विषयतावैलक्षण्यस्याननुभवात्। विशिष्टज्ञानकार्य्यताव-च्छेदकतया तत्सिद्धिरित्यपि बालप्रलपितं तादृशविलक्षणविषयता-सिद्धावेव तन्नियामकतया विशिष्टज्ञानहेतुतासिद्धेः। यदि च विशिष्टप्रतियोगिकविलक्षणसंसर्गावगाहिनि बोध एवान्वय-व्यति-रेकाभ्यां विशिष्टज्ञानं हेतुः तज्जन्यतावच्छेदकं यदि विशिष्टप्रति-योगिकत्वावच्छिन्नसंसर्गताकबुद्धित्वं तदा गौरवम् उक्तवैलक्षण्य-पुरस्कारेण प्रकारताविशेषस्य कार्य्यतावच्छेदकत्वे च लाघवमिति विशिष्टप्रतियोगिकवैशिष्ट्यावगाहिन्येव ज्ञाने प्रकारताया व्यासज्य-वृत्तित्वादिरूपवैलक्षण्यसिद्धिरप्रत्यूहैव इत्युच्यते तदा न विवदामहे इति प्रकृतमनुसरामः। ननु यथा विशेषणतावच्छेदकरक्तत्वाद्यंशे निर्द्धर्म्मितावच्छेदककतद्विशिष्टवैशिष्ट्यबोधे तत्प्रकारकज्ञानत्वेनैव हेतुता न तु तत्र संशयान्यत्वनिवेशः तथा तदंशे सधर्म्मितावच्छे-दककविशिष्टवैशिष्ट्यबोधेऽपि तद्धर्म्मितावच्छेदकावच्छिन्नविशेष्य-कतत्प्रकारकज्ञानत्वेनैव संशयसाधारणहेतुता स्वीक्रियते निश्चयत्वेन विशेषणतावच्छेदकधीहेतुताया मणिकारादिभिरनभिधानादिति-कथमतिव्याप्तिरतस्तथा हेतुतामनुभवेन द्रढ़यति, 'दण्डो रक्तो न वेति। ननु दण्डो रक्तो न वेति संशयानन्तरं रक्तदण्डवानिति

निश्चयानुत्पाद एवानुभवसिद्धः स च (१) विशेषणसन्देहे विशिष्टसन्देहस्य औचित्यावच्छिन्नत्वादुपपद्यते निश्चयोत्पत्तौ संशयसामग्र्यभावस्यापेक्षितत्वात् रक्तदण्डवानवेति विशिष्टसंशयस्त्वनुभवसिद्ध एवेति निश्चयत्वेन हेतुतायां साधकविरहः बाधकस्य च सत्त्वम्।

अत्र केचित्। यदि विशेषणतावच्छेदकप्रकारकसंशयादपि विशिष्टवैशिष्ट्यबोध उपेयते तदा अप्रामाण्यशङ्कास्कन्दितादपि ज्ञानात्तदुपगम आवश्यकः ज्ञानाप्रामाण्यसन्देहेन विषयसंशयस्यापि जननात् संशयेऽप्रामाण्यसंशयस्याकिञ्चित्करत्वात् अतोऽप्रामाण्यनिश्चयास्कन्दितज्ञानात् फलवारणाय अप्रामाण्यनिश्चयानास्कन्दितत्वेनैव हेतुता वक्तव्येति अप्रामाण्यज्ञानीयगुरुशरीरनिश्चयत्वनिवेशात् गौरव इत्यप्रामाण्यज्ञानानास्कन्दितनिश्चयत्वेन हेतुत्वमेवोचितम् विशेषणसंशयाद्विशिष्टसंशयानुपपत्तिरूपबाधकमपि कथञ्चिदुद्धरणीयमिति (२) वदन्ति।

वस्तुतस्तु संशयस्य विशिष्टवैशिष्ट्यबोधजनकत्वे दण्डो रक्तो न वेति संशयात् रक्तत्व-तदभावाद्युभयविशिष्टदण्डादिवैशिष्ट्यावगाहिबोधोऽपि (३) स्यात्, न चेष्टापत्तिः, तादृशज्ञानस्य एकत्र दण्डादिधर्मिणि विरुद्धोभयप्रकारकतया रक्तत्वादिनिश्चयत्वानभ्युपगमात् [illegible] अनुभवविरुद्धतया [illegible]

---

१ [illegible]

२ [illegible]

३ [illegible]

संशयत्वोपगमासम्भवाच्च। अतएव च केवलं विशेष्ये विशेषणमि-
त्यादिरीत्या रक्तदण्डवानित्यादिज्ञानेऽपि उक्तसंशयः कार्य्यसहभा-
नैव प्रतिबन्धक इति वदन्ति। न च तत्र संशयस्य प्रतिबन्ध-
विशिष्टवैशिष्ट्यबोधसाधारण एव तत्प्रतिबध्यतावच्छेदकोऽस्तु ता-
संशयानन्तरं तद्विशिष्टवैशिष्ट्यबोधवारणे त [illegible]
हेतुत्वमुचितमिति वाच्यम्। तत्संशयद्वितीयक्षणे कथञ्चित् तत्प्र-
रकनिश्चये तद्द्वितीयक्षणे तद्विशिष्टवैशिष्ट्यधीनिर्व्वाहाय विशि-
वैशिष्ट्यविषयताभिन्नवैशिष्ट्यविषयताया एव संशयप्रतिबध्यताव-
च्छेदकत्वं वाच्यमिति निश्चयत्वेन विशिष्टवैशिष्ट्यबोधाहेतुत्वे संश-
त्तरं विनापि निश्चयं विशिष्टवैशिष्ट्यधीप्रसङ्गात्। न च यत्र [illegible]
रक्तत्वस्य संशयः पुरुषे च दण्डस्यानुमितिसामग्री [illegible]
पुरुषे बाधग्रहः तत्र संशयसत्त्वेपि केवलं विशेष्ये विशेषणमि-
रीत्या रक्तदण्डवान् पुरुष इत्यनुमित्युत्पत्तेः कथं तादृशबो-
संशयप्रतिबन्धकतेति वाच्यम्। प्रत्यक्षं प्रत्येव तत्प्रतिबन्धकताया
वक्तव्यत्वात्, अलौकिकत्वमपि तत्र विशेषणं देयं संशयसत्त्वेऽ-
लौकिकसन्निकर्षाद्रक्तदण्डवानिति ज्ञानोत्पत्तेः, लौकिकप्रत्य-
सामग्र्या विपरीतभानविरोधितयैव च विशेषणधर्म्मिकलौकिक-
प्रत्यक्षात्मकसंशयस्य नापत्तिः। एवञ्च विशिष्टवैशिष्ट्यबोध-
व्यावर्त्तकविशेषणानवच्छिन्नेऽपि विशेष्ये विशेषणमिति रीत्या बोध-
विशेषणे तद्विशेषणसंशयस्य प्रतिबन्धकत्वेपि दण्डो रक्तो न वेति
संशयवतोऽपि तद्बाधायुपनीतरक्तत्वादिविशेषितदण्डाद्यनुमितौ रक्त-
त्वादिविशिष्टवैशिष्ट्यावगाहितायमसङ्गस्य तादृशसंशयानन्तरजात-

क्तत्वादिविशेषितदण्डादिप्रकारकलौकिकप्रत्यक्षे विशिष्टवैशिष्ट्या-गाहिताप्रसङ्गस्य च वारणाय तदवगाहिबुद्धौ विशेषणतावच्छेदक-प्रकारकनिश्चयत्वेन हेतुताकल्पनमावश्यकम् ।

यत्तु निश्चयत्वेन विशिष्टवैशिष्ट्यबोधहेतुत्वे निश्चयत्वघट-कयोस्तदभावाप्रकारकत्व-तत्प्रकारकत्वयोर्दलयोर्विशेष्य-विशेषणभावे विनिगमनाभावेन कारणताबाहुल्यमिति तदभावप्रकारकज्ञान-त्वेन संशयस्य प्रतिबन्धकत्वमेव कल्पयितुमुचितम् (१)। यत्र संशयद्वितीयक्षणे स्मरणादिरूपस्तन्निश्चयस्तत्र द्वितीयक्षणे संशय-नाशे सत्येव विशिष्टवैशिष्ट्यबोध उपेयत इति, तदसत्, तथा सति तुल्ययुक्त्या अनुमित्यादावपि लिङ्गादिसन्देहस्य तदभाव-प्रकारकज्ञानत्वेन प्रतिबन्धकतापातात् निश्चयत्वावच्छिन्नहेतुता-घटितानुमितिलक्षणेऽसम्भवापत्तेः ।

यत्तु विशिष्टवैशिष्ट्यबोधं प्रति निश्चयत्वेन हेतुत्वे विशेषण-संशयजन्यविशिष्टसंशयानुपपत्तिरिति बाधकं, तदकिञ्चित्करम् । दण्डत्वसामानाधिकरण्येन रक्तत्वनिश्चयरूपकोटितावच्छेदकाव-च्छिन्नप्रसिद्धिस्थल एव चैत्रीयो दण्डो रक्तो न वेति विशेषरूपाव-च्छेदेन रक्तत्वाभावावगाहिसंशयाद्रक्तदण्डवान् वा चैत्र इति विशिष्टसंशयोदयात् तथाविधनिश्चयस्य तादृशसंशयाविरोधित्वात् ।

यत्तु तत्र विशेष्ये विशेषणमितिरीत्यैव विशिष्टबोधावगाही

---

(१) तदभावप्रकारकज्ञानत्वेन कारणत्वं भावाभावप्रकारकत्वेन प्रति-बन्धकत्वं न तु इत्यत्र कारणताद्वयं कल्प्यमिति भावः ।

संशयः न तु विशिष्टवैशिष्ट्यावगाहीति समाधानं (१), तदस-
धर्मिणि रक्तत्वादिविशेषितदण्डादिकतरीत्या भासमाने वै-
अभावांशे विशिष्टप्रतियोगिनो वैशिष्ट्यभाननियमात् (२) अभावांशे
रक्तत्वादिविशिष्टदण्डादिवैशिष्ट्यभानस्यावश्यकत्वात् तदुपपत्तेः
दर्शितप्रकारं (३) विना असम्भवात्। न च लौकिकप्रत्यक्षए
भावांशे तद्धर्मविशेषितप्रतियोगिनि प्रकारतया भासमाने तद्वि-
शिष्टवैशिष्ट्यावगाहितानियमः इति संशये कोट्योरुपनयाद्
भानाद्विशिष्टवैशिष्ट्यानवगाहिभानसम्भव इति वाच्यम्। दण्ड-
सामान्याभावस्यैव रक्तत्वाद्युपलक्षितप्रतियोगिकत्वादभावांशे र-
त्वादिविशिष्टदण्डादिरूपप्रतियोगिवैशिष्ट्यानवगाहने तादृशसंश-
यस्य दण्डादिसामान्याभावावगाहितया दण्डवानयमिति विशिष्ट-
निश्चयदशायां दण्डादौ रक्तत्वादिसंशयाद्विशिष्टसंशयानुपपत्तेरित्य-
धिकमन्यत्रानुसन्धेयम्। दण्डी रक्तो न वेत्यादिसंशयानुव्यवसा-
च रक्तत्वादिविशिष्टदण्डादिरूपविषयप्रकारेण न ज्ञानभान-
किन्तु दण्डादिविशेषणतानापन्नरक्तत्वादिप्रकारकत्वेनैव इति
न तदनुपपत्तिरिति सङ्क्षेपः। विशिष्टवैशिष्ट्यबोधं प्रति विशेषण-
तावच्छेदकप्रकारकसंशयान्यत्वेनैव हेतुता न तु तादृशसंशयान्य-
ज्ञानत्वेनेति संशयान्यत्वविशिष्टज्ञानत्वरूपनिश्चयत्वावच्छिन्नकार-

(१) तथाच विशेषणतावच्छेदकनिश्चयं विनैवौचित्यावर्जितसंशयोपपत्तिरिति भावः।

(२) अभावप्रत्ययो हि विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेते इति नियमात्।

(३) प्रागुक्तदण्डत्वसामानाधिकरण्येन रक्तत्वनिश्चयेत्यादिरूपप्रकारमित्यर्थः।

एतावद्घटितलक्षणस्य न तत्रातिव्याप्तिरिति समाधत्ते, 'ज्ञानोपरमे-पीत्यादिना 'ज्ञानत्वस्याप्रवेशादित्यन्तेन, ज्ञानत्वस्यावच्छेदकगर्भा-प्रवेशे हेतुगर्भविशेषण 'न्यूनवृत्तेरिति, न्यूनवृत्तित्वञ्च अवच्छेद्य-त्वाभिमतहेतुताया अव्यापकत्वं, ज्ञानत्वानिवेशेऽनुद्बुद्धसंस्कारात् वैशिष्ट्यवैशिष्ट्यावगाहिप्रत्यक्षापत्तिः स्मृताविवोद्बोधकस्य हेतुतया प्रत्यक्षे तद्विरहस्याकिञ्चित्करत्वात् तेन विनापि ज्ञानेन विशिष्ट-वैशिष्ट्यप्रत्यक्षजननादिति तु न दोष्यं, अगत्या उद्बोधकासमाधान-विशिष्टसंस्कारत्वाभावस्यावच्छेदकप्रवेशेन तदापत्तेर्व्वारणीयत्वात्, उद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यावगाहिस्मरणनिर्व्वाहाय संस्कारभेदमु-पेक्ष्य विशिष्टसंस्कारत्वाभावानुधावनम्। उद्बोधकसमवहिते संस्कारे च विशेषणाभावाद्विशिष्टसंस्कारत्वाभावः सुलभः। भेदस्याव्याप्य-वृत्तित्वे तु उद्बोधकाभावविशिष्टसंस्कारभेद एव निवेश्यः। अतएव ज्ञानत्वाप्रवेशे लाघवासम्भवेन न्यूनवृत्तित्वमेव तदनिवेशप्रयोजक-तयाभिहितम्। 'तद्विषयकगुणानां तत्र हेतुत्व इति न्यूनवृत्तिता-प्रकाशनाय, 'तद्विषयकगुणानां' विशिष्टविशेषणावगाहिनामि-च्छाद्वेष कृति संस्काराणाम्। ननु विशिष्टविषयकेच्छादिस्थलेऽपि तज्जनकविशिष्टज्ञानस्यावश्यकत्वात् सर्व्वत्र ज्ञानमेव हेतुः न तु इच्छादिकमित्याशङ्कायां इच्छादेर्व्विशिष्टवैशिष्ट्यबोधहेतुत्वे हेतु-माह, 'ज्ञानोपरमेपीत्यादिना, 'ज्ञानोपरमेपि' इच्छादिजनक-विशिष्टज्ञाननाशेपि, 'विशिष्टविषयोपधानेनेति रक्तत्वादिविशिष्ट-दण्डादिरूपविषयप्रकारेणेत्यर्थः, 'इच्छा-द्वेषयोः' 'साक्षात्कारादित्य-न्वयः, रक्तदण्डमिच्छामि रक्तदण्डं द्वेष्मि इत्याकारक इच्छा-द्वेष-

साक्षात्कार इच्छात्वादिप्रकारक इच्छाद्वितीयक्षणोत्पन्नेच्छात्वादि
निर्व्विकल्पकादिच्छातृतीयक्षण एव उत्पत्स्यते तत्पूर्व्वक्षण
इच्छाजनकज्ञानं नश्यतीति न विशिष्टवैशिष्ट्यावगाहीच्छाप्रत्य
व्यवहितप्राक्क्षणे ज्ञानसत्त्वमिति इच्छादिकमेव तत्र हेतुः। इ
च इच्छात्वादिनिर्व्विकल्पकेऽपि विशिष्टविषयप्रकारेण इच्छादि
भासते तथाच तदेव निर्व्विकल्पक इच्छांशे विशिष्टवैशिष्ट्यबोधा
इच्छासाक्षात्कारपूर्व्वं स्थास्यतीति तादृशज्ञानस्य न व्यभिचार
अतएव नृसिंहाकारतन्निर्व्विकल्पकं इति सिद्धान्त इत्युच्यते, तत्र
यत्र विशिष्टविषयकफलसाधनताज्ञानं प्रथमं तदुत्तर फलेच्छ
तदनन्तरञ्च विशिष्टोपायविषयिनीच्छा तत्रेच्छात्वनिर्व्विकल्पक
विशिष्टविषयकेच्छासाक्षात्कारे एवं द्विष्टसाधनताज्ञानानन्
फलद्वेषजन्योपायद्वेषविषयकसाक्षात्कारे च ज्ञानस्य व्यभिचा
दुर्व्वार एव द्विक्षणस्थायिनो ज्ञानस्य तत्पूर्व्वक्षण एव नाशादि
भावः। कृतिसाक्षात्काराव्यवहितपूर्व्वक्षे ज्ञानस्य दिनस्यदव
स्यापि सत्त्वं सम्भावितमपि नेति सूचयितुं स्वातन्त्र्येण कृ
साक्षात्कारे व्यभिचारं दर्शयति, 'कृतेश्चेति, अत्रापि 'विशिष्टविष
यधानेनेत्यनुषज्यते। ननु विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत
विषयज्ञानं विनापि विषयविशिष्टकृत्यादिसाक्षात्कार एव न भवि
मर्हतीति अगत्या तत्पूर्व्वं विषयस्मरणमेव कल्पनीयं तथाच विशि
तावच्छेदकप्रकारकज्ञानत्वावच्छिन्नस्यापि न तत्र व्यभिचार इत्य
आह, 'विशेषणेति, 'ज्ञानोपरमेऽपीत्यनुषज्यते, रक्तत्वादिरूपविशे
षणज्ञाननाशेऽपि रक्तत्वादिविषयकात् रक्तत्वादिविशिष्टदण्डादि

विषयकसंस्कारादेव ताद्दशविशिष्टविषयकस्मरणोत्पत्तेरित्यर्थः, तथाच तत्र व्यभिचारभयेन विशेषणज्ञानस्यापि विशेषणविषयकत्वेनैव विशिष्टधीहेतुता वाच्या तथाच विशेषणविषयकज्ञत्वादित एव विषयविशेषितज्ञत्वादिसाक्षात्कारसम्भवात् न ज्ञानापेक्षेति विशिष्टवैशिष्ट्यबुद्धावपि विशिष्टविषयकगुणमात्रस्य हेतुत्वम्, इत्यञ्च विशिष्टवैशिष्ट्यावगाहिसंस्कारात् विशेषणतावच्छेदकप्रकारकज्ञानं विनैव ताद्दशस्मरणनिर्व्वाहोऽपीति भावः। एवमुपनायकज्ञानस्य सविषयकत्वेन हेतुता अतो न विषयोपनयार्थं ज्ञानापेक्षेति बोध्यम्। अनुद्बुद्धसंस्कारात् उपनीतभानवारणाय ज्ञानप्रत्यासत्तिहेतुतायामविशिष्टसंस्कारभेद एव निवेश्यः न तूद्बोधकासमवधानविशिष्टसंस्कारत्वाभावादिः, उद्बोधकसमवहितसंस्कारादुपनीतभानानुपगमे क्षतिविरहात्। ततः स्मरणोत्पादे क्षणैकविलम्बेनैव उपनीतभाननिर्व्वाहात्। न च स्मरणकल्पने गौरवात् विशिष्टसंस्कारत्वाभावनिवेशनमेवोचितमिति वाच्यम्। उद्बोधकानामननुगततया तदभावसहस्रस्य निवेशनीयतया महागौरवात्। लघुरूपेण कारणतासिद्धौ तन्निर्व्वाहकस्मरणकल्पनागौरवस्य फलमुखत्वेनादोषत्वात्। अतएव निर्व्विकल्पकादिस्मरणकल्पनेन विशेषणधियोऽपि विशेषणज्ञानत्वेन हेतुत्वमग्रे व्यवस्थापयिष्यति इदानीन्तु निर्व्विकल्पकस्मृतिर्न सिद्धान्तसिद्धा ज्ञत्वादिसाक्षात्कारस्थान्तरा विषयस्मरणं विनैवानुभवसिद्ध इत्याशयेन विशेषणज्ञानादिहेतुतायां ज्ञानत्वाप्रवेशोऽभ्युपगत इत्यवधेयम्। अनुमितावपि सविषयकत्वमात्रेण न कुतो हेतुत्व-

मित्याकाङ्क्षायामाह, 'इच्छादित इति व्याप्यवत्पक्षविषयकेच्छादित इत्यर्थः। ज्ञानस्य चिरान्तरितत्वविरहेण कदाचिदिच्छादेर्-मित्युत्पादकतायामिष्टापत्तिः सम्भवतीत्याशङ्क्याह, 'संस्काराच्चेति' व्याप्यविशिष्टपक्षविषयकसंस्काराच्चेत्यर्थः। ननु विशिष्टवैशिष्ट्य-बोधहेतुतायामनुद्बुद्धसंस्कारान्यत्ववत् अनुमितिहेतुतायामपि ज्ञानत्वमुपेक्ष्य संस्कारस्य इच्छादेश्च व्यावर्त्तनाय तदन्यत्वमेव किं न निवेश्यते इति तटस्थप्रश्ने उत्तरयति, 'संस्काराद्यन्यत्वस्येति, अगत्या तु विशेषणतावच्छेदकप्रकारकगुणहेतुतायां गौरवसहिष्णु-तेति भावः। अतिव्याप्तिशङ्कया 'संस्काराद्यन्यत्वस्येत्यादिग्रन्थो नावतरति संस्काराद्यन्यत्वेनानुमितिहेतुत्वेऽपि उभयत्र एक-रूपेणाहेतुतयाऽतिव्याप्तेरनवकाशात् ज्ञानत्वघटितधर्म्मावच्छिन्न-कारणताघटितलक्षणेऽसम्भवशङ्कानिरासपरोऽयं ग्रन्थः इत्यप्याहुः।

चिन्तामणिदीधितिः।

न च परामर्शानुव्यवसायेऽतिव्याप्तिः, सामान्यतः प्रत्यक्षे विषयत्वेन तत्तद्विषयकप्रत्यक्षे तत्त्वेन कदाचित् ज्ञानादिप्रत्यक्षे ज्ञानत्वादिना तत्र हेतुत्वं न तु यावा-नेव तत्तदितरत्वादिर्विषयनिष्ठो धर्म्मस्तेन तद्विषयत्वेन कार्य्यकारणभावः मेवावलोकित-चैत्रनिर्मित-नीलेतर-घटतद्विषयकत्वादिना तत्त्वेऽनन्तकार्य्य-कारणभाव-प्रसङ्गान्मानाभावात् अन्यथोपपत्तेश्च।

गादाधरी विवृतिः ।

परामर्शप्रत्यक्षं प्रति अनुमिताविव परामर्शत्वेन हेतुता परामर्शं विना तत्प्रत्यक्षानुदयादित्यभिमानमूलां परामर्शप्रत्यक्षेऽतिव्याप्तिशङ्कां तत्र तेन रूपेण हेतुतां निराकुर्व्वाणो निरस्यति, 'न चेति. परामर्शादिप्रत्यक्षे साध्यव्याप्यहेतुप्रकारकपक्षविशेष्यकसंशयान्यज्ञानत्वरूपपरामर्शत्वेन हेतुतां निराकर्त्तुं वस्तुगत्या यत्प्रत्यक्षनिरूपितविषयनिष्ठहेतुतावच्छेदकं तन्निर्द्धारयति, 'सामान्यत-इत्यादिना. 'सामान्यतः' प्रत्यक्षत्वरूपसामान्यधर्म्मावच्छिन्ने प्रत्यक्षे. 'विषयत्वेनेति, विषयतायाः स्वाश्रयविषयादिभेदेन भिन्नत्वेऽपि विषयतात्वमनुगमकं, कारणस्य प्रत्यासत्तिस्तादात्म्यं, कार्य्यस्य लौकिकसन्निकर्षजन्यज्ञानीयविलक्षणविषयता (१), अतएवातीतादिविषयस्य न प्रत्यक्षविषयत्वं कार्य्याव्यवहितपूर्व्ववर्त्तिविषयरूपकारणस्य च तत्र तादात्म्येनासम्बद्धत्वात् । अव्यवहितप्राक्क्षणवृत्तिकारणसम्बन्धस्य कार्य्यसम्बन्धप्रयोजकत्वात्, अतीतानागतघटादिरूपविषये कार्य्याव्यवहितप्राक्क्षणवृत्तित्व [illegible] अतीतानागतसम्बन्ध [illegible] इन्द्रियसन्निकर्ष [illegible] [illegible] हेतुत्वमास्यताम् । [illegible]

(१) [illegible]

देशस्यान्यदेशावच्छेदेन तत्क्षणवृत्तिप्रतिबन्धकात्यन्ताभावसत्त्वा
कालावच्छेदेनाधिकरणतया तत्र च द्वितीयक्षणे कार्य्यापत्तेः।
एवञ्चातीतादिविषयस्य वर्त्तमानकालासम्बन्धितया अवच्छेद्यादि
कारणसम्बद्धस्यैवावच्छेदकतया नित्यस्यापि सन्निकर्षस्य वर्त्तमान
कालावच्छेदेन न तत्र सत्त्वमिति नातिप्रसङ्गः। अथैवं अतीतादि
विषये सामान्यप्रत्यासत्त्यापि न प्रत्यक्षं जायेत तत्र वर्त्तमानकाला
च्छेदेन नित्यस्यापि सामान्यस्यासत्त्वादिति चेन्न, कारणताव
द्वि व्यापकत्वं द्विधा, क्वचित् यत्र यदा कार्य्यं तत्र त
क्षणावच्छेदेन कारणमित्येवं रूपं, क्वचिच्च यत्र यदा कार्य्यं तत्र त
व्यवहितप्राक्क्षणवृत्तिकारणमित्येवं रूपं, यत्र यस्य
प्रथमोक्तव्यापकताघटिता तस्य प्राक्क्षणावच्छेदेन देशे सत्त्वं
यस्य कारणता द्वितीयव्यापकताघटिता प्राक्क्षणवृत्तेस्तस्य
कदाचिद्देशे सत्त्वं देशे कार्य्योत्पत्तिप्रयोजकम्। लौकिकसन्नि
कर्षादेः प्रत्यक्षादिहेतुतायाञ्च प्रथमव्यापकत्वं, सामान्यप्रत्या
सत्त्यादेः तद्धेतुतायाञ्च द्वितीयमिति नातीतादिविषयस्य लौकिक
प्रत्यक्षप्रसङ्गो न वा सामान्यजप्रत्यक्षानुपपत्तिरित्युच्यते, तदा
पूर्व्वक्षणावच्छिन्नसन्निकर्षाद्विषयनाशकाले
विषयस्य कार्य्यसहभावेन हेतुत्वमावश्यकम्। यदि च विष
नाशोत्पत्तिकालेऽपि प्रत्यक्षमिष्यते "सम्बद्धं वर्त्तमानञ्च गृह्य
चक्षुरादिना"। इति प्रवादस्तु प्राक्क्षणवर्त्तमानतापरः।
एवाशुविनाशिसुखादिप्रकारकलौकिकप्रत्यक्षस्य सुखाद्युत्पाद
तृतीयक्षणे निर्व्वाहः। विशेषणज्ञानस्य हेतुतया तदुत्पत्ति

तद्विरहेण द्वितीयक्षणे तद्विशिष्टबुद्ध्यसम्भवात् इत्युच्यते, तदापि प्रत्यक्षविशेषे विषयविशेषस्य हेतुताया व्यवस्थापनीयतया यद्विशेषे यद्विशेषस्य प्रयोजकता तत्सामान्ये तत्सामान्यस्येति नियमात् सामान्यकार्य्य-कारणभाव आवश्यकः। 'तत्तद्विषयकेति तत्तद्व्यक्तिविषयकप्रत्यक्षत्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुते-त्यर्थः। न चैतादृशकार्य्य-कारणभावो निष्प्रमाणकः तत्तद्व्यक्ति-विषयकप्रत्यक्षस्य सन्निकर्षादिशालिव्यक्त्यन्तरे दृष्टत्वात् यावतीषु व्यक्तिषु सन्निकर्षादिघटितसामग्रीसमवधानं युगपत्तावद्विषयस्य एकस्यैव प्रत्यक्षस्योत्पत्तेरिति वाच्यम्। तत्तद्व्यक्तिभेदेन इन्द्रि-यसन्निकर्षादिघटितसामग्रीभेदनिर्वाहाय तत्तद्व्यक्तित्वेन विषय-हेतुताया आवश्यकत्वात्, अन्यथा तत्तद्घटेन्द्रियसन्निकर्षादीनां साधारणधर्म्मपुरस्कारेणैव(१) हेतुतया तद्व्यक्तिभासकसामग्र्या एत-द्व्यक्तिभासकसामग्रीतो वैलक्षण्यासम्भवात् तादृशहेतुतासत्त्वे तादृश-सामग्र्याः पृथक् तत्तद्व्यक्तित्वावच्छिन्नघटितत्वेन वैलक्षण्यात्, तदवैलक्षण्ये च तत्तद्व्यक्तिविषयकबाधग्रहाभावादिघटितायाः सम-वायेन तत्तद्व्यक्तिविषयकविशिष्टप्रत्यक्षसामग्र्या विषयतासम्बन्धेन तत्तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीमत्क्षणवृत्तित्वविशिष्टायाः सम-वायेन तत्तद्व्यक्तिविषयकविशिष्टबुद्ध्युत्पादप्रयोजिकायाः व्यक्त्यन्तर-मात्रसन्निकर्षदशायामपि आत्मन्यक्षततत्त्वेन तदानीमात्मनि सम-वायेन तादृशबुद्ध्यापत्तेर्दुर्व्वारत्वात्। न च सन्निकर्षस्यैव तत्तद्व्यक्ति-

(१) संयोगत्वादिनेत्यर्थः।

सन्निकर्षत्वेन हेतुत्वमस्तु तावताप्यन्यव्यक्तिमात्रसन्निकर्षवत्यपि काले विषयतया तत्तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीविरहः सुघटः तदानीं तादृशतद्व्यक्तिसन्निकर्षाभावादिति वाच्यम्। गुरुणा तत्तद्व्यक्तिसन्निकर्षत्वेनैव हेतुतापेक्षया लाघवात् तत्तद्व्यक्तित्वेन विषयहेतुताया एवोचितत्वात्। न चोक्तकाले तत्तद्व्यक्तित्वावच्छिन्नस्य विषयस्य सत्त्वेन तद्घटितसामग्र्यक्षतैव इति न विषयतया तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीविरह इति विशिष्य विषयहेतुतया नोक्तातिप्रसङ्गवारणसम्भव इति वाच्यम्। एकाधिकरणप्रत्यासन्नकारणतावच्छेदकावच्छिन्नस्तोमस्यैव सामग्रीत्वात् तादात्म्यसम्बन्धेन तत्तद्व्यक्तित्वावच्छिन्नसम्बन्धिन्यां तत्तद्व्यक्तौ समवायादिना अप्रत्यासन्नस्य इन्द्रियसंयोगादेः सत्त्वेऽपि उक्तसामग्रीविरहात्। यदि च तद्धर्मघटितधर्मावच्छिन्नजनकसामग्री तद्धर्मवत्ताप्रयोजकसामग्रीसमवहिता कार्य्यं जनयति अत आत्मनि तद्व्यक्तिविषयकज्ञानजनकसामग्र्यास्तद्विषयकत्वप्रयोजकसमवधानमपेक्षणीयं प्रत्यक्षे तद्व्यक्तिविषयत्वप्रयोजकत्वञ्च तद्विषयतानियामकसामग्र्यास्तद्व्यक्तित्वसामानाधिकरण्यम्, उक्तस्थले च इन्द्रियसन्निकर्षादेस्तदभावात् तत्तद्व्यक्तित्वेन तत्तत्प्रत्यक्षाहेतुत्वेऽपि नोक्तापत्तिरिष्यते, तदापि तत्तद्घटादिव्यक्तिवृत्तितद्रूपाद्यात्मकविशेषणधीघटिता सामग्री तद्विशिष्टबुद्धिजनने तत्तद्घटादिस्वरूपविशेष्यभासकसामग्रीमपेक्षा वाच्या व्यक्त्यन्तरभासकसन्निकर्षादिघटितसामग्र्यास्तद्व्यक्तिभासकसामग्र्या अविशेषे च व्यक्त्यन्तरमात्रसन्निकर्षदशायामपि तद्व्यक्तिगतरूपादिज्ञानात् तद्विशिष्टबुद्ध्यापत्ति-

दुर्व्वारैव, (१) न हि तद्रूपादिज्ञानजन्यतावच्छेदकगर्भे तद्घटादिव्यक्तिविषयकत्वमपि प्रविष्टं, येनोक्तप्रयोजकापेक्षया नातिप्रसङ्गः स्यात् तथा सति (२) तत्प्रकारकभ्रमाद्यसंग्रहप्रसङ्गादिति तत्तद्व्यक्तित्वेन विषयस्य हेतुत्वमावश्यकं तद्व्यक्तिविषयकत्वरूपकार्य्यतावच्छेदकोपलक्षितप्रत्यक्षस्य समूहालम्बनरूपस्य विषयतासम्बन्धेन व्यक्त्यन्तरेषूत्पत्तावपि तद्विशिष्टस्यानुत्पत्तेः न तद्व्यक्तित्वावच्छिन्नहेतुतायां व्यभिचारः, तादृशकार्य्यतावच्छेदकविशिष्टसमानाधिकरणाभावघटितव्यापकताया अक्षतत्वात्, तत्तद्व्यक्तिवृत्तिविषयतात्वेनैव कार्य्यतावच्छेदकसम्बन्धत्वोपगमात् न व्यभिचार इत्यप्याहुः ।

ननु परामर्शत्व-परामर्शप्रत्यक्षत्वयोरतिसामान्यातिविशेषोक्तरूपद्वहिर्भावेऽपि (३) मध्यविधकार्य्य-कारणभावस्तेन रूपेणापि (४) इतिशङ्कामपाकर्त्तुं मध्यविधकार्य्यकारणभावस्य प्रामाणिकत्वे तदवच्छेदकं विशिष्टानात्मकं लघुरूपं दर्शयति, 'कदाचिदिति, तादृशकार्य्य-कारणभावस्य निर्युक्तित्वं 'कदाचिदित्यनेन सूचितम् ।

---

(१) न च तद्व्यक्त्यन्तरे तद्विशिष्टबुद्धिर्भ्रमरूपैव सा च न जायते दोषाभावात् दोषसत्त्वे इष्टापत्तिरिति वाच्यम् । दोषाद्यघटितयादृशसामग्रीबलात् तद्घटव्यक्तौ तद्रूपविशिष्टबुद्धिर्जायते तादृशसामग्र्या एव व्यक्त्यन्तरे सत्त्वेन दोषासत्त्वेऽपि व्यक्त्यन्तरे तद्विशिष्टबुद्ध्यापत्तिर्दुर्व्वारैवेति ।

(२) तत्तद्व्यक्तिविषयकत्वस्य कार्य्यतावच्छेदके प्रवेशे ।

(३) प्रत्यक्षत्व-विषयत्व-तत्तद्व्यक्तिविषयकप्रत्यक्षत्व-तत्तद्व्यक्तित्वरूपेणेत्यर्थः ।

(४) परामर्शत्व-परामर्शप्रत्यक्षत्वरूपेणेत्यर्थः ।

यद्यप्यतीन्द्रियाणां (१) गुरुत्वादृष्ट-भावना स्थितिस्थापकानां प्रत्यक्षस्य चक्षुराद्ययोग्यस्पर्शादीनाञ्च चक्षुरादिना ग्रहस्य वारणाय योग्यजातीयानां स्वविषयकप्रत्यक्षे हेतुत्वकल्पनमावश्यकं तथा सति यावद्विशेषकारणबाधेनातीन्द्रियविषयतया प्रत्यक्षवारणसम्भवात्, (२) तथाप्यादिपदग्राह्यघटादिप्रत्यक्ष-घटत्वादिना कार्य्य-कारणभावोऽतिनिर्युक्तिक एव। वस्तुतस्त्वतीन्द्रियविषयाणां तादात्म्येन प्रतिबन्धकत्वकल्पनयैवातिप्रसङ्गवारणे योग्यजातीयानां बहूनां न प्रत्यक्षहेतुता अन्यत् स्वयमूहनीयम्। इदानीं प्रतिबन्धि प्रदर्शयन् परामर्शप्रत्यक्षे परामर्शत्वेन हेतुतां निराकरोति 'न त्विति, 'तत्तदितरत्वादिरिति व्याप्तिप्रकारकत्व-पक्षधर्मताविषयकत्व-ज्ञानत्व संशयेतरत्वादिघटित इत्यर्थः, 'घट-तद्विषयत्वादिना' घटत्व-तत्प्रत्यक्षत्वादिना, प्रामाणिकत्वे गौरवं न दोषायेत्यत आह, 'मानाभावादिति। ननु परामर्शादिशून्य-काले तद्विषयकप्रत्यक्षत्वावच्छिन्नापत्तिवारणान्यथानुपपत्त्या परा-

(१) नित्यसन्निकर्षाश्रयीभूतातीन्द्रियपदार्थस्य प्रत्यक्षवारणाय योग्यजातीयानां स्वविषयकप्रत्यक्षं प्रति हेतुत्वमावश्यकं तथा सति कदाचिदित्यद्य इत्याशङ्कय नित्यसन्निकर्षाश्रययोग्यजातीयानां स्वविषयकप्रत्यक्षं प्रति हेतुत्वेऽपि आदिपदग्राह्यस्य अनित्यसन्निकर्षाश्रययोग्यघटादिजातीयानां स्वविषयकप्रत्यक्षं प्रति हेतुत्वस्य निर्युक्तिकत्वं कदाचिदित्यनेन सूचितम् इति समाधत्ते, यद्यपीत्यादिना। नन्वेतावता आदिपदग्राह्यस्य कार्य्य-कारणभावस्य निर्युक्तिकत्वेऽपि प्रकृतशङ्कनीयकार्य्य-कारणतायास्य निर्युक्तिकत्वं नायातीत्याशयेनाह, वस्तुतस्त्वित्यादि।

(२) सामान्यसामग्र्या उभयवृत्तिधर्म्मघटितविशेषसामग्रीसमवहितायाः फलाजनकत्वनियमादिति भावः।

र्गादिप्रत्यक्षे परामर्शत्वादिना कारणत्वकल्पनमावश्यकमित्यत आह, 'अन्ययोपपत्तेश्चेति प्रत्यक्षविषयताप्रयोजिकाया विषयतासम्बन्धेन प्रत्यक्षोत्पादकसामग्र्या विषयनिष्ठतत्तद्धर्मसामानाधिकरण्यरूपात् प्रत्यक्षविषयतायास्तत्तद्धर्मसामानाधिकरण्यप्रयोजकादेव तत्तद्धर्मवद्वृत्तिविषयताकप्रत्यक्षत्वावच्छिन्नोत्पत्तिनियमोपपत्तेरित्यर्थः। अतएव प्रयोजकसमाजनियम्यधर्मान्तराणामपि कार्य्यतावच्छेदकत्वमिति भावः।

चिन्तामणिदीधितिः।

अथ विशिष्टस्मरणेऽतिव्याप्तिः। न चोपेक्षान्यत्वेन तत्र हेतुत्वं, उपेक्षात्वं हि न जातिश्चाक्षुषत्वादिना सङ्करप्रसङ्गात् आंशिकत्वोपगमाच्च।

गादाधरी विवृतिः।

वह्निव्याप्यधूमवान् पर्व्वत इति स्मरणे तादृशनिश्चयत्वेन हेतुत्वात्तत्रातिव्याप्तिरिति शङ्कते, 'अथेति, 'विशिष्टस्मरणे' व्याप्यविशिष्टपक्षस्मरणे। न च कृतिजनकतायामप्रामाण्यज्ञानाभाववैशिष्ट्यानिवेशादनुमितौ च तन्निवेशान्नैकरूपेण उभयहेतुतेति नातिव्याप्तिरिति वाच्यम्। अनुमितिजनकतायामप्रामाण्यज्ञानाभावनिवेशे विशेष्य-विशेषणभावे विनिगमनाविरहादप्रामाण्यज्ञानाभावस्य पृथक्कारणत्वोपगमात्। अथ धूमत्वादिना एकधूमादिविषयकज्ञानात् तेन रूपेण धूमाद्यन्तरस्मरणवारणाय तत्तद्धूमादिव्यक्त्यवगाहित्वमपि कृतिजनकतावच्छेदके प्रविष्टं

न त्वनुमितिजनकतावच्छेदकतायामिति कथमवच्छेदकतापर्य्याप्ति-
घटितलक्षणेऽतिव्याप्तिः। न च पर्य्याप्त्यनिवेशाभिप्रायेणैतदभि-
धानं, 'न चोपेक्षान्यत्वेनेति शङ्कानवतारात्। न च समान-
विशेष्यत्वप्रत्यासत्त्यैवानतिप्रसङ्गे तत्तद्व्यक्तिविषयकत्वस्य न स्मृति-
जनकतायां निवेश इति वाच्यम्। वह्निव्याप्यधूमत्वादिना-
विषयकाद्रूपान्तरेण चेतद्धूमावगाहिज्ञानाद्वह्निव्याप्यधूमत्वादि-
नैतद्धूमादिविषयकस्मरणस्य समानविशेष्यताप्रत्यासत्त्या अवार-
णात् वह्निव्याप्यधूमत्वादिप्रकारकविषयतात्वेन विषयताया
कार्य्य-कारणसम्बन्धत्वोपगमे कारणतावच्छेदकधर्म्मगर्भे व्याप्त्यादि-
विषयताया निवेशे प्रयोजनविरहेण तद्रूपावच्छिन्नजनकता-
घटितोक्तलक्षणस्यातिव्याप्त्यनवकाशः उक्तविषयतायाः सम्बन्धत्वे-
ऽपि अभावत्वादिना अभावान्तरस्य व्याप्तिशरीरे यत्र भा-
तत्रापराभावादिविषयकस्मरणापत्तिर्दुर्व्वारैवेति तत्तद्व्यक्तिवि-
षयतात्वेनैवाभावत्वाद्यवच्छिन्नविषयताः स्मृतिजनकतायां निवे-
शनीया न त्वनुमितिजनकतायामित्यतिव्याप्तिर्न सङ्गतैवेति
चेन्न, यत्साध्यव्याप्ययद्धेतुविशिष्टयद्धर्म्मिविषयकं सर्व्वमेव ज्ञा-
तत्तद्धर्म्मप्रकारेण तद्धर्म्माद्यशेषव्यक्तिविषयकं तत्साध्यव्याप्य-
तद्धेतुविशिष्टतद्धर्म्मिज्ञानस्य तादृशस्मृतिहेतुतायां तत्तद्धर्म्मिवि-
षयकत्वस्याव्यावर्त्तकत्वेनानिवेशात् तादृशपरामर्शघटितलक्षणाभि-
प्रायेणैतदभिधानात् जातिघटितलक्षणस्य इदानीमकरणात्
न च तादृशस्मृतेरपि नानासाधनादिप्रकारेण नानाधिकरणादि-
गाहिज्ञानस्य यद्यदधिकरणादेर्यत्साधनादिप्रकारेण तद्विषय-

तत्तत्साधनादिव्यक्तिभिन्नतत्तद्विषयसाधनादिप्रकारेण तद्विषयाधिकरणादिव्यक्त्यन्तरविषयकस्मरणापत्तिर्दुर्वारैवेति तत्तद्व्यक्तिप्रकारतानिरूपिततत्तद्व्यक्तिविशेष्यताना विशिष्य कार्य्य-कारणभावे निवेशनमावश्यकमिति वाच्यम्। तत्स्थलीयपरामर्शस्य तत्स्मरणनिष्ठकार्य्यतावच्छेदकगर्भे तत्तत्साधनादिव्यक्तिप्रकारतानिरूपिततत्तत्साधनाधिकरणव्यक्तिविषयतानां विशिष्टनिवेशादेव स्मृतौ वैपरीत्येन भानवारणात् कारणतावच्छेदककोठौ तत्तद्व्यक्तिविषयतात्वेन विषयतानिवेशे प्रयोजनविरहात् तावतैव च शङ्कितातिव्याप्तिसङ्गतेः।

परे तु यद्युपमितिविशेषेऽतिव्याप्तिवारणाय कारणतावच्छेदकत्वपर्य्याप्तिः परामर्शत्वांशे निवेशनमावश्यकमिति मन्यते तदापि परामर्शत्वशरीरे या या विषयताः प्रविष्टास्तदन्यविषयत्वानवच्छिन्नत्वरूपं परामर्शत्वपर्य्याप्तावच्छेदकताकत्वमेव लक्षणप्रविष्टकारणतायां निवेश्यं लाघवान्न तु परामर्शत्वघटकायावन्तः पदार्थास्तदन्यपदार्थानवच्छिन्नत्वम् अधिकभेदनिवेशे गौरवात्, एवञ्चोपमितिविशेषे हेतुतावच्छेदकेऽधिकविषयतानिवेशादेव नातिव्याप्त्यवकाशः, स्मृतिकारणतावच्छेदके च तत्तद्विषयाणामधिकानां निवेशेऽप्यधिकविषयतानामनिवेशात्तत्रातिव्याप्तिसङ्गतिः। अतिरिक्तविषयतानवच्छिन्नत्ववत् तदपेक्षान्यत्वानवच्छिन्नत्वमपि निवेश्यमित्याशयानुलापा ग्रन्थाद्यः 'न चेत्यादिना निरास इत्याहुः।

अथ तत्तद्विषयकस्मृतौ तत्तद्विषयकसंस्कारत्वेन संस्कारहेतुतयैव

स्मृतिर्विषयनियमो ज्ञानस्य ज्ञानत्वेनैव स्मृतिजनकत्वं
हेतुता न तु तद्विषयकस्मृतौ तद्विषयक...
कत्वमतिप्रसक्तिः। न च तत्संशयात्तत्स्मरणवारणाय तत्क
तन्निश्चयत्वेन हेतुत्वमावश्यकमिति वाच्यम्। संस्कारस्य तद्धर्मि
तत्प्रकारकस्मरणे तद्धर्मिकतदभावप्रकारकान्यतद्धर्मिकतत्प्रकारक
सस्कारत्वेन हेतुतयैव तद्गोचरसंशयात्तदापत्त्ययोगात् संशयज
सस्कारस्य विरोधिप्रकारकत्वनियमादिति चेन्न, सस्कारस्य सस्का
त्वेनैव हेतुता ज्ञानस्य तद्गोचरस्मृतौ तन्निश्चयत्वेन ...
सम्भवेन विनिगमकाभावात् ज्ञानहेतुतायामपि ... । द्वि
गस्याप्रत्याख्येयत्वात्। न च तद्गोचरज्ञानजन्यसस्कारस्य का
दिना नाशे अन्यगोचरसंस्कारात्तद्गोचरस्मरणवारणाय संस्का
हेतुताया विषयनिवेशनमावश्यकमिति वाच्यम्। ... । हेतुता
विषयानिवेशेऽप्युक्तस्थले तन्निश्चयरूपकरणव्यापारविरहेण तत्स्म
रणापत्त्यसम्भवात्। वस्तुतोऽन्वय-व्यतिरेकाभ्यां तद्गोचरस्मृतौ तद्गो
चरनिश्चयत्वेन हेतुत्वसिद्धौ तन्निर्व्वाहकतया व्यापारीभूतसस्का
कल्पना सस्कारे प्रमाणान्तराभावादिति कथं संस्कारेण तद्गोच
निश्चयत्वावच्छिन्नस्यान्यथासिद्धिः यतस्तद्रूपावच्छिन्नमहेतुः स्यात्
न हि यदुपजीव्य यत्सिद्ध्यति तत् तद्बाधकं, एतेन सस्कारहे
तायां विषयानिवेशे तदंशे उपेक्षात्मकज्ञानजन्यादन्यगोच
सस्कारात् तत्स्मरणापत्तिवारणाय तद्विषयकस्मृतौ तद्विषयक
सस्कारत्वेन हेतुत्वमावश्यकमिति ज्ञानहेतुतायां ...
व्यर्थ इत्यपि प्रत्युक्तम्। फल-व्यापारौ प्रति करणस्य ...

तुनेति प्राचीनसम्मतनियमानुरोधेन ज्ञानस्य स्मृतिजनकतायां षयनिवेशनमावश्यकमित्यपि वदन्ति।

यत्तु ज्ञानस्य ज्ञानत्वेनैव स्मृतिहेतुता तद्विषयकस्मृतावुद्बोधकशेषाणां हेतुताया आवश्यकत्वात् ततएव विषयनियमोपत्ते. उद्बोधकानां फलबलकल्प्यत्वात्। न च सम्बन्धिदज्ञानादीनामनुगतरूपेणैव तत्तद्गोचरस्मृतिहेतुतया तद्गोचरान विनापि तत्स्मरणापत्तिरिति वाच्यम्। तत्सम्बन्धित्वेन हीतम् यत्तज्ज्ञानस्यैव तद्विषयस्मारकतया तादृशोद्बोधकसमधानस्थले तज्ज्ञानस्याप्यावश्यकत्वादिति, तदसत्, तथा सति ानत्वमात्रेणापि ज्ञानस्य स्मृतिहेतुतायामप्रामाणिकतापत्तेः। द्बोधकेन ज्ञानविशेषान्यथासिद्धौ कालान्तरे यज्ज्ञानस्योपयोगिता ज्ज्ञानार्थं विशेषदर्शिनां शास्त्राध्ययनादावप्रवृत्तिप्रसङ्गाच्च।

वस्तुतः (१) स्मृतौ सम्बन्धिज्ञानस्य न तत्सम्बन्धावगाहिज्ञानवेन हेतुता यत्र सम्बन्धो येन रूपेण गृहीतः सम्बन्धाविषयकादपि त्प्रकारकज्ञानात् सम्बन्ध्यन्तरस्मरणात्, नापि सम्बन्धग्रहविषयावच्छेदकावच्छिन्नविषयकत्वेन सम्बन्धग्रहस्य उपलक्षणतया भाविसम्बन्धग्रहविषयविषयकग्रहस्याप्युद्बोधकतापत्तेः, सम्बन्धग्रहे सामान्यतः पूर्व्वत्वमव्यावर्त्तकम् तत्तज्ज्ञानपूर्व्वत्वञ्चाननुगतं सम्बन्धानुद्बोधे च पूर्व्वसम्बन्धग्रहोप्यस्मारकः सम्बन्धोद्बोधकाप्यननुगता एव, एवञ्च स्मृत्युपधायकसम्बन्धिज्ञानानां तत्तद्व्यक्ति-

(१) अनुगतत्वेनाभिमता यदि उद्बोधका नानुगता इत्याह वस्तुत इत्यादिना।

तेनैव हेतुना तास्या तथात्व प्रात्यक्षप्रत्यभिज्ञानमस्ति यत्र पूर्वं निगमितोऽनुभूतस्य तद्विषयस्य स्मृतिस्तदनुज्ञानस्य [illegible] नानाहेतुत्वस्यानापत्ते सम्बन्धप्रयोगतद्विषयकस्मृतौ तदनुमा- नानुगतरूपेणैकहेतुत्वे सम्भवति यत्पूर्वेच तद्विषयस्य [illegible] भवस्तत्कालीनतदनुज्ञानात् तत्र तद्विषयस्मृतिवारणाय तद्गोचरस्मृतौ तद्विषयकनिश्चयत्वेनापि हेतुत्वमावश्यकमितिदिक् उपेक्षात्मकज्ञानात् स्मरणानुत्पत्त्या तदन्यत्वस्याधिकस्यापि स्मृ- कारणतावच्छेदके निवेश्यतया नोपदर्शितनिश्चयत्वपर्याप्तकारण- तावच्छेदकताकत्वं स्मृताविति नातिव्याप्तिरित्याशङ्का निरस्यति 'न चेति, 'उपेक्षान्यत्वं' उपेक्षात्वावच्छिन्नभेदः, तस्य तदा स्मृ- कारणतावच्छेदकघटकता स्यात् यद्युपेक्षात्व [illegible] व्यावृत्तो जातिविशेषः स्यात्, स्मृत्यजनकज्ञानत्वरूपस्य उपेक्षा- व्यवहारविषयस्य उपाधेः स्मृतिजनकतायां प्रवेशासम्भवात् स्मृ- जनकान्यत्वस्य स्मृतिजनकत्वरूपत्वात् स्वस्य (१) च स्वानवच्छेद- त्वात्, नहि तादृशजातिः शक्यकल्पना, जातिसङ्करादिदोषग्रासा- दित्याह, 'उपेक्षात्वं हीति, अत्र च जातित्वाभावानुमाने उपेक्षात्वस्य स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकत्वेन पक्षता, '[illegible] त्यादिशङ्कितुर्मतेऽपि स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छे- दकत्वस्य संशयत्वे तद्घटकविरोधिप्रकारकत्वे वा प्रसिद्धत्वात्। तत्र जातित्वाभावस्य उभयमतसिद्धत्वेऽपि उक्तपक्षतावच्छेदकावच्छेद-

---

(१) आत्माश्रयप्रसङ्गभयेनेत्यादिः।

ध्यसिद्धेरुद्देश्यत्वान्नांशतः सिद्धसाधनं दोषः । अत्र उपेक्षापद-
ृत्तिनिमित्तत्वेन पक्षता उपेक्षापदप्रवृत्तिनिमित्तस्य प्रसिद्धा-
पे वादिनस्तस्य स्मृत्यजनकत्वादिरूपतया तदवच्छिन्नान्यत्वस्य
तिजनकत्वावच्छेदकत्वासम्भवेन (१) स्मृतेरनुमितिजनकतावच्छे-
कपर्य्याप्तजनकतावच्छेदकताकत्वाच्चतेः, अत्राप्यवच्छेदकावच्छेदेन
ाध्यसिद्धेरुद्देश्यत्वान्नोक्तदोषः इत्यपि केचित्, तच्चिन्त्यम् उपेक्षा-
स्य जातित्ववादिना तस्योपेक्षापदप्रवृत्तिनिमित्ततानभ्युपगमे
तिविरहादवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेऽपि तत्र जाति-
ाभावासिद्धेः, 'तादृशादपि स्मृत्युत्पादादित्यग्रिमग्रन्थविरोधाच्च ।
द्रूपवतः स्मृत्युत्पादकत्वे तद्रूपनिष्ठस्मृतिजनकतावच्छेदकभेद-
तियोगितावच्छेदकताया एव विरोधित्वात् न तु उपेक्षापद-
वृत्तिनिमित्ततायाः ।

यत्तु स्मृतिजनकावृत्तिज्ञानधर्म्मत्वेन (२) पक्षता, तादृग्ध-
र्म्मत्वञ्च तत्तज्ज्ञानान्यतरत्वादौ प्रसिद्धमिति, तदसत्, एकास्मि
उपेक्षात्मकज्ञानस्यान्यविषयकस्मृतिजनकतया उपेक्षात्वस्य स्मृति-
जनकावृत्तित्वाप्रसिद्धेः, अन्यथा 'आभिकत्वोपगमाच्चेति बाधका-
सङ्गतेः ।

स्वीययावद्विषयविषयकस्मृतिजनकावृत्तिज्ञानधर्म्मत्वेन तु (३)
पक्षत्वं सम्भवति, 'चाक्षुषत्वादिनेति, आदिना ज्ञानत्वव्याप्य-

(१) स्वस्य स्वानवच्छेदकत्वादिति भावः ।

(२) घटत्वादौ व्यभिचारवारणाय ज्ञानेति ।

(३) स्वं यद्वृत्तिप्रतियोगिनिरूपकपरम् ।

निखिलजातिपरिग्रहः। तत्तज्जातिनिरूपितसङ्करस्य च पृथ
हेतुता बोध्या न तु मिलितस्य वैयर्थ्यात्। ... त्वव्याप
सति तज्जातिव्यभिचारित्वे सति तज्जातिसामानाधिकरण्यं
ङ्करः। अव्यापकत्वं प्रतियोग्यसमानाधिकरणतत्समानाधिकरणा
भावप्रतियोगित्वं, तत्समानाधिकरणभेदप्रतियोगितावच्छेदक
वा, तज्जातिव्यभिचारित्वञ्च तद्व्यक्तित्वावच्छिन्नाभावसामानाधि
करण्यम्। यद्यपि व्याप्यजातिमत्यनित्येऽपि कालिकादिसम्बन्धे
व्यापकजात्यवच्छिन्नभेदो वर्त्तते, व्याप्यजातेरपि व्यापकजाति
कालिकादिसम्बन्धेन वृत्तेर्विरुद्धजातेरपि कालिकादिसम्बन्धेन
सामानाधिकरण्यमस्ति समवायेन चावच्छेदकत्वं वृत्तिश्च पक्षसा
पेक्षात्वस्य नोभयमते, उपेक्षात्वस्य उपाधित्वमते (१) विशेषणता
विशेषेणैव वृत्तेरिति स्वरूपासिद्धिः। वस्तुतस्तु (२) गुणगतजाति
सङ्करस्य (३) यत्र हेतुता तत्र साधनाप्रसिद्धिरेव गुणे जातिभिन्न
स्यासमवायात्, समवायघटितचाक्षुषत्वादिसङ्करस्य क्वचिदप्
प्रसिद्धिविरहात्। तथापि समवाय-दैशिकविशेषणतान्यतरसम्ब
न्धेन तथात्वं (४) बोध्यम्। अथवा समवायेनावच्छेदकत्वस्याने
समवायावच्छिन्नावच्छेदकताशून्यं यत्समवेतं तदन्यत्वं, समवायेन
तदभावादिमति समवायेन वृत्तिस्थाने समवायेन तद्वृत्तित्व

(१) मूर्त्यजनकत्वरूपोपाधित्वमते।

(२) द्वित्वनीत्वादिसङ्करस्य घटजलसंयोगादौ प्रसिद्धत्वेऽपि।

(३) गुणगता या जातिश्चाक्षुषत्वादिरूपा तत्सङ्करस्य।

(४) अवच्छेदकत्वादिकमित्यर्थः।

सति समवेतं यत्तदन्यत्वं, तज्जातिसमानाधिकरणत्वस्थले तज्जातिमदसमवेतत्वे सति यत्समवेतं तदन्यत्वं च निवेशनीयमिति नासिद्धिः। विशिष्टभेदस्य पक्षस्य समवेतत्वेऽसमवेतत्वे चाक्षतत्वात्। यदि चैतत् निरूपकजातिभेदेन भिन्नमेव तत्तज्जातीनां विशिष्योपादानादिति चाक्षुषत्वादिना सङ्करस्य यत्र हेतुता तत्र व्याप्यजातौ व्यभिचारवारकं व्यभिचारित्वविशेषणं व्यर्थं चाक्षुषत्वादिव्याप्यजात्यप्रसिद्धेः, तत्परित्यागे च ज्ञानत्वाद्यव्यापक-तत्समानाधिकरणचाक्षुषत्वादेरिव चाक्षुषत्वाद्यव्यापक-तत्समानाधिकरणस्य उपेक्षात्वस्यापि जातित्वं स्यात् इत्यप्रयोजकत्वग्रहग्रास इत्युच्यते, तदा यज्जात्यव्यापकत्वे सति यज्जातिव्यभिचारि यत्तन्न तज्जातिसमानाधिकरणजातिरिति सामान्यतो व्याप्त्या उपेक्षात्वे चाक्षुषत्वादिसमानाधिकरणजातित्वाभावः साध्यः, चाक्षुषत्वादिव्यापकज्ञानत्वादौ ज्ञानत्वादिव्याप्यचाक्षुषत्वादौ व्यभिचारवारणाय दलद्वयम्। वस्तुतस्तु स्वाव्यापकस्वव्यभिचारिजातित्वव्यापकविरोधप्रतियोगि (१) यद्यत् स्वं तत्तद्भेदकूटं हेतूकृत्य उपेक्षात्वादौ जातिसङ्कीर्णधर्मे जातित्वाभावः साधनीयः,

---

(१) स्वाव्यापक-स्वव्यभिचारित्वमात्रव्यापकत्वनिवेशे चाक्षुषत्वादौ व्यभिचारिस्वसमानाधिकरणोपेक्षत्वादेः स्वाव्यापक-स्वव्यभिचारितया चाक्षुषत्वादेः स्वान्तर्भावात् अतो जातित्वेति। तादृशजातित्वसामानाधिकरण्योक्तौ स्वाव्यापकस्वव्यभिचारिघटत्वादिजाते स्वविरोधितया उपेक्षत्वादेः तादृशजातित्वसमानाधिकरणविरोधप्रतियोगितया स्वान्तर्भावात् स्वरूपासिद्धिः स्यादतो व्यापकतानिवेशः।

कत्वेति, यत्र समूहालम्बनस्य ज्ञानस्य एकविषयस्मारकत्व अपर-विषयास्मारकत्वञ्च तत्र उपेक्षात्वजात्यनभ्युपगमे सकलविषय-स्मारकत्व उपगमे च सकलविषयास्मारकत्वं स्यात् इति यद्विषया-स्मारकत्व तस्य तद्विषयावच्छेदेन उपेक्षात्वं स्वीकरणीयं, अन्य-विषयांशे च तदभाव इति तद्विषयकस्मृतौ च तद्विषयावच्छिन्न-मुपेक्षान्यत्वं प्रयोजकं वाच्यमित्यव्याप्यवृत्तित्वादुपेक्षात्वं न जाति-रित्यर्थः। न चांशिकोपेक्षयामपि न विषयान्तरावच्छेदेन उपेक्षात्वाभावः स्वीक्रियते किन्तु तद्विषयकत्वस्य उपेक्षात्वानव-च्छेदकत्वमात्रम्(१), प्रतियोग्यनवच्छेदकस्य तस्य तदभावावच्छेद-कत्वानियमात्, तथा नियमे दण्डादेर्द्रव्यत्वादिना घटादिजनक-त्वाभावप्रसङ्गादिति नोपेक्षात्वस्याव्याप्यवृत्तित्वं स्वाभावासामाना-धिकरण्यादिति वाच्यम्। जातावभावसामानाधिकरण्यवत् किञ्चि-दवच्छिन्नवृत्तिकताया अपि सिद्धान्तविरुद्धत्वात्। यद्यपि उपेक्षा-त्वस्य स्मृत्यजनकत्वादिरूपोपाधित्वमते न स्वाभावसामानाधि-करण्यमवच्छिन्नवृत्तिकत्वं वेति नायमुभयसिद्धो हेतुः (२)। तथापि तन्मतसिद्धहेतुनैव तं प्रति जातित्वाभावः साध्यते अतएवोपगमादि-त्युक्तम्। वस्तुतस्तु प्रमेयत्वादिनांशिकत्व-जातित्वोभयाभाव. साध-नीयः उपेक्षान्यत्वेन स्मृतिहेतुतावादिना च तस्य आंशिकत्वोप-

---

(१) तथाच उपेक्षात्वानवच्छेदकतद्विषयकत्वं तद्विषयकस्मृतिजनकतावच्छेदक-मिति भाव ।

(२) आंशिकत्वोपगमादित्यस्य नोभयसिद्धहेतुत्वमिति भाव ।

गमाज्जातित्वाभावमादाय पर्य्यवसानमित्यांशिकत्वोपगमात्रेत्वनेन दर्शितम् ।

चिन्तामणिदीधितिः ।

नापि प्रवृत्तिनिवृत्त्यजनकत्वमजिज्ञासितविषयत्वं वा, तादृशादपि स्मृत्युत्पादात् । नापि संस्काराजनकत्वं, तज्जनकतावच्छेदकरूपान्तरापरिचयात् अन्योन्याश्रयप्रसङ्गात् संस्कारानुत्पत्त्यैवास्मरणसम्भवे स्मृतिजनकतायां तदप्रवेशाच्च । नाप्यनुभवत्वेन तथात्वं, संस्कारस्य फलनाश्यतया सकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसङ्गात् समानाकारस्यैव फलस्य नाशकत्वात्, समूहालम्बनादितो नैकैकगोचरक्रमिकस्मरणानुपपत्तिः, जायते च पुनः पुनः स्मरणाद्दृढतरः संस्कारः ।

गादाधरी विवृतिः ।

ननु मा भूदुपेक्षात्वं जातिस्तद्गोचरप्रयत्नाप्रयोजकत्वरूप उपाधिरेव तद्विषये उपेक्षात्वं हानोपादानभिन्नज्ञाने (१) उपेक्षात्वव्यवहारात् तदवच्छिन्नान्यत्वमेव तद्विषयकस्मृतिप्रयोजकं वाच्यं, अतएव ज्ञानस्य किञ्चिद्विषयस्मारकत्वं किञ्चिद्विषयास्मारकत्वञ्च उपपद्यते निरुक्तोपेक्षात्वस्य विषयभेदनियन्त्रितत्वात् । अथवा

(१) हीयतेऽनेनेति व्युत्पत्त्या हानपदेन निवृत्तिप्रयोजकं ज्ञानं उपादीयतेऽनेनेति व्युत्पत्त्या उपादानपदेन प्रवृत्तिप्रयोजकं ज्ञानं प्रतीयते ।

स्वसमानाधिकरणतद्विषयकजिज्ञासानुत्तरत्वं (१) तदित्याशङ्कां निराकरोति, 'नापीति, 'प्रवृत्ति-निवृत्त्यजनकत्वमिति, स्मृति-प्रयोजकभेदप्रतियोगितावच्छेदकमित्यर्थकमुपेक्षात्वमित्यनुषज्यते, तस्योपेक्षापदप्रवृत्तिनिमित्तमित्यर्थकत्वे न तदनुसङ्गसम्भवः प्रवृत्ति-निवृत्त्यजनकत्वादेरुपेक्षापदप्रवृत्तिनिमित्तत्वे तादृशज्ञानस्य स्मृत्युत्पादकतायाम् अबाधकत्वेनाग्रिमहेत्वसङ्गतेः। किन्तु स्मृति-प्रयोजकभेदप्रतियोगितावच्छेदकमिति पूरणीयम्। ननूपेक्षा-ज्ञानात् संस्कारानुत्पादेन तद्विषयकसंस्काराजनकत्वरूपोपेक्षात्वाव-च्छिन्नभेदस्तत्संस्कारजनकत्वपर्य्यवसितः तत्स्मृतिजनकतावच्छेदको वाच्य इत्याशङ्कां निरस्यति, 'नापीति, 'तज्जनकतावच्छेदकेति, संस्कारं प्रति उपेक्षासाधारणरूपेण निश्चयत्वमात्रेण हेतुत्वे उपेक्षायाः संस्काराजनकत्वं दुर्घटम् इति संस्काराजनकत्वस्य तदैवोपेक्षात्वरूपता सम्भवति यद्युपेक्षाव्यावृत्तरूपेण संस्कारजन-कता स्यात्तादृशञ्च रूपमुपेक्षान्यनिश्चयत्वादन्यत् दुर्व्वचम् अतः संस्कारं प्रत्यपि उपेक्षान्यत्वेन हेतुता वाच्या तादृशोपेक्षात्वस्य संस्काराजनकत्वरूपत्वे आत्माश्रय. (२)। स्मृत्यजनकत्वरूपत्वे च संस्कारं प्रति स्मृतिजनकत्वेन स्मृतिं प्रति च संस्कारजनकत्वेन

---

(१) ज्ञानादौ संस्कारेऽवश्यमेव तत्पूर्वं वर्त्तते तद्विषयकजिज्ञासाविच्छेदात् तद्विषयकजिज्ञासानुत्तरत्वं सर्वत्रैवाक्षतम् स्वसमानाधिकरणेति।

(२) संस्काराजनकत्वाव[illegible] संस्कारजनकतावच्छेदकविरहेण संस्कार-जनकतावच्छेदकत्वे [illegible] [illegible] [illegible]-[illegible] भावः।

रितेनान्योन्याश्रयः (१) इति चेन्नाभिमतार्थः। नच संस्कारजनकतावच्छेदकत्वम् उपेक्षात्मकाभावत्वेऽपि उपेक्षाव्यक्तीनां तत्तद्व्यक्तित्वेन संस्कारप्रतिबन्धकतास्वीकारात् तासां संस्कारानुपधायकत्वनिर्वाहः। आधिक्योपेक्षाव्यक्तीनां तत्तद्विषयकसंस्कारत्वप्रतिबध्यतावच्छेदकमिति तासामप्यन्यविषयकसंस्कारोपधायकतया अन्यविषयस्मारकतोपपत्तिरित्यत आह, 'संस्कारेति।

यत्तु ननु तत्तद्व्यक्तित्वेनैवोपेक्षाव्यक्तीनां भेदाः संस्कारजनकतावच्छेदकाः। न चैवं भेदसमस्तस्य विशेष्य-विशेषणभावे विनिगमनाविरहः, एकैकभेद पृथक्पृथक्निवेश्य एकैककारणताभ्युपगमात् एकोपेक्षाज्ञानव्यक्तिदशायाम् अन्योपेक्षाव्यक्तिभिन्नज्ञानसत्त्वेऽपि तदुपेक्षाव्यक्तिभिन्नज्ञानरूपकारणविरहेण संस्कारादित्वादसम्भवात्। न चोपेक्षाद्वयसत्त्वे सकलकारणसत्त्वात् संस्कारोत्पत्तिः, तद्वारणाय तादृशव्यक्तिद्वयभेदस्य एकत्र निवेश्यतायां तयोर्भेदयोर्व्विशेष्य-विशेषणभावे विनिगमनाविरहात् कारणताद्वयमिष्टमेव, उपेक्षाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकतामतेऽपि तत्कालीनसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबन्धकतया गौरवात्, एवञ्च संस्कारानुपधायत्वरूपोपेक्षात्वावच्छिन्नभेदस्य स्मृतिजनकतावच्छेदकत्वे नान्योन्याश्रय इत्यत आह, 'संस्कारेतीत्यवतारणम्। तदसत्, तत्तदुपेक्षान्यत्वेन कारणतामतेऽपि तेन रूपेण

---

(१) स्मृतिजनकत्वावच्छिन्नसंस्कारजनकता संस्कारजनकत्वावच्छिन्नस्मृतिजनकतेति ज्ञा. सज्ञानापेक्षज्ञानापेक्षज्ञानकत्वरूपान्योन्याश्रयप्रसङ्ग इति भाव।

ज्ञानस्य संस्कारहेतुता तत्तदुपेक्षाकालीनसंयोगादिवत्तेर्वा तत्प्रतिबन्धकता कल्प्यते इत्यनुयोगस्याशक्यसमाधानत्वात्।

'संस्कारानुत्पत्त्यैव' इत्यस्य उपेक्षाज्ञानादित्यादिः, संस्काराजनकत्वस्य तदैवोपेक्षात्वरूपतासम्भवो यद्युपेक्षाधीः संस्कारं न जनयेत्, तथा सति संस्काररूपव्यापारविरहेणैव उपेक्षाया अस्मारकत्वसम्भवे उपेक्षात्वस्य संस्काराजनकत्वरूपस्य दुर्निर्वचत्वेऽपि तदवच्छिन्नान्यत्वस्य निष्प्रयोजनकतया स्मृतिजनकतावच्छेदकगर्भेऽनिवेशादित्यर्थः, तथाच विशिष्टस्मरणातिव्याप्तिर्दुर्वारैवेति भावः। न च तद्विषयकस्मृतौ तद्विषयकसंस्काररूपव्यापारेण यथा तद्विषयकज्ञानत्वावच्छिन्नस्य नान्यथासिद्धिः तथा उपेक्षान्यत्वसहिततद्रूपावच्छिन्नस्यापीति (१) तेन रूपेण स्मृतिहेतुता दुर्वारेति वाच्यम्। संस्कारासिद्धौ संस्काराजनकत्वरूपोपेक्षात्वावच्छिन्नभेदघटितधर्मपुरस्कारेण कारणताकल्पनासम्भवात् तादृश(२)धर्मावच्छिन्नकारणताया संस्काररूपव्यापारसिद्धौ अनुपजीव्यतया तद्रूपावच्छिन्नस्यान्यथासिद्धानुपजीव्यविरोधरूपबाधकानवकाशात्।

यत्तु नन्वेवमुपेक्षात्वस्याननुगतस्य निर्वचनासम्भवेऽपि उपेक्षाज्ञानात् स्मरणानुत्पत्त्या तत्तदुपेक्षान्यत्वविशिष्टत्वेनैवानन्त्या स्मृतिहेतुत्वमुपेयं तदाह न विशिष्टस्मृतावतिव्याप्तिरित्यत आह 'संस्कारानुत्पत्त्यैवेति', [illegible] उपेक्षाज्ञानात् संस्कारो [illegible] [illegible]

१ [illegible]।

२ [illegible]।

सांशयिके च संस्कारजनकतायाम् उपेक्षाभेदनिवेशस्यावश्यक-
स्मृतिजनकतायां न तन्निवेशः संस्काराभावेनैव उपेक्षितास्मरणो-
पपत्तेः । न च फलव्यापारौ प्रति कारणस्य एकरूपेण हेतु-
नियमपरित्यागे निश्चयत्वमपि संस्कारजनकतायामेव निवे-
तथाच कथमतिव्याप्तिरिति वाच्यम् । संस्कारजनकताया नि-
यत्वनिवेशे उपेक्षान्यत्वेन सह विशेष्य-विशेषणभावे विनिगमना-
विरहात् स्मृतिजनकतायामेव निश्चयत्वनिवेशौचित्यात् समान-
धर्मिगोचरसंस्कारस्यावश्यकतया निश्चयत्वेन विशिष्टसंस्कार-
हेतुत्वे संशयजन्यसंस्कारे विशिष्टविषयकत्वमात्रकल्पनम् उपेक्षा-
न्यत्वेन तद्धेतुत्वे(१) विशिष्टविषयकसंस्काररूपधर्मिकल्पनमिति
विनिगमनाविरहेण वैपरीत्यप्रसक्तिः (२) । वस्तुत उपेक्षाज्ञानात्
संस्कारप्रतिबन्धकत्वमेवोपेयते तथाच फल-व्यापारौ प्रति कारणस्य
एकरूपेण हेतुत्वनियमात् उभयत्रैव निश्चयत्वप्रवेशः । एतेना-
शिकोपेक्षाज्ञानादन्यविषयकसंस्कारस्य प्रामाणिकतया तद्भेदाः
स्मृतिजनकतायामेव निवेश्यन्ते न तु संस्कारजनकतायां तथा सति
सर्व्वांशे उपेक्षाभेदैः सह विशेष्य-विशेषणभावे विनिगमनाविरहेण
कारणताबाहुल्यप्रसङ्गादिति निश्चयत्वं संस्कारजनकतायामेव
निवेश्यं, स्मृतिजनकतायां तन्निवेशेऽपि आंशिकोपेक्षाभेदैः सह

(१) संस्काराहेतुत्वे च उपेक्षाज्ञानाद्विशिष्टविषयकसंस्काररूपधर्मिकल्पन-
गौरवात् न विनिगमनाविरहावकाश इति भाव ।

(२) स्मृतिजनकत्वं उपेक्षान्यत्वेन संस्कारहेतुत्वं निश्चयत्वेनेति वैपरीत्य-
म् ।

विशेष्य-विशेषणभावे विनिगमनाविरहतादवस्थ्यादित्यपास्तम्। तथाच स्मरणातिव्याप्तिः सुदृढैवेति व्याख्यानं, तदसत्, व्यापारासिद्धिदशाया कल्पनीयस्य तत्तदुपेक्षान्यत्वेन स्मृतिहेतुत्वस्य उत्तरकालकल्प्यव्यापारविरहेण कार्य्यातिप्रसङ्गवारणसम्भवेऽपि निराकरणासम्भवात् उक्तशङ्कया 'संस्कारानुत्पत्त्यैव' इत्यादिफक्किकावतारणासङ्गतेः।

ननु तद्विषयकस्मृतौ तद्विषयकज्ञानत्वेन न हेतुता अपितु तद्विषयकानुभवत्वेनैव अनुभवत्वस्यापि जातित्वेन ज्ञानत्वापेक्षयाऽगौरवात् स्मृत्युत्तरमपि पूर्व्वानुभवादेव स्मरणोपपत्तेः स्मृते. स्मृतिहेतुताया अप्रामाणिकत्वात् तथाच न ज्ञानत्वघटितधर्म्मावच्छिन्नकारणताघटितानुमितिलक्षणस्य विशिष्टस्मृतावतिव्याप्तिः। न चानुभवत्वापेक्षया अगुरुणा ज्ञानत्वेनापि स्मृतिहेतुताया विनिगमनाविरहेण दुर्व्वारतया तादृक्कारणतामादायातिव्याप्तिर्दुर्व्वारैवेति वाच्यम्। अगुरुव्याप्यधर्म्मपुरस्कारेण कारणत्वसम्भवे व्यापकधर्म्मस्यान्यथासिद्धिनिरूपकत्वात् इत्याशङ्कां निरस्यति, 'नाप्यनुभवत्वेनेति, 'संस्कारस्य फलनाश्यतया' स्वजन्यस्मृतिनाश्यतया, प्रथमस्मरणेनैव पूर्व्वानुभवजन्यसंस्कारनाशे, 'तदनुभूतस्य' स्मरणोत्तरमननुभूतस्य विषयस्यानुभवजन्यसंस्कारव्यापारानपेक्षत्वेन 'तत्कारणतया' स्मरणस्यानुपपत्तेरित्यर्थः। स्वजन्यफलस्य संस्कारनाशकत्वे स्मृतिसाधारणेन ज्ञानत्वेन स्मृतिहेतुत्वेऽपि घट-पटादिसमूहालम्बनादिविषयकानुभवेन जनितस्य तद्विषयकसंस्कारस्य पटादिविषयकस्मरणेनापि विनाशस्वीकारे घटादि-

स्मरणानुपपत्तिः तद्विषयकसंस्काराभावात् । स्मृतिजन्यतदादि गोचरसंस्कारस्य च भिन्नविषयकतया पटादिस्मारकत्वायोगादिति शङ्कां निरस्यति, 'समानेति, समानाकारस्य अनूनाकारस्य, अतः प्रत्येकगोचरनानासंस्कारजनितसमूहालम्बनस्मरं स्वजनकसकलसंस्कारनाशहेतुतानिर्व्वाहः । अथाव ... यदि स्वजन्यस्वान्यूनविषयकस्मृतित्वेन तदा स्वपदस्य तत्तत्संस्कारव्यक्तिपरताया आवश्यकत्वात् तत्तद्व्यक्तिभेदेन कारणताबाहुल्यतदुपगमे तत्तद्व्यक्तित्वेनैव नाशकताया युक्तत्वात् (१)। यदि च प्रतियोगितासम्बन्धेन संस्कारनाशं प्रति जनकत्वानतिरिक्तविषयकत्वोभयसम्बन्धेन स्मृतित्वेन हेतुता जनकत्वनिवेशात् स्वजन्यसंस्कारस्य स्मृत्या न विनाशः। जनकत्वस्थले तद्घटकपूर्व्ववर्त्तित्वमेव वा निवेश्य नियमानन्यथासिद्धत्वप्रवेशवैफल्यात्। न च व्यधिकरणस्मृतेरपि नाशकतापत्तिः, व्यधिकरणस्मृतिं प्रत्यपि संस्कारस्य स्वरूपयोग्यतया सामानाधिकरण्यनिवेशस्योभयमते (२) आवश्यकत्वात्। वस्तुतः सामानाधिकरण्यसहितमनतिरिक्तविषयकत्वमेव सम्बन्धः न तु जनकत्वस्य पूर्व्वकालीनत्वस्य वा निवेशः। ज्ञानादीनां क्षणिकतावारणाय प्रतियोगितासम्बन्धेन नाशं प्रति पूर्व्वत्वसम्बन्धेन नाशस्य सामान्यकारणताया आवश्यकत्वात् तत एव स्वजनकस्मरणेन

(१) तथा चानुभवत्वेन स्मृतिजनकत्वेऽपि न स्मरणोत्तरस्मरणानुपपत्ति तद्व्यक्तित्वेन नाशकत्वानभ्युपगमादिति भाव॰।

(२) जनकत्वस्य सम्बन्धघटकत्वमते एतन्मते चेत्यर्थः।

संस्कारस्य स्वोत्पत्तिद्वितीयक्षणे नाशापत्त्यनवकाशात् तदानीञ्च स्मृतेर्विनाशेन ततस्तदुत्तरक्षणमपि (१) तन्नाशापत्त्यसम्भवात् । अनतिरिक्तविषयकत्वञ्च स्वावृत्तिविषयिताशून्यत्वं न तु स्वाविषया-विषयकत्वं, प्रमेयत्वादिना सकलप्रमेयविषयकस्मरणस्याविषया-प्रसिद्धेः संस्कारनाशकतानुपपत्तेः भावत्वादिना सकलभावादि-विषयकस्मरणाद्घट इत्यादिज्ञानजन्यसंस्कारनाशापत्तेश्च इत्युच्यते, तदापि सम्बन्धमध्ये तत्तत्स्मरणव्यक्तिरूपस्वपदार्थमनन्तर्भाव्य अन-तिरिक्तविषयकत्वस्यावृत्तिविषयिताद्यप्रसिद्ध्या दुर्व्वचत्वेन तत्त-द्व्यक्तिविश्राम आवश्यकः । स्वनिष्ठभेदप्रतियोगितावच्छेदकविष-यिताशून्यत्वरूपानतिरिक्तविषयकत्वेऽपि भेदे तत्तत्स्मृतिव्यक्ति-निष्ठत्वविशेषणमावश्यकम् अन्यथा अवच्छेदकत्वान्तस्य विषयि-तायामव्यावर्त्तकतापत्तेरिति चेत्, सत्य, तत्प्रकारक-तद्विशेष्य-कसंस्कारनाशं प्रति तत्प्रकारक-तद्विशेष्यकस्मृतित्वेन कारणता कार्य्यस्य सम्बन्धः प्रतियोगिता कारणस्य पूर्व्ववर्त्तित्वसहितं तदसहितं वा सामानाधिकरण्यं तत्तद्विषयकसंस्कारभेदोऽपि प्रतियोगिप्रत्यासत्तौ हेतुरतो घटत्वप्रकारक-घटविशेष्यकसमूहा-लम्बनानात्मकस्मृत्या यथा समूहालम्बनात्मकस्तत्प्रकारक-तद्वि-शेष्यकसंस्कारो नाश्यते तथा समूहालम्बनात्मकोऽपि तादृश-संस्कारो नाश्यताम्, अन्यविषयकस्मृतिविरहस्य तद्विषयकस्मृति-घटितनाशधीविरहाप्रयोजकत्वादिति दूषणस्य नावकाशः । समू-हालम्बनात्मकतद्विषयकसंस्कारनाशप्रयोजकतामध्ये अन्य-

(१) स्मृतेर्[illegible] ।

विषयकसंस्कारभेदस्य प्रकारणकूटघटितत्वात् समूहालम्बनसंस्कारनाशकसामग्र्याः अन्यविषयकस्मृतिघटितत्वात्, समूहालम्बनसंस्कारे च तादृश्याः कस्या अपि सामग्र्या उक्तस्थलेऽसत्त्वात् न चैवमपि गोत्वाभाववान् गोत्वाभाव इत्यादिज्ञानजन्यसंस्कारे गोत्वाभाव इत्याकारकस्मरणादिनाशापत्तिः, तादृशसंस्कारे तादृशस्मृतिसहकारिणा यावत्तदविषयविषयकसंस्कारभेदाना मन्यतद्विषयकगोत्वादिविषयकसंस्कारभेदस्य च तदसहकारित्वात् गोत्वाभावादिनिष्ठतत्सम्बन्धस्यापि तत्स्वरूपतया (१) तादृशस्मृतिनाश्यसंस्कारविषयत्वेन (२) तद्विषयकसंस्कारभेदस्यापि तादृशसहकारित्वासम्भवादिति (३) वाच्यम्। तत्तत्प्रकारकान्यसंस्कारनाशे तत्तत्प्रकारकसंस्कारभेदत्वेन हेतुताया उपगम्यतया गोत्वाभाव इत्यादिस्मृतिनाश्यसंस्कारसाधारणस्य गोत्वाभावादिप्रकारकसंस्कारभेदस्य तादृशस्मृतिसहकारितया (४) गोत्वाभाववान् गोत्वाभाव इत्यादिधीजन्यसंस्कारे तादृशभेदासत्त्वेन उक्तापत्त्यसम्भवात् द्रव्यत्वादिना घट-पटादिविशेष्यकसंस्कारस्य तेन रूपेण घटादिमात्रविशेष्यकस्मृतितो विनाशवारणाय तत्तद्विशेष्यकसंस्कारनाशे तत्तद्विशेष्यकसंस्कारभेदस्य हेतुत्वमपि वाच्यम् एव समानप्रकारकसमानविशेष्यकनानासम्बन्धावगाहिसंस्कारस्य एकमात्रसंसर्ग

(१) गोत्वाभावस्वरूपतयेत्यर्थः।

(२) गोत्वप्रकारक-गोत्वाभावविशेष्यकसंस्कारविषयत्वेन।

(३) तस्य सहकारित्वे तादृशभेदघटितसामग्र्यास्तादृशसंस्कारेऽभावात् तादृशस्मरणनाश्यत्वानुपपत्तेरिति भावः।

(४) गोत्वाभाव इति स्मृतिसहकारित्वेत्यर्थः।

स्मृतितो विनाशवारणाय तत्तत्संसर्गकसंस्कारनाशे तत्तत्संसर्गक-संस्कारभेदस्यापि हेतुता बोध्या। वस्तुतस्तादृशधर्म्मिविशेष्यता-निरूपिततत्संसर्गावच्छिन्न-तादृशधर्म्मप्रकारताकान्यसंस्कारनाशे त्वाविधतादृशधर्म्मप्रकारताकसंस्कारभेदो हेतुरित्येवोपगन्तव्यं अन्यथा द्रव्यत्व-पृथिवीत्वोभयरूपेण घटं पटञ्चावगाहमानस्य संस्कारस्य द्रव्यत्वमात्रेण च घटं पृथिवीत्वमात्रेण च पटमवगाहमानात् स्मरणाद्विनाशापत्तेः तत्र द्रव्यत्वमात्रेण घटं पृथिवीत्वमात्रेण पट-मवगाहमानस्य संस्कारस्य यादृशसामग्रीतो नाशस्तादृशसामग्र्या-स्तदाजनकत्वात् तादृशसंस्कारस्यापि (१) द्रव्यत्व-पृथिवीत्वोभयप्रका-रकतया घट-पटोभयविशेष्यकतया च तन्नाशकसामग्र्यां तत्तत्प्र-कारकभेद-तत्तद्विशेष्यकसंस्कारभेदाप्रवेशात् तन्नाशकसामग्रीघट-कद्रव्यत्व-पृथिवीत्वेतरधर्म्मप्रकारकसंस्कारभेद-घट-पटभिन्नविशेष्य-कभेदानां तादृशसमूहालम्बनसंस्कारेऽपि सत्त्वात्। संस्कारनाशं प्रति तादात्म्यसम्बन्धेन संस्कारत्वेनाप्येव हेतुता कल्पनीया अतः संस्कारनाशप्रयोजकसामग्र्या नाशोत्पादिसाधारण्यम् (२)।

केचित्तु समूहालम्बनजन्यघट-पटादिसंस्कारा भिन्नभिन्ना एव संस्कारध्वंसत्वे फलनिरस्यात् तथाच स्वहेतुविषयतासम्बन्धेन स्मृतिनिष्ठनाश्यतावच्छेदकप्रत्यासत्तिघटकत्वोपगमात् घटादि-स्मृत्या पटादिसंस्कारस्य न विनाशः तस्य तत्स्मृतिहेतुघटादि-

विषयावत्त्वाभावादित्युत्तरकालं पटादिस्मरणनिर्व्वाहः। एवं
वद्भूतलमित्यादिविशिष्टज्ञानाद्घट इत्यादिस्मृतिनिष्ठप्रत्येकपदार्थ
विषयताशून्या एव विशिष्टगोचरसंस्कारा उपगम्यन्ते ते इ
तादृशस्मृतितो विनश्यन्ति तत्र त दृ ति ष्ठवि षयतावत्त्वा
हात् अत उत्तरकालं विशिष्टस्मृतिनिर्व्वाहः। घट इत्यादिस्मृ
घटादिविषयकसंस्कारत्वावच्छिन्नविशिष्टसंस्कारफलतया तद्ग्रा
त्तंनाय फलस्य समानाकारकताकथनसङ्गतिरित्याहुः।

स्मृतिवृत्तित्वाभावविशिष्टविषयताविरहः संस्कारप्रत्यक्ष
स्तन्नाशकः एकैकगोचरस्मृतिदशायां संस्कारनिष्ठविषयान्तरविष
तायां स्मृतिवृत्तित्वाभावसत्त्वेन तया प्रतिवन्धान्न समूहा-
संस्कारनाश इत्यपरे।

नन्वनुगतरूपेण स्मृतेः संस्कारनाशकत्वं निर्युक्तिकं भव
चरमस्मृतिजन्यस्येव ममाप्यनुभवजन्यसंस्कारनाशस्यापि अननु
नापि कालादिना नाशसम्भवात्। न च यत्र यत्र विषये चरम
स्मृतिव्यक्तय उपेक्षारूपास्तत्रानुभवजन्यसंस्कारस्यानुगतात् अन
रूपनाशकान्नाशोपगम एव युक्तस्तत्र चरमस्मृतिजन्यसंस्कारस्य
प्रसिद्ध्या अननुगतकालादेर्नाशकताया अनावश्यकत्वादिति वाच्यं
ज्ञानत्वेन स्मृति-संस्कारहेतुतामते चरमस्मृतिविशेषाणां संस्कार
जनकत्वनिर्व्वाहाय तत्तद्व्यक्तित्वेन तासां ... प्रतिवन्धकता
कल्पनीयतया अनुभवत्वेन स्मृति-संस्कारहेतुत्ववादिन उक्तस्थले
भवजन्यसंस्कारनाशेऽननुगतानां हेतुत्वोपगमेऽपि ... नाशकता
चरमस्मृतिव्यक्तीनामपि तत्तद्व्यक्तित्वेन ... नाशकता

संस्कारस्य फलनाश्यताप्रवादसङ्गतिः इत्यनुभवत्वेन स्मृतिसंस्कार-हेतुतायां नोक्तबाधकावकाश इत्यत आह, 'जायते चेति, अनुभव-जन्यसंस्कारापेक्षया स्मरणात् दृढः तदुत्तरस्मरणादितश्च दृढतर-दृढतमाः संस्कारा जायन्ते इत्यवश्यमेव स्वीकार्य्यम्, दार्ढ्यञ्च उत्कर्षरूपो जातिप्रभेदो झटितिस्मृत्युत्पादप्रयोजकः। न च विवशसम्बन्धझटित्युद्बोधकसमवधानादेव स्मृतिनियमोपपत्तौ न प्रयोजकतया संस्कारगतजातिविशेषः सिद्ध्यतीति वाच्यम्। तादृशसम्बन्धिविशेषज्ञानसत्त्वे पुनः पुनः स्मरणोत्तरं नियमतः स्मृतिर्न त्वनुभवमात्रोत्तरं तादृशोद्बोधकघटितसामग्र्या अनुगमाय संस्कारगतजातिविशेषस्यावश्यकत्वात् झटिति स्मृतेर्दार्ढ्याधीनत्वमुप-गम्य संस्कारातिशयखण्डने शास्त्रादावभ्यासोऽपि नोपयुज्येतेति मानुभवत्वेन संस्कारहेतुतासम्भवः इत्याशयः। इदन्तु बोध्यं दृढ-दृढतरादिसंस्कारं प्रति समानविषयकस्मृतित्व-तादृशस्मरणो-त्तरस्मरणत्वादिना न हेतुता पुनःपुनरनुभवादपि संस्कारदार्ढ्य-दर्शनात्। नापि समानविषयकज्ञानोत्तरज्ञानत्वादिना उपेक्षो-त्तरोत्पन्नोपेक्षातो दृढसंस्कारानुदयात् रोगादिना ज्ञातार्थगोचर-संस्कारनाशोत्तरजातज्ञानात्तदनुदयाच्च। किन्तु समानविषयकसं-स्कारत्वेन दृढसंस्कारं प्रति, दृढ-दृढतरतादृशसंस्कारत्वेन च दृढतर-दृढतमसंस्कारं प्रति जनकता, अतएव भावनायाः पटुतरभावना-जनकत्वप्रवादः। भावनया भावनान्तरजनने च तत्पोषकज्ञानं सहकारि तस्य च संस्कारत्वावच्छिन्नं प्रत्येव ... दृढ-दृढतरसंस्कारैरेव हेतुता। न चैवं ...

स्वजनकज्ञानसहकारिणापि संस्कारः पटुतरसंस्कारं जनयति वाच्यम्। स्वजन्यसंस्कारानुपहितज्ञानत्वेनैव स[illegible]हेतुत्वोप[illegible] अन्यथा सर्व्वत्र विनश्यदवस्थज्ञानात् पटुतरसंस्कारान्तरस्य [illegible] त्वात् अनन्ताप्रामाणिकसंस्कारकल्पनागौरवेण [illegible]पत्ते-दिति।

अनुमानदीधितिः।

परित्यज्य च निश्चिताव्यभिचारकं रूपं [illegible] व्यभिचारकेण कारणत्वकल्पनानुदयात् [illegible] सामान्यस्य च हेतुतावच्छेदकत्वे वीजम् [illegible] तात्पर्य्यटीकायां प्रथमसूत्रेऽवयवविवेचनप्रस्तावे [illegible] स्मृतीनां स्वकार्य्यसंस्कारविरोधिनीनामसह [illegible] चेन्न, चरमज्ञानपदस्यानुभ[illegible] वा विवक्षितत्वादित्यपि कश्चित्। किञ्च व्याप्यविशि[illegible] कात्पक्षविशिष्यकाञ्च परामर्शादनुमितिदर्शनाच्च [illegible] भयवैशिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वं लक्षणघट[illegible] मपि तदेव।

गादाधरी विवृतिः।

ज्ञानत्वेन स्मृति-संस्कारहेतुत्वे युक्त्यन्तरमप्याह, परि[illegible] चेति, निश्चितः कार्य्यतावच्छेदकावच्छेदेनाव्यभिचारो [illegible] स्य तन्निश्चिताव्यभिचारकं, गृह्यमाणः कार्य्ये संशय [illegible]

निर्धर्मिकतौ तद्व्यवच्छिन्नस्य व्यभिचारकत्वग्रहकालावच्छेदेन व्यभिचारे, तदा च ज्ञानत्वावच्छिन्नस्य स्मृति संस्कारयोः व्यभिचारकत्वात् स्मृतेः कालान्तरोत्पन्नस्य सन्निकृष्टत्वात् अनुभवत्वावच्छिन्नस्य तत्र व्यभिचार सन्दिग्ध इति न तेन रूपेण कारणताग्रहः सम्भवतीति भावः। यद्यपि व्यभिचारकत्वस्य ग्राह्यधर्मतया कल्पनात्मक-कारणतापत्ते न विशेषत्वसम्भवः धर्मांशस्य परोक्षज्ञाना-विरोधितायाः सर्वसम्मतत्वात्, तथापि कारणताया सामान्य-विशेषरूपावच्छिन्नत्वयोः सत्वे सामान्यरूपस्य नियतपूर्ववर्त्ति-तावच्छेदकत्वं लघु विशेषरूपस्य तदात्मभिन्नतया कल्प्यमिति तस्य कारणतावच्छेदकत्वे कल्पनागौरवमिति गौरवप्रतिसन्धानेन प्रतिबन्धात् विशेषरूपे अवच्छेदकत्वग्रहो न सम्भवतीति बोध्यम्। 'इदमेव' निश्चिताव्यभिचारकत्वमेव, 'अन्यत्र' प्रवृत्त्यादिकार्य्ये, 'सामान्यस्य' इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकनिश्चय-त्वाद्यपेक्षया अधिकसंग्राहकस्य तदुभयवैशिष्ट्यावगाहिनिश्चयत्वादेः, संस्कारस्य स्मृतिजन्यत्वं नापसिद्धान्त इत्याविष्कर्त्तुं तत्र टीकाकार-संवादमाह, 'अभिहितञ्चेति, 'प्रथमसूत्रे' प्रमाण प्रमेयेत्यादिसूत्रे, 'अवयवविवेचनप्रस्ताव इति, तत्र पूर्व्वपूर्व्ववर्णस्मृतिसहित उत्तर-वर्णानुभव एव पदप्रत्यक्षहेतुरस्तु इत्याक्षेपे, समाधान 'स्वकार्य्येति, स्व स्मृतिः, तत्कार्य्यो यः संस्कारः स एव स्वानन्तरोत्पन्नविशेष-गुणविधया विरोधी नाशको यासा तासामित्यर्थः। एतञ्च तृतीय-क्षणानवस्थाननिर्व्वाहकं त्रिचतुरादिव्यक्तीनां एकक्षणानवस्थान-रूपासहभावप्रयोजकतया अभिहितम्। 'चरमज्ञानपदस्येति,

स्वजनकज्ञानसहकारिणापि संस्कारः पटुतरसंस्कारं ... वाच्यम्। स्वजन्यसंस्कारानुपहितज्ञानत्वेनैव ... । हेतुत्वे ... अन्यथा सर्व्वत्र विनश्यदवस्थज्ञानात् पटुतरसंस्कारान्तरस्य दुं... त्वात् अनन्ताप्रामाणिकसंस्कारकल्पनागौरवेण इष्टापत्तेरसं... दिति।

अनुमानदीधितिः।

परित्यज्य च निश्चिताव्यभिचारकं रूपं गृह्यमा... व्यभिचारकेण कारणत्वकल्पनानुदयात् इदमेव चा... सामान्यस्य च हेतुतावच्छेदकत्वे बीजम् ... तात्पर्य्यटीकायां प्रथमसूत्रेऽवयवविवेचनप्रस्तावे ... स्मृतीनां स्वकार्य्यसंस्कारविरोधि ...। ... चेन्न, चरमज्ञानपदस्यानुभ... त्व ... वा विवक्षितत्वादित्यपि कश्चित्। किञ्च ~ ... कात्पक्षविशिष्यकाच्च परामर्शादनुमितिदर्शनाच्च त... भयवैशिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वं ... मपि तदेव।

गादाधरी विवृतिः।

ज्ञानत्वेन स्मृति-संस्कारहेतुत्वे युक्त्यन्तरमप्याह, ... चेति, निश्चितः कार्य्यतावच्छेदकावच्छेदेनाव्यभिचारो यद्रू... ... यस्य तन्निश्चिताव्यभिचारकं, गृह्यमाणः कार्य्ये सं... ...

विषयीभूतौ यद्रूपावच्छिन्नस्य व्यभिचारस्तादृग्रूपमात्रव्यभिचारकं, तथाच ज्ञानत्वावच्छिन्नस्य स्मृति-संस्कारयोर्न व्यभिचारग्रहोऽपि स्मृतेः संस्कारादिजनकत्वस्य सन्दिग्धत्वात् अनुभवत्वावच्छिन्नस्य तत्र व्यभिचारः सन्दिग्ध इति न तेन रूपेण कारणताग्रहः सम्भवतीति भावः । यद्यपि व्यभिचारसंशयस्य ग्राह्यसंशयतया कल्पनात्मक-कारणताग्रहे न विरोधित्वसम्भवः ग्राह्यसंशयस्य परोक्षज्ञाना-विरोधितायाः सर्व्वसम्मतत्वात्, तथापि कारणतायां सामान्य-विशेषरूपावच्छिन्नत्वयोः संशये सामान्यरूपस्य नियतपूर्व्ववर्त्ति-तावच्छेदकत्वं क्लृप्तं विशेषरूपस्य तथात्वमसिद्धतया कल्प्यमिति तस्य कारणतावच्छेदकत्वे कल्पनागौरवमिति गौरवप्रतिसन्धानेन प्रतिबन्धात् विशेषरूपे अवच्छेदकत्वग्रहो न सम्भवतीति बोध्यम् । 'इदमेव' निश्चिताव्यभिचारकत्वमेव, 'अन्यत्र' प्रवृत्त्यादिकार्य्ये, 'सामान्यस्य' इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकनिश्चय-त्वाद्यपेक्षया अधिकसंग्राहकस्य तदुभयवैशिष्ट्यावगाहिनिश्चयत्वादेः, संस्कारस्य स्मृतिजन्यत्वं नापसिद्धान्त इत्याविष्कर्त्तुं तत्र टीकाकार-संवादमाह, 'अभिहितञ्चेति, 'प्रथमसूत्रे' प्रमाण प्रमेयेत्यादिसूत्रे, 'अवयवविवेचनप्रस्ताव इति, तत्र पूर्व्वपूर्व्ववर्णस्मृतिसहित उत्तर-वर्णानुभव एव पदप्रत्यक्षहेतुरस्तु इत्याक्षेपे, समाधान 'स्वकार्य्येति, स्वं स्मृतिः, तत्कार्य्यो यः संस्कारः स एव स्वानन्तरोत्पन्नविशेष-गुणविधया विरोधी नाशको यासां तासामित्यर्थः। एतच्च तृतीय-क्षणानवस्थाननिर्व्वाहकं त्रिचतुरादिव्यक्तीनां एकक्षणानवस्थान-रूपासहभावप्रयोजकतया अभिहितम् । 'चरमज्ञानपदस्येति,

'अनुभवपरत्वात्' अनुभवत्वावच्छिन्नरूपविशेषार्थकत्वात्, तथाच ताद्दशनिश्चयत्वावच्छिन्नजन्यानुभवत्व लक्षणं तस्य चानुभवत्व शून्यायां स्मृतावतिव्याप्तिर्न शङ्कास्पदमपीति भावः। अन्यच समाधानान्तरमुपन्यस्यति, 'साक्षादिति, साक्षात्तज्जन्यत्वं तज्जन्या जन्यत्वे तज्जन्यतावच्छेदकावच्छिन्नाजन्यत्वे वा सति तज्जन्यत्वं परा मर्शजन्यतावच्छेदकविशिष्टगोचरसंस्कारत्वावच्छिन्नजन्यायां स्मृतौ नास्तीति भावः। अत्र गौरवमस्वरसबीजम्। विशिष्टवैशिष्ट्यबोध-हेतुताया ज्ञानत्वनिवेशव्यवस्थापनायाः शक्यत्वे तत्रातिव्याप्तिर्यथा वारणीया विशिष्टस्मरणेऽपि तेनैव प्रकारेण तद्वारणं सम्भवतीति चरमज्ञानपस्यानुभवपरत्वमपि नावलम्बनीयमित्याशयवानाह, 'व्याप्येति, 'व्याप्यविशेष्यकात्' आधेयतासम्बन्धेन व्याप्यरूप विशेष्ये पक्षप्रकारकात् पर्व्वते वह्निव्याप्य इत्याकारकात्, 'पक्ष विशेष्यकात्' अधिकरणतासम्बन्धेन पक्षरूपविशेष्ये व्याप्यप्रकार कात् वह्निव्याप्यवान् पर्व्वत इत्याकारकात्, 'परामर्शात्' 'अनु मितिदर्शनात्' अविलक्षणायाः पर्व्वतो वह्निमानित्यनुमितेरनु भवात्, 'तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन' उभयानुगमकेन व्याप्य पक्षोभयनिरूपितवैशिष्ट्यविषयताशालिनिश्चयत्वेन, 'तत्र हेतुत्वं' अनुमितिं प्रति कारणत्व, न तु विशिष्टवैशिष्ट्यबोध-विशिष्ट स्मरणजनकतावच्छेदकेन व्याप्यप्रकारक-पक्षविशेष्यकनिश्चयत्वा दिना, अन्यतरासंग्रहादित्यर्थः (१)। ननु वैशिष्ट्यमत्र व्याप्यता-

---

१. [illegible] इत्यादिदूषणानामग्रे स्फुटत्वादित्यर्थः।

इति दूषणमपास्तं [illegible] [illegible] [illegible] [illegible] संयोगावच्छिन्नाधेयतानिरूपितैव [illegible] न व्याप्तिग्रहः, तत एव [illegible] [illegible] [illegible] धूम-इत्यादिज्ञानस्य [illegible] संयोगावच्छिन्नाधेयत्वस्य [illegible] सत्त्वात् । न च पर्वते धूम इत्यादावपि व्याप्यतावच्छे[illegible] संयोगादेः संसर्गो न त्वाधाराधेयभाव इति वाच्यम् । पर्वतादिप्रति-योगिकसंयोगादेर्धूमादिरूपविशेष्यानुयोगिकत्वविरहेण तादृश-प्रत्ययस्य भ्रमत्वापातात् । आधाराधेयभावानवगाहने तत्सम्बन्धिता-नुपपत्तेश्च । न च संयोगाद्यवच्छिन्नाधेयत्वमेव तत्र संसर्गः, तत्-संसर्गकत्वेऽपि तदन्तर्गतसंयोगादिसंसर्गकत्वमक्षतमिति वाच्यम् । विशिष्टसंसर्गकत्वेऽपि विशेषणीभूतसंयोगादेः संसर्गतावच्छेदकतया तद्विषयताया, प्रकार-विशेष्योभयनिरूपितत्वाभावात् अन्यथा (३) संयोगाद्यवच्छिन्नाधेयतासम्बन्धेन व्याप्यप्रकारकात् व्याप्यं पर्व्वत-इतिज्ञानात् संयोगाद्यवच्छिन्नाधारतासम्बन्धेन पक्षप्रकारकात् पर्व्वतवान् धूम इत्यादिज्ञानाच्चानुमितिप्रसङ्गात् । एतेनाधारा-धेयत्वयोरनुगतवित्तिवेद्यतया संयोगाद्यवच्छिन्नाधारत्वावगाहित्वेन तादृशाधेयत्वावगाहित्वेन वा व्याप्य-पक्षविशेष्यकपरामर्शयोरनुगम-इत्यपि निरस्तम् । व्याप्यं पर्व्वत इत्यादि धियो दुर्व्वारत्वात् ।

(१) कालिकसम्बन्धेन व्याप्यवत्तापरामर्शात् वह्निमत्तापत्तिरूपातिप्रसङ्गा-दिरर्थः ।

(२) तादृशसम्बन्धरूपवैशिष्ट्यस्य विवक्षणीयत्वे च ।

(३) संसर्गविधेयविशेषणीभूतसंयोगादिविषयताया अपि प्रकार-विशेष्योभयनिरू-पितत्वस्वीकारे इत्यर्थः ।

व्याप्यनिरूपिताधारत्वावगाहित्वेन पक्षनिरूपिताधेयत्वावगाहि-
त्वेन वा अनुगमस्यान्यनिरूपिताधारत्वादिसम्बन्धावगाहिभ्रमा-
संग्रहेणासम्भवात्। अथ पर्व्वते धूम इत्यादिसमम्युल्लेखिप्रतीतौ
संयोगावच्छिन्नाधेयत्वमेव धूमे पर्व्वतस्य संसर्गतया भासतां सा च
पर्व्वत-धूमयोः संयोगानवगाहितया अनुमितावहेतुरेव उक्तरूपेणा-
नुगमस्तु संयोगसम्बन्धेनैव व्याप्यांशे यः पक्षप्रकारकः यश्च पक्षांशे
व्याप्यप्रकारकस्तयोरेव परामर्शयोः स्वीकरणीयः प्रथमज्ञानस्य
उक्तयुक्त्या भ्रमत्वेऽपि तस्यानुमितिहेतुतायास्तेनामत्याख्येयत्वात्
इति चेन्न, व्याप्यतावच्छेदकसंयोगेन व्याप्यस्य पक्षवत्ताया: तत्र
साध्याभावेऽप्युपपद्यमानतया व्याप्यांशे तेन सम्बन्धेन तद्वत्ताज्ञानस्य
तत्र पक्षे साध्यानुमितिहेतुताया अनुभवविरुद्धत्वात्, अन्यथा
समवायादिना द्रव्यत्वादिव्याप्ये गुणादौ तेन सम्बन्धेन सत्तादि-
प्रकारकप्रमात्मकज्ञानात् सत्तादौ बाधानवतारदशायां द्रव्यत्वादि-
सिद्धिप्रसङ्गः (१)। अत्राहुः। आधारत्वाधेयत्वयोस्तुल्यवित्तिवेद्यता-
मते पर्व्वते धूम इत्यत्राधारतानिरूपिताधेयता धूमवान् पर्व्वत
इत्यत्र च आधेयतानिरूपिताधारता सम्बन्धः न तु तुल्यमुभयोः
संसर्गतया भानं प्रत्येकमुभयोरुभयप्रकारतापत्तेः, एवञ्च उभयत्रैवा-
धारत्वविषयता पर्व्वतविषयतया आधेयत्वविषयता च धूमविषय-
तया निरूपिता, तथाच पक्षविषयतानिरूपिता या आधारत्वविष-
विषयता तन्निरूपितनिरूपितत्वविषयतानिरूपिताधेयत्वविषय-

(१) [illegible]

निरूपितव्याप्यविषयताशालित्वेन द्वयोरनुगमः। व्याप्ये पर्वतः पर्वतवान् धूम इत्यत्र च पक्षविषयतानिरूपिताधेयत्वविषयता व्याप्यविषयता चाधारत्वविषयतानिरूपितेति वैपरीत्यान्नोक्तानुगमकरूपस्यैतत्साधारण्यमिति नातिप्रसङ्गः। न चाधारत्वाद्यवगाहित्वस्य कारणतावच्छेदकत्वे तदनवगाहिनो व्याप्यताघटकगुहसंयोगादिना पक्षे हेतुसत्ताज्ञानादनुमित्यनुदयप्रसङ्ग इति वाच्यम्। प्राचां मते आधाराधेयभावगर्भस्य हेतुसामानाधिकरण्यस्य व्याप्तिघटकतया हेतुनिरूपिताधारतावगाहिधिय एवानुमितिजनकत्वात्। यदि च संयोगादिरेव संसर्गतया व्याप्तिप्रविष्टहेतुसामानाधिकरण्यघटको न त्वाधारत्वं तदा संयोगादेरेव हेतुतावच्छेदकसम्बन्धता तत्र तेन सम्बन्धेन व्याप्यप्रकारकज्ञानमेवानुमितिजनकम् न तु संयोगाद्यवच्छिन्नाधेयतासम्बन्धेन पक्षप्रकारकं व्याप्यविशेष्यकज्ञानं, हेतु-पक्षयोः सम्बन्धविधया व्याप्यतावच्छेदकसम्बन्धानवगाहनात्, तस्याधिकविषयत्वेन गौरवस्य पक्षविशेष्यकपरामर्शहेतुतायां विनिगमकत्वात्, परन्तु यत्र तादात्म्यसम्बन्धेन हेतुता तत्रैव व्याप्य-पक्षविशेष्यकपरामर्शयोर्व्याप्य-पक्षोभयविषयतानिरूपिततादात्म्यसंसर्गताकज्ञानत्वेन हेतुता तत्र च न कश्चिदतिप्रसङ्गः, निष्कृष्टज्ञानाघटितानुमितिलक्षणस्य यावल्लक्ष्यकत्वेन तादृशकारणताघटितलक्षणस्यैव कर्त्तुमनावश्यकत्वात्। न च ज्ञानाघटितलक्षणे ज्ञानाद्यनुगतत्वस्याप्रवेशादस्य निर्वचनीयतया कृतौ समानाकारत्वेन कार्य-कारणभावस्य स्वीकारे विकल्पतादृशैव कृत्यादिप्रसङ्गवारणसम्भवादिति वाच्यम्। ज्ञानत्व-

समानाधिकरणानुभवत्वव्याप्यजातिघटितलक्षणापेक्षया कार्य्यतावच्छेदकजातिघटितलक्षणस्यादरणीयतया स्मृतो पक्षोभयविशेष्यकपरामर्शद्वयसाधारणरूपेण कारणत्वे ता- कारणताप्रतियोगिककार्य्यतावच्छेदकस्मृतित्वजातिमादाय तिव्याप्तेः प्रसक्तया तादृशलक्षणाभिप्रायेण अनुभवत्वव्याप्य- घटितलक्षणेऽपि स्मृतावनुगतरूपेणाहेतुत्वे अनुभवत्वान्यानुभवा- समवेतत्वरूपानुभवत्वव्याप्यत्वमुपेत्य ... तावच्छेदकत्वरूपस्य निवेशनं सम्भवतीत्यभिप्रायेण वा विशेषरूपेण हेतुत्वव्यवस्थापनसङ्गतेः लक्षणेऽपि तादृश्येव का- विशिष्टवैशिष्ट्यबोधादावतिव्याप्तिवारणाय निविश्येत्यवच्छेद- 'लक्षणघटकमपि तदेवेति, 'तदेव' उभयवैशिष्ट्यावगाहिनिश्चय- रूपानुगतधर्म्मावच्छिन्नकारणत्वमेव प्रकृतलक्षणघटकमुपेयमित्य- अन्यरूपावच्छिन्नहेतुताघटितस्य लक्षणस्यालक्ष्य एव सत्त्वादि- भाव. ।

अनुमानदीधितिः ।

ना. १ मे पाम्र न ९न्य निन्ध्यका.नरणा। ।वा अन्यथा नियमेन स्मृतेरुभयविशिष्यकत्वप्रसङ्गात् समा- प्रकारकत्वेनैव ज्ञान-स्मरणयोः कार्य्य-कारणभावाच्च ता- विशिष्यैव कार्य्य-कारणभावः न तूक्तरूपेण गौरवा- न्मानाभावाच्च इत्यपि केचित् । एवञ्च विशिष्टवैशिष्ट्य

बोधादौ क्वापि नातिप्रसङ्गशङ्कापि वह्न्याद्यनुमितौ वह्न्यादिव्यभिचारधीविरोधिधीविषयधर्म्मप्रकारकपक्षधर्म्मताज्ञानत्वेन हेतुतामते तु नितरां तथैव लक्षणे निवेशात्। अतएव व्याप्यवत्पक्षाद्यभावग्रहं प्रति व्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः व्याप्तिविषयकत्वेन वा जन्यं ज्ञानं विशेषणीयम्। एतेन स्मृतिं प्रति संस्कारद्वारा अनुभवं प्रति च साक्षाद्विशेषणधियो हेतुत्वस्य निर्व्विकल्पकात्मकस्य वा स्मरणस्यानुभवं प्रत्येव वा तस्या हेतुत्वस्य नियमतः हस्तिसाक्षात्कारपूर्व्वं विषयस्मृतेश्च कल्पनात् व्याप्यवत्पक्षवत्त्वादिज्ञानेऽतिव्याप्तिरित्यपि परास्तम्।

गादाधरी विवृतिः।

विशिष्टस्मृतिकारणता नोक्तानुगतरूपावच्छिन्ना अपि तु विशेषरूपावच्छिन्नेति न तत्रातिव्याप्तिरित्याह, 'एकतरेत्यादिना 'तत्र विशिष्यैव कार्य्य-कारणभाव' इत्यन्तेन, 'तत्र' स्मृतिस्थले, 'विशिष्यैव' व्याप्यप्रकारकपक्षविशेष्यकस्मृतित्व-तादृशानुभवत्वादिरूपविशेषधर्म्ममुपादायैव, 'कार्य्य-कारणभावः' कल्प्यत इति शेषः। तत्र हेतुमाह, 'समानप्रकारकत्वेनैव ज्ञान-स्मरणयोः कार्य्य-कारणभावादिति, तृतीयाया वैशिष्ट्यार्थकत्वात् 'समानप्रकारकत्वेनेत्यस्य समानप्रकारकयोरित्यर्थः। तथाचासमानप्रकारकज्ञानस्य

समानाभिलापानुभवत्वव्याप्यजातिघटितलक्षणाभिप्राये[illegible]
कार्य्यतावच्छेदकजातिघटितलक्षणस्यादरणीयतया स्मृतौ [illegible]
पक्षोभयविशेष्यकपरामर्शत्वसाधारणरूपेण कारणत्वे [illegible]
कारणताप्रतियोगिककार्य्यतावच्छेदकानुमितित्वजातिमादाय
तिव्याप्तेः समतया तादृशलक्षणाभिप्रायेण अनुभवत्वव्याप्य-
घटितलक्षणेऽपि स्मृतावनुगतरूपेणाहेतुत्वे अनुभवत्वव्याप्य[illegible]
समवेतत्वरूपानुभवत्वव्याप्यत्वमुपेक्ष्य तयोरनुभवनिष्ठभेदप्रतियोगि-
तावच्छेदकत्वरूपस्य निवेशेन सम्भवतीत्यभिप्रायेण वा [illegible]
विशेषरूपेण हेतुत्वव्यवस्थापनसङ्गतेः लक्षणेऽपि तादृश्यैव [illegible]
विशिष्टवैशिष्ट्यबोधादावतिव्याप्तिवारणाय निवेश्यत्वस्य
'लक्षणघटकमपि तदेवेति, 'तदेव' उभयवैशिष्ट्यावगाहित्व-
रूपानुगतधर्म्मावच्छिन्नकारणत्वमेव [illegible]
अन्यरूपावच्छिन्नहेतुताघटितस्य लक्षणस्यालक्ष्य एव सत्त्वा-
भाव. ।

अनुमानदीधितिः ।

[illegible] विशिष्यकास्स [illegible]
अन्यथा नियमेन स्मृतेरुभयविशेष्यकत्वप्रसङ्गात् समा-
प्रकारकत्वेनैव ज्ञान-स्मरणयोः कार्य्य-कारणभावाच्च [illegible]
विशिष्यैव कार्य्य-कारणभावः न तूक्तरूपेण गौर-
न्मानाभावाच्च इत्यपि केचित् । एवञ्च [illegible]

बोधादौ क्वापि नातिप्रसङ्गशङ्कापि वह्न्याद्यनुमितौ वह्न्यादिव्यभिचारधीविरोधिधीविषयधर्म्मप्रकारकपक्षधर्म्मताज्ञानत्वेन हेतुतामते तु नितरां तथैव लक्षणे निवेशात्। अतएव व्याप्यवत्पक्षाद्यभावग्रहं प्रति व्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः व्याप्तिविषयकत्वेन वा जन्यं ज्ञानं विशेषणीयम्। एतेन स्मृतिं प्रति संस्कारद्वारा अनुभवं प्रति च साक्षाद्विशेषणधियो हेतुत्वस्य निर्व्विकल्पकात्मकस्य वा स्मरणस्यानुभवं प्रत्येव वा तस्या हेतुत्वस्य नियमतः ज्ञातिसाक्षात्कारपूर्व्वं विषयस्मृतेश्च कल्पनात् व्याप्यवत्पक्षवत्त्वादिज्ञानेऽतिव्याप्तिरित्यपि परास्तम्।

गादाधरी विवृतिः।

विशिष्टस्मृतिकारणता [illegible]

[illegible]

व्याप्तिविरहेऽपि अभावबुद्धौ प्रतियोगितावच्छेदकप्रकारकप्रतियोगिविशेष्यकनिश्चयत्वेन हेतुता मिश्रेणावश्यं स्वीकरणीयेति वह्निव्याप्यवान् पक्षो नास्तीत्यभावग्रहे तन्मतेप्यतिव्याप्तिरस्तीति दर्शितरीत्यैव सा वारणीया इत्याह, 'अतएवेति, 'अतएव' उक्तानुगतरूपावच्छिन्नकारणताया लक्षणे प्रवेशादेव,'व्याप्यवत्पक्षाद्यभावग्रहं प्रतीति पक्षतावच्छेदकावच्छिन्नविशेषणतया व्याप्तिविशिष्टावच्छिन्ना या प्रतियोगिता तन्निरूपितानुयोगिताप्रकारकाभावलौकिकप्रत्यक्षं प्रतीत्यर्थः, 'व्याप्यवत्पक्षादिज्ञानत्वेन' व्याप्तिविशिष्टप्रकारकपक्षतावच्छेदकावच्छिन्नविशेष्यकनिश्चयत्वेनेत्यर्थः । दण्डी रक्तो नास्तीत्यभावग्रहस्य दण्डी रक्तो न वेति संशयादनुत्पत्तेरानुभविकतया विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकधीहेतुतावादिना तद्विशेषहेतुतायामिव मिश्रमते सधर्म्मितावच्छेदकप्रतियोगितावच्छेदकप्रकारकज्ञानहेतुतायां निश्चयत्वनिवेशस्यावश्यकत्वादिति भावः । 'न क्षतिः' नातिव्याप्तिः, व्याप्यपक्षविशेष्यकयोरन्वय-व्यतिरेकव्याप्तिप्रकारकयोः परामर्शयोरनुगमकरूपस्याभावप्रत्यक्षजनकतानवच्छेदकत्वादिति भावः । यदि चानुमिति-परामर्शयोः समानविशेष्यकत्वानुभवानुरोधात् विनिगमकान्तराद्वा (१) पक्षविशेष्यक एव परामर्शोऽनुमितिहेतुरुपेयते व्यतिरेकिणि च व्यतिरेकसहचारेण अन्वयव्याप्तिरेव गृह्यते इति मतं, व्यतिरेकव्याप्तेरनुमितिप्रयोजकत्वेऽपि मणि-

(१) आधेयत्वीयसांसर्गिकविषयताया कारणतावच्छेदककोटिनिवेशे गौरवं विनिगमकम् ।

स्मरणाद्धेतुत्वादित्यवधारणार्थः। एतावतानुगतरूपस्य ।

रितावृत्तित्वलाभः। असमानप्रकारकज्ञानस्य स्मृत्यका।

फलानुत्पादकत्वं हेतुमाह, 'एकतरेति व्य ।दिमात्राव

ज्ञानात् पक्षादिविशेष्यकस्मरणानुत्पत्तेरित्यर्थः, एतदेव

'अन्यथेति एकतरविशेष्यकज्ञानादपि अन्यतरविशेष्य स्मृ

पगमे, व्याप्यादिविशेष्यकस्मृतीनां विशेष्य त्वनियमा

रित्यर्थः।

केचित्तु 'नियमेनेत्यत्र अकारप्रश्लेषः, तथाच नि

नियामकाभावेन, 'स्मृतेः' स्मृतिमात्रस्य, 'उभयविशेष्य

दिति व्याचक्षते।

'विशिष्टवैशिष्ट्यबोधादाविति विशेषणतावच्छेदकप्रकारकवि

षणविशेष्यकनिश्चयत्वावच्छिन्नजन्यव्याप्यविशिष्टपक्षवैशिष्ट्यबोधा

वित्यर्थः, 'आदिना, विशिष्टस्मृतिपरिग्रहः। व्यति

व्यतिरेकव्याप्तेरेव गमकतापक्षे अन्वय-व्यतिरेकाव्य सिप्रकारता

व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वेनानुगमय्य का। यत

कत्वमते तादृशकारणताया एव लक्षणे निवेशात् नि

व्याप्त्यवगाहिज्ञानादन्यविधव्याप्तिविषयक-विशिष्टवैशिष्ट्यबोधा

नुदयात् तज्जनकतावच्छेदकागर्भे विशिष्यैव तत्तद्व्याप्तिविषयता

निवेशेन एकरूपेणानुमिति विशिष्ट... ।हेतुता

त्वत नातिव्याप्तिप्रसक्तिरित्याह, 'वह्न्याद्यनुमितावित्यादि

विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयहेतुतानभ्यु

पगन्तृमिश्रमते व्याप्यविशिष्टपक्षवैशिष्ट्यावगाहिप्रत्यक्षसामान्येऽपि

गमेन, विशिष्टस्मरणातिव्याप्तेरनुभवत्वनिवेशेनापि वारणसम्भवा-
दित्याशङ्का ज्ञानत्वेन विशिष्टवैशिष्ट्यबोधहेतुताया व्यभिचारमुद्धरन्
ज्ञास्यविषयकत्वनिवेशस्य तदतिव्याप्तिवारणप्रयोजनकत्वं दर्शयति,
'एतेनेत्यादिना. प्रथमतो विशिष्टवैशिष्ट्यस्मरणे व्यभिचारमुद्धरति,
'स्मृतिं प्रतीत्यादिना कल्पत्रयेण, 'संस्कारद्वारेति 'विशेषणधियो
हेतुत्वस्य कल्पनादित्यनेनान्वयः, तथाच न स्मृतौ ज्ञानत्वावच्छिन्नस्य
व्यभिचारः। विशेषणज्ञानजन्यसंस्कारोत्पत्तिक्षण एव विशिष्टानु-
भवस्योत्पत्त्या तत्र संस्कारद्वारा हेतुत्वासम्भवेऽपि न क्षतिः साक्षादेव
तत्र तथात्वादित्याह, 'अनुभवं प्रति चेति। न च साक्षाद्धेतुत्वे स्मृतौ
परम्परया हेतुत्वे चानुभवे व्यभिचारात् कथमयं कल्पः सम्भवदुक्तिक-
इति वाच्यम्। स्व-स्वव्यापारान्यतरत्वावच्छेदेन नियतपूर्ववर्त्तिताया-
एव कारणताघटकत्वात् प्रत्येकं व्यभिचारस्याकिञ्चित्करत्वात्।
ननु व्यापारघटिता यस्य कारणता तदीयव्यापारमात्रसत्त्वं
कार्य्योत्पत्तावपेक्षितं तथाच संस्कारादपि अनुभवसामग्रीसहकृता-
द्विशिष्टवैशिष्ट्यबोधापत्तिः, यदि च ज्ञानस्य स्वतःपूर्ववर्त्तिताया-
अपि कारणताघटकत्वात्तत्सत्त्वमप्यपेक्षितं तदा स्मरणेनापि
तदपेक्षितं अतो व्यापारघटितमेकं कारणत्वं अन्यच्च तदघटितं
वाच्यं तथा च दर्शितव्यभिचारो दुर्व्वार एव इत्यनुशयेन कल्पान्तर-
माह, 'निर्व्विकल्पकात्मकस्य वा स्मरणस्येति, विशिष्टस्मृतिपूर्व्व-
मित्यादिः, 'कल्पनादित्यनेनान्वयः।

केचित्तु विशेषणधिय इत्यग्रिमस्य विशेषणतावच्छेदकप्रका-
रकधिय इत्यर्थकतया विशेषणतावच्छेदकप्रकारकज्ञानस्यैव ज्ञान-

मन्त्रादिन्यायेन विरोधिताया अप्रामाणिकतया अनुगमासम्भ
पृथक् पृथगेव व्याप्तिज्ञानयोरनुमितिहेतुता व्यतिरेक
दर्शनीयरीत्या च (१) व्यभिचारवारणं, तदा नोक्तरीतिद्वयेन विशि
वैशिष्ट्यबोधाद्यतिव्याप्तिवारणसम्भवः, न वा पूर्वोक्तरीत्या
अनुद्बुद्धसंस्कारात् विशिष्टवैशिष्ट्यबोधवारणाय तद्धेतुतायां ज्ञान
प्रवेशस्यावश्यकत्वादित्यालोच्य तदतिव्याप्तिवारणाय विशेषणा
प्रवेशयति, 'व्याप्यविषयकत्वेन वेति, लिङ्गोपधानस्य मणिकृ
अनभ्युपगमात् तन्मतेऽसम्भवेपि न क्षतिः। उक्तविशिष्टवैशिष्ट्या
विशिष्टस्मरणादेर्व्याप्तिविषयकत्वनियमान्नातिव्याप्तिरिति भाव
ननु अनुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिवारणाय उद्
धकाभावविशिष्टसंस्काराद्यन्यत्वमेव विशेषणतावच्छेदकप्रकार
हेतुतायां निवेश्यं न तु ज्ञानत्वं पूर्वोपदर्शितव्यभिचारस्य दुर्वा
त्वात् (२) अनन्यगतिकतया जनकतावच्छेदकगौरवस्यादोषत्व
भेदस्याव्याप्यवृत्तितया उपगन्तव्यतया उद्बुद्धसंस्कारे उद्बोध
भावविशिष्टतद्भेदसत्त्वात् तादृशात् संस्कारात् विशिष्टवैशिष्ट्यज्ञा
निर्वाहः, संस्कारनिष्ठत्वविशेषितस्य उद्बोधकाभाववैशिष्ट्यस्या
न्ताभाव एव वा निवेश्यः स च उद्बोधकासमवहितज्ञानादि
साधारणोऽपि, तथाच ज्ञानत्वस्य विशिष्टवैशिष्ट्यधीजनकतायां
निवेशादेव तत्रातिव्याप्तिवारणसम्भवे किं व्याप्यविषयकत्वनि

(१) कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशरीत्या चेत्यर्थः।
(२) ज्ञानोपनीतभानस्थले व्याप्तिज्ञानादिरीत्या।
(३) इतिमाचाल्कारादौ व्यभिचारस्य दुर्वारत्वादित्यर्थः।

कथनेपि न न्यूनतेति ध्येयम् । अथातिप्रसङ्गवारणाय समान-प्रकारकत्वेनैव स्मृतिं प्रति संस्कार-ज्ञानयोर्हेतुत्वान्न निर्व्विकल्पक-स्मरणसम्भवः घटत्वादिविशिष्टतद्घटागोचरसंस्कारादिजन्यतायां निर्व्विकल्पकसाधारणस्य घटत्वादिभिन्नप्रकारतानिरूपितविशे-ष्यताभिन्न-तद्घटादिविषयताशालिघटत्वादिगोचरस्मृतित्वस्यावच्छेद-कत्वे च यत्र द्रव्यत्वेन तद्घटावगाहिनो घटत्वेन चैतद्घटावगाहिनः संस्काराद्घटत्व-तद्घटादिविषयकं निर्व्विकल्पकं (१) तत्र घटत्वविशिष्ट-तद्घटविषयकसंस्कारादेर्व्यभिचारः,(२) एवं निर्व्विकल्पकस्मरणोपगमे प्रमेयत्वादिसामान्यलक्षणाजन्यज्ञानाधीनविश्वविषयकनिर्व्विकल्पक-स्मरणात् स्वरूपतो निखिलजातिप्रकारकं ज्ञानं स्यात् । न च तादृशं ज्ञानमसर्व्वज्ञस्यानुभवसिद्धं, न च स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकसंस्कारादेर्हेतुतया तादृशकारणाभावात् सकल-जातिनिर्व्विकल्पकसत्त्वेऽपि न स्वरूपतः सकलजातिप्रकारक-स्मरणसम्भवः तादृशप्रत्यक्षादेरपि युगपत् सकलजातिसन्निकर्ष-विरहेण नापत्तिसम्भव इति वाच्यम् । ज्ञानरूपसन्निकर्षसत्त्वेन तादृशमानसस्य दुर्व्वारत्वात् तत्कथमिदानीमपि निर्व्विकल्पक-स्मरणमङ्गीकृतमिति चेन्न, अनुद्बुद्धसंस्कारान्यत्वापेक्षया लघुना ज्ञानत्वेन विशिष्टधीहेतुतासिद्धौ तन्निर्व्वाहकतया निर्व्विकल्पक-

(१) तादृशस्मृतेस्तद्घटावगाहित्वांशे द्रव्यत्वेन तद्घटावगाहीति घटत्वाव-गाहित्वांशे घटत्वेनैतद्घटावगाहीत्यर्थः [illegible] ।

(२) तादृशस्मृतेर्घटत्वप्रकारकत्वात्तद्विशेष्यकसंस्कारस्य कार्यतावच्छेदकमान-त्वात् तत्पूर्वं तत्प्रकारकानुभवस्य व्यभिचार इत्यर्थः ।

कथनेपि न न्यूनतेति ध्येयम्। अथातिप्रसङ्गवारणाय समान-प्रकारकत्वेनैव स्मृतिं प्रति संस्कार-ज्ञानयोर्हेतुत्वान्न निर्व्विकल्पक-स्मरणसम्भवः घटत्वादिविशिष्टतद्घटागोचरसंस्कारादिजन्यतायां निर्व्विकल्पकसाधारणस्य घटत्वादिभिन्नप्रकारतानिरूपितविशे-ष्यताभिन्न-तद्घटादिविषयताशालिघटत्वादिगोचरस्मृतित्वस्यावच्छेद-कत्वे च यत्र द्रव्यत्वेन तद्घटावगाहिनो घटत्वेन चैतद्घटावगाहिनः संस्काराद्घटत्व-तद्घटादिविषयकं निर्व्विकल्पकं (१) तत्र घटत्वविशिष्ट-तद्घटविषयकसंस्कारादेर्व्यभिचारः (२) एवं निर्व्विकल्पकस्मरणोपगमे प्रमेयत्वादिसामान्यलक्षणाजन्यज्ञानाधीनविश्वविषयकनिर्व्विकल्पक-स्मरणात् स्वरूपतो निखिलजातिप्रकारकं ज्ञानं स्यात्। न च तादृशं ज्ञानमसर्व्वज्ञस्यानुभवसिद्धं, न च स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकसंस्कारादेर्हेतुतया तादृशकारणाभावात् सकल-जातिनिर्व्विकल्पकसत्त्वेऽपि न स्वरूपतः सकलजातिप्रकारक-स्मरणसम्भवः तादृशप्रत्यक्षादेरपि युगपत् सकलजातिसन्निकर्ष-विरहेण नापत्तिसम्भव इति वाच्यम्। ज्ञानरूपसन्निकर्षसत्त्वेन तादृशमानसस्य दुर्व्वारत्वात् तत्कथमिदानीमपि निर्व्विकल्पक-स्मरणमङ्गीकृतमिति चेन्न, अनुद्बुद्धसंस्कारान्यत्वापेक्षया लघुना ज्ञानत्वेन विशिष्टधीहेतुतासिद्धौ तन्निर्व्वाहकतया निर्व्विकल्पक-

(१) [illegible]

(२) [illegible]

मावश्यकमेवेति वाच्यम्। ज्ञानविनाशेऽपि तद्व्यापारभूतया इच्छया विशिष्टविषयककृतिजननात्तत्र व्यभिचारेण विशिष्टविषयकत्व-मात्रस्य विशेषणधीजन्यतावच्छेदकत्वासम्भवात्। न चोपादान-प्रत्यक्षस्य साक्षात् कृतिं प्रति हेतुतया कृतौ न ज्ञानत्वावच्छिन्नस्य व्यभिचार इति वाच्यम्। उपादानप्रत्यक्षस्य फलविषयकत्वानियमात् सुखत्वादिविशिष्टफलविषयककृतौ सुखत्वादिधियो व्यभिचारस्य दुर्व्वारत्वात्। एवं निर्व्विकल्पकस्मरणोपगमेऽपि कृतिसाक्षात्कार-पूर्व्वं विशिष्टस्मृतिकल्पनया न तदुपपत्तिः कृतिद्वितीयक्षणोत्पन्न-निर्व्विकल्पकस्मरणेन विशिष्टविषयस्मृतिजननकाले कृतिनाशेन विशिष्टविषयोपधानेन कृतिसाक्षात्कारासम्भवादित्यालोच्य विशिष्टा-नुभवत्वस्यैव विशेषणधीजन्यतावच्छेदकत्वमाह, 'अनुभवमिति, 'तस्याः' विशेषणधियः, अनुभवत्वजात्यनङ्गीकारे विशिष्टप्रत्यक्षत्व-स्यैव तथात्वं स्वीकरणीयमिति ध्येयम् (१)। इच्छा-द्वेषसाक्षात्कारे व्यभिचारस्य कथितरीत्या (२) अनवकाशात् कृतिसाक्षात्कारे व्यभिचारमुद्धरति, 'नियमत इति यत्र यत्र कृतिसाक्षात्कारस्तत्र कृतिद्वितीयक्षणे विशिष्टविषयस्मृतिं कल्पयित्वा तदनन्तरक्षण एव कृतिप्रत्यक्षोपगमादित्यर्थः। न च कृतित्वनिर्व्विकल्पका-विषय-

(१) अनुमिति-शाब्दौ प्रति परामर्श-योग्यताज्ञानादीनां नियामकत्वात् विशिष्टप्रत्यक्षत्वमेव तस्य कार्य्यतावच्छेदकमित्याशयः।

(२) विनश्यदवस्थज्ञानमूलकनरसिंहाकारेच्छानिर्व्विकल्पकज्ञानसम्भवेन न व्यभिचार इत्युक्तरीत्येत्यर्थः। अथवा ज्ञानस्य इच्छा-द्वेषौ प्रति कार्य्यकालवृत्ति-तया कारणत्वोक्त्येत्यर्थः। पूर्व्वग्रन्थस्य एतादृशार्थे तात्पर्य्यात्।

स्मरणयोर्युगपदुत्पादासम्भवात् क्रमेण तदुभयोत्पत्तौ कृतेर्व्विनाश-द्विषयविरहेण कृतित्वविशिष्टकृतिप्रत्यक्षानुपपत्तिरिति वाच्यम्। कृतित्वादिविशिष्टबुद्धौ तज्ज्ञानस्य हेतुत्वानुपगमेन तन्निर्व्विकल्प-कस्यानभ्युपगमात्। तत्र विशेषणधियो हेतुत्वेऽपि विषयस्मरणस्यैव कृतित्वविषयकत्वोपगमेनोपपत्तौ तन्निर्विकल्पकस्यानावश्यक-त्वात्। अनादौ संसारे सर्व्वदैव कृतित्वविषयकसंस्कारसम्भवेन कृतिसाक्षात्कारजनकविषयस्मृतौ तद्भाने बाधकाभावात्। न चैवमन्यत्रापि निर्व्विकल्पकोच्छेदः, अपूर्व्वघटत्वादेः प्राथमिक-विशिष्टबुद्धिपूर्व्वं तत्स्मरणासम्भवेन तन्निर्व्विकल्पकस्यावश्यक-त्वात्। यत्र विशिष्टान्तरचाक्षुषादिसामग्रीकाले घटादीन्द्रिय-संयोगोत्पत्तिस्तत्र द्वितीयक्षणे विशिष्टान्तरचाक्षुषाद्युत्पत्त्या घट-त्वादिस्मरणासम्भवेन तदुत्तर घटत्वादिविशिष्टधीनिर्व्वाहाय घट-त्वादिनिर्व्विकल्पकस्यावश्यकत्वाच्च।

अनुमानदीधितिः।

साध्यादेरननुगमात् एकोपादाने अन्यानुमितौ देवाद्व्याप्तिविषयित्वाच्च तस्यामव्याप्तिः परमवशिष्यते, सापि तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षया निरसनीया, एतल्लाभायैव चानुभवार्थकं चरमज्ञान-पदम्। एवञ्चान्वय-व्यतिरेकव्याप्त्योः पृथक्प्रयोजकत्वे-ऽपि न क्षतिः। पर्व्वत-वह्निव्याप्यवैशिष्ट्यावगाहिनिश्चय-

त्वावच्छिन्नकारणताप्रतियोगिककार्य्यताया वह्निव्याप्यवत्पर्व्वतनिश्चयत्वावच्छिन्नकारणताप्रतियोगिकव्याप्त-विषयकवृत्तिकार्य्यताया वा अवच्छेदिका ज्ञानवृत्तिः सामानाधिकरण्येन वावच्छेदिका या जातिस्तद्वत्त्वं वा बोध्यम् ।

गादाधरी विवृतिः ।

जन्यज्ञाने व्याप्यविषयकत्वनिवेशे यत्र व्याप्तिविशिष्टधूमादेः पक्षतावच्छेदकघटकता तत्रत्यानुमितौ वह्नि-तद्व्याप्यधूमादि-विषयकसमूहालम्बनानुमितौ चाव्याप्ति (१) साध्याद्यननुगम-निबन्धन-व्याप्त्यननुगमप्रयुक्ताव्याप्तिवारणानुरोधेनावश्यविवक्षणीय-वह्निव्याप्तिविशिष्टपर्व्वतवृत्तिताज्ञानजन्यव्याप्यविषयकज्ञानजातीय-त्वस्य लक्षणतया निराकर्त्तुमाह, 'साध्यादेरिति, 'आदिना सम्बन्ध-विशेषादिपरिग्रहः । 'एकोपादाने' एकसाध्यादिघटितव्याप्त्यादि-विषयकपरामर्शजन्यताघटितलक्षणे, 'अन्यानुमितौ' अन्यसाध्य-काद्यनुमितौ, 'दैवात्' दैववशसम्पन्नसामग्रीविशेषात्, 'तस्या' अनु-मितौ, 'परमित्यनेन अतिव्याप्तेरसम्भवस्य च व्यवच्छेदः, 'तादृश-ज्ञानवृत्तीति पर्व्वत-वह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नजन्ये व्याप्यविषयके वह्निव्याप्यधूमविशिष्टपर्व्वतत्वावच्छिन्नविषयक-

---

(१) अव्याप्तिमित्यस्य निराकर्त्तुमित्यग्रिमेन सहान्वयः ।

निश्चयानन्तरोत्पन्नत्वं वा ज्ञाने समवेतत्वेऽपि, तद्भिन्नं तत्र नैवात्र, अतो न संस्कारस्तेन तद्विशिष्टत्वादिकमादाय ज्ञानसामान्येऽतिव्याप्तिः (१)। यथा श्रुतस्य ज्ञानत्वसामान्याभावस्य वाच्यतावच्छेदकत्वादिकमादायानुभवत्वस्याप्रसिद्धिः, व्याप्यत्वमात्र भेदगर्भ अनुभवत्वव्याप्ति यदि ज्ञानसमवेतत्वरूपं निरुक्तं तेनाव भवतानिरासः। यद्यपि अनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्व रूपं यत्किञ्चिदनुभवासमवेतत्वरूपं वा तद्व्यापकत्वं निवेश्य अनुभवत्वासाधारणधर्मो धारणं सम्भवति, तथापि ईदृशव्यापकजाति वारकप्रकाराणां जातिघटितलक्षणे नहणो यस्यान्ते न दर्शितत्वात् दिक्प्रदर्शनायैव एकप्रकारोऽत्र दर्शितः, व्याप्यपदमेव उक्तभेदगर्भव्याप्यपरतया लघुगर्भोऽदर्शिताव्यापकत्वार्थक-मिति तु न युक्तं, या काचिदित्यादौ दर्शितभेदगर्भव्याप्तेः व्याप्य-पदार्थस्य स्फुटतयोपादानेन विरोधादिति। जातिपदं समवेत तद्वत्तालाभाय, जातिभिन्नज्ञानसमवेतधर्माप्रसिद्धया जातित्वनिवेश वैयर्थ्यात्। यद्यपि तादृशधर्मोऽनुमितित्वं तदेव च लक्ष्यतावच्छे-दकं (२) तथापि स्वरूपतस्तस्य लक्ष्यतावच्छेदकता दर्शितरूपेण च लक्षणत्वमित्यविरोधः। ननु व्याप्यविषयकत्वस्य जन्यज्ञानविशे-षणत्वे संस्कारवारणाय उपात्तं ज्ञानपदमनर्थकं व्याप्यवत्तानिश्चय-

---

(१) प्रत्यक्षत्वादेस्तज्जन्यज्ञानासमवेतत्वादिति भावः।

(२) तथाच लक्षण-लक्ष्यतावच्छेदकयोरभेद इति भावः।

त्वावच्छिन्नजन्यसंस्कारस्य व्याप्तिविषयकत्वनियमात् इत्याशङ्का तत्पदमुक्तार्थलाभसम्पादकतया सार्थकयति, 'एतल्लाभायैव चेति जन्यपदस्य लक्षणयाऽनुभवत्वव्याप्यजातिपुरस्कारेण जन्यजातीयत्वार्थे तात्पर्य्यग्रहायैवेत्यर्थः। अनुभवत्वोपस्थापकज्ञानपदसमभिव्याहारादनुभवत्वघटितोक्तार्थे झटिति तत्तात्पर्य्यग्रहात् घटो पटजातीयं द्रव्यमितिवत् जलं घटजातीयं द्रव्यमित्यादिवाक्यस्य स्वरसतोऽप्रयोगात्तज्जातीयार्थकपदस्य समभिव्याहृतपदोपस्थाप्यधर्म्मव्याप्यजात्या साजात्यपरतायाः औत्सर्गिकत्वादितिभावः। जातिघटनायाः प्रयोजनान्तरमपि दर्शयति, 'एवञ्चेति, 'पृथक्प्रयोजकत्वेऽपि' अनुमितिनिरूपितविभिन्नकारणतावच्छेदकशरीरे विशेषरूपेण प्रवेशेऽपि, 'न क्षतिः' न एकतरव्याप्तिघटितलक्षणकरणेऽपरव्याप्तिज्ञानजन्यानुमितावव्याप्तिः, एकतरव्याप्तिज्ञानजन्यजातीयत्वस्यापरव्याप्तिज्ञानजन्यानुमितावक्षतत्वादिति भावः। कार्य्यतासामानाधिकरण्यस्थले कार्य्यतावच्छेदकत्वनिवेशने जातावनुभवत्वव्याप्यत्वविशेषणं विनैव सत्तादिवारणं सम्भवति तादृशजातीनां परामर्शजन्यतावच्छेदककोट्यनिविष्टत्वात् अनुमितित्वस्यैव तथात्वादित्याशयेनाह, 'पर्व्वतेति, व्याप्य-पक्षविशेष्यकपरामर्शयोरनुगतरूपेण हेतुतामते तद्रूपावच्छिन्नाजन्यतयैव ज्ञानान्तरातिव्याप्त्यनवकाशात् तादृशकारणताघटितप्रथमकल्पे व्याप्त्यविषयकत्वानिवेशः। घवच्छेदकत्वस्य पर्य्याप्त्यनिवेशाद्विशेषविषयकत्वस्याधिकस्य च परामर्शजन्यतावच्छेदकत्वेऽपि नासम्भवः। समुदायस्य एकदेशानतिरिक्ततया समुदायस्यावच्छेदकत्वे तदेकदेशस्यापि तथात्व.

व्याप्तत्वात्। अतएव (१) अवच्छेदककोटिप्रविष्टवह्नित्वादि जातिमादाय वह्न्यादिरूपविपक्षेऽतिव्याप्तिवारणाय 'ज्ञानवृत्ति' रिति ज्ञानसमवेतेत्यर्थः। अथ वह्नित्वादिकमवच्छेदकविशेष तयावच्छेदकतायामेवावच्छेदकं न तु कार्य्यतायां तथाच का तज्जातिमादायातिव्याप्तिप्रसक्तिः। न च स्वावच्छिन्नविधेयताक सम्बन्धेन कार्य्यविशेषणतया वह्नित्वमपि कार्य्यतावच्छेदकमि वाच्यम्। तादृशपरम्परायाः सम्बन्धत्वे मानाभावात् विषयिताव न्धेन च वह्नित्वस्यातिप्रसक्ततया अवच्छेदकत्वायोगादिति चे अवच्छेद्याश्रये साक्षात् परम्परया वा यावन्ति विशेषणानि ताव स्वेव कार्य्यतावच्छेदकत्वोपगमे बाधकाभावात्कार्य्यतावच्छेदकादि विशेषणस्य कार्य्यतादौ तदवच्छेदकत्वे वा अवच्छेदकत्वमित्य विनिगमकाभावेऽपि न ज्ञानवृत्तीत्यादिवैयर्थ्यम्। न च व्यधिकर

च्छेद त्वनि॰ त् विषयवृत्तेर्न कार्य्यतावच्छेदकत्वम ॰

न्। साक्षादवच्छेद्याश्रयविशेषणतया विलक्षणावच्छे

॥॰ सामानाधिकरण्यापेक्षणात्। वच्छे॰का

ऽपि अवच्छेद्यज्ञाननिरूपिताया अवच्छेदकतापर्य्याप्त्यधिकर ण॰ तादृशप्रकारावच्छेद्याश्रयज्ञाननिष्ठविषयताया अभेदादवच्छे द्यकार्य्यतादेरभेद इति वह्निविधेयकानुमितिः परामर्शजन्या इत्या कारके कार्य्य-कारणभावग्रहे अनुमितिविषयताया ऐक्यात् कार्य कारणभावैक्यं, अनुमितित्व-व त्वा॰ वच्छेदकत लक्षण

BIBLIOTHECA INDICA.

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES No 1278.

तत्त्वचिन्तामणि दीधिति-विवृति



TATTVACINTAMANI DIDHITI-VIVRITI

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

[illegible]

MAHĀMAHOPĀDHYĀYA KAMAKHYANATHA TARKAVAGISA

[illegible]

[illegible] III

Calcutta

[illegible]

5 Nanda Kumar Chowdhury's 2nd Lane

[illegible]

[illegible]

1911

तावत्समुदाये यद्यपि नैकमवच्छेदकत्वं तथापि तत्कार्य्यतानिरूपितावच्छेदकतात्वेन तदवच्छेदकतानां व्यासज्यवृत्तित्वे बाधकाभावः (१)। तादृशानुगतरूपावच्छिन्नावच्छेदकत्वाधारतायाः समुदायवृत्तिधर्म्मेणैवावच्छेदादित्यलं पल्लवितेन। तादृशजातिमज्ज्ञानत्वस्य लक्षणत्वे सामानाधिकरण्यसम्बन्धेन तादृशजातिवैशिष्ट्यस्य ज्ञानत्व इव विषयवृत्तिधर्म्मेऽपि सत्त्वेन तद्व्यावर्त्तनाय ज्ञानत्वत्वरूपेण ज्ञानत्वस्याप्यवश्यं निवेशनीयतया गौरवमिति तदुपेक्षितम्, ज्ञानत्वाद्यवच्छिन्नसाध्यकादिपरामर्शजन्यताघटितज्ञानवृत्तिजातिमादाय लक्षणं दुष्करं तत्र विषयवृत्तिज्ञानत्वादिजातिमादायातिव्याप्तेर्दुर्व्वारत्वादिति तादृशपरामर्शजन्यताघटितमपि लक्षणं सम्भवतीति सूचयितुं ज्ञानवृत्तित्वविशेषणं परित्यज्य कल्पान्तरमाह, 'सामानाधिकरण्येन वेति, कार्य्यविशेषणतया वैलक्षण्यमवच्छेदकत्वमिह सामानाधिकरण्येनावच्छेदकत्वमतो ज्ञानत्वादेः कार्य्यतासमानाधिकरणत्वेऽपि न क्षतिः।

यत्तु आलोकलिङ्गकानुमितौ धूमलिङ्गकपरामर्शस्य व्यभिचारवारणाय स्वसमानाधिकरणतत्तल्लिङ्गकपरामर्शाव्यवहितोत्तरत्वं तत्तल्लिङ्गकपरामर्शजन्यतावच्छेदकमवश्यं वाच्यं तथाच परामर्शविशेषणतया ज्ञानत्वस्य परामर्शजन्यतावच्छेदकत्वात्तदादायातिप्रसङ्गवारणाय 'सामानाधिकरण्येनेति कल्पानुसरणमिति, तन्न

(१) यथा प्रतियोगितायाः प्रतियोगिस्वरूपत्वेन तत्तद्व्यक्तिविश्रान्तत्वेऽपि प्रतियोगिधर्म्मावच्छिन्नप्रतियोगिताको व्यासज्यवृत्तिः सामान्याभावस्तद्वद्दीधितिकृता स्वीकृतं तथात्रापीति भावः।

साधीयः, अव्यवहितोत्तरत्वस्य कार्य्यतावच्छेदकत्वे अनुमितित्व निवेशस्य निष्प्रयोजनतया लाघवात्तदनुपादानात् न चाव्यवहितोत्तरत्व प्रवेशे क्वापि व्यभिचारः प्रसज्येत येन तद्वारणाय तदनुमितित्वनि वेशः सार्थकं भवेत्। अथानुमितित्वापरिवेशे धूमपरामर्शाव्यवहितोत्तर त्वतत्समानाधिकरणत्वतत्संयोग दिलाद्यधिकरणे घटादि परामर्शाभावेन व्यभिचार इत्यनुमितित्वनिवेशसार्थक्यम्। न च विषयविशेषावगाहित्वनिवेशात् निर्व्विषयसंयोगादिव्यावृत्ते रिति वाच्यम्। अव्यवहितोत्तरत्वनिवेशे विषयविशेषावगाहि तायाः प्रयोजनान्तराभावेनानिवेशादिति। न च कार्य्यनिरूपित दैशिकव्यापकत्वं न कारणताघटकं अपितु कार्य्यतावच्छेदकव्यापक सामानाधिकरण्यप्रतियोगित्वमतएव क्रियानधिकरणोत्तरदेश संयोगोत्पत्तावपि तस्यास्तत्कारणत्वमिति वाच्यम्। प्रकृते कार्य्य निरूपितदैशिकव्यापकतायाः कारणत्वाघटकत्वे कार्य्याधिकरण त्वस्य कारणाधिकरणदेशत्वानियतत्वनिर्व्वाहात् क्रियाधिकरणे उत्पद्यमानः संयोगो यथा तदनधिकरणोत्तरदेशे जायते तथा परा मर्शाधिकरणइव तदनधिकरणेऽपि सिद्ध्यभावादिघटितानुमिति सामग्रीसत्त्वात्मन्यनुमित्युत्पादस्य दुर्व्वारत्वादिति (१) चेत्, सत्यं, अनुमितित्वमनिवेश्य स्वसमानाधिकरणपरामर्शाव्यवहितोत्तरत्वस्य जन्यतावच्छेदकत्वे संयोगादिविशेषे व्यभिचारोऽस्त्येव तद्वारणाय स्वाव्यवहितपूर्व्ववर्त्तिपरामर्शसामानाधिकरण्यमेव विशेषणतया

(१) अयव्यवारणत्वादितीति पा०।

पक्षताग्रन्थे एकक्षणावच्छिन्नत्व [illegible] न्येन सिद्धौ सिषाधयिषाविरहवैशिष्ट्यमित्यभिधान सङ्गतिः। अतएव पक्षतायाः विशिष्टाभावरूपायाः [illegible] अतीन्द्रियतया प्रत्यक्षासम्भवाभिप्रायेण विशेष्याद्यभावरूपायाः इत्यनुपदं तदभिधानस्यापि सङ्गतिः। एवञ्चानुमितित्वस्य परामर्शकार्य्यतावच्छेदककोटावप्रवेशेऽपि नोक्तव्यभिचारप्रसङ्गः घटादौ परामर्शाधिकरणतानियतायास्तदुपलक्षिताधिकरणता-विलक्षणायाः सामानाधिकरण्यघटितसम्बन्धेन [illegible] करणताया असत्त्वात्। नापि [illegible] मित्यधिकरणतायाः कारणताघटकव्यापकतायामनिवेशे तस्याः परामर्शरूपकारणनियम्यता न स्यादिति दूषणस्याप्यवकाशः तदधिकरणताया अपि विशिष्टाधिकरणतात्वेन तादृशव्यापकतायां निवेशात्। अस्तु वा स्ववृत्तित्व-स्ववृत्तिधूमादिपरामर्शाव्यवहि-तोत्तरत्वोभयसम्बन्धेनात्मविशिष्टत्वमेव धूमादिपरामर्शजन्यताव-च्छेदकम् तावताप्यन्यलिङ्गकानुमितौ तस्य व्यभिचारवारणात् आत्मवृत्तित्वविशिष्टस्यैव आधेयतया आत्मविशिष्टस्यापि अनात्म-वृत्तेरिति ज्ञानत्वादिकं निवेश्यापि मयोगादौ व्यभिचारवारण-सम्भवात् विनिगमनाविरहेण तस्यापि कार्य्यतावच्छेदकतायाः दुर्व्वारतयाऽतिप्रसङ्गाच्च। न चाव्यवहितप्राक्क्षणावच्छिन्न-तल्लिङ्गकपरामर्शाधिकरणताविशिष्टसमवायस्तल्लिङ्गकपरामर्शजन्य-तावच्छेदकसम्बन्धः एवञ्च शुद्धमनुमितित्वमेव तज्जन्यतावच्छेदकं शुद्धज्ञानत्वादिकञ्च नित्यसाधारणमिति न तस्य तथात्वसम्भव

इति वाच्यम्। तथा सति ज्ञानत्वस्य कार्य्यतावच्छेदककोटि-प्रवेशेन तद्वारकविशेषणोपादानानुपपत्तेः। तस्मात् यत्साध्य-पक्षकानुमितिरेकलिङ्गकपरामर्शजन्यैव प्रसिद्धा तत्पक्षक-तत्साध्य-व्याप्यवत्तापरामर्शजन्यताघटितमेव लक्षणमभिप्रेतम्। पर्व्वतादि-पदमपि तत्पक्षादिपरमेव तत्र च न परामर्शविशेषणतया ज्ञान-त्वस्य जन्यतावच्छेदकप्रवेशप्रसक्तिरिति तथाच ज्ञानत्वघटितया-दृशसाध्यकानुमितिरेकलिङ्गकपरामर्शादेव तदनुमितिकारणता-घटितमपि लक्षणं ज्ञानवृत्तित्वविशेषणमुपेक्ष्य सामानाधिकरण्ये-नावच्छेदकत्वं निवेश्य कर्त्तुं शक्यते इत्याशयेन 'सामानाधि-करण्येन वेत्यभिहितमिति तत्त्वम्।

अनुमानदीधितिः।

व्याप्तिभानेऽवश्यं भासमानो यस्तादृशानुमित्यविषय-स्तदविषयत्वमात्रं वा ग्राह्यं, यां काञ्चिदनुमितिव्यक्ति-मादाय तद्व्यक्तिसमवेतानुभवत्वान्यानुभवान्यासमवेत-धर्म्मसमवायित्वमिति वा वक्तव्यम्। अनुभवत्वजात्य-नङ्गीकारे तु तद्व्यक्तिसमवेतभिन्नासमवेतधर्म्मसम-वायित्वं वक्तव्यम्।

व्याप्तिज्ञानत्वावच्छिन्नकारणतापतियोगिकार्य्य-तावच्छेदकावच्छिन्ना या विशिष्टपरामर्शत्वावच्छिन्न-

कारणताप्रतियोगिककार्य्यता तत्समानाधिकरणानु भवत्वव्याप्यजामितिमत्त्वं तत्त्वमित्यपि कश्चित्।

गादाधरी विवृतिः।

ननु विशिष्टवैशिष्ट्यबोधाद्यतिव्याप्तिवारणाय नानापदार्थ घटितगुरुतरव्याप्त्यविषयकत्वनिवेशनमयुक्तं अभावत्वादियत्किञ्चि द्व्याप्तिघटकपदार्थाविषयकत्व निवेश्यापि तद्वारणसम्भवात् जाति घटनया अभावाद्यनुमितेरपि सुसंग्रहत्वादित्याशयेनाह, 'व्याप्ति भान इति, व्याप्तिज्ञानविषयतद्घटकपदार्थान्तराविषयकत्वनिवेशे ऽतिव्याप्तेर्दुर्व्वारत्वात् 'अवश्यमिति, अनुमितौ नियतभासमानव्याप्ति घटकसाध्याद्यविषयत्वनिवेशस्यासम्भवसम्पादकत्वादसम्भव इत्यन् 'तादृशानुमित्यविषय इति प्रकृतसाध्यकयत्किञ्चिदनुमित्यविषय इत्यर्थः, यत्किञ्चिदनुमित्यविषयतायाः प्रकृतसाध्यादिसाधारण त्वात् सामान्यतोऽनुमित्यविषयतायाः प्रकृतसाध्यकयावदनुमिति विषयकसमूहालम्बनानुमितिविषयतायाश्च केवलान्वयित्वात्' प्रकृतसाध्यकेति यत्किञ्चिदिति च अतिव्याप्त्यसम्भवयोः (१) वारक तामाविष्कर्त्तुमेवोक्तमङ्ग्याभिधानं, निवेशस्तु तादृशपदार्थस्य कस्य चिदेकस्य विशिष्यैवेत्यवधेयम्। अनुभवत्वव्याप्यजातिघटित लक्षणे परामर्शत्वावच्छिन्नकारणताप्रतियोगिताकव्याप्त्यविषयक वृत्तिकार्य्यतागानित्वेनानुगतेन कतिपयानुमितीनां निवेश

(१) तथाच व्याप्तिभानेऽवश्य भासमान इति दलमतिव्याप्तिवारकं, शेषदला न्वारकमिति भावः।

सम्बन्धविशेषेण समवायेवत्तानिवेशस्यावश्यकत्वे समवायस्यैव सम्बन्धताया उचितत्वात्। नन्वनुभवचतुष्टयमात्रसाधारणी जातिरप्रामाणिकी प्रत्यक्षत्वस्यैव (१) विशेषणधीजन्यतावच्छेदकत्व-सम्भवात् इति स्मृत्यन्यज्ञानत्वमेव अनुभवत्व तथाचानुभवत्वान्यत्व विशेषणमयुक्तं स्मृत्यन्यत्वविशिष्टस्यापि ज्ञानत्वस्य ज्ञानत्वानतिरिक्ततया विशेषणान्तरेण वारितत्वात्। एव अनुभवान्यासमवेतेति स्मरणान्यज्ञानान्यासमवेतार्थकं तत्र स्मरणभिन्ने ज्ञानत्व-निवेशनमनतिप्रयोजनकं ज्ञानान्यसमवेतेच्छात्वादेस्तत्तदतिरिक्तासम-वेतत्वनिवेशेनैव वारणात् स्मरणान्यान्यत्वेन स्मृत्युपादानमपि न हि घट इति वक्तव्ये अनघट इति कश्चिद्वदतीतिन्यायेनायुक्त-मित्यत आह, 'अनुभवत्वेति, अनुभवत्वजात्यङ्गीकर्त्तृमते अनु-भवत्वान्यत्वविशेषणस्यानुभवत्वव्यावर्त्तनायावश्यकतया तदनङ्गी-कारे त्वित्युक्तम्।

मूलोक्तलक्षणे चक्रवर्त्तिव्याख्यानमुपन्यस्यति, 'व्याप्तीति, 'व्याप्तिज्ञानत्वावच्छिन्नेति धूमत्वावच्छिन्नविशेष्यतानिरूपित व्याप्तिप्रकारताशालिनिश्चयत्वावच्छिन्नेत्यर्थः, 'विशिष्टपरामर्शत्वा-वच्छिन्नेति वह्निव्याप्यप्रकारतानिरूपितपर्व्वतत्वावच्छिन्नविशेष्यता-शालिनिश्चयत्वावच्छिन्नेत्यर्थः। धूमलिङ्गकवह्न्याद्यनुमितौ धूमो वह्निव्याप्य इत्याकारकव्याप्तिप्रकारकनिश्चयस्य कारणविधया हेतुत्वं तज्जन्यतावच्छेदकञ्च पर्व्वतपक्षकधूमलिङ्गकवह्न्याद्यनु

---

(१) ननु विशेषणज्ञानजन्यतावच्छेदकतयैव तत्सिद्धिरित्यत आह, प्रत्यक्षत्वस्यैवेति।

मितित्वं, वह्निव्याप्यधूमवान् पर्व्वत इत्यादिपरामर्शस्य च हेतुत्वं तद्व्यापारविषया तज्जन्यतावच्छेदकञ्च पर्व्वतत्वावच्छिन्नपक्षक-वह्नित्वावच्छिन्नविधेयताकधूमलिङ्गकानुमितित्वं, एवञ्च धूमत्वा-वच्छिन्नविशेष्यक-व्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारणतानिरूपि-तकार्य्यतावच्छेदकीभूतोपदर्शितधर्म्मावच्छिन्नव्याप्यप्रकारतानिरू-पित-पर्व्वतत्वावच्छिन्नविशेष्यताकनिश्चयत्वावच्छिन्नकारणताप्रति-योगिका च या पर्व्वतो वह्निमानित्येतादृशानुमितिनिष्ठ-कार्य्यता तादृशकार्य्यतासमानाधिकरणानुभवत्वव्याप्यजातिश्चानु-मितित्वजातिरेव तामादाय सकलानुमितौ लक्षणसमन्वयः । वह्निव्याप्यधूमवत्पर्व्वतवान् इत्यादिविशिष्टवैशिष्ट्यबोधवृत्ति-तथाविधनिश्चयत्वावच्छिन्नविशेषणतावच्छेदकप्रकारकज्ञानीयका-रणताप्रतियोगिककार्य्यतामादायातिप्रसङ्गवारणायावच्छिन्नान्तं, तथाच वह्निव्याप्तिविशिष्टावच्छिन्नपर्व्वतप्रकारताशालिज्ञानत्वा-वच्छिन्नतादृशकार्य्यतायां धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारक-निश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्य्यतावच्छेदकावच्छिन्न-त्वाभावात् न तामादायातिप्रसङ्गः । वह्निव्याप्यधूमवान् पर्व्वत-इत्येतादृशनिश्चयत्वावच्छिन्नकारणताया अपि धूमत्वावच्छिन्न-विशेष्यकव्याप्तिप्रकारताकतादृशनिश्चयवृत्तित्वात्, तादृशकारणता-निरूपितकार्य्यतावच्छेदकावच्छिन्नतादृशकार्य्यतामादायातिप्रसङ्ग-इत्यतस्तादृशनिश्चयवृत्तित्वमपहाय तादृशनिश्चयत्वावच्छिन्नत्वनिवे-शनं, तादृशनिश्चयत्वान्यूनवृत्तित्वं तदर्थः, अन्यथा वह्निव्याप्य-धूमवान् पर्व्वत इत्यादिविशेषणतावच्छेदकप्रकारकनिश्च-

वह्निव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारतानिरूपितविषय-
तावच्छेदकविशेष्यताशालिनिश्चयत्वेन पर्वतत्वावच्छिन्नविशेष्य-
तापन्नधूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तिप्रकारताशालिनिश्च-
यत्वेन च निविशमानानिवेशेन वैलक्षण्यादिभिन्नत्वादिकार्य-
तादृशनिश्चयत्वेनापि तथाविधनिश्चयत्वावच्छिन्न-
निरूपितकार्यतामादायातिप्रसङ्गवारणासम्भवात्, तादृशनिश्च-
यत्वान्यूनवृत्तित्वनिवेशे च वह्निव्याप्यधूमवान् पर्वत इत्येतादृश-
विशेषणतावच्छेदकप्रकारकनिश्चयवृत्तितायाः वह्निव्याप्यो धूम इत्ये-
तादृशनिश्चयावृत्तित्वेन तादृशनिश्चयत्वन्यूनवृत्तितया न दोषः।
वह्निव्याप्यधूमवत्पर्वतवान् देशः इत्येतादृशविशिष्टवैशिष्ट्यबुद्धि-
त्वावच्छिन्नकार्यताया अपि धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रका-
रकनिश्चयत्वावच्छिन्ना या विशेषणतावच्छेदकप्रकारकनिश्चयविशे-
या कारणता तत्प्रतियोगिक-व्याप्तिविशिष्टधूमवैशिष्ट्यावगाहिबोध-
निष्ठकार्यतासमानाधिकरणत्वात् उक्तातिप्रसङ्गवारणासम्भवेन
तादृशकार्यतासामानाधिकरण्यमपहाय तदवच्छेदकावच्छिन्नत्व-
निवेशनम्। एवञ्च तादृशव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारणता-
प्रतियोगिककार्यतावच्छेदकीभूतवह्निव्याप्यवच्छिन्नधूमविशेषणता-
कबुद्धित्वेन (१) वह्निव्याप्यत्वविशिष्टधूमावच्छिन्न-पर्वतविशेष्य-

---

(१) धूमविशेषणताकबुद्धित्वेनेत्यस्य व्यनवच्छिन्नत्वादित्यग्रिमेण सहान्वयः। तथाच व्याप्तिप्रकारकनिश्चयकार्यतावच्छेदके व्याप्तिनिष्ठविलक्षणावच्छेदकता धूम-
[illegible] निविष्टा अत्र तु धूमनिष्ठविलक्षणावच्छेदकता पर्वतनिष्ठप्रकारता-
ष। इति वैलक्षण्यमिति हृदयम्।

[illegible]

[illegible] इति वाच्यम्। [illegible]

विरहात् समुदायस्य [illegible]

[illegible] (१)

[illegible] नेकधर्मावच्छिन्नपर्याप्तिकं न्यूनाधिकभिन्ना यावत्पदार्थसमुदाय-त्वाभ्यामेव तत्पर्याप्त्योरवच्छेदादिति नातिप्रसङ्गः। प्रकृते च व्याप्तिनिरूप्यव्याप्यत्वनिरूपकनिरूपितजन्यतावच्छेदककुक्षिनिविष्ट-पदार्थानां न्यूनाधिकभावविरहेण एकेनैव समुदायत्वेनैव तदुभयाव-च्छेदकतापर्याप्तिरवच्छिद्यत इति नासम्भवः। अथ धूमो वह्निव्याप्य-इत्येतादृशव्याप्तिनिश्चयस्य धूमलिङ्गकवह्निविषयकानुमितित्वमेव जन्यतावच्छेदकमुपेयते न तु तत्र पक्षविषयत्वान्तर्भावः तथासत्य-नन्तपक्षभेदेन तत्कार्य्य-कारणभावबाहुल्यप्रसङ्गात् वह्निव्याप्यधूमवान्

---

(१) अवच्छेदकतापर्य्याप्त्यवच्छेदकधर्म्मावच्छिन्नत्वनिरूपितावच्छेदकतापर्य्याप्ति-कत्वमिति पा०।

[illegible]वारणाय निवेशनीयम् न तु व्याप्यवत्ताज्ञानाव्यवहितोत्तरत्वं गौरवात् व्याप्यवत्तानिश्चयजन्यतावच्छेदककोटौ च न तन्निवेशनम्(१)। तन्निवेशनेऽपि धूमो वह्निव्याप्य इत्येतादृशज्ञानमात्र(२)कालीनान्यलिङ्गकानुमितौ व्यभिचारात् अपि तु व्याप्यवत्तानिश्चयाव्यवहितोत्तरत्वेनैव, तथाच परामर्शजन्यताया न [व्या]प्तिनिश्चयजन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्वमिति चेन्न, [एक]करणव्यापारनिरूपितफलनिष्ठजन्यतायाः प्राचीनमते एकधर्मा[व]च्छिन्नत्वनियमादगत्या पर्व्वतपक्षक-वह्निविधेयकधूमादिलिङ्गका[न]ुमितित्वेनैव व्याप्तिज्ञान-परामर्शयोर्जन्यतावच्छेदकं वाच्यम् तथाच तादृशजन्यतयोरेकधर्म्मावच्छिन्नपर्य्याप्तिनिरूपकतावच्छेदकताकत्वमक्षतमेवेति नानुपपत्तिः। एतादृशनियमस्याप्रामाणिकत्वात् अयमेवास्वरसः केचिदित्यनेन सूचितः। धूमत्वावच्छिन्नधर्म्मिकव्याप्तिप्रकारकज्ञानीयकारतायाः(३) अपि वह्निव्याप्यधूमवान्पर्व्वत इत्येतादृशनिश्चयवृत्तित्वात् तत्प्रतियोगिककार्य्यतायास्तादृशव्याप्तिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्य्यतावच्छेदकावच्छिन्नत्वमादायातिप्रसङ्गवारणाय विशिष्टपरामर्शवृत्तित्वमपहाय तदवच्छिन्नत्वनिवेशः। पदान्तरव्याहृतिस्तु(४)

---

(१) वह्निव्याप्यो धूम इति निश्चयाव्यवहितोत्तरत्वनिवेशनम् [illegible]।

(२) [illegible]।

(३) [illegible]।

(४) [illegible]।

पूर्व्ववद्बोध्या। अत्र व्याप्यविषयकवृत्तित्वस्य निवेशेनैव विशि वैशिष्ट्यबोधादिवृत्तिकार्य्यतामादायातिप्रसङ्गवारणसम्भवात् तरव्याप्तिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्य्यतावच्छेदक वच्छिन्नत्वस्य निवेशाद्गौरवमित्यप्यस्वरसः कोचिदि सूचितः।

अनुमानदीधितिः।

परे तु पक्षधर्म्मतेत्यत्र पक्षता विशेषणं, पक्षतासहकृततादृशपरामर्शजन्यत्वमर्थः, यथोक्ताय विशेष्याद्यभावरूपाया वा पक्षतायाः प्रत्य परामर्शस्योपादानं तत्त्वेन जनकत्वमेकावच्छेदेन त भयजन्यत्वञ्च विवक्षितं तेन बाधादिकालीनेन प्रतियोगिविषयकेण परामर्शेन जन्ये पक्षतायाः तदुभयमसूलात्यने वा नातिप्रसङ्गः। भवत्वव्याप्यजातिमत्त्वविवक्षया च नाव्या तच्चिन्त्यम्।

गादाधरी विवृतिः।

मिश्रव्याख्यानमुपन्यस्यति, 'परे'त्विति, यथाश्रुतव्याख्याने पक्षताजन्यत्वनिवेशाभ्यूलोक्तागस्यात् तत्राभाय आह, धर्म्मतेत्यत्रेति पक्षधर्म्मतागन्धादिप्रविष्टेत्यर्थः, तथाच पक्ष धर्म्मिमात्रपरं अपि तु पक्षताविशिष्टधर्म्मिपरमेवेति

'विशेषणमिति, ज्ञानपदार्थ इत्यादिः, धर्म्मित्वरूपविषयविशेषणत्वेन विषयतया ज्ञानान्वयिनि धर्म्मिरूपविशेष्यांशे न तस्य विशेषणत्वसम्भवः, परामर्शाविषयस्य तस्य तद्विषयविशेषणत्वासम्भवात् दण्डाद्यविषयकस्य पुरुषादिज्ञानस्य पुरुषादेर्दण्डादिमत्त्वेऽपि दण्डादिविशिष्टपुरुषाद्यविषयकत्वात् दण्ड-पुरुषावित्यादिज्ञानस्य (१) दण्डादिविषयकत्वेऽपि न तद्विशिष्टविषयकत्वं, विषयतावच्छेदकस्यैव विषयविशेषणत्वादतः पक्षतोपलक्षितधर्म्मिविषयकमेव ज्ञानमिह विवक्षितं, तथासत्यपि पक्षताजन्यत्वसहितं परामर्शजन्यत्वं जन्यान्ताल्लभ्यते विशेष्यीभूततदन्वयिना तदन्वयिनो विशेषणत्वात् ज्ञानविशेषणपक्षताया ज्ञानान्वितजन्यपदार्थजन्यताया (२) अन्वयात् इत्याशयेन तथैव लक्षणार्थमाह, 'तथाचेति । अथारुणया गवा सोमं क्रीणातीत्यादौ गवादावारुण्यादेः साक्षात्प्रकारतया तत्र तस्य विशेषणत्वसम्भवेन गवादिसाध्यतया प्रतीयमाने सोमक्रयादौ आरुण्यादिसाध्यताप्रतीतिः सम्भवतीति प्रकृतस्थले तु पक्षताया-ज्ञानांशे साक्षादप्रकारत्वाज्ज्ञानान्वयिना जन्यत्वेन कथमन्वयः । न चारुणयेत्यत्रापि आरुण्यं गवि न साक्षात्प्रकारः, अभेदसम्बन्धेनारुण्यविशिष्टाया एव तत्र साक्षात्प्रकारत्वात् तथाच परम्परया

(१) [illegible]

(२) [illegible]

गवि प्रकारस्यापि आरुण्यस्य यथा गवान्वयिना ी
त्वेनान्वयस्तथा प्रकृतेऽपि ज्ञानविशेषणधर्म्मतायां
धर्म्मिणि प्रकारीभवन्त्याः पक्षताया ि ता े
जन्यत्वेऽन्वयः सम्भवतीति वाच्यम्। । े प ि म
तथा अरुणाभेदस्यारुण्यपर्य्यवसितस्य साक्षाद्गोविशे
वात्। मेवं, लोहितोष्णीषा ऋत्विजः प्रचरन्तीत्यादौ
त्यस्य ऋत्विक्प्रचरणांशे परम्परया विशेषणस्यापि
इष्टसाधनत्वेनान्वयः तथा प्रकृतेऽपि परम्परया ।
पक्षताया अपि जन्यतान्वये बधकाभावात्। एव
सार्थकतामते(१)अरुणयेत्यादावारुण्यं गवि परम्परयैव प्रकार
साक्षात् तत्प्रकारस्यैव तदन्वयिना अन्वय इति नियमाभावात्।
भवतु परम्परया स्वविशेष्येऽन्वयिनापि स्वान्वयः तथापि
ज्ञानान्वये उपलक्षणतया भासमानविषयांशे प्रकारीभूतायाः
ताया जन्यतान्वयो न सम्भवतीति उपलक्षणपुच्छलग्नस्य विशे
त्वायोगात्,लोहितोष्णीषा इत्यादौ लौहित्य भूतो
वपि इष्टसाधनतान्वयोपगमेन लौ स्या ये व
तद्धर्म्मिणोऽपि ा ध न्वयो न स्यो
त्वाभावेन सामञ्जस्यात्, प्रकृते च परामर्शविषयेऽनुमितिजनकत्वा
धेन तदन्वयायोगात् उपलक्षणताया एव वाच्यत्वादितिचेन्न, प्रकृते
ऽपि जन्यपदस्य प्रयोज्यपरतया कारणतावच्छेदकप्रविष्टविषयां

(१) साधुत्वार्थतामते इति पा०।

पि अनुमितिप्रयोजकतया तेषामपि जन्यपदार्थान्वयः सम्भव
ते सामञ्जस्यात्, परामर्शादिप्रयोज्यताया लक्षणघटकत्वेऽ
ामर्शाद्यन्वयिप्रयोज्यताशरीरे जनकजनकत्वादिना या अन्य
ऽिस्यदनिरूपकत्वञ्च (१) निवेशेनानुमितिजन्यप्रत्यक्षादौ
निव्याप्तिवारणसम्भवात्, विषयप्रयोजकतायाश्च (२) लक्षणघ
त्यदोषे सत्यपि तस्या लक्षणघटकत्वेन न विवक्षा अतो
इति स्वरूपविशेषणता, वक्ष्यमाणानि पक्षतान्वयधर्मिवृत्ति
विषयत्वस्य साक्षात् सम्बन्धतया सति पक्षताया अपि
प्रकारक ज्ञानान्वयधर्मिवृत्तित्वविषयत्वसम्बन्धेन तदे
नीतिप्रयुक्ते तथाच ज्ञानानि परम्परासम्बन्धेन साक्षात्प
ज्यताः पक्षताया जन्यत्वाद्यनिरासाय एव। अतएव दर्शि
ितत्वान्त इत्यादौ अङ्कुरा भाततानि सन्देहस्थले भान
िततदर्थेऽपि तत्तदादानवचनविशिष्टत्वादौ दोषादेरपि
निष्ठसम्बन्धेन यावन्तस्य पूर्वादौ साक्षात्प्रयोजक

कतत्तत्पदार्थघटितपरम्परासम्बन्धातिरिक्तसम्बन्धेनान्वये विरहात् अन्यथा दण्डो पुरुष इत्यादौ [illegible] नापि पुरुषादौ पारतन्त्र्येण दण्ड-दण्डत्वाद्यन्वयापत्तेः।

व्यक्तिसाध्यकत्वं' व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वम्, अत एव एतद्व्यक्तिवृत्तियावद्धर्मवान् एतद्धर्मादित्यादौ नानाव्यक्तिसाध्यके अव्याप्तिविरहेऽपि न क्षतिः। 'अव्याप्यवृत्तीति कपिसंयोगी एतत्त्वादित्यादावित्यर्थः, 'अव्याप्तेर्वारणायेत्यन्वयः, 'व्यभिचारिणि चेति पृथिवी कपिसंयोगादित्यादावित्यर्थः। 'अभावद्वये' साध्याभावे हेत्वभावे च, तथाचाव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतोरव्याप्तेर्व्वारणाय साध्याभावे, व्यभिचारिणि च अव्याप्यवृत्तावतिव्याप्तेर्व्वारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यमित्यर्थः। यद्यपि हेत्वभावे प्रतियोगिवैयधिकरण्यस्य आवश्यकतया कपिसंयोगी कपिविभागादित्याद्यव्याप्यवृत्तिहेतुकेऽव्याप्तिवारणप्रयोजनकत्वं साध्याभावे तद्विशेषणस्य सम्भवतीति व्याप्यवृत्तीत्यकिञ्चित्करं, तथापि हेत्वभावे तादृशविशेषणप्रतिसन्धानं विनैव व्याप्यवृत्तिहेतुकस्थले अव्याप्तिनिर्णयो भवतीत्येतदभिसन्धायैव तदुक्तं, प्रतियोगिवैयधिकरण्यञ्च न प्रतियोग्यधिकरणावृत्तित्वम् अव्याप्यवृत्तिसाध्यके तथाविधहेतुके च तादृशसाध्याभावहेत्वभावाप्रसिद्ध्या अव्याप्तेरपि तु प्रतियोग्यनधिकरणवृत्तित्वं, तथाच प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावाधिकरणेषु यावत्सु प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः सन् वर्त्तते योऽभावस्तत्प्रतियोगित्वमर्थः। तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगाद्यनधिकरणगुणादिवृत्तित्वोपलक्षितकपिसंयोगाद्यभावस्य हेत्वधिकरणे सत्त्वेऽपि न अव्याप्तिर्न वा एतद्वृक्षत्ववान्

ि ंयो। दत्य ॆ तथाविधकपिसंयोगाद्यभावस्य सकलसाध्या-

भावाधिकरणे सत्त्वेऽपि अतिव्याप्तिः, प्रतियोग्यनधिकरणीभूत-साध्याभावाधिकरणयावन्निष्ठस्वप्रतियोग्यनधिकरणताकाभावप्रति-योगित्वमिति फलितार्थः। प्रथमे साध्यतावच्छेदकसम्बन्धेन चरमे हेतुतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यं तेनाय-मात्मा आत्म-महाकालान्यतरत्वात् इत्यादौ व्यभिचारनिरूपकाधि-करणस्य कालस्य कालिकसम्बन्धेन साध्याधिकरणत्वेऽपि नाति-व्याप्तिर्न वा वह्निमान् धूमादित्यादौ साध्याभावाधिकरणयाव-दन्तर्गतकाल-ज्ञानादिषु कालिक-विषयत्वादिसम्बन्धेन हेत्वभाव-प्रतियोग्यधिकरणत्वेऽपि असम्भव अव्याप्तिर्वा (१) इत्यत्र प्रतियो-गित्वं सम्बन्धविशेषावच्छिन्नत्वेन न निवेशनीये सम्बन्धान्तराव-च्छिन्नप्रतियोगिताकयोः साध्याभाव-हेत्वभावयोरन्यसम्बन्धेन प्रति-योगिसमानाधिकरणतया असम्भवातिव्याप्त्योरनवकाशात् (२) 'हेत्वभावोऽपि' इत्यपिशब्देन साध्याभावेऽपि प्रतियोगितावच्छेद-कावच्छिन्नवैयधिकरण्य निवेश्यम् इति सूच्यते, तेन (३) विशिष्ट सत्तावान् जातेरित्यादौ हेत्वधिकरणगुणादिषु साध्याभावप्रति-योगिसत्तादेः सत्त्वेऽपि नातिव्याप्तिः अत साध्याभावोऽपि इत्युक्तौ [illegible] हेत्वभावपरामर्श[illegible] तत्र हेत्वभाव[illegible] [illegible]मिति तदीय, 'तत्प्रतियोगित्वं' साध्याभाव[illegible]-

(१) [illegible]

(२) [illegible]

(३) [illegible]

[illegible] 'हेतुतावच्छेदक'-पदं हेतुतावच्छेदकावच्छिन्न-[illegible] । [illegible], [illegible] । [illegible] 'न [illegible]' [illegible] 'विशिष्टसत्ता नास्ति' [illegible] विशिष्टसत्त्वाद्यवच्छिन्ना तदीयार्थत्वावच्छिन्नप्रतियोगिताकः । तथा च साध्ये यत्र, प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताभिन्नत्वमवच्छिन्नत्वं वा तत्र, 'साध्याभावे' इति सकलसाध्याभाववन्निष्ठाभावस्यार्थः । न च हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यादेः हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यमेव निविष्टतया ततोऽपि तत्प्रयोजननिर्वाहात् तथाच द्रव्य सत्तादिव्यादौ गुणादिनिष्ठविशिष्टसत्ताभावस्य हेतुतावच्छेदकावच्छिन्नसमानाधिकरणत्वेनातिव्याप्तिवारणसम्भवात् प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशनमफलमिति वाच्यम् (१)। हेत्वभावे हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्नाधिकरणवृत्तित्वविशिष्टनिरूपिताधिकरणता तन्निरूपकाभावप्रतियोगित्वमित्यर्थे स्यात् तदपेक्षया सकलसाध्याभाववन्निष्ठा हेतुतावच्छेदकावच्छिन्नयावद्व्यक्ति

(१) यद्यपि हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे [illegible] साध्याभावसमुच्चयाप्रसिद्धेः, एतत्तदुपादाने च [illegible] तथापि [illegible] भिया लक्षणे विशेषणान्तरदानमनुचितमिति ।

योगितावच्छेदकावच्छिन्नानधिकरणता तद्दत्वरूपस्यास्मदीयफलितार्थस्यागुरुत्वात् । न च ममापि सकलसाध्याभाववन्निष्ठं यद्धर्मावच्छिन्नानधिकरणत्व तद्धर्मवत्त्वमित्येवार्थः स च अतिलघुरेवेति वाच्यम् । एतादृशार्थकरणे मूलोक्तं प्रतियोगितायाः व्याप्तित्व व्याहन्येत इति मूलानुसारेण दीधितिकृता गुर्व्वर्थस्यानुसरणात् उक्तविशेषण-विशेष्यभावेनानिवेशे व्यर्थविशेषणतानवकाशात् ।

केचित्तु हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठविशिष्टसत्तात्वावच्छिन्नव्यधिकरणाभावप्रतियोगित्वरूपव्याप्तिविशिष्टवैशिष्ट्यज्ञानस्य गुणेऽपि सत्त्वात् बाधानवतारदशायां तत्र द्रव्यत्वानुमित्यापत्तिः अस्मन्मते तु तत्प्रतियोगित्वञ्चेत्यतो लब्धस्य तादृशप्रतियोगितावच्छेदकहेतुतावच्छेदकस्य(१) व्याप्तितया तद्विशिष्टवैशिष्ट्यावाहिज्ञानस्य गुणेऽपि भ्रमत्वादित्याहुः ।

अनुमानदीधितिः ।

यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वादिव्याप्ये तत्त्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिस्तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह, 'साध्यवदन्येति, अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम् । न हि भवति नीलो घटो घटादन्य इति ।

---

(१) तथाच प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशादेव तत्प्रतियोगितावच्छेदकीभूतहेतुतावच्छेदकपर्य्यन्तस्य प्राप्तत्वादिति भाव· ।

गादाधरी विवृतिः ।

एतल्लक्षणं दूषयित्वोत्तरलक्षणमवतारयति, 'यत्रैकव्यक्तिकमिति । यत्रैकव्यक्तिकं साध्यं तत्राव्याप्तिरित्यन्वयः, एतद्रूपवान् एतद्रसादित्यादौ अनेकाशेषत्वरूपसाकल्यस्य साध्येऽसत्त्वादिति भावः । साध्ये साकल्यविशेषणं परित्यज्य कल्पान्तरानुसरणान्नैतद्दोषावकाश इत्यत आह, 'विपक्षो वेति, विपक्षः साध्याभाववान् अत्राप्येकव्यक्तिक इत्यस्य विशेषणस्य लिङ्गव्यत्ययेनानुषङ्गः (१) तथाच एतद्घटभिन्न पटत्वादित्यादौ साध्याभाववति एतद्घटादौ साकल्याप्रसिद्धाव्याप्तिरित्यर्थः । सकलपदस्य अशेषमात्रपरत्वे दोषान्तरमाह, 'निर्धूमत्वादिव्याप्य इति, 'तत्त्वेन' निर्धूमत्वव्याप्यत्वेन, तथाच धूमत्वावच्छिन्नाभावव्याप्यवान् वह्नित्वावच्छिन्नाभावादित्यादावित्यर्थः, निर्धूमत्वत्वावच्छिन्ने साध्ये एकव्यक्तिकतया पूर्व्वदोषाक्रान्तत्वेन तद्व्याप्यसाध्यकानुसरणं, निर्धूमत्वव्याप्यह्रदत्वादेस्ताद्रूप्येण साध्यतायां सद्धेतुत्वानुपपत्तिरतस्तत्त्वेनेत्युक्तं, 'हेत्वभावस्येति । अथ वह्न्यात्मकहेत्वभावस्य प्रत्येकं सकलसाध्याभाववन्निष्ठत्वासम्भवेऽपि सकलतन्निष्ठवह्न्यभावादिभेदप्रतियोगितामादायैव लक्षणं सङ्गमनीयं हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशादेव व्यभिचारिणि (२) सम्बन्धान्त-

---

(१) विपरिणतस्यानुषङ्ग इति पा० ।

(२) अयोगोलकभिन्नं वह्नेरित्यादौ प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेश एव समवायेन हेत्वभावमादायातिव्याप्ति स्यात् न तु हेतुतावच्छेदकसम्बन्धेन तन्निवेशे तथाच कथं हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेशनीयमिति भाव ।

रावच्छिन्नप्रतियोगिताकहेत्वभावमादायातिप्रसङ्गानवकाशेन हेत्वभावप्रतियोगितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशात् ।

यत्तु वह्निमद्भेदहेतुताभिप्रायकोऽयं ग्रन्थः, भेदभेदस्यानवस्थाभयेनाधिकरणस्वरूपतया तस्य च प्रत्येकविश्रान्ततया यावद्विपक्षवृत्तित्वासम्भवात् तत्र हेतुभेदमादायापि लक्षणगमनासम्भवात् इति तन्न, आकाशाभावाधिकरणकभेदभेदस्याकाशाद्यभावस्वरूपतया तस्य च यावद्विपक्षवृत्तित्वेन तमादायैव लक्षणगमनसम्भवात् । न च एतादृशरीत्या आकाशाभावमादाय भेदहेतुकव्यभिचारिणि अतिप्रसक्तया हेत्वभावत्वेन सकलसाध्याभावाधिकरणवृत्तित्वं विवक्षणीयं तथासति अधिकरणस्वरूपाभावस्य च स्वस्मिन्नेव तदभावत्वेन वृत्तिरिति नातिव्याप्त्यवकाशः एवञ्चाकाशाभावमादाय नोक्ताव्याप्तिपरिहारसम्भव इति वाच्यम् । उक्तस्थले आकाशाभावस्य हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यविरहादेवातिव्याप्तिवारणसम्भवेन तादृशविवक्षाया निष्प्रयोजनकत्वात् वह्निमद्भेदहेतुकस्थले च साध्याभावाधिकरणस्य हेतुरूपप्रतियोग्यनधिकरणत्वेनाकाशाभावरूपहेतुभेदस्य प्रतियोगिव्यधिकरणत्वेनाव्याप्तिवारणसम्भवादिति दिक् ।

अत्र केचित्, यत्र वह्न्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यं साध्यं वह्न्यभावान्यत्वविशिष्टवह्न्यभाव (१) हेतुस्तत्र वह्न्यभावस्यापि सकलसाध्याभाववदवृत्तितया तत्र वह्न्यभावभेदाभावेन तमादाय लक्षणगमनासम्भवात् । न च तादृशविशिष्टहेतुकस्थले हेतुभेदस्य

(१) [illegible]

एवेति वाच्यम्। कालिकसम्बन्धेन तत्र वह्न्यभावसत्त्वेऽपि प्रतियोग्यनधिकरणीभूतवह्निमदवयवावच्छेदेन तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्यापि सत्त्वात् एवं विशिष्टाभावस्य विशेष्याभाव-विशेषणाभावाभ्याम् अनतिरिक्तत्वे द्रव्यं विशिष्टसत्त्वादित्यादावेव अव्याप्तिसम्भवे तदुपेक्षाभावसाध्यकाभावहेतुकस्थलानुधावने वीजाभावात्। तस्मात् प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिवैयधिकरण्यं निविष्टं प्रतियोगिता च हेतुतावच्छेदकसम्बन्धावच्छिन्नैव निविष्टेत्यभिप्रायेणैव तद्दोषदानम्। हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यदाने (१) तु अग्रिमलक्षणापेक्षया गौरवमेव तल्लक्षणावतारे वीजं बोध्यम्। एतेन सकलग्रन्थस्य व्यापकतार्थकतया साध्याभावव्यापकीभूताभावप्रतियोगित्वमेव निष्कृष्टैतल्लक्षणार्थः, धूमवान् वह्नेरित्यादौ प्रमेयत्वादिना वह्न्यभावस्य साध्याभावव्यापकत्वेऽपि न क्षतिः यद्रूपावच्छिन्नाभावत्वं साध्याभावव्यापकतावच्छेदकं तद्रूपवत्त्वस्यैव लक्षणत्वात्, एवञ्च हेत्वभावे प्रतियोगिवैयधिकरण्यं न निवेश्यते व्यापकतालक्षणे प्रतियोगिवैयधिकरण्यानिवेशेन अव्याप्यवृत्तिहेतुकाव्यभिचारिणि हेत्वभावस्य साध्याभाववन्निष्ठहेतुरूपाभावप्रतियोगितया व्यापकत्वाभावेनातिप्रसङ्गविरहात्, व्यापकताशरीरे च हेतुतावच्छेदकसम्बन्धेन साध्याभाववन्निष्ठत्वमभावे निवेश्यं तेन वह्न्याद्यभावादिमति कालिकादिसम्बन्धेन धूमादिरूपाभावस्य वृत्तावपि धूमाभावादेर्न साध्याभावव्यापकता-

(१) प्रतियोगिवैयधिकरण्यनिवेशे इति पा०।

सकलसाध्याभाववन्निष्ठत्वासम्भवेऽप्यखण्डस्य तस्य विशिष्टात्यन्ता-भावस्य तथात्वमादायैव लक्षणगमनं सम्भवतीति वाच्यम्। प्राचीनमते विशिष्टाभावस्य विशेषणाभाव-विशेष्याभावाभ्याम् अनतिरिक्ततया तादृशविशिष्टभावस्य वह्न्यभावत्व-वह्न्युभयरूपत्वेन सकलसाध्याभाववन्निष्ठत्वासम्भवात्। अथैवमपि विषयितादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य वह्न्यभावात्यन्ताभावस्य अखण्डतया सकलधूमवन्निष्ठतया तमादाय एव लक्षणगमनं सम्भवतीति चेत्, न, वृत्त्यनियामकतया विषयितादिसम्बन्धानामत्यन्ताभावप्रतियोगितानवच्छेदकत्वात् संयोगादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्याखण्डस्य सकलधूमवन्निष्ठत्वेऽपि तदभावप्रतियोगिता न हेतुतावच्छेदकीभूतवह्न्यभावत्वावच्छिन्ना, तत्र लाघवेनाभावत्वस्यैव तदवच्छेदकत्वात् इति न तमादायापि लक्षणसङ्गतिः। न च गुरुधर्मावच्छिन्नहेतुकस्थले लक्षणसङ्गमनाय पारिभाषिकमेवावच्छेदकत्व हेतुतावच्छेदके निवेश्य तथाच वह्न्यभावत्वादेरपि तादृशावच्छेदकत्वमक्षतमेवेति वाच्य। एतल्लक्षणस्य परित्याज्यतया निखिलदोषोद्धारानावश्यकत्वेन पारिभाषिकावच्छेदकत्व न निविष्टमित्याशयेनैव तद्दोषदानादिति, तदसत्, तथा सत्यपि सकलसाध्याभाववन्निष्ठं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावाभावमादाय लक्षणसमन्वयसम्भवात्। न च जन्यमात्रस्य कालोपाधित्वेनैव साध्याभाववति पर्वतादौ कालिकसम्बन्धेन वह्न्यभावादिसत्त्वात् तत्र तादृशसम्बन्धेन तस्याभावो न वर्तते

एवेति वाच्यम्। कालिकसम्बन्धेन तत्र वह्न्यभावसत्त्वेऽपि प्रतियोग्यनधिकरणीभूतवह्निमदवयवावच्छेदेन तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्यापि सत्त्वात् एवं विशिष्टाभावस्य विशेष्याभाव-विशेषणाभावाभ्याम् अनतिरिक्तत्वे द्रव्यं विशिष्टसत्त्वादित्यादावेव अव्याप्तिसम्भवे तदुपेक्षाभावसाध्यकाभावहेतुकास्थलानुधावने बीजाभावात्। तस्मात् प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिवैयधिकरण्यं निविष्टं प्रतियोगिता च हेतुतावच्छेदकसम्बन्धावच्छिन्नैव निविष्टेत्यभिप्रायेणैव तद्दोपदानम्। हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यदाने (१) तु अग्रिमलक्षणापेक्षया गौरवमेव तल्लक्षणावतारे बीजं बोध्यम्। एतेन सकलग्रन्थस्य व्यापकतार्थकतया साध्याभावव्यापकीभूताभावप्रतियोगित्वमेव निष्कृष्टलक्षणार्थः, धूमवान् वह्नेरित्यादौ प्रमेयत्वादिना वह्न्यभावस्य साध्याभावव्यापकत्वेऽपि न क्षतिः यद्रूपावच्छिन्नाभावत्वं साध्याभावव्यापकतावच्छेदकं तद्रूपवत्त्वस्यैव लक्षणत्वात्, एवञ्च हेत्वभावे प्रतियोगिवैयधिकरण्यं न निवेश्यते व्यापकतालक्षणे प्रतियोगिवैयधिकरण्यानिवेशेन अव्याप्यवृत्तिहेतुकव्यभिचारिणि हेत्वभावस्य साध्याभाववन्निष्ठहेत्वभावप्रतियोगितया व्यापकत्वाभावेनातिप्रसङ्गविरहात्, व्यापकताशरीरे च हेतुतावच्छेदकसम्बन्धेन साध्याभाववन्निष्ठत्वमात्रं निवेश्यं तेन दण्डाद्यभावादिमति कालिकादिसम्बन्धेन धूमादिमत्त्वाभावस्य ह्रदादि धूमाभावादेर्न साध्याभावव्यापकता-

(१) [illegible]

सकलसाध्याभाववन्निष्ठत्वासम्भवेऽप्यखण्डस्य तस्य विशिष्टात्यन्ताभावस्य तथात्वमादायैव लक्षणगमनं सम्भवतीति वाच्यम्। प्राचीनमते विशिष्टाभावस्य विशेषणाभाव-विशेष्याभावाभ्याम् अनतिरिक्ततया तादृशविशिष्टभावस्य वह्न्यभावत्व-वह्न्युभयरूपत्वेन सकलसाध्याभाववन्निष्ठत्वासम्भवात्। अथैवमपि विषयितादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य वह्न्यभावात्यन्ताभावस्य अखण्डतया सकलधूमवन्निष्ठतया तमादाय एव लक्षणगमनं सम्भवतीति चेत्, न, वृत्त्यनियामकतया विषयितादिसम्बन्धानामत्यन्ताभावप्रतियोगितानवच्छेदकत्वात् संयोगादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्याखण्डस्य सकलधूमवन्निष्ठत्वेऽपि तदभावप्रतियोगिता न हेतुतावच्छेदकीभूतवह्न्यभावत्वावच्छिन्ना, तत्र लाघवेनाभावत्वस्यैव तदवच्छेदकत्वात् इति न तमादायापि लक्षणसङ्गतिः। न च गुरुधर्म्मावच्छिन्नहेतुकस्थले लक्षणसङ्गमनाय पारिभाषिकमेवावच्छेदकत्वं हेतुतावच्छेदके निवेश्य तथाच वह्न्यभावत्वादेरपि तादृशावच्छेदकत्वमक्षतमेवेति वाच्य। एतल्लक्षणस्य परित्याज्यतया निखिलदोषोद्धारानावश्यकत्वेन पारिभाषिकावच्छेदकत्वं न निविष्टमित्याशयेनैव तद्दोषदानादिति, तदसत्, तथा सत्यपि सकलसाध्याभाववन्निष्ठं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावाभावमादाय लक्षणसमन्वयसम्भवात्। न च जन्यमात्रस्य कालोपाधितानये साध्याभाववति पर्व्वतादौ कालिकसम्बन्धेन वह्न्यभावादिसत्त्वात् तत्र तादृशसम्बन्धेन तस्याभावो न वर्त्तते

प्रकारान्तरानुसरणेन परिष्कारे सकललक्षणानामेव परिष्कारसम्भवादिति कृतं पल्लवितेन ।

परे तु 'निर्धूमत्वव्याप्ये तत्त्वेन साध्ये' इत्यस्य सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावव्याप्ये साध्ये तत्सम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावादौ अव्याप्तिरित्यर्थः (१)। तत्र च हेतोरपि सकलसाध्याभाववदन्तर्गततया तत्र हेतुभेदासत्त्वेन न वह्न्यभावभेदमादाय लक्षणसङ्गतिरित्यव्याप्तिर्दुर्व्वारैव, तथाहि सामानाधिकरण्यसम्बन्धेन पर्व्वतत्वादौ वर्त्तमानस्य वह्नेस्तादृशसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य पर्व्वतादौ सत्त्वेन तत्र सामानाधिकरण्यसम्बन्धावच्छिन्न--प्रतियोगिताकधूमाभावसत्त्वात् साध्याभावाधिकरणत्वमविवादमेव इति ध्येयमित्याहुः (२)।

साध्यवद्यान्तिविशेषभेदमादायाव्याप्तिं परिहरति, 'अत्रेति, 'साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वमिति साध्यतावच्छेदकविशिष्टसाध्यवत्त्वपर्य्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थः. तेन वह्निमान् धूमादित्यादौ तत्तद्वह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदमा-

---

(१) [illegible]

(२) [illegible]

त्तिः। सत्तावान् जातेरित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या अव्याप्तिश्च लक्षणपञ्चक एव दोषः, अस्तु वा हेतुतावच्छेदकसम्बन्धेन हेतुमत्ताज्ञानं प्रति यादृशसम्बन्धेन हेत्वभाववत्ताग्रहः प्रतिबन्धकस्तादृशसम्बन्धेन स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधिकरणकं यद्यत् स्वं तद्भिन्नत्वमेव साध्याभावव्यापकतावच्छेदकत्वम्, इत्थञ्च सत्तावान् जातेरित्यादौ एतादृशं स्वं जातित्वाभावत्वादिकमेव तद्भिन्नञ्च जात्यभावत्वमिति लक्षणसमन्वयः, इत्थञ्च एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ कपिसंयोगाभावत्वावच्छिन्नानधिकरणाप्रसिद्ध्या कपिसंयोगाभावत्वं नैतादृशं स्वमिति कपिसयोगाभावत्वस्य साध्यव्यापकतावच्छेदकत्वादतिव्याप्तिवारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यविशेषणं देयमेव, न देयमेव वा अधिकरणत्वाभावस्यैवाधिकरणभिन्नत्वस्थले निवेशनीयत्वात्, कपिसंयोगाभावादिवत्तदधिकरणताया अपि अव्याप्यवृत्तितया तदभावस्य साध्याभाववति सत्त्वेनातिव्याप्त्यनवकाशात्, अधिकरणत्वाभावादिश्च भावप्रतियोगिकतया अतिरिक्त एवेति विशेषणताविशेषेणैव तद्वत्त्वं साध्यभाववति विशेषणीयमिति, एवञ्च निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वेऽपि हेत्वभावत्वेन तेषां साध्याभावव्यापकत्वात् नाव्याप्तिरिति पूर्व्वपक्षोऽप्यकिञ्चित्करः। यत्र यावतां साध्याभाववता सम्भवस्तत्र प्रातिस्विकरूपेण तत्तदधिकरणवृत्तित्वमेव हेत्वभावविशेषणतया लक्षणघटकं न तु साध्याभावव्यापकत्वमित्यभिप्रायेणैव एतद्दोषदानात्,

प्रकारान्तरानुसरणेन परिष्कारे सकललक्षणानामेव परिष्कार-सम्भवादिति कृतं पल्लवितेन।

परे तु 'निर्धूमत्वव्याप्ये तत्त्वेन साध्ये' इत्यस्य सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावव्याप्ये साध्ये तत्सम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावादौ अव्याप्तिरित्यर्थः (१)। तत्र च हेतोरपि सकलसाध्याभाववदन्तर्गततया तत्र हेतुभेदासत्त्वेन न वह्न्यभावभेदमादाय लक्षणसङ्गतिरित्यव्याप्तिर्दुर्व्वारैव, तथाहि सामानाधिकरण्यसम्बन्धेन पर्व्वतत्वादौ वर्त्तमानस्य वह्नेस्तादृशसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य पर्व्वतादौ सत्त्वेन तत्र सामानाधिकरण्यसम्बन्धावच्छिन्न–प्रतियोगिताकधूमाभावसत्त्वात् साध्याभावाधिकरणत्वमविवादमेव इति ध्येयमित्याहुः (२)।

साध्यवद्भिन्नविशेषभेदमादायाव्याप्तिं परिहरति, 'अत्रेति, 'साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वमिति साध्यतावच्छेदकविशिष्टसाध्यवत्त्वपर्य्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थः, तेन वह्निमान् धूमादित्यादौ तत्तद्वह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदमा-

---

(१) अत्र लक्षणस्याव्याप्तिदोषमुद्धृत्य तेन लक्षणेन वह्नेरभेदानुमाने पक्षतावच्छेदकसामानाधिकरण्येन पक्षे लक्षणघटकेत्याभावात् भागासिद्धिदोषो भवति। अत्र लक्षणस्यातिव्याप्तिदोषमुद्धृत्य तेन लक्षणेन वह्नेरभेदानुमाने पक्षतावच्छेदकावच्छेदेन हेत्वभावात् भागासिद्धिदोषो भवति। अत्र लक्षणस्यातिव्याप्तिदोषमुद्धृत्य तेन लक्षणेन वह्नेरभेदानुमाने वह्नेरभेदस्य साध्याभाववद्वृत्तित्वरूपहेतोर्वर्त्तमानत्वेन व्यभिचारदोषो भवतीति ध्येयम्।

(२) परे निर्धूमादिरूपाङ्गीकारिणः प्राञ्चः केचिदिति दर्शयन्ति इत्याहुः।

दाय न दोषस्तादृशप्रतियोगितावच्छेदकताया: तत्ताविशिष्टवह्नि-मत्त्व एव पर्य्याप्तत्वात्। 'व्युत्पत्तिबललभ्यम्' अन्यादिपदसमभि-व्याहारलभ्यं, नञ्पदसमभिव्याहारज्ञानस्येवैतादृशपदसमभिव्या-हारज्ञानस्यापि अन्वयितावच्छेदकधर्म्मावच्छिन्नप्रतियोगिताका-भावशाब्दत्वावच्छिन्न प्रत्येव जनकत्वादिति भाव:। 'व्युत्पत्ति-बललभ्यमित्यनेन यथाश्रुतलक्षणवाक्यार्थ एवायमिति सूचितम्। तादृशसमभिव्याहारस्थले तत्प्रतियोगिकाभावमात्रबोधे अतिप्रसङ्गं सूचयति, 'न हि भवतीति, प्रामाणिकव्यवहार इति शेष:, तथा-चान्वयिप्रतियोगिकाभावमात्रबोधे नीलघटेऽपि पीतघटादिभेद-सत्त्वेन तादृशव्यवहारोऽपि स्यादिति भाव:। द्रव्यं न घट इत्याद्य-प्रयोगात् अन्वयितावच्छेदकावच्छेदेन (१) अन्योन्याभावादि-रन्यादिपदेन प्रत्याय्यते अनुयोगितावच्छेदकस्य प्रतियोग्यवृत्तिरेव धर्म्म इति प्रकाशकृदङ्गीकृतव्युत्पत्त्यन्तरविरोधात् घटो घटादन्य इति प्रयोगवारणसम्भवात् 'नील इति, घटादन्य इत्यादौ प्राचीन-मते पञ्चम्या: प्रतियोगित्वमर्थ:, तत्र च प्रकृत्यर्थस्य घटत्वादि-विशिष्टस्य घटत्वाद्यवच्छिन्नत्वविशिष्टाधेयतासम्बन्धेनान्वय:, अथवा केवलमाधेयत्वमेव सम्बन्ध:, धर्म्मिपारतन्त्र्येण घटत्वादेरप्यव-च्छिन्नत्वसम्बन्धेनान्वयोपगमात् एकविशेषणत्वेनोपस्थितस्याप्यन्यत्र पारतन्त्र्येण अन्वयस्य व्युत्पत्तिसिद्धत्वात्, प्रतियोगित्वस्य व्युत्पत्ति-वैचित्र्येणान्यपदार्थैकदेशे भेदे निरूपकतासम्बन्धेनान्वय:,घटादन्य-इत्यादौ निरूपकतासम्बन्धेन घटत्वावच्छिन्नप्रतियोगिताविशिष्टो

(१) अनुयोगितावच्छेदकावच्छेदेनेति पा०।

लक्षणया घटादिपदार्थस्तत्पुरुषस्थले पूर्व्वपदस्य तत्तद्विभक्त्यन्तार्थविशिष्टलाक्षणिकत्वात्, तादृशघटादिपदार्थस्याभेदसम्बन्धेन भेदेऽन्वयः। नवीनमते च घटादन्य इत्यादौ अनुयोगित्वं पञ्चम्यर्थः, तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य स्ववृत्तिघटत्वाद्यवच्छिन्नप्रतियोगितानिरूपकताकत्वसम्बन्धेनान्वयः, अनुयोगितायाश्चाश्रयतासम्बन्धेन भेदेऽन्वयः, समासस्थले च घटत्वावच्छिन्ननिरूपितानुयोगिताविशिष्टे पूर्व्वपदस्य लक्षणा तस्य चाभेदसम्बन्धेन भेदेऽन्वयः। अथैवं साध्यवदन्यावृत्तित्वमित्येतादृशलक्षणवाक्यादभेदसम्बन्धेन तादृशप्रतियोगिताविशिष्टविशेषितस्तादृशानुयोगिताविशिष्टविशेषितो वा यो भेदस्तद्वदवृत्तित्वमेव प्रतीयते, तथाच अनुमित्यौपयिकव्याप्तिस्वरूपजिज्ञासायां तादृशलक्षणाभिधाने अर्थान्तरप्रसङ्गः तादृशप्रतियोगितासम्बन्धेन तादृशानुयोगितासम्बन्धेन वा साध्यवद्विशेषितभेदवदवृत्तिताज्ञानस्यैव लाघवेन अनुमितिहेतुत्वात् इति चेत्, न, यादृशव्याप्तिज्ञानमनुमितिहेतुः तस्यामेव अस्य तात्पर्य्यात् शाब्दबोधविषयत्वेऽपि तन्मूलकोदीच्यव्याप्तिविषयकमानसोपनीतभानस्यैव तादृशतात्पर्य्यनिर्व्वाहकत्वात्, नीलो घटः कम्बुग्रीवादिमदन्य इत्यादिवाक्यस्य अप्रमाणत्वात्, पटः कम्बुग्रीवादिमदन्य इत्यादिवाक्यस्य प्रमाणत्वादन्वयितावच्छेदकनिरूपितपारिभाषिकमवच्छिन्नत्वं प्रतियोगिताया भासत इत्युपेयम् अतः साध्यवदन्य इत्यादौ मतुवन्तप्रतिपाद्यतावच्छेदकस्य साध्यसम्बन्धस्य साध्यापेक्षया गुरुतया अनवच्छेदकत्वेऽपि नोक्तलक्षणवाक्यार्थाप्रसिद्धिः। पारिभाषिक तदवच्छिन्नत्वञ्च तद्वि-

शिष्टसम्बन्धिनिष्ठाभावीया या या प्रतियोगिता तदवच्छेदकत्वाभावकूटवदवच्छिन्नत्वम्। एतादृशावच्छिन्नत्वस्य सम्बन्धतया प्रातिस्विकरूपेण तत्तत्प्रतियोगिताव्यक्तीनां दुर्ज्ञेयत्वेऽपि न क्षतिः। सम्बन्धज्ञानस्य विशिष्टवुद्धावनपेक्षितत्वात्, अनुमितिं प्रति च साध्यावच्छिन्नप्रतियोगिताकत्वावगाहिज्ञानमेव कारणं कल्प्यते लाघवात् न तु साध्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वावगाहि ज्ञानम्। अनुमित्यौपयिकव्याप्तिशरीरे तादृश्येव प्रतियोगिता निवेश्यते,कम्बुग्रीवादिमत्त्वात् घटादित्यादौ विशेषदर्शिनामनुमितेः प्रामाणिकत्वे निरुक्तपारिभाषिकावच्छिन्नत्वमेवानुमित्यौपयिकव्याप्तिघटकं तादृशगुरुधर्म्मावच्छिन्नसाध्यकानुमानस्य केवलान्वयिसाध्यकानुमानसमशीलतावादिनस्तु स्वरूपसम्बन्धरूपावच्छिन्नत्वमेव तादृशव्याप्तिशरीरे निवेशयन्तीति समासः। मूले 'केवलान्वयिन्यभावादित्यादौ एतादृशलक्षणपञ्चकस्य केवलान्वयिनि अप्रसिद्धेरित्यर्थः। न च हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्यावश्यं निवेशनीयतया सत्तावान् द्रव्यत्वादित्यादौ अव्याप्तिरस्तीति केवलान्वयिसाध्यकमात्रे अव्याप्तिकथनमसङ्गतमिति वाच्यम्। केवलान्वयिपदेन हेतुतावच्छेदकसम्बन्धेन यत्किञ्चिदधिकरणवृत्त्यभावाप्रतियोगित्वरूपकेवलान्वयित्वाश्रयसाध्यकमात्रस्य उक्तत्वात्। अथवा हेतुतावच्छेदकसम्बन्धेन वृत्तित्वमनिवेश्य हेतुतावच्छेदकसम्बन्धातिरिक्तो यो हेतुप्रतियोगिकः सम्बन्धः तदन्यसम्बन्धावच्छिन्नवृत्तित्वमेव निवेश्यं वह्निमान् धूमादित्यादौ कालिकसम्बन्धेन धूमादेः साध्याभाववद्वृत्तित्वेऽपि तत्सम्बन्धस्य हेतुतावच्छेदक-

सम्बन्धातिरिक्तत्वात् हेतुमप्रतियोगिकत्वाच्च लक्षणाघटकतया तदन्यसम्बन्धेन तद्वृत्तित्वाभावः अस्त्येवेति भावः। एवञ्च सत्तावान् द्रव्यत्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वाप्रसिद्धावपि हेतुतावच्छेदकसम्बन्धातिरिक्तहेतुप्रतियोगिकसम्बन्धान्यविशेषणताविशेषादिना वृत्तित्वप्रसिद्ध्या नाव्याप्तिरिति ध्येयम्।

इति श्रीगदाधरभट्टाचार्य्यविरचिता शिरोमणिकृत-
व्याप्तिपञ्चकव्याख्याया विवृतिः समाप्ता
समाप्तं व्याप्तिपञ्चकम्।

तत्त्वचिन्तामणिः ।

सिंह-व्याघ्रनामकव्याप्तिद्वयम् ।

नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्यवैयधिकरण्यानधिकरणत्वं वा, तदुभयमपि साध्यानधिकरणानधिकरणत्वं, तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चासिद्धम् ।

तत्त्वचिन्तामणिदीधितिः ।

'नापीति, साध्यमसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वम् साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम् साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमिति यावत्, तदनधिकरणत्वमित्यर्थः, साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसङ्गः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षस्तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः ।

गादाधरी विवृतिः ।

'साध्यासामानाधिकरण्यानधिकरणत्वलक्षणे यदि तदधिकरणावृत्तित्वरूपासामानाधिकरण्यं निविश्यते तदा द्रव्यं सत्त्वादित्यादावतिव्याप्तिः सत्ताया द्रव्यत्वाधिकरणवृत्तितया तादृशा-

सामानाधिकरण्यानधिकरणत्वात् तदनधिकरणवृत्तित्वस्यासामानाधिकरण्यपदार्थत्वे अनन्तरवक्ष्यमाणलक्षणाभेद इत्यतो व्याचष्टे, 'साध्येति, साध्यं असमानाधिकरणं यस्येत्यत्रासमानाधिकरणपदस्य स्वानधिकरणार्थकत्वे (१) द्रव्यं सत्त्वादित्यादावेवातिव्याप्तिः द्रव्यत्वादेः सत्तानधिकरणाधिकरणकत्वविरहेण यत्पदेन सत्तादेरुपादानासम्भवात्, सत्तावान् द्रव्यत्वादित्यादावव्याप्तिश्च सत्तादेर्द्रव्यत्वानधिकरणाधिकरणकत्वात् अतस्तदधिकरणानधिकरणकत्वपरतया तत्पदं व्याचष्टे, 'यदधिकरणेति, यदधिकरणानधिकरणकं साध्यं तत्त्वानधिकरणत्वस्य व्याप्तित्वे व्याप्तेर्विशिष्टैकार्थरूपतानुपपत्त्या विशिष्टपरामर्शस्यानुमितिहेतुत्वानिर्व्वाहः, यत्त्व-तत्त्वाननुगमेन तत्त्वाधिकरणत्वाभावकूटस्य निवेशनीयतया दुर्ज्ञेयत्व गौरवञ्च इत्याशयेन यत्त्व-तत्त्वाघटितसाध्यासामानाधिकरण्यपदार्थमाह, 'साध्यनिष्ठेति, साध्यनिष्ठं यदसामानाधिकरण्यं स्वाधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्तित्वाभावस्तत्प्रतियोगित्वं तत्प्रतियोगिकोटिनिविष्टाधिकरणवृत्तित्वं साध्यवन्निष्ठाभावीयाधेयत्वनिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धेन यदवच्छेदकं तद्वृत्तित्वमिति यावत्, वह्निमान् धूमादित्यादौ साध्यनिष्ठाभावो ह्रदाधेयत्वाभावस्तदीयप्रतियोगितायामुक्तसम्बन्धेनावच्छेदको ह्रदादिस्तद्वृत्तित्वानधिकरणत्वं धूमादाविति लक्षणसमन्वयः। अत्र साध्यनिष्ठाभावप्रतियोग्याधेयत्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यम् अन्यथा वह्निमान् धूमादित्यादौ पर्व्वतादिसमवेतत्वाद-

(१) [illegible] पाठः।

तत्त्वचिन्तामणिः ।

सिंह-व्याघ्रनामकव्याप्तिद्वयम् ।

नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्य-वैयधिकरण्यानधिकरणत्व वा, तदुभयमपि साध्यानधि-करणानधिकरणत्वं, तच्च तत्र यत्किञ्चित्साध्यानधिकर-णाधिकरणे धूमे चासिद्धम् ।

तत्त्वचिन्तामणिदीधितिः ।

'नापीति, साध्यमसमानाधिकरणं यस्य यदधि-करणानधिकरणं साध्यं तत्त्वम् साध्यनिष्ठासामानाधि-करण्यप्रतियोगित्वम् साध्यनिष्ठाधेयत्वानिरूपकाधि-करणवृत्तित्वमिति यावत्, तदनधिकरणत्वमित्यर्थः, साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्-वृत्तौ नातिप्रसङ्गः साध्यनिष्ठाधेयत्वानिरूपकाधिकरण-त्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षस्तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः ।

गादाधरी विवृतिः ।

'साध्यासामानाधिकरण्यानधिकरणत्वलक्षणे यदि तदधि-करणावृत्तित्वरूपासामानाधिकरण्य निवेश्यते तदा द्रव्यं सत्त्वा-दित्यादावतिव्याप्तिः सत्ताया द्रव्यत्वाधिकरणवृत्तितया तादृशा-

सामानाधिकरण्यानधिकरणत्वात् तदनधिकरणवृत्तित्वस्यासामानाधिकरण्यपदार्थत्वे अनन्तरवक्ष्यमाणलक्षणाभेद इत्यतो व्याचष्टे, 'साध्येति, साध्यं असमानाधिकरणं यस्येत्यत्रासमानाधिकरणपदस्य स्वानधिकरणार्थकत्वे (१) द्रव्यं सत्त्वादित्यादावेवातिव्याप्तिः द्रव्यत्वादेः सत्तानधिकरणाधिकरणकत्वविरहेण यत्पदेन सत्तादेरुपादानासम्भवात्, सत्तावान् द्रव्यत्वादित्यादावव्याप्तिश्च सत्तादेर्द्रव्यत्वानधिकरणाधिकरणकत्वात् अतस्तदधिकरणानधिकरणकत्वपरतया तत्पदं व्याचष्टे, 'यदधिकरणेति, यदधिकरणानधिकरणकं साध्यं तत्त्वानधिकरणत्वस्य व्याप्तित्वे व्याप्तेर्विशिष्टैकार्थरूपतानुपपत्त्या विशिष्टपरामर्शस्यानुमितिहेतुत्वानिर्व्वाहः, यत्त्व-तत्त्वाननुगमेन तत्त्वाधिकरणत्वाभावकूटस्य निवेशनीयतया दुर्ज्ञेयत्वं गौरवञ्च इत्याशयेन यत्त्व-तत्त्वाघटितसाध्यासामानाधिकरण्यपदार्थमाह, 'साध्यनिष्ठेति, साध्यनिष्ठं यदसामानाधिकरण्यं स्वाधिकरणीभूतयत्किञ्चिदग्निवृत्तित्वाभावस्तत्प्रतियोगित्वं तत्प्रतियोगिकोटिनिविष्टाधिकरणवृत्तित्वं साध्यवन्निष्ठाभावीयाधेयत्वनिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धेन यदवच्छेदकं तद्वृत्तित्वमिति यावत्, वह्निमान् धूमादित्यादौ साध्यनिष्ठाभावो ह्रदाधेयत्वाभावस्तदीयप्रतियोगितायामुक्तसम्बन्धेनावच्छेदकीह्रदादिस्तद्वृत्तित्वानधिकरणत्वं धूमादाविति लक्षणसमन्वयः। अत्र साध्यनिष्ठाभावप्रतियोग्याधेयत्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यम् अन्यथा वह्निमान् धूमादित्यादौ पर्व्वतादिसमवेतत्वाद्य-

(१) सद्धेतुस्थले स्वपदम् उदासीनव्यक्तिपरम्, असद्धेतुस्थले हेतुपरमिति भावः।

भावमादायानुपपत्तेस्तथाच सत्तावान् समवायित्वादित्यादौ साध्यनिष्ठाभावीय-समवेतत्वनिष्ठप्रतियोगितावच्छेदकीभूताधिकरणाप्रसिद्धेरव्याप्तिः। वह्निमान् धूमादित्यादावपि धूमादेरयोगोलकीयवह्न्यादिनिष्ठपर्व्वतादिवृत्तित्वाभावस्य प्रतियोगितावच्छेदकपर्व्वतादिवृत्तित्वादव्याप्तिश्च साध्यतावच्छेदकव्यापकीभूताभावनिवेशे च गौरवं इत्याशयेन फलितार्थमाह, 'साध्यनिष्ठाधेयत्वेति, आधेयत्वमिह साध्यतावच्छेदकव्यापकीभूतं ग्राह्यं तेन वह्निमान् धूमादित्यादौ महानसादेः पर्व्वतीयवह्निनिष्ठाधेयत्वानिरूपकत्वेऽपि नाव्याप्तिः। एवं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाधेयता विशेषणीया तेनायमात्मा आत्म-महाकालान्यतरत्वादित्यादौ कालस्य कालिकसम्बन्धावच्छिन्नात्मत्वादिनिष्ठाधेयत्वनिरूपकत्वेऽपि नातिव्याप्ति', तादृशाधेयत्वानिरूपकाधिकरणत्वेत्यत्राधिकरणत्वमविवक्षितं तदनिरूपकत्वमात्रं निविष्टं (१) प्रथमतो द्रव्यं सत्त्वादित्यादावतिव्याप्तेराशङ्कितया व्यभिचारिसामान्य एवातिव्याप्तिमुद्धरति, 'साध्यवद्भिन्नस्येति व्यभिचारनिरूपकाधिकरणस्येत्यर्थः, अत्राधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन वाच्यम्, अन्यथा वह्निमान् धूमादित्यादौ वह्न्यादिनिष्ठाधेयत्वानिरूपकस्यावयवादौ धूमादेः समवायेन वृत्तेरव्याप्त्यापत्तेः इत्यञ्च सत्तावान् द्रव्यत्वादित्यादौ अव्याप्तिः साध्यनिष्ठाधेयत्वानिरू-

---

(१) स्ववृत्तिहेतुतावच्छेदकसम्बन्धावच्छिन्नधेयतावत्त्वसम्बन्धेन साध्यनिष्ठाधेयत्वानिरूपकत्वदन्यत्वम् इत्यर्थस्तेन धूमाधिकरणतामादाय धूमादौ नाव्याप्तिरिति ध्येयम्।

पकाधिकरणे सामान्यादौ हेतुतावच्छेदकसम्बन्धात्मकसमवा-
यादिना वृत्तेरप्रसिद्धेः, एवं द्रव्यं गुण-कर्म्मान्यत्वविशिष्टसत्त्वादि-
त्यादावपि विशिष्टसत्त्वादेः सत्ताद्यनतिरेकितया साध्यनिष्ठा-
धेयत्वानिरूपकाधिकरणगुणादिवृत्तित्वानधिकरणत्वासम्भवादव्या-
प्तिरित्यतो निष्कृष्टार्थमाह, 'साध्यनिष्ठेति, अत्रापि पूर्व्व-
दोषवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाधेयत्व विशे-
षणीयम्, एवमधिकरणत्वमप्य विवक्षितं, तादृशाधेयत्वानिरूप-
कत्वव्यापकतैवाभावे निवेशनीया, तादृशाधेयत्वानिरूपकवृत्ति-
त्वमात्रनिवेशे धूमवान् वह्नेरित्यादौ वह्न्यधिकरणत्वसामान्या-
भावस्य धूमनिष्ठाधेयत्वानिरूपकह्रदादिवृत्तित्वादतिव्याप्तिरतो
व्यापकतानिवेशः, व्यापकत्वञ्च तद्वन्निष्ठान्योन्याभावीयप्रति-
योगितानवच्छेदकत्वं, न तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं,
सर्व्वस्यैव तथाविधवृत्त्याद्यवच्छिन्नाभावप्रतियोगितया तदप्रसिद्धेः,
न वा तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्म्मवत्त्वं तादृश-
प्रतियोगितानवच्छेदकीभूताभावत्वादिकमादाय वह्न्यधिकरणत्व-
सामान्याभावस्यापि धूमानधिकरणत्वव्यापकतया अतिव्याप्त्या-
पत्तेः, अनवच्छेदकत्वञ्चावच्छेदकतापर्य्याप्त्यनधिकरणत्वम् अत
उभयवद्भेदमादाय न दोषः। अथ वा यदधिकरणतासामान्या-
भावत्वं साध्यनिष्ठाधेयत्वानिरूपकवृत्त्यत्यन्ताभावप्रतियोगितानव-
च्छेदकं तत्त्वमेव समुदायार्थः, अतोऽभावत्वादिना व्यापकता-
मादाय न दोषः। अधिकरणता च हेतुतावच्छेदकसम्बन्धाव-
च्छिन्ना ग्राह्या तेन वह्निमान् धूमादित्यादौ वह्न्यनधिकरण-

धूमावयवादौ धूमाधिकरणत्वसामान्याभावासत्त्वेऽपि न क्षतिः, धूमवान् वह्नेरित्यादौ यत्किञ्चिदधिकरणत्वाभावस्यैव धूमानधिकरणत्वव्यापकतया अतिव्याप्तिवारणाय सामान्यपदं, तथाच तादृशाधेयत्वानिरूपकत्वव्यापकाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नाधिकरणतात्वं, यद्रूपावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्व वा तादृशाधेयत्वानिरूपकत्वव्यापकतावच्छेदकं तद्रूपवत्त्वं व्याप्तिरिति फलितार्थः, तेन धूमानधिकरणत्वव्यापकीभूत-धूमाधिकरणत्व-वह्न्यधिकरणत्वोभयसामान्याभावप्रतियोगिताया-वह्न्यधिकरणत्वसामान्यनिष्ठत्वेऽपि नातिव्याप्तिः, यदधिकरणतामात्रनिवेशे द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः द्रव्यत्वानधिकरणगुणादौ हेत्वधिकरणतात्वावच्छिन्नाभावासत्त्वात् अतः यद्रूपावच्छिन्नेति, हेत्वभावस्य व्यापकतानिवेशे हेतुतावच्छेदकसम्बन्धेन तद्वन्निष्ठत्वं निवेश्यं अन्यथा वह्निमान् धूमादित्यादौ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणजलादौ धूमाभावाभावस्य कालिकसम्बन्धेन वृत्तेरव्याप्त्यापत्तेः तथाच सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धेरतो हेत्वधिकरणत्वाभावस्य व्यापता[illegible] मे तल्लक्षणं तथाचाधिकरणताया विशेषणताविशि-[illegible] वृत्तिमत्तया तेन सम्बन्धेन तद्वन्निष्ठत्वं निवेश्यम् अतो न दोषः। पूर्व्वकल्पपरित्यागे वीजमाह, 'तेनेति, 'न दोष इति, सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धावपि तत्तत्सम्बन्धावच्छिन्नाया द्रव्यत्वाधिकरणताया द्रव्ये प्रसिद्धाया अप्र-

भावस्य साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादिति (१) भावः ।

तत्त्वचिन्तामणिदीधितिः ।

साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणकत्वञ्चर-माधिकरणत्वांशस्यानतिप्रयोजनकतया तदपहाय द्वय-मेकोक्त्या अनूद्य दूषयति, 'तदुभयमपीति । साध्ये-त्यादेः साध्यं यदधिकरणानधिकरणं तत्त्वाभावः, साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावस्यार्थः, तत्र केव-लान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्ध्या नानाव्यक्तिसाध्यके च एकसाध्यव्यक्तिनिष्ठाधेयत्वानिरू-पकाधिकरणत्वं साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः क्वचिद्व्यभिचारिण्यतिप्रसङ्गाश्चाद्ये, द्वितीये च साध्य-वैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको-भेदो विवक्षितस्तदा केवलान्वयिनि, यदि च यत्किञ्चि-त्साध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्यके सर्वत्रा-व्याप्तिः ।

गादाधरी विवृतिः ।

साध्यवैयधिकरण्यस्य निरुक्तार्थकत्वे पौनरुक्त्यमतस्तद्व्याचष्टे, 'साध्येति । ननु मूले 'तदुभयमपि साध्यानधिकरणानधिकरण-

(१) साध्यानधिकरणत्वव्यापकत्वादितीति पा° ।

त्वम्' इत्यनेनोक्तलक्षणद्वयार्थानुवादोऽसङ्गतः असमानाधिकरण्य-वैयधिकरण्ययोरधिकरणताद्वयघटितत्वेन ताद्दृशलक्षणयोरधिकरणताद्वयघटितत्वादनुवादे चाधिकरणताद्वयमात्रस्य निवेशादतस्तादृशमूल सङ्गमयति, 'चरमेति, (१) 'अनतिप्रयोजनकतयेति, अनधिकरणत्वस्याधिकरणत्वाभावरूपतया तद्‌घटकाधिकरणत्वांशं परित्यज्य साध्यासामानाधिकरण्याभाव-साध्यवैयधिकरण्याभावनिवेशेनैवोपपत्तिरिति भावः। असामानाधिकरण्याद्यधिकरणत्वाभावस्यासामानाधिकरण्याद्यभावाघटिततया न वैयर्थ्यमित्यनतिप्रयोजनकत्वयेत्युक्तं, 'तदपहाय' चरमाधिकरणत्वांशं परित्यज्य, 'द्वयं' साध्यासामानाधिकरण्याभाव-साध्यवैयधिकरण्याभावरूपलक्षणार्थद्वयं, साध्यानधिकरणानधिकरणत्वमित्यनेन सत्तावान् द्रव्यत्वादित्यादावव्याप्तिवारणायावलम्बितस्य प्रथमलक्षणीयनिष्कृष्टार्थस्य (२) कथञ्चिदपि प्रतिपादनासम्भवात्तदनुवादतानुपपन्नेति यथाश्रुतानुवादपरतया सङ्गमयितुम् अनुवादनीयलक्षणार्थद्वयमाह, 'साध्येत्यादेरिति, लक्षणद्वयस्य क्रमेणेति शेषः, 'तत्त्वाभावः' इत्यन्तेन प्रथमलक्षणार्थकथनम्, एवञ्च साध्यानधिकरणानधिकरणशब्देन साध्यं यदधिकरणानधिकरणकं तद्बोध्यते तदुत्तरत्वप्रत्ययेन तत्त्वं साध्यपदोत्तरसन्निविष्टनञा तदभावः प्रत्याय्यते इति प्रथमलक्षणार्थबोधकत्वं साध्यानधिकरणानधिकरणत्वमित्यस्य। न च साध्याधि-

(१) चरमाधिकरणत्वांशस्येतीति पा०।

(२) प्रथमलक्षणार्थनिष्कर्षस्येति पा०।

करणानधिकरणत्वमित्यनेन नञ्समासे सत्येव तदर्थाभावः नञा प्रत्याययितुं शक्यते तथाच साध्यपदोत्तरनञ्निपातोऽसम्भवी समस्यमानपदपूर्व्वनिपतितस्यैव नञः साधुत्वादन्यथा अचित्त-गुरित्यादौ चित्तादिपदोत्तरमपि नञ्निपातापत्तेरिति वाच्यम्। ससम्बन्धिकार्थबोधकोत्तरपदघटितसमुदायेन समं नञ्समासस्थले नञो मध्यनिवेशस्यापि साधुतासम्पादकत्वात् अन्यथा घटानधि-करणत्वं साध्याभाववद्वृत्तित्वमित्यादौ न घटाद्यधिकरणत्वाद्य-भावप्रत्ययानुपपत्तेः (१) न हि तत्रानधिकरणत्वपदानां घटादिपदैः समासे तादृशार्थप्रतीतिरुपपद्यते, अनधिकरणत्वपदादिजन्यप्रती-तिविशेष्यीभूताभावेन सममेव घटादिसंसर्गभानात् समस्य-मानपदप्रतिपाद्यतावच्छेदककोटिनिविष्टेनापरपदार्थान्वये राज-पुरुषादन्य इत्यर्थे राजापुरुष इत्यादिसमासापत्तेः, एवं नञा अन्वयितावच्छेदकावच्छिन्नाभावस्यैव बोधनात् अधिकरणसामा-न्यभेदवानेवानधिकरणपदार्थः स्यात्तस्य चाप्रसिद्धा नञ्पदाधि-करणपदयोः प्रायत्निकसमासासम्भवाच्चेति, साध्यनिष्ठाधेयत्वा-निरूपकाधिकरणवृत्तित्वाभावरूपप्रथमलक्षणार्थस्य निष्कृष्टतया-ऽनुगतार्थोऽपि साध्यानधिकरणानधिकरणत्वमिति शब्देन प्रति-पाद्यते तथाहि आधेयतानिरूपकार्थकचरमाधिकरणपदघटि-तेनाधिकरणानधिकरणपदेन स्वाधिकरणमनधिकरणम् आधेय-त्वानिरूपकं यस्येति व्युत्पत्त्या अधिकरणनिष्ठभेदप्रतियोगितावच्छे-दकीभूतनिरूपकताकाधेयतावत्त्वेनान्यपदार्थो बोध्यते बहुव्रीहौ

(१) घटाधिकरणत्वाभावसाध्याभाववद्वृत्तित्वाभावयोः प्रत्ययानुपपत्तेरिति पा०।

विग्रहवाक्यात्तादृशविशेषण-विशेष्यभावापन्नस्य बोधस्तद्विपरीत-विशेष्य-विशेषणभावापन्नस्य प्रत्ययात् चित्रा गौर्यस्येति वाक्यात् यत्पदार्थसम्बन्धित्वेन चित्रगोः चित्रगुरित्यतश्चित्रगोनिष्ठसम्बन्ध-प्रतियोगित्वेन यत्पदार्थस्य बोधात्, प्रकृतस्थले च विग्रवाक्याद-न्यपदार्थनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदवत्त्वेनाधिकरणप्रतीतेः, एवं साध्यं यदधिकरणानधिकरणकं यदधिकरणनिष्ठभेदप्रति-योगितावच्छेदकीभूतनिरूपकताकाधेयतावदिति व्युत्पत्त्या साध्य-निष्ठाधेयत्वनिरूपकत्वावच्छिन्नभेदवधिकरणवृत्तित्वं 'साध्याधिक-रणानधिकरणत्वशब्देन प्रत्याय्यते तदभावः साध्यपदोत्तरनिविष्ट-नञ्पदघटिततद्वाक्येनेति। द्वितीयलक्षणार्थमाह, 'साध्यस्येति, तथाच साध्यानधिकरणमधिकरणम् आधेयतानिरूपकं यस्येति व्युत्पत्त्या साध्यानधिकरणाधिकरणत्वशब्देन साध्यानधिकरणवृ-त्तित्वं प्रत्याय्यते, तदभावश्च द्वितीयनञेति उक्तशब्दस्य एतद-र्थानुवादकतेति भावः। पूरणसम्बलितं तत्रेति ग्रन्थं व्याचष्टे, 'तत्रेत्यादिना, मूले केवलान्वयिनि वह्निमान् धूमादित्यादौ चाव्या-प्तेर्हेत्वकथनात् प्रथमलक्षणे केवलान्वयिन्यव्याप्तिहेतुं पूरयति, 'साध्येत्यादिना 'अप्रसिद्धेरत्यन्तेन, साध्यनिष्ठाधेयतानिरूपकसामा-[illegible] वे [illegible] येण इयमप्रसिद्धिरभिहिता, यत्किन्निरूपकभेद-निवेशे च तादृशभेदवदधिकरणे हेतोर्वृत्तेरव्याप्तिर्बोध्या, वक्ष्य-माणक्रमेण नानाव्यक्तिसाध्यकहेत्वन्तरेऽप्यव्याप्तिसत्त्वात् धूममात्रे तत्कथनं मूलकृतां न्यूनतासम्पादकमतो धूम इत्यस्य उपलक्ष-णत्वाभिप्रायेण पाठमदृत्वेव व्याचष्टे, 'नानाव्यक्तिकेति, अत्र च

यत्रासम्भवस्तत्राव्याप्तिर्बोध्या किञ्चिदूनाभिधानात् घटत्वादित्यादौ उक्तमार्गरीत्या अव्याप्तिविरहोऽपि न इति.. अत एवाग्रे नानाधिकरणके सत्त्वेनेति वक्ष्यति । यदा नानाव्यक्तिसाध्यक इत्यस्य निरो-व्यधिकरणवृत्तिसाध्यतावच्छेदकक इत्यर्थः.. एतदव्याप्तिं तु प्रक-टयति, 'एकेत्यादिना 'इतोऽन्तेन, अनया रीत्या अव्याप्तिप्र यत्किञ्चित्साध्यनिष्ठाधेयत्वनिरूपकत्वावच्छिन्नभेदनिवेशाभिप्रायेण, साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशे च केवलान्वयिन्य-व्याप्तिरेव दोष इति ध्येयम् । 'पृथिवीति पृथिवीत्वविशिष्ट-द्रव्यत्ववत् द्रव्यत्वादित्यादावतिव्याप्तिरिति, विशिष्टद्रव्यत्वस्य शुद्ध-द्रव्यत्वानतिरेकितया पृथिव्यादेः साध्यनिष्ठाधेयत्वानिरूपकत्वा-सम्भवादिति भाव । आधेयतायां साध्यतावच्छेदकावच्छिन्नत्वविव-क्षणे नैषदोषः अधिकरणतानिरूपकतावच्छेदकस्यैवाधेयतावच्छेद-कतया पृथिवीनिष्ठाधिकरणतानिरूपकतानवच्छेदकपृथिवीत्वविशिष्टद्रव्यत्वत्वादेः पृथिवीनिरूपिताधेयतानवच्छेदकत्वादिति ध्येयम् । द्वितीयलक्षणे साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदनिवेशे धूमादौ नाव्याप्तिः अतस्तत्पक्षे केवलान्वयिसाध्यकाव्याप्तिरेव, यत्किञ्चित्-साध्यवद्व्यक्तिनिवेशे च उभयस्थलएवाव्याप्तिरिति मूलाभिप्रायं स्फुटयति. 'द्वितीये चेत्यादिना, साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदः साध्यवैयधिकरण्ये विवक्षित इति योजना, साध्यवैयधि-करण्यघटकतया विवक्षित इत्यर्थः, 'केवलान्वयिनि' केवलान्वयि-न्येव, नानाधिकरणके एकव्यक्तिसाध्यकेऽपि सत्तावान् द्रव्यत्वादि-त्यादौ एकस्य साध्यवतोभेदस्यान्यत्र साध्यवति सत्त्वादव्याप्तेर्नाना-

व्यक्तिसाध्यकेऽपि एतद्वृत्तित्वगर्भत्वात् एतत्त्वादिनाव्याप्यासम्भवात् नानाव्यक्तिकेति नोक्तं, तथा च द्वितीयलक्षणाभिप्रायेण धूम इति मूलं नानाधिकरणसाध्यसामान्योपलक्षणमिति भावः ।

तत्त्वचिन्तामणिदीधितिः ।

केचित्तु साध्यासामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे तेनैव सम्बन्धेन साध्यवद्वृत्तित्वाभावस्तदधिकरणाभिन्नत्वमर्थस्तेन धूमस्य स्वावयवे संयोगेन वह्निमति च समवायेनावृत्तावपि न क्षतिः, तादृशाभावस्य सम्बन्धान्तरेण तत्रैव वर्त्तमाने सुलभः व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरण एव तादृशि तादृशाभाववत्त्वं, सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यनुभवात् । न चैवं गुण-कर्म्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः, विशिष्टस्यातिरिक्तत्वात् अनतिरिक्तत्वे तु विशेषण-विशेष्यसम्बन्धस्यैव परम्परया व्याप्तत्वात्, केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुः, तच्चिन्त्यं, सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमितिप्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धेन सामानाधि-

करणस्य वा अभावं गुणोऽवगाहते न तु सत्तायामेव
द्रव्यवृत्तित्वाभावं सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्य-
वृत्तित्वाभावो न सत्तावृत्तिरित्यादिसर्व्वजनसिद्धप्रतीति-
बाधितत्वात् बाधकाभावात्तु संयोग-तदभावयोरव-
च्छेदकभेदेनैकत्र प्रतीत्या तदुभयोरेकत्र सिद्धिः। अती-
न्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारिण्यतिप्रसङ्गाच्च तत्र
सामानाधिकरण्याभावस्य प्रत्यक्षत्वासम्भवेनासिद्धेः।
न च तदभाववद्वृत्तित्वेन तत्र तदनुमेयं, तद्वद्वृत्ति-
भिन्नत्वस्योपाधित्वात्। किञ्च इदमिदानीमितिप्रतीति-
नियामकविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः
तेन सम्बन्धेनाधिकरणे काले तेन सम्बन्धेन साध्य-
वद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः।
इत्यनुमानदीधितौ सिंह-व्याघ्रनामकव्याप्ति-
द्वयं समाप्तम्।

गादाधरी विवृतिः।

साध्यासामानाधिकरण्यानधिकरणत्वमित्यत्र साध्यासामा-
नाधिकरण्यपदेन साध्याधिकरणवृत्तित्वाभावविवक्षणेऽपि द्रव्यं
सत्त्वादित्यादावतिव्याप्तिर्न सम्भवति सामानाधिकरण्यस्याव्याप्य-
वृत्तितया सत्तादावपि गुणाद्यवच्छेदेन द्रव्यत्वादिसामानाधि-

करणाभावसत्त्वात् किन्तु वह्निमान् धूमादित्यादावव्याप्तिः स्वावयवावच्छेदेन धूमादेरपि वह्न्यादिसामानाधिकरण्याभावसत्त्वात्। साऽपि हेतुतावच्छेदकसम्बन्धेन यद्धेतुमत् तदवच्छिन्नत्वेनाभावं विशिष्य वारयितु शक्यते इत्यभिप्रायेण तत्पदं तादृशाभावपरतया वर्णयतः सार्वभौमस्य मतमुत्थापयति, 'केचित्त्विति, 'हेत्वधिकरण इति सप्तम्यर्थोऽभावान्वयि अवच्छिन्नत्वं, 'तेनैव सम्बन्धेनेति तृतीयार्थो वृत्त्यन्वितमवच्छिन्नत्व, 'वृत्तिपदस्य सम्बन्धार्थकत्वे तु अभेदएव तदर्थः, अनधिकरणत्वपदस्याधिकरणत्वाभावोऽभावमात्रं वा यद्यर्थः स्यात् तदा अव्याप्यवृत्त्यधिकरणतया अव्याप्यवृत्तितया सत्तादौ द्रव्याद्यवच्छेदेन साध्यसामानाधिकरण्याभावाधिकरणत्वाभावस्य सामानाधिकरण्यरूपतदभावाभावस्य चाक्षतत्वादतिव्याप्तिस्तदवस्थैवेत्यनधिकरणपदमधिकरणभेदवदर्थकतया व्याकरोति, 'तदधीति, यद्यप्यधिकरणभेदेनाभावभेदाभावात् संयोगादिना धूमाद्यधिकरणपर्व्वताद्यवच्छिन्नो यः सम्बन्धान्तरेण तद्वृत्तिरूपादिनिष्ठवह्न्यादिमत्संयुक्तत्वाद्यभावस्तस्यैव स्वावयवाद्यवच्छेदेन धूमादौ वर्त्तमानतया धूमादेस्तादृशाभावानधिकरणत्वं दुर्घटं, तथापि तादृशहेत्वधिकरणावच्छिन्नत्वविशिष्टाभावाधिकरणत्वस्यैव विवक्षणीयतया न दोषः। रूपे पर्व्वते न वह्निमत्संयुक्तत्वमिति प्रतीतिवत् पर्व्वते धूमे न वह्निमत्संयुक्तत्वमिति प्रतीत्यनुदयात् पर्व्वतावच्छिन्नत्वविशिष्टनिरूपिताया वह्निमत्संयुक्तत्वाभावीयविलक्षणाधिकरणताया रूपादावेवोपगमात्, अभावाधिकरणता-

यामेव वाधिकरणविशेषावच्छिन्नत्वं निवेशनीयं तावतापि धूम-रूपयोरभिन्नस्याप्यभावस्य परस्परानवच्छेदकावच्छिन्नाधिकरणता-भेदेन कथितदोषनिराकरणसम्भवात्। उभयत्र हेतुतावच्छेदक-सम्बन्धप्रवेशप्रयोजनं क्रमेण दर्शयति, 'तेनेति स्वावयवे संयोगेना-वृत्तावपीत्यर्थः। तथाच धूमावयवावच्छेदेन साध्यवत्संयुक्तत्वाभाव-सत्त्वेन (१) तदभावस्याव्यततया प्रथमतो हेतुतावच्छेदकसम्बन्धा-निवेशे स्वावयवरूपस्वाधिकरणावच्छिन्नसाध्यवत्संयुक्तत्वाभावानधि-करणत्वविरहेण संयोगेन धूमहेतौ कस्यापि साध्यस्य व्याप्तिर्न स्या-दिति भावः। यद्यपि तादृशसम्बन्धनिवेशेऽपि वह्निमत्संयुक्तत्वादेः कालिकाव्याप्यवृत्तितया धूमादावुत्पत्तिकालावच्छेदेन वह्निमत्-संयुक्तत्वाभाववृत्तेः पर्व्वतादेरपि कालोपाधितया तादृशाभावाव-च्छेदकत्वादव्याप्तिस्तादवस्थ्यं तथापीदानीमितिप्रतीतिनियामक-कालस्यावच्छेदकत्वादिहेतिप्रतीतिनियामकदेशनिष्ठावच्छेदकताया वैलक्षण्यं दुरपह्नवं यदभावात् पर्व्वते धूमे न वह्निमत्संयु-क्तत्वमिति प्रत्ययाभावः हेतुमन्निष्ठतादृशावच्छेदकतानिरूपकत्व-मेव निवेश्यमिति न दोषः। न च कालोपाधेरवच्छेदकतायाम् अवच्छेद्याधिकरणेनावच्छेदकस्य कालिकसम्बन्धो नियामकः इत्यस्तु तादृशसम्बन्धेनानवच्छिन्नत्वमेव देशस्यावच्छेदकतायां वैलक्षण्यं अन्यस्य दुर्वचत्वात् तथाच व्यभिचारिणि कालिकसम्बन्धेन हेतो-र्वर्त्तमानसाध्यसामानाधिकरण्याभावे व्यभिचारनिरूपकाधिकर-णीयावच्छेदकतायां कालिकसम्बन्धानवच्छिन्नत्वविरहात् अति-

(१) साध्यवत्संयुक्तत्वाभावसत्त्वेनेति पा० ।

व्याप्तिरिति वाच्यं। कालिकाव्याप्यवृत्तावपि कालिकसम्बन्धघटितात्मत्वाकाशत्वादिसामानाधिकरण्ये दैशिकसम्बन्धेनात्मत्वाद्यनधिकरणकालस्य देशविधयैवावच्छेदकत्वात् कालविधया कालस्यावच्छेदकत्वे तादृशसामानाधिकरण्यस्य कालिकाव्याप्यवृत्तित्वापत्तेः कालिकसम्बन्धानवच्छिन्नत्वादन्यस्यैव वैलक्षण्यस्य देशविधया अवच्छेदकतायां स्वीकरणीयत्वात् हेत्वधिकरण इत्यत्र हेतुपदम् अधिकरणभिन्नत्वानुयोगितत्तद्धेतुपरम् अतो धूमाद्यन्तरसंयुक्तसावयवावच्छेदेन धूमादेस्तादृशाभाववत्त्वेऽपि न क्षतिः। एवञ्च व्याप्तेः प्रतिधूमादिकं भिन्नत्वेऽपि केनापि रूपेणानुगतानां तासां धूमत्वादिकमवच्छेदकम्। यत्तु (१) हेतुपदं हेतुतावच्छेदकावच्छिन्नपरमेव हेतुतावच्छेदकसम्बन्धेन स्वानुयोगिनो यदधिकरणं तदनवच्छिन्ना या अधिकरणता तदन्यत्वेन साध्यसामानाधिकरण्याभावाधिकरणताया विशेषणीयत्वान्नोक्तदोषावकाशो न वा अननुगमः। एवञ्च कालोपाधिविधया हेत्वधिकरणदेशस्य अवच्छेदकत्वेन उक्तदोषस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकत्वनिवेशेनापि वारणसम्भवः पर्व्वतरूपादौ हेतुतावच्छेदकसम्बन्धावच्छिन्नपर्व्वतादिनिष्ठावच्छेदकताकसाध्यसामाना[illegible] रूपादिनिष्ठनिरुक्ताभावाधिकरता[illegible] धूमादिप्रसिद्धनिरुक्ताधिकरणतानां भेदस्याक्षततया तदन्यत्वेन धूमादौ लक्षणसमन्वयादिति, तन्न(२)साधु, तथा सति

(१) यत्त्वित्यत्र यथवेति पा०।

(२) तन्नेत्यादि प्रसिद्धेरित्यन्त पाठः कस्मिंश्चित् आदर्शपुस्तके नास्ति।

विह्नित्वानधिसम्बन्धागतेः गगननिष्ठसाध्यसामानाधिकरण्या-भावाधिकरणतायाः पृथ्वीत्वाधिकरणताभिन्नायाः प्रसिद्धेः। 'वह्निमति चेति, तथाच तेनैव सम्बन्धेनेत्यनुक्तौ यत्किञ्चित्सम्बन्धेनेत्युक्तौ पर्व्वताद्यवच्छेदेन वह्निमत्संयुक्तत्वस्यापि तदवच्छिन्नवह्निमत्समवेतत्वाभावसत्त्वाद्धूमस्य वह्निव्याप्यत्वं नोपपद्येतेति भावः। साध्यवत्सम्बन्धसामान्याभावनिवेशे वह्निमत्समवेतत्वाद्यभावस्य लक्षणाघटकत्वेऽपि हेत्वधिकरणविशेषावच्छिन्नसाध्यवत्सम्बन्धसामान्याभावाप्रसिद्ध्या असम्भवो बोध्यः, साध्यवत्सम्बन्धस्य गगनादेर्हेतुमति सम्बन्धासम्भवादवच्छेद्याधिकरणसम्बन्धिन एव अवच्छेदकतया तन्निष्ठाभावे हेतुमतोऽनवच्छेदकत्वात्, 'न चेति-रिति नाव्याप्तिरसम्भवश्चेत्यर्थः, साध्यवत्त्वं साध्यतावच्छेदक-सम्बन्धेन बोध्यं, तेन समवायेन वह्नौ साध्ये संयोगेन हेतौ धूमे पर्व्वताद्यवच्छेदेन वह्निमद्वृत्तित्वसामान्याभावस्यासत्त्वेऽपि नाति-व्याप्तिः, न वा सद्धेतावपि यत्किञ्चित्सम्बन्धेन यः साध्यवांस्तद्वृ-त्तित्वाभावस्य स्वाधिकरणावच्छेदेन सत्त्वेऽपि दोषः। साध्यञ्च उपलक्षणविधया अभावप्रतियोगितावच्छेदककोटौ निवेशनीयं न तु विशेषणविधया, तेनोत्पत्तिक्षणावच्छिन्नघटादौ गन्धाद्यसत्त्वात् तादृशघटाद्यवच्छेदेन पृथिवीत्वादौ गन्धादिविशिष्टवृत्तित्वाभाव-सत्त्वेऽपि गन्धवान् पृथिवीत्वादित्यादौ मूलावच्छिन्नवृक्षादौ कपि-संयोगाद्यसत्त्वात्तादृशवृक्षाद्यवच्छेदेन एतद्वृक्षत्वादौ कपिसंयोगा-दिविशिष्टवृत्तित्वाभावसत्त्वेऽपि कपिसंयोगी एतद्वृक्षत्वादित्यादौ वा नाव्याप्तिः तत्तत्काल-देशावच्छिन्नतत्तदधिकरणाद्यवच्छेदेनापि

[illegible] तादृशसाध्योपलक्षितधर्म्मिवृत्तित्वसत्त्वात्। न चैव-
मपि धूमादौ पर्व्वतादिवृत्तेरनवच्छेदको यो देशः कालो वा [illegible] पर्व्वतावच्छेदेन वह्न्यादिमद्वृत्तित्वाभावस्य धूमादौ [illegible] विरहेऽपीति वाच्यम्। तत्तद्देश-कालावच्छिन्नपर्व्व- [illegible] भिन्नतया धूमादावभाववृत्तावपि तादृशस्यानव- [illegible]त्वात्। न चैवम् उत्पत्तिक्षणविशिष्टपर्व्वते धूमस्य न वह्नि- [illegible] प्रतीत्यनुपपत्तिः द्रव्यत्वे गुणे न पृथिवीत्वा- [illegible] त्यादिवत्प्रतीतिः सामानाधिकरण्याव [illegible] न सम्भवति विशेषणस्यावच्छेदकत्व [illegible] सम्भवादिति वाच्यम्। तादृशप्रतीतीनां [illegible] विशिष्ट [illegible] त्वाभावावगाहितयैवोप [illegible] न वह्निसंयुक्तत्वमित्यादौ पर्व्व- [illegible] वह्निसमसंयुक्तत्व तस्य उत्पत्तिक्षणे नाव [illegible] धूमनिष्ठवह्निसमसंयुक्तत्वाभाव [illegible] नाप्यं पर्व्वतस्य प्रतियोगित्व [illegible]

[illegible]

केचित्तु विशिष्टपर्व्वतादेरवच्छेदकतामादायाव्याप्तिवारणाया-वच्छेदकान्तरानवच्छिन्नहेत्वधिकरणावच्छिन्नत्वम् अभावे निवेशनीयम् एवञ्च पर्व्वतादेः कालविधया धूमनिष्ठवह्निमत्संयुक्तत्वाद्यभावावच्छेदकत्वस्यापि व्याहत्तिः पर्व्वतादेः स्थूलकालतया वह्निमत्संयुक्तत्वादिरूपप्रतियोगिनोऽप्यवच्छेदकत्वात् तन्निष्ठाभावावच्छेदकताया अविरोधायावान्तरकालावच्छिन्नत्वोपगमादित्यप्याहुः।

हेतुमदसम्बद्धे साध्यसामानाधिकरण्याभावस्योक्तयुक्त्या हेत्वधिकरणावच्छिन्नत्वविरहात् हेतुतानवच्छेदकसम्बन्धेन हेतुमत्सम्बद्धे हेतुमदवच्छिन्नतादृशाभावप्रसिद्धिमाह, 'तादृशेति हेतुतावच्छेदसम्बन्धेन साध्यवदवृत्तित्वस्य तेन सम्बन्धेन हेतुमदवच्छिन्नाभावघेत्यर्थः, 'तत्रैव' तादृशहेतुमत्येव। न च तथाविधे रूपादौ वह्निमत्संयुक्तत्वाद्यभावो व्याप्यवृत्तिरेवेति तत्राधिकरणविशेषस्यावच्छेदकत्व निर्युक्तिकं प्रतियोगिमत्यभाववृत्तावेव विरोधभञ्जनार्थमवच्छेदकभेदापेक्षणात् धूमवत्कपालादिसमवेतवह्निमन्महानसादिसंयुक्तघटादौ महानसाद्यवच्छेदेन वह्निमत्संयुक्तत्ववति हेतुमत्कपालाद्यवच्छेदेन वह्निमत्संयुक्तत्वाभावसौलभ्येऽपि एतद्रूपवान् एतद्रसादित्यादौ एतद्रूपादिमत्समवेतत्ववति हेत्वधिकरणावच्छेदेन प्रतियोगिसत्त्वात्तदवच्छेदेन साध्यसामानाधिकरण्याभावहत्त्यसम्भवादेतद्रूपादिमति सम्बन्धान्तरेण वर्त्तमानसाध्यवत्समवेतत्वाभावस्य व्याप्यवृत्तितया हेत्वधिकरणानवच्छिन्नत्वानिरुक्ताभावाप्रसिद्धेर्दुर्वारत्वादिति वाच्यम्। पर्व्वते रूपे न

वह्निमत्संयुक्तत्वमिति प्रतीतिबलेन व्याप्यवृत्तेरपि सामानाधि-
करण्याभावस्याधिकरणविशेषावच्छिन्नत्वोपगमात् ।

यत्तु व्याप्यवृत्तेरभावस्य अधिकरणविशेषावच्छिन्नत्वानभ्युपगमे हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये हेत्वनुयोगिकत्व-हेत्वधिकरणविशेषावच्छिन्नत्वोभयाभावो विवक्षणीयः तथाच धूमादिनिष्ठस्वावयवाद्यवच्छिन्नतदधिकरणताया हेतुतावच्छेदकसम्बन्धेन हेतुमदवच्छिन्नत्वस्य रूपादिनिष्ठवह्निमत्संयुक्तत्वाद्यभावाधिकरणतायां घटादिनिष्ठधूमवत्कपालाद्यवच्छिन्नतदधिकरणतायाञ्च हेत्वनुयोगिकत्वस्याभावेनोभयाभावसत्त्वात् लक्षणसमन्वय इति, तन्न, व्याप्यवृत्तेरवच्छेदकानभ्युपगमे पृथिवी रूपादित्यादावतिव्याप्तिः पृथिवीत्वादिव्यभिचारिजलीयरूपादिनिष्ठसाध्यसामानाधिकरण्याभावस्य व्याप्यवृत्तितया तदधिकरणतासामान्ये निरुक्तोभयाभावस्याक्षतत्वात् हेत्वधिकरणावच्छिन्नत्वस्थाने अवच्छिन्नत्व हेत्वधिकरणानवच्छिन्नत्वोभयाभावस्यैव निवेशनीयत्वान्नायं दोषः जलरूपादिनिष्ठपृथिवीत्ववत्त्वाभावाधिकरणतायामवच्छिन्नत्वविरहेणोभयाभावसत्त्वात् एवञ्च एतावतैव दर्शितातिप्रसक्तेरपि निवारितत्वात्तादृशोभयाभाववत्तादृशाधिकरणतावदन्यत्वमेव निवेशनीयं न तूक्ताधिकरणतासामान्ये हेत्वनुयोगिकत्व तादृशोभयाभाववत्त्वोभयाभावः प्रयोजनविरहादिति केचिदपि वक्ष्यमाणाया, कालिकादिसंसर्गेण हेतावच्छेदकत्वादिदूषणैरेवेति तत्र कालिकादिसम्बन्धेन धूमी गगना द्यवृत्तिनिष्ठसाध्यवत्त्व सामानाधिकरण्याभावाधिकरण-

तायाः प्रसिद्धेः अवृत्तावेव सत्त्वेन तादृशाभाववत्त्वप्रसिद्ध्या सम्बन्धान्तरेण वर्त्तमानपर्य्यन्तानुधावनविरोधः तस्मात् व्याप्यवृत्तेरप्यवच्छेदकत्वमेव ग्रन्थकारानुमतमित्यवधेयम्। द्रव्यं सत्त्वादित्यादावाशङ्कितामतिव्याप्तिमुद्धरति, 'व्यभिचारिण्येति, 'तादृशीति हेतुतावच्छेदकसम्बन्धेन हेतुमतीत्यर्थः, अवच्छेदकत्वं सप्तम्यर्थः, 'तादृशाभाववत्त्व' हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभाववत्त्वम्। अत्र प्रमाणाकाङ्क्षायामाह, 'सत्तायामिति, तादृशप्रतीत्या द्रव्यत्वसामानाधिकरण्यवत्यामपि सत्ताया तदनवच्छेदकगुणाद्यवच्छेदेन तदभाववत्त्वावगाहनादिति ध्येयम्। एवं सत्तायां द्रव्यत्वसामानाधिकरण्याभावोपगमे विशिष्टसत्त्वे गुणाद्यन्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नेऽव्याप्तिरिति गुणाद्यवच्छेदेन साध्यसामानाधिकरण्याभाववत्ता केनापि रूपेण तदनधिकरणत्वासम्भवादिति भावः। 'विशिष्टस्येति, तथाच विशिष्टसत्त्वं द्रव्यमात्रवृत्ति तदधिकरणत्वं न गुणादेरिति न हेत्वधिकरणावच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववत्त्वमिति नाव्याप्तिरिति भावः। यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छिन्नत्वं निवेश्यापीयमव्याप्तिः शक्यते वारयितुं तथापि प्रकारान्तरेणाव्याप्तिवारणसम्भवे लघुनोऽधिकनिवेशनमनुचितमित्यभिप्रेत्य विशिष्टस्यातिरिक्तत्वादिपक्ष आश्रितः। न च हेतुतावच्छेदकविशिष्टाधिकरणतानिवेशनमावश्यकम् अन्यथा इदं स्पन्दवत् मूर्तत्व-मूर्तत्वोभयस्मादित्यादौ मूर्तत्वे मूर्तत्वे च हेतौ साधिकरणे गगने सत्त्वेऽपि च साध्यसामानाधिकरण्याभावविरहेणाव्याप्ति-

प्रसङ्गादिति वाच्यम्। अनुगतस्य एकविशिष्टापरस्वरूपतामत-
मवलम्ब्य विशिष्टस्यातिरिक्तत्वेन तत्र स्वावच्छिन्ननिरूपिताधि-
करणत्वस्वरूपपरम्परासम्बन्धेनाभावत्वेन ईदृशमिति स्वीकृत्यैव
वा तदव्याप्तेः समाधानसम्भवात्। ननु द्रव्यं गुणाद्यन्यत्वे सति
सत्त्वादित्यादौ विशिष्टस्यातिरिक्तत्वपक्षमवलम्ब्याव्याप्तिवारणं न
विचारसहं तथाहि गुणादिवृत्तिसत्त्वादितो गुणाद्यन्यत्वविशिष्ट-
सत्त्वादेरतिरिक्तत्वेऽनुगतधर्म्मभावोच्छेदः एकव्यक्तिवृत्तित्वविशिष्ट-
स्यापरव्यक्तिवृत्त्यन्यत्वात्। न च तत्तद्व्यक्तिवृत्तित्वविशिष्टसत्त्वादीनां
मिथो भेदेऽपि शुद्धसत्तादिकमनुगतं निराबाधमेवेति वाच्यम्।
शुद्धसत्तादौ तत्तद्व्यक्तिवृत्तित्ववैशिष्ट्याभ्युपगमे भवतान्तदेकत्वा-
सम्भवात् तदनभ्युपगमे तस्यावृत्तित्वप्रसङ्गात् एवं सर्व्वेषामेव
वस्तूनां तत्तत्क्षणवृत्तित्वरूपविशेषणभेदात् भेदप्रसक्त्या क्षण-
भङ्गापत्तिपर्य्यवसानं दुर्व्वारमेव। अथ प्रत्यभिज्ञाद्यनुरोधेन एक-
स्मिन् नानादेश-कालवृत्तित्ववैशिष्ट्यं स्वीक्रियत एव परन्तु गुणे
द्रव्यवृत्तित्वविशिष्टसत्ता नास्ति इदानीं पूर्व्वक्षणवृत्तित्वविशिष्ट-
घटो नास्तीति प्रतीत्यनुरोधेन मिथो भिन्ना अपि तत्तद्विशे-
षणविशिष्टसत्त्व-घटादयः स्वीक्रियन्ते तदवलम्बनेनैव तादृशप्रती-
त्युपपत्तेः द्रव्यवृत्तित्वादिवैशिष्ट्यपुरस्कारेण चानुगतसत्तादेर्द्रव्य-
[illegible] न स्वीक्रियते अपि तु तदन्यतादृशविशेषणविशिष्ट-
गुणाद्यवृत्तिवस्तुन एवेति तत्र द्रव्यत्वादिव्याप्तिविरहेऽपि न क्षति-
रिति चेत्, तादृशवस्तूनां केन रूपेण व्याप्यता, न द्रव्यवृत्तित्वादि-
विशिष्टत्वेन, तादृशरूपस्याव्याप्यानुगतधर्म्मसाधारण्यात्, नापि

ताद्दशविशेषणविशिष्टतत्तद्व्यक्तित्वादिना, ताद्दशविशेषणवैशिष्ट्यांशस्य व्यर्थत्वात् तद्व्यक्तित्वाद्यनुपस्थितावनुमानानिर्व्वाहाच्च, एवं विशिष्ट-सत्ता नास्तीत्यत्र विशिष्टसत्तात्वाद्यवच्छिन्नाभावस्य न विषयता-सम्भव तद्रूपावलीढ़ानुगतसत्तावति तद्रूपावच्छिन्नाभावासम्भवात् । नापि तत्तद्व्यक्तित्वाद्यवच्छिन्नाभावस्य, तत्तद्व्यक्तित्वस्य प्रतियोगि-कोटावनुल्लेखात्, विशेषणावच्छिन्नप्रतियोगिकः सम्बन्धो विलक्षणः स च नानुगतसत्तायाः सम्बन्धः अपि त्वतिरिक्तविशिष्टसत्ताया-एवेति प्रतियोगितावच्छेदकधर्म्मस्य गुणादिवृत्तिसत्तादिसाधारण्ये-ऽपि तत्र विशिष्टसत्ताभावोऽस्त्यतएव प्रतियोगितावच्छेदकावच्छिन्न-प्रतियोगिताकसम्बन्धशून्यत्वमात्रस्य विशिष्टाभावसत्त्वेऽपेक्षितत्वा-दिति चेत्, तर्हि गुणादिसाधारणसत्ताया एव ताद्दशातिरिक्त-सम्बन्धेन गुणादिव्यावृत्तिः क्रियतां किं सम्बन्धान्तरकल्पनेनेत्यभि-प्रत्याह, 'अनतिरिक्तत्वे त्विति, 'विशेषण-विशेष्यसम्बन्धस्यैवे[...] सत्तानिष्ठगुणाद्यन्यत्ववैशिष्ट्यस्यैवेत्यर्थः, 'परम्परया' परम्प[...] सम्बन्धेन स्वावच्छिन्ननिरूपितसमवायादिसम्बन्धेनेति या[...] 'व्याप्तत्वादिति, गुणाद्यन्यत्ववैशिष्ट्यावच्छिन्नाधिकरणताया [...]दावसत्त्वात् ताद्दशसम्बन्धेन तद्वैशिष्ट्यस्य द्रव्यमात्रवृत्तित्वा[...] भावः । 'एवकारेण सत्ताया व्याप्यत्वव्यवच्छेदः, यत्र [...] विशेषावच्छिन्नसत्तादिहेतुकद्रव्यत्वाद्यनुमितिरभिमता [...]शिष्ट्यहेतुकानुमितिरेवोपेयते वैशिष्ट्येऽपि परस्प[...] व्याप्तिधीविरहे चानुमितिरसिद्धैवेति भावः । यद्य[...] [...]तसम्बन्धस्य विलक्षणत्वे ताद्दशसम्बन्धेन

व्याप्यत्व निर्व्वहति तथापि विशेषणावच्छिन्ननिरूपितसमवायत्वादिना न सत्तादिसम्बन्धिता किन्तु विशिष्टसत्तावानिति प्रत्यये वैशिष्ट्यस्यैव सत्तादिविशेषणतापन्नस्य उक्त परस्परासम्बन्धेन धर्म्मिणि विशेषणतोपगमान्नातिप्रसङ्गः इत्याशयेन इदमभिहितम्। नन्वेवं रीत्या प्रथमलक्षणपरिष्कारे वक्ष्यमाणकेवलान्वयिसाध्यकाव्याप्त्यसङ्गतिः तत्रापि सम्बन्धान्तरेण हेतुमद्वृत्ती हेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्याभावप्रसिद्धया लक्षणगमनसम्भवादित्यत आह, 'केवलान्वयिनीति, 'द्वितीयलक्षणेति। न च 'तच्चेत्यनेन (१) उभयत्वावच्छिन्नस्यैव परामर्शात् प्रथमलक्षणे अव्याप्त्यभावे असङ्गतिर्दुर्व्वारैवेति वाच्यम्। केवलान्वयिसाध्यके धूमे चाव्याप्तिप्रदर्शनादुभयत्वेनोपस्थितेऽपि लक्षणद्वये यथायोगं तत्तत्स्थले व्याप्त्यन्वये तात्पर्य्यात्। यद्यपि धूमादावपि साध्यसामानाधिकरण्यसामान्याभावघटितस्य प्रथमलक्षणार्थस्य नाव्याप्त्यवकाशः, तथापि यत्किञ्चित्साध्यवद्व्यक्तिभेदनिवेशाभिप्रायेण द्वितीयलक्षणस्येव यत्किञ्चित्साध्यसामानाधिकरण्याभावनिवेशाभिप्रायेणैव प्रथमलक्षणस्यापि नानाव्यक्तिसाध्यके अव्याप्तिप्रदर्शनमविरुद्धं। मूले च 'यत्किञ्चित्साध्यानधिकरण इत्युपलक्षणं यत्किञ्चित्साध्याधिकरणावृत्तिरित्यपि बोध्यम्, तेन प्रथमलक्षणाव्याप्तिसम्पादकहेत्वकथनात् न्यूनत्वस्य नावकाश इति ध्येयम्। सामानाधिकरण्यस्याव्याप्यवृत्तितायां प्रमाणसिद्धायामेव दर्शितातिव्याप्तिर्वारयितुं शक्यते तत्रैव न प्रमाणम् उक्तप्रतीतेरन्यविषयकत्वादित्याह,

(१) मूलोक्ततच्चेत्यनेनेत्यर्थः।

'सत्तायामिति, 'प्रतीतिर्हीति,'अभावं गुणेऽवगाहत इत्यनेनान्वयः, 'अवच्छेदकत्वस्येति निरूपकत्वस्येत्यर्थः। तेन सामानाधिकरण्यस्य व्याप्यवृत्तितामते तदवच्छेदकत्वस्याप्रामाणिकत्वेऽपि न क्षतिः, उक्ताकारप्रतीतौ अवच्छेदकत्वानुल्लेखादवच्छेदकत्वाभावावगाहिता न सम्भवतीत्याशङ्कयाह, 'परस्परेति। ननूक्तपरम्परासम्बन्धेन वृत्ति-नियामकः आकाशं द्रव्यत्वसामानाधिकरण्यवदित्यप्रत्ययात् इत्युक्त-सम्बन्धावच्छिन्नाभाव एवाप्रामाणिक इति तादृशावलम्बनतापि नोक्तप्रतीतेः सम्भवतीत्याशङ्कोद्धारायानुरूपं दृष्टान्तमाह, 'द्रव्यत्व-इति, गुणस्यावच्छेदकतानियामकद्रव्यत्वसम्बन्धशून्यतया द्रव्यत्व-निष्ठाभावावच्छेदकत्वं न सम्भवतीत्यगत्या गुणनिष्ठो द्रव्यत्ववृत्ति-पृथिवीत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धावच्छिन्न-तादृशसामानाधिकरण्यस्याभाव एव वा तादृशप्रतीतिविषय इत्य-वश्यमुपेय तद्वदत्रापीत्यर्थः। स्वरसतो यादृशशब्दाद्यादृशोऽर्थः प्रतीयते तादृशशब्दोल्लेखिप्रत्यये तादृशार्थविषयकत्वमेवासति बाधके युज्यत इत्याशयेन दर्शितप्रतीतेः सत्ताया गुणावच्छिन्न-द्रव्यवृत्तित्वाभावावगाहितायां बाधकप्रतीतिमाह, 'सत्ता न द्रव्य-वृत्तित्वाभाववतीति। न च द्रव्यवृत्तित्वाभावाभावस्य द्रव्यवृत्तित्व-रूपस्य सत्तायामसत्त्वेऽपि सत्ताद्वैतस्याः प्रतीतेः बाधकत्व सम्भ-वति विरोध्यविषयकत्वादिति वाच्यम्। तादृशशब्देन द्रव्यवृत्ति-त्वाभाववद्भेदस्यैव प्रत्यायनात् तदाकारप्रतीतिरपि तद्भेदावगाहि-तया बाधकत्वात् भेदस्याव्याप्यवृत्तित्वविरहेण सामानाधिकरण्या-भाववद्भेदस्य तदभावविरोधित्वात्। यदि च भेदस्याव्याप्यवृत्तित्वमत-

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS MR. BERNARD QUARITCH,
11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. O-
HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA

Sanskrit Series

*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	Rs. 1
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1
*Agni Purāṇa, Fasc. 6-14 @ /10/ each	5
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14
Aitereya Lochana	2
*Aṇu Bhāshya, Fasc. 2-5 @ /10/ each	2
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-	1
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3
*Atharvana Upanishad, Fasc. 4-5 @ /10/ each	1
Ātmatattvaviveka, Fasc. I @ /10/ each	0
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-7 @ 1/ each	15
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol. 2, Fasc. 1 @ /10/ each	1
Baudhāyana S'rauta Sūtra, Fasc. 1-3; Vol. II, Fasc. 1-3 @ /10/ each	3
*Bhāmatī, Fasc. 4-8 @ /10/ each	3
Bhaṭṭa Dīpikā, Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1, @ /10/ each	4
Baudhyostatrasangraha	2
Bṛhaddēvatā, Fasc. 1-4 @ /10/ each	2
Bṛhaddharma Purāṇa, Fasc. 1-6 @ /10/ each	3
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each	3
Çrī Çāntinātha Charita, Fasc. 1-3	1
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2 each	8
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-7; Vol. 5, Fasc. 1-4 @ /10/ each	14
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each	3
Ditto Vol. VII, Fasc. 1-5 @ /10/	3
Çatasāhasrikā Prajñāpāramitā, Part I, Fasc. 1-14 @ /10/ each	8
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III, Part I, Fasc. 1-18; Part II, Fasc. 1-10; Vol. IV, Fasc. 1-6 @ /10/ each	35
Ditto Vol. 4, Fasc. 7-8 @ 1/4/ each	2
Ditto Vol. IV, Fasc. 8-9 @ /10/	1
Çlokavartika, (English) Fasc. 1-7 @ 1/4/ each	8
*Çrauta Sūtra of Āpastamba, Fasc. 12-17 @ /10/ each	3
Ditto Çānkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4; Vol. 4, Fasc. 1 @ /10/ each	10
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each	1
Dāna Kriyā Kaumudī, Fasc. 1-2 @ /10/ each	1
Gadadhara Paddhati Kālasāra, Vol. I, Fasc. 1-7 @ /10/ each	4
Ditto Āchārasāraḥ, Vol. II, Fasc. 1-4 @ /10/ each	3
Gobhilīya Gṛhya Sūtra, Vol. I @ /10/ each	3
Ditto Vol. II, Fasc. 1-2 @ 1/4/ each	2
Ditto (Appendix) Gobhila Parisista	2
Ditto Gṛhya Sangraha	0
Haralata	1
Karmapradīpa, Fasc. I	1
Kāla Viveka, Fasc. 1-7 @ /10/ each	4
Kātantra, Fasc. 1-6 @ /12/ each	4
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each	17
*Kūrma Purāṇa, Fasc. 1-9 @ /10/ each	4

प्रत्यक्षामभ्भवेनासिद्धेरनुमानस्याप्रयोजकत्वात्, एवं सामानाधिकरण्यस्याव्याप्यवृत्तितामतमाश्रित्य मणिकृतैव सिद्धान्तलक्षणे हेतुसमानाधिकरणाभावे प्रतियोगिसामानाधिकरण्याभावस्य विशेषणताकल्पे 'कर्म्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः' इति ग्रन्थेनाव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिरुद्धृता तथाच तन्मते युक्तिर्भवतु मा वा उभयथापि तदाश्रित्य पूर्व्वपक्षलक्षणं व्याचक्षाणो नापराध्यतीत्याशङ्का दूषणान्तरमाह, 'इदमिदानीमिति कालिकविशेषणतात्मकविलक्षणसम्बन्धेनेत्यर्थः, अभावादेरिहेतिप्रत्ययनियामको यो दैशिकविशेषणताविशेषस्ततस्तादृशसम्बन्धवैलक्षण्यस्य प्रामाणिकतालाभाय विलक्षणप्रतीतिनियामकत्वाभिधानम्। न चेदानीमिति प्रतीतौ सम्बन्धवैलक्षण्याभावेऽपि कालत्वेनाधिकरणावगाहनादिहेतिप्रत्ययात् तस्य वैलक्षण्यमुपपद्यत इति किं सम्बन्धवैलक्षण्येनेति वाच्यं। सम्बन्धविशेषानुयोगित्वादन्यस्य कालत्वस्य दुर्वचत्वात् इदानीं कालत्वाभाव इत्यादिप्रतीत्या काले कालत्वाद्यभाववृत्तेः प्रामाणिकत्वेऽपि काले कालत्वं नास्तीति प्रतीत्यनुदयात् नास्तीत्याकारप्रतीतौ कालिकसम्बन्धव्यावृत्तरूपावच्छिन्नाया एव विशेषणताया नियामकत्वस्यावश्यकत्वात् दैशिक कालिकसम्बन्धसाधारणसम्बन्धतावच्छेदकस्याप्रामाणिकतया कालिकसम्बन्धसम्बन्धतावच्छेदकीभूतस्य वैलक्षण्यस्य सिद्धेर्निष्प्रत्यूहत्वाच्च। 'सद्धेताविति कालत्वादिसाध्यकघटादिहेतावित्यर्थः, 'काल इति कालावच्छेदेनेत्यर्थः, 'अप्रसिद्धेरिति, वृत्तिमतः कालावच्छेदेन कालत्वादिसामानाधिकरण्यवत्त्वात्

अवृत्तिनिष्ठतदभावस्य च कालानवच्छिन्नत्वात् अवच्छेद्याधिकरण-सम्बन्धिनोऽनवच्छेदकत्वात्।

अथ हेत्वधिकरणमहाकालावच्छेदेन महाकाल एव काल-वृत्तित्वाभावः प्रसिद्ध्यति महाकालस्य गगनादिवदवृत्तितया तत्र कालवृत्तित्वस्यासत्त्वात् स्वस्य तादात्म्यसम्बन्धेन स्वसम्बन्धितया स्वनिष्ठाभावावच्छेदकत्वसम्भवाच्च। न च तादात्म्यसम्बन्धो नाव-च्छेदकतानियामकः रूपे पर्व्वते न वह्निमत्संयुक्तत्वमिति प्रती-तिवत् स्वस्मिन् न वह्निमत्त्वयुक्तत्वमित्यादिप्रतीतेः सविवादत्वा-दिति वाच्यम्। तथा सति तादात्म्यसम्बन्धेन व्यभिचारिणि तदतिरिक्तसम्बन्धेन स्वासम्बद्धे हेतौ तेन सम्बन्धेन हेतुमत्त्वावच्छे-देन साध्यासामानाधिकरण्यवत्त्वविरहेणातिव्याप्तेः स्फुटतया तद्दो-षोपेक्षाया अनुचितत्वापातात्।

अत केचित् कालिकसम्बन्धेन गगनादेरपि वृत्तिमत्त्वमिति-मताभिप्रायकोऽयं ग्रन्थः, तथाच कालावच्छेदेन महाकालेऽपि कालिकसम्बन्धेन साध्यवदवृत्तित्वसत्त्वात्तद्विरहविरहोऽप्रसिद्धिर्न विर-ध्यत इति वदन्ति।

ननु तनु स्वस्मिन् सामानाधिकरण्य-तदभावयोर्वृत्त्यवच्छेद-कत्वे स्वाधिकरणत्वमेव नियामकं न तु स्वसम्बन्धित्वमात्रं स्वाधि-करणावच्छेदेनैव स्वस्मिन् तत्प्रतीतिरनुभवसिद्धत्वात् अतएव सम्बन्धान्तरेण स्वत्व इत्युपेत्य सम्बन्धान्तरेण वर्त्तमान इत्यभिहि-तम्। न च तादात्म्यादिवृत्त्यनियामकसम्बन्धेन व्यभिचारित्व-निवारणायानियामकता दुर्वारैवेति वाच्यम्। तादृशसम्बन्धेन साध-

वद्वृत्तित्वस्य हेत्वधिकरणत्वस्य चाप्रसिद्धा अतिव्याप्त्यसम्भवात्। न च तेन सम्बन्धेन सद्वेतौ लक्षणसङ्गमनाय वृत्तेरधिकरणता-याश्च स्थाने सम्बन्धप्रतियोगित्वानुयोगित्वयोरेव निवेशनीयत्वा-दतिव्याप्तेरावश्यकतेति वाच्यम्। प्राचां तेन सम्बन्धेन व्याप्त्य-नभ्युपगमसम्भवेन वृत्त्यादेरपि निवेशसम्भव इत्यभिप्रायेणैवातिव्या-प्त्यनुद्भावनात्। एतेन हेत्वधिकरणखण्डकालविशेषावच्छेदेन कालिकसम्बन्धेन तदवृत्तौ तद्विषयकज्ञान एव साध्याभावाधि-करणप्रसिद्धिः सम्भवति। न चैवमपि कालत्ववान् सर्व्वत्वादित्यादौ खण्डकालस्य हेत्वधिकरणतया हेत्वधिकरणावच्छिन्नसाध्याभावा-नाधिकरणाप्रसिद्धिर्दुर्व्वारैवेति वाच्यम्। हेतुतावच्छेदकावच्छिन्न-हेत्वधिकरणतापर्य्यन्तानिवेशे चैशिष्ट्य-व्यासज्यवृत्तिधर्म्मावच्छिन्नस्य यत्र हेतुत्वमभिहितं तत्र तत्र तादृशधर्म्मस्यैव तन्मते स्वावच्छिन्न-निरूपिताधिकरणत्वरूपपरम्परासम्बन्धेन हेतुत्वस्यानुमततया उक्त-स्थले सर्व्वत्वस्यैव तादृशसम्बन्धेन हेतुतया तादृशसम्बन्धेनावृत्तौ कालिकसम्बन्धेन कालवृत्तौ गगनत्वादावेव तादृशसम्बन्धेन साध्य-वद्वृत्तित्वाभावस्य हेत्वधिकरणकालावच्छेदेन प्रसिद्धेरित्यपि निर-स्तम्। तादृशकाले तज्ज्ञानस्य विषयतासम्बन्धसत्त्वेऽपि तादृ-शसम्बन्धस्य वृत्तिनियामकत्वानभ्युपगमेन तज्ज्ञानस्य तत्कालीन-ताविरहेण च तस्य तज्ज्ञानानधिकरणत्वात्तज्ज्ञाने अभाववृत्तौ तत्कालस्यानवच्छेदकत्वात् महाकालानुयोगिकविशेषणताविशे-षेण घटादिहेतुकस्थलाभिप्रायको वाऽयं ग्रन्थः तादृशसम्बन्धेन हेतु-मत्तायाः खण्डकालेऽभावान्नोक्तदिशा प्रसिद्धिरित्यपि कश्चित्।

अत स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकताद्दृशसम्बन्धावच्छिन्नस्वाधिकरणतावत्सामान्यकत्वविवक्षणान्नोक्ताव्याप्त्यवकाशः स्वावयवपरमाण्वाद्यवच्छेदेन घटादौ वर्त्तमाने कालत्वादिसामानाधिकरण्याभावे तदधिकरणकालसामान्यस्यानवच्छेदकतया तत्र लक्षणगमनसम्भवात् केवलान्वयिसाध्यके मेयत्वादौ सर्व्वाधिकरणावच्छेदेनैव हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वस्य सत्त्वात् स्वनिष्ठतदभावाप्रसिद्ध्याऽव्याप्तिर्न क्षतिमावहति मूलकृतैव तत्राव्याप्तेर्वक्ष्यमाणत्वात्। यदि चैवमात्मभिन्नं ज्ञानवदन्यत्वादित्यादौ हेतोरात्मान्यसकलवस्त्ववच्छेदेनैव दैशिकविशेषणतया साध्यवद्वृत्तित्वसत्त्वात् आत्मनश्च केनापि सम्बन्धेन हेतुमत्त्वाभावात्तदवच्छेदेन हेतौ साध्यसामानाधिकरण्याभावद्वृत्त्यसम्भवाद्धेतुनिष्ठताद्दृशाभावाप्रसिद्ध्याऽव्याप्तिरिति विभाव्यते तदा हेतुतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तदवच्छेदेन स्वस्मिन् वर्त्तते योऽभावस्तत्प्रतियोगितानवच्छेदकताद्दृशसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वकत्वं व्याप्तिरित्येव विवक्षणीयं कालत्ववान् घटादित्यादौ कालावच्छेदेन घटादौ वर्त्तमानः कपालसमवेतत्वाद्यभावएव प्रसिद्धः तत्प्रतियोगितानवच्छेदकञ्च कालिकसम्बन्धावच्छिन्नकालवृत्तित्वादिकमिति लक्षणसमन्वयः, हेतुतावच्छेदकसम्बन्धेन यद्वृत्तिमत् तन्निष्ठतत्सम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतत्सम्बन्धावच्छिन्नतद्वस्तु-प्रकृतहेतूभयाधिकरणतावत्सामान्यकत्वं वा वक्तव्यम् आत्मभिन्नं ज्ञानवदन्यत्वादित्यादौ आत्माद्यवच्छेदेन घटत्वाभावादिनिष्ठस्यानात्मवृत्तित्वाभावस्यानव-

च्छेदकं घटत्वाभाव-ज्ञानवह्निन्नत्वोभयाधिकरणसामान्यमिति लक्षणसमन्वयः। उभयाधिकरणत्वनिवेशाद्वह्निमान् धूमादित्यादौ धूमादिसंयोगिनः कपालादेर्घटादिनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वेऽपि न क्षतिः कपालादेः संयोगेन तद्घटानधिकरणतया उक्तोभयाधिकरणतावत्सामान्यानन्तर्गतत्वात्। अथवा हेतुतावच्छेदकसम्बन्धेन यत् स्वाधिकरणं तदवच्छिन्नस्ववृत्तिकान्यहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावकत्वविवक्षणान्न कश्चिद्दोषः सर्व्वत्र सद्धेतौ अन्ततोऽवृत्तौ प्रसिद्धे साध्यसामानाधिकरण्याभाव एव तादृशस्ववृत्तिकान्यत्वसत्त्वेन लक्षणसमन्वयात्। वह्न्यादिनिष्ठधूमादिसामानाधिकरण्याभावे अयोगोलकादेरिव तद्वृत्तित्वस्याप्यवच्छेदकत्वात् स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्त्यनच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यसामानाधिकरण्याभावकत्वं वा विवक्षणीयमित्यादयः परिष्कारस्य पन्थानो द्रष्टव्याः (१)॥

इति महामहोपाध्याय-श्रीगदाधर-भट्टाचार्य्य-विरचितायां
अनुमानदीधितिविवृतौ सिंहव्याघ्रनामक-
व्याप्तिद्वयं सम्पूर्णमिति।

---

(१) 'परिष्कारस्य पन्थानो द्रष्टव्या' इत्यनन्तरं 'अथवा साध्यवद्वृत्तित्वाभाव-[illegible] यदधिकरणावच्छिन्नत्व-यद्वृत्तित्वोभयाभावकत्वं यदा यद-[illegible] साध्यवद्वृत्त्यभावान्यत्वं साध्यवद्वृत्त्यभावे वा [illegible]धिकरणावच्छिन्नवद्वृत्त्यन्यत्वं तत्त्वम्। इत्यधिक० पाठ० कस्मिंश्चिदादर्शपुस्तके वर्त्तत इति।

तत्त्वचिन्तामणिः।

व्यधिकरणधर्म्मावच्छिन्नाभावः।

अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घटएव प्रसिद्धः व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात्। न चैवं घटएव व्यभिचारः, साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः,नच वाच्यत्वाभावस्तादृशो घट इति चेत्तर्हि तादृशसाध्याभावसामानाधिकरण्याभावोव्याप्तिः। तथाचाप्रसिद्धिः।

तत्त्वचिन्तामणिदीधितिः।

'समवायितयेति, वाच्यत्वं न यथा समवायि तथा वच्यते, घटादिसमवायितयेत्यर्थः इत्यप्याहुः, प्रमेयसाध्यके च भावत्वेनाभावानां अभावत्वेन भावानां वह्नित्वेन निर्व्वह्नौ अवृत्तिमात्रवृत्तिगगनत्वादिना विरुद्धघटत्व-पटत्वाभ्याञ्च सर्व्वत्र प्रमेयमात्रस्याभावः सुलभः

गादाधरी विवृतिः।

'अथ समवायितयेति मूलम्, अथ व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमे सर्व्वत्र तादृशाभाववति हेतोर्वृत्तेरसम्भवः

साध्याभाववद्वृत्तित्वस्य तादृशाभावमादाय लक्षणसङ्गमने सर्वत्र व्यभिचारिण्यतिव्याप्तिरिति लक्षणपरिष्कारासम्भवेन सोन्दडमतावलम्बनेन मूललक्षणपरिष्कर्तुरीदृशाशङ्का न गच्छते इति चेदत्रोपाध्यायमतानुयायिनः केवलान्वयिनि साध्याभावाप्रसिद्धिनिबन्धनदोषस्य उद्भावितत्वात् साध्याभावस्य कथञ्चित् प्रसिद्धावेव लक्षणस्य निर्दोषतेत्यभिमानेनेयमाशङ्का तादृशाभिमानमेव निराकरिष्यतीत्यग्रे 'तर्ही'त्यादिग्रन्थेन । व्यधिकरणधर्मावच्छिन्नाभावोपगमे यथा व्यभिचारलक्षणे साध्यतावच्छेदकावच्छिन्नसाध्याभावो निवेश्यते तथा व्याप्तिलक्षणेऽपि तादृशसाध्याभावएव निवेशनीयः अन्यथा असम्भवस्यातिव्याप्तेर्वा प्रसक्तिः व्याप्तेरव्यभिचाररूपतानुपपत्तिश्चेति (१) पुनरप्रसिद्धिनिबन्धनाव्याप्तिः । केवलान्वयिसाध्यकस्थल इति तदर्थः । न चैवमपि तत्तद्वृत्तित्वावच्छिन्नाभावव्यावर्त्तकसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपेणैव साध्याभावस्य विशेषणीयतया वाच्यत्वत्वावच्छिन्नसाध्यकस्थले समवायित्वावच्छिन्नतदभावस्यातादृशत्वात्तादृशाभावप्रसिद्धिरनुपयोगिनीति कथमियमाशङ्का साध्यप्रतियोगिकाभावमात्रनिवेशाभिमानस्याशङ्काबीजत्वे केवलान्वयिसाध्यकस्थले व्यासज्यवृत्तिरूपावच्छिन्नप्रतियोगिताकस्य विशिष्टाभावरूपस्य च तादृशाभावस्य प्रसिद्धे । सोन्दडमतावलम्बनस्य निर्बीजत्वापातादिति वाच्यम् ।

(१) साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादायाव्याप्ते- रुद्धारः, अव्याप्तिरिति, यदि वा पारिभाषिकमेव लक्षणं क्रियते तदायाह, नेति ।

महानसीयवह्नित्वावच्छिन्नाभाववारणाय साध्यतावच्छेदकापर्य्याप्त-स्वसमानाधिकरणनिष्ठावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगि-ताकाभाव एव निवेशनीय इत्यभिप्रायेणाप्याहुरिति। प्रमेयत्वादि-ना प्रमेयमात्रं यत्र साध्यतावच्छेदकं तत्र प्रमेयत्वादिविशिष्टप्रमेया-पर्य्याप्त तदविशेषिघटत्वादिनिष्ठमेवावच्छेदकत्वं प्रसिद्धं स्वसमा-नाधिकरणवृत्तिताद्वृशावच्छेदकतानिरूपकप्रतियोगिताभिन्नं च व्य-धिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वेन । यत्र याद्वृशं साध्यताव-च्छेदकं विशिष्टमविशिष्टं वा तत्र तदनवच्छिन्नत्व-समानाधिकरण-धर्म्मावच्छिन्नत्वोभयाभाववत्प्रतियोगिताकाभावनिवेशाभिप्रायको-ऽयं ग्रन्थ इत्यप्याहुः। न चैवं प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थलेऽपि व्यधिकरणधर्म्मावच्छिन्नाभावमादायैव लक्षणघटकताद्वृशाभा-वप्रसिद्धौ तत्र गगनत्व-घटत्वघटत्वोभयाद्यवच्छिन्नप्रमेयमात्रा-भावप्रसिद्ध्यानुसरणप्रयासो व्यर्थः इति वाच्यम्। महानसीयवह्नि-त्वावच्छिन्नाभाववारणाय साध्यतावच्छेदकसमनियतप्रतियोगि-ताकः साध्यतावच्छेदकापर्य्याप्तसाध्यवृत्तिधर्म्मनिष्ठावच्छेदकता-कान्यप्रतियोगिताको वाऽभावो निवेशनीय इत्यभिप्रायेण तैरुभया-भिधानानुसरणात्। न च घटत्व-घटत्वोभयावच्छिन्नप्रतियोगि-ताकाभावप्रतियोगितावच्छेदकत्वं साध्यवृत्तिधर्म्मनिष्ठमेव घटत्व-घटत्वयोः प्रत्येकं साध्यवृत्तित्वादिति वचनं तत्र घटत्व इति वाच्यम्। साध्यवृत्तिधर्म्मनिष्ठत्वेन तदन्यत्वे व्यधिकरणधर्म्मेऽपि वि-शिष्टत्वं साध्यं तत्र विशिष्टस्य घटत्व-घटत्वोभयपर्य्याप्ताव-च्छेदकताया व्यधिकरणप्रतियोगिकतावच्छेदकत्वम्। इत्थञ्च इति-

साध्याभाववद्वृत्तित्वस्य तादृशाभावमादाय लक्षणसङ्गमने सर्व्वत्र व्यभिचारिण्यतिव्याप्तिरिति लक्षणपरिष्कारासम्भवेन सोन्दडमतावलम्बनेन मूललक्षणपरिष्कर्त्तुरीदृशाशङ्का न गच्छते इति चेदत्रोपाध्यायमतानुयायिनः केवलान्वयिनि साध्याभावाप्रसिद्धिनिबन्धनदोषस्य उद्भावितत्वात् साध्याभावस्य कथञ्चित् प्रसिद्धावेव लक्षणस्य निर्द्दोषतेत्यभिमानेनेयमाशङ्का तादृशाभिमानमेव निराकरिष्यतीत्यग्रे 'तर्हीत्यादिग्रन्थेन। व्यधिकरणधर्म्मावच्छिन्नाभावोपगमे यथा व्यभिचारलक्षणे साध्यतावच्छेदकावच्छिन्नसाध्याभावो निवेश्यते तथा व्याप्तिलक्षणेऽपि तादृशसाध्याभावएव निवेशनीयः अन्यथा असम्भवस्यातिव्याप्तेर्वा प्रसक्तिः व्याप्तेरव्यभिचाररूपतानुपपत्तिश्चेति (१) पुनरप्रसिद्धिनिबन्धनाव्याप्तिः। केवलान्वयिसाध्यकस्थल इति तदर्थः। न चैवमपि तत्तद्वृत्तित्वापच्छिन्नाभावव्यावर्त्तकसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपेणैव साध्याभावस्य विशेषणीयतया वाच्यत्वत्वावच्छिन्नसाध्यकस्थले समवायित्वावच्छिन्नतदभावस्यातादृशत्वात्तादृशाभावप्रसिद्धिरनुपयोगिनीति कथमियमाशङ्का साध्यप्रतियोगिकाभावमात्रनिवेशाभिमानस्याप्याशङ्काबीजत्वे केवलान्वयिसाध्यकस्थले व्यासज्यवृत्तिरूपावच्छिन्नप्रतियोगिताकस्य विशिष्टाभावरूपस्य च तादृशाभावस्य प्रसिद्धौ सोन्दडमतावलम्बनस्य निर्व्वीजत्वापातादिति वाच्यम्।

(२) साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्म्मावच्छिन्नाभावमादायासम्भवा- ·वा , अतिव्याप्तेर्वेति, यदि वा पारिभाषिकमेव लक्षणं क्रियते तदाप्याह, व्याप्तेरिति।

महानसीयवह्नित्वावच्छिन्नाभाववारणाय साध्यतावच्छेदकापर्य्याप्त-
स्वसमानाधिकरणनिष्ठावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगि--
ताकाभाव एव निवेशनीय इत्यभिप्रायेणाग्रिमासङ्गतिः। प्रमेयत्वादि-
ना प्रमेयमात्रं यत्र साध्यतावच्छेदकं तत्र प्रमेयत्वादिविशिष्टप्रमेया-
पर्य्याप्तं तदविशेषितघटत्वादिनिष्ठमेवावच्छेदकत्वं प्रसिद्धं स्वसमा-
नाधिकरणवृत्तितादृशावच्छेदकतानिरूपकप्रतियोगिताभिन्नञ्च व्य-
धिकरणधर्म्मावच्छिन्नप्रतियोगितामात्रमेव। यत्र यादृशं साध्यताव-
च्छेदकं विशिष्टमविशिष्टं वा तत्र तदनवच्छिन्नत्व-समानाधिकरण-
धर्म्मावच्छिन्नत्वोभयाभाववत्प्रतियोगिताकाभावनिवेशाभिप्रायको-
ऽयं ग्रन्थ इत्यप्याहुः। न चैवं प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थलेऽपि
व्यधिकरणधर्म्मावच्छिन्नाभावमात्रस्यैव लक्षणघटकतासम्भवाद्दी-
धितिकृतां तत्र गगनत्व-घटत्वपटत्वोभयाद्यवच्छिन्नप्रमेयसामान्या-
भावपर्य्यन्तानुसरणप्रयासोऽव्यर्थः इति वाच्यम्। महानसीयवह्नि-
त्वाद्यवच्छिन्नाभाववारणाय साध्यतावच्छेदकसमनियतप्रतियोगि-
ताकः साध्यतावच्छेदकापर्य्याप्तसाध्यवृत्तिधर्म्मनिष्ठावच्छेदकता-
कान्यप्रतियोगिताको वाऽभावो निवेशनीय इत्यभिप्रायेण तैस्तथा-
विधाभावानुसरणात्। न च घटत्व-पटत्वोभयावच्छिन्नप्रतियोगि-
ताकाभावप्रतियोगितावच्छेदकत्वं साध्यवृत्तिधर्म्मनिष्ठमेव घटत्व-
पटत्वयोः प्रत्येकं साध्यवृत्तित्वादिति इयमसौ लक्षणघटक इति
वाच्यम्। साध्यवृत्तिधर्म्मनिष्ठत्वेन तदपर्य्याप्त्यधिकरणधर्म्मविशिष्टा-
धिकरणं साध्यं तस्य विवक्षितया घटत्व-पटत्वोभयपर्य्याप्तावच्छेदकताया अन्यत्वप्रतियोगिकोटावनन्तर्भावात्। [illegible]

साध्याभाववद्वृत्तित्वस्य तादृशाभावमादाय लक्षणसङ्गमने सर्व्वत्र व्यभिचारिण्यतिव्याप्तिरिति लक्षणपरिष्कारासम्भवेन सोन्दडमतावलम्बनेन मूललक्षणपरिष्कर्त्तुरीदृशाशङ्का न गच्छते इति चेदत्रोपाध्यायमतानुयायिनः केवलान्वयिनि साध्याभावाप्रसिद्धिनिबन्धनदोषस्य उद्भावितत्वात् साध्याभावस्य कथञ्चित् प्रसिद्धावेव लक्षणस्य निर्द्दोषतेत्यभिमानिनेयमाशङ्का तादृशाभिमानमेव निराकरिष्यतीत्यग्रे 'तर्हीत्यादिग्रन्थेन। व्यधिकरणधर्म्मावच्छिन्नाभावोपगमे यथा व्यभिचारलक्षणे साध्यतावच्छेदकावच्छिन्नसाध्याभावो निवेश्यते तथा व्याप्तिलक्षणेऽपि तादृशसाध्याभावएव निवेशनीयः अन्यथा असम्भवस्यातिव्याप्तेर्वा प्रसक्तिः व्याप्तेरव्यभिचाररूपतानुपपत्तिश्चेति (१) पुनरप्रसिद्धिनिबन्धनाव्याप्तिः। केवलान्वयिसाध्यकस्थल इति तदर्थः। न चैवमपि तत्तद्वृत्तित्वापच्छिन्नाभावव्यावर्त्तकसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपेणैव साध्याभावस्य विशेषणीयतया वाच्यत्वत्वावच्छिन्नसाध्यकस्थले समवायित्वावच्छिन्नतदभावस्यातादृशत्वात्तादृशाभावप्रसिद्धिरनुपयोगिनीति कथमियमाशङ्का साध्यप्रतियोगिकाभावमात्रनिवेशाभिमानस्याप्याशङ्काबीजत्वे केवलान्वयिसाध्यकस्थले व्यासज्यवृत्तिरूपावच्छिन्नप्रतियोगिताकस्य विशिष्टाभावरूपस्य च तादृशाभावस्य प्रसिद्धसम्भवेन सोन्दडमतावलम्बनस्य निर्व्वीजत्वापातादिति वाच्यम्।

(१) साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्म्मावच्छिन्नाभावमादायासम्भवासम्भवादाह, अतिव्याप्तेर्वेति, यदि वा पारिभाषिकमेव लक्षणं क्रियते तदाप्याह, व्याप्तेरिति।

महानसीयवह्नित्वावच्छिन्नाभाववारणाय साध्यतावच्छेदकापर्य्याप्त-स्वसमानाधिकरणनिष्ठावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगि-ताकाभाव एव निवेशनीय इत्यभिप्रायेणाशङ्कासङ्गतेः। प्रमेयत्वादि-ना प्रमेयमात्रं यत्र साध्यतावच्छेदकं तत्र प्रमेयत्वादिविशिष्टप्रमेया-पर्य्याप्तं तदविशेषितघटत्वादिनिष्ठमेवावच्छेदकत्वं प्रसिद्धं स्वसमा-नाधिकरणवृत्तिताहृशावच्छेदकतानिरूपकप्रतियोगिताभिन्नञ्च व्य-धिकरणधर्म्मावच्छिन्नप्रतियोगितामात्रमेव। यत्र याहृशं साध्यताव-च्छेदकं विशिष्टमविशिष्टं वा तत्र तदनवच्छिन्नत्व-समानाधिकरण-धर्म्मावच्छिन्नत्वोभयाभाववत्प्रतियोगिताकाभावनिवेशाभिप्रायको-ऽयं ग्रन्थ इत्यप्याहुः। न चैवं प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थलेऽपि व्यधिकरणधर्म्मावच्छिन्नाभावमात्रस्यैव लक्षणघटकतासम्भवाद्दी-धितिकृतां तत्र गगनत्व-घटत्वपटत्वोभयाद्यवच्छिन्नप्रमेयसामान्या-भावपर्य्यन्तानुसरणप्रयासोऽव्यर्थः इति वाच्यम्। महानसीयवह्नि-त्वाद्यवच्छिन्नाभाववारणाय साध्यतावच्छेदकसमनियतप्रतियोगि-ताकः साध्यतावच्छेदकापर्य्याप्तसाध्यवृत्ति धर्म्मनिष्ठावच्छेदकता-कान्यप्रतियोगिताको वाऽभावो निवेशनीय इत्यभिप्रायेण तैस्तथा-विधाभावानुसरणात्। न च घटत्व-पटत्वोभयावच्छिन्नप्रतियोगि-ताकाभावप्रतियोगितावच्छेदकत्वं साध्यवृत्तिधर्म्मनिष्ठमेव घटत्व-पटत्वयोः प्रत्येकं साध्यवृत्तित्वादिति कथमसौ लक्षणघटक इति वाच्यम्। साध्यवृत्तिधर्म्मनिष्ठत्वमनेन यत्पर्य्याप्त्यधिकरणधर्म्मविशिष्टा-धिकरणं साध्यं तस्य विवक्षिततया घटत्व-पटत्वोभयपर्य्याप्ताव-च्छेदकताया अन्यत्वप्रतियोगिकोटावनन्तर्भावात्। वस्तुतस्तु वृत्ति-

मेवृत्तयोर्यावन्तः साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावास्तद्वत्त्वमेव साध्याभाववदवृत्तित्वमित्यस्यार्थः, इत्यभिप्रायकतया 'अथेत्यादिग्रन्थः सार्व्वभौमैर्व्याख्यातः, दीधितिकृतामपि तादृशग्रन्थस्य तदभिप्रायकत्वमेवानुमतं कूटघटितलक्षणस्य स्वयमग्रे दूषणीयत्वेऽपि आपाततः सम्भवदुक्तिकतयैव तत्शङ्कितुरभिप्रायविषयत्वौचित्यात् । व्यधिकरणधर्म्मावच्छिन्नाभाववादिमतेऽपि (१) निर्दोषस्यापि लक्षणस्य सम्भवेन तदुपेक्ष्य सदोषं कूटघटितलक्षणमवलम्ब्य 'प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थावतारणमनुचितमित्यभिप्रेत्यैव अग्रे तल्लक्षणमाक्षेप्यमिति न सन्दर्भविरोधः । 'यत्समानाधिकरणा इत्यादिलक्षणाभिप्रायकता चात्र न युज्यते तादृशव्याप्तेः साध्याभाववदवृत्तित्वादिरूपत्वाप्रसक्तेः मूलोक्तलक्षणपरिष्कारासम्भवात् व्यभिचारशरीरे साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशस्यावश्यकतां प्रदर्श्य केवलान्वयिसाध्यकसाधारणसाध्याभाववदवृत्तित्वरूपव्याप्तेरव्यभिचाररूपता न सम्भवतीत्यभिधानेन अव्यभिचारपदार्थरूपसाध्याभाववद्वृत्तित्वा-

---

(१) व्यधिकरणधर्म्मावच्छिन्नाभावत्वं "विवादोऽप्यतिरिक्तायामेव प्रतियोगितायाम्' इत्यादिग्रन्थस्वरसेन अतिरिक्तप्रतियोगिताकाभावत्वम्, अथवा प्रतियोगिताविशिष्टप्रतियोगिताकाभावत्वं व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावत्वं वैशिष्ट्यं स्वतादात्म्य-स्वाश्रयनिष्ठाधेयतावच्छेदकताविशिष्टान्यावच्छेदकताकत्वोभयसम्बन्धेन, सम्बन्धघटकवैशिष्ट्यं स्वसामानाधिकरण्य स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्व-स्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन. स्ववृत्तित्वञ्च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेनातो विशिष्टसत्त्वेन गुणो नास्तीतिप्रतीतिसिद्धाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावत्वाभावात इति विवेचनीयम् ।

भावस्य व्याप्तित्वे निराकृते च साध्याभाववद्वृत्तित्वाभावस्य व्याप्तित्वानभ्युपगमेऽपि न क्षतिरित्याशयेन 'यत्समानाधिकरणा' इत्यादिनिर्दोषलक्षणमवलम्ब्यैव स्वयं प्रतियोग्यवृत्तित्वेत्यादिग्रन्थस्यावतारणीयत्वात् । न च साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटवद्वृत्तित्वस्यापि व्यभिचारपदार्थत्वसम्भवात्, कूटघटितव्याप्तेरव्यभिचारत्वमुपपद्यत इति वाच्यम् । तादृशाभावकूटसामानाधिकरण्यस्य व्यभिचारपदार्थत्वे 'न चैवं घट एवेत्यादिना दर्शिताया ज्ञेयत्वादिहेतौ वाच्यत्वव्यभिचारित्वव्यवहारापत्तेर्दुर्वारत्वात् वाच्यत्वादेः समानाधिकरणधर्मावच्छिन्नाभावाप्रसिद्धेर्व्यधिकरणधर्मावच्छिन्नाभावकूटवति च हेतोर्वृत्तेरिति सर्वमनाकुलम् । एवञ्च कूटघटितलक्षणाभिप्रायेणैव प्रमेयसाध्यकस्थले उक्ताभावानुसरणं ग्रन्थकृतां सकल घटत्वाद्यवच्छिन्नपटाद्यभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहादित्यवधेयम् (१) ।

ननु वाच्यत्वं पदशक्तिः सा च तत्तत्पदबोध्यत्वप्रकारिका भगवदिच्छैव (२) न तु पदार्थान्तरम् अपसिद्धान्तत्वात् (३) तथाच समवायित्वं समवायप्रतियोगित्वरूपं तदनुयोगित्वरूपं वा भवतु उभयथैव वाच्यत्ववृत्तीति तेन रूपेण तदभावस्य कथं व्यधिकरणधर्माव-

---

(१) [illegible] पुस्तकेषु नास्ति ।

(२) [illegible] भावः ।

(३) सिद्धान्त[illegible] पदार्थस्वीकारो न [illegible] ।

च्छिन्नप्रतियोगिताकत्वम्। न च भगवदिच्छाया वाच्यत्वपदार्थत्वे पटादेर्घटादिपदवाच्यत्वापत्तिर्घटादाविव पटादावपि घटादिपद-बोध्यत्वप्रकारिकाया भगवदिच्छाया विषयतासम्बन्धेन सत्त्वात् तदिच्छाया एकत्वादिति वाच्यम्। यद्धर्म्मांशे यस्य प्रकारता तस्यैव धर्म्मिणो विशेष्यतासम्बन्धेन तद्धर्म्मप्रकारकत्वविशिष्टवत्त्वोपगमात् पटादेर्घटादिपदबोध्यतया भगवदिच्छया अनवगाहनात् तत्र विशेष्यतासम्बन्धेन तद्बोध्यत्वप्रकारकत्वविशिष्टभगवदिच्छाविरहेण तदवाच्यत्वोपपत्तेः। न चैव विशिष्टेच्छाया वाच्यत्वरूपत्वे विशेष-णांशे समवायित्वाभावात्तेन रूपेण विशिष्टाभावस्य व्यधिकरण-धर्म्मावच्छिन्नप्रतियोगिताकत्वमव्याहतमेवेति वाच्यम्। यतो विशि-ष्टाभावप्रतियोगिता न विशेषणान्तर्भावेन पर्य्याप्ता अपि तु विशेष्यां-शमात्रे, अवच्छिद्यते पुनरियं विशेषणेन, प्रतियोगिताया अव्यास-ज्यवृत्तित्वात् (१) तथाच विशेष्यवृत्तेः समवायित्वस्य कथं प्रतियोगि-ताव्यधिकरणत्वमिति। न च प्रतियोगिताया व्यासज्यवृत्तित्वानुप-गमे सर्व्वत्र घटत्वेन घट-पटोभयं नास्तीतिप्रतीतिः कथमुपपद्यतां घटादिमति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिसत्त्वेन तद्विष-याभावस्य सत्त्वासम्भवात् इति अभावविशेषीयप्रतियोगित्वमवश्य-मेव व्यासज्यवृत्त्युपेयं तथा सति च तत्र प्रतियोगितापर्य्याप्त्यधि-करणस्योभयत्वावच्छिन्नस्य प्रतियोगितावच्छेदकघटत्वादिविशिष्ट-त्वासम्भवाद्यद्धर्म्मावच्छिन्ने प्रतियोगितायाः पर्य्याप्तिः प्रतियोगिता-वच्छेदकविशिष्टस्य तदवच्छिन्नस्यैवाभावविरोधितया न तादृशा-

(१) व्यासज्यवृत्तित्वञ्च एकत्वानवच्छिन्नपर्य्याप्तिकत्वम्।

भावस्य सार्व्वत्रिकत्वानुपपत्तिरिति वाच्यम्। प्रतियोगिताया-अव्यासज्यवृत्तित्वेऽपि तत्रैकधर्म्मावच्छिन्नापर्य्याप्तिरूपविरोधशालिनोर्घटत्व-पटघटोभयत्वयोः प्रतियोगितावच्छेदकत्वस्य व्यासज्यवृत्तित्वोपगमात्तादृशाभावस्य विरुद्धघटत्व-पटत्वाद्युभयावच्छिन्नाभाववत् केवलान्वयित्वोपपत्ते.। यद्यपि घट-पटौ नस्त इत्यादिप्रतीतिविषयसमानाधिकरणधर्म्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमपि घटत्वाद्यन्तर्भावेन पर्य्याप्तं तथापि तत्र द्वित्वधर्म्मितावच्छेदकतापन्नस्यैव घटत्वादेरवच्छेदकत्व प्रतीयते अत्र च स्वातन्त्र्येणापीति भेद'। अस्तु वा तत्रोभयाभावप्रतियोगिताया गत्यन्तरविरहाद्व्यासज्यवृत्तित्वं तथापि विशिष्टाभावप्रतियोगितायास्तथात्वमप्रामाणिकमेव दण्डिपुरुषादिमति पुरुषत्वेन दण्डविशिष्टो नास्तीत्यादिप्रतीतेरसिद्धेः इत्यत आह, दीधितौ 'बाधत्व न यत्नेति, 'तथा वक्ष्यत इति, अयमाशय बाधत्व शक्तिविषयत्वं न तु शक्ति. धातुनैव शक्तिप्रतिपादनात् प्रत्ययस्य निरर्थकतापत्तेः विषयत्वञ्च पदार्थान्तरम् इति प्राचीननैयायिकै [illegible] तस्य च न समवायः सम्बन्ध. अपि तु [illegible] [illegible]

[illegible]

वह्नित्वस्य अभाववत्त्वमित्यस्यापि, प्रमेयवह्निमत्त्वे [illegible]
भावप्रसङ्गे अभावाभावत्वमित्यदोषादिति प्रमेयसामान्य-
धर्मस्याप्यभिप्रायः [illegible]
[illegible], 'प्रमेयसामान्य [illegible]) 'भावत्वादि',
'अभावाना भावत्वमपि [illegible] 'अभाव [illegible]',
अभावस्य भावत्वाच्च भावाभावयोर्भावो [illegible] वह्नि-
रिति [illegible] प्रमेयत्वमात्रमपि [illegible]
कूटघटतया [illegible]
घटकी भवितुमर्हतीत्यभिप्रायः । न च यदभावीयप्रतियोगिता-
त्वेन साध्यतावच्छेदकसमनैयत्यमिति विवक्षणे वाच्यत्वादिसाध्यके
वह्न्यादिसाध्यके च तादृशाभावाप्रसिद्धिः निखिलव्यधिकरण-
धर्मावच्छिन्नाभावाना समनियतत्वेनाभिन्नतया घटादेरपि तथा-
विधवाच्यत्वाभावप्रतियोगित्वात् किञ्चिद्विशिष्टस्याभावादेरपि (२
वह्न्याद्यभावप्रतियोगित्वादिति तत्तत्प्रतियोगितात्वेन समनैयत्य-
मिति विवक्षणीयमिति कथमुक्ताभावस्य लक्षणघटकतेति वाच्यम् ।
समनैयत्यशरीरे व्यापकतायास्तदभावप्रतियोगितात्वावच्छिन्नाया-
व्याप्यतायाश्च विशिष्टरूपावच्छिन्नाया निवेशनेनानुपपत्त्यभावात् ।
ननु साध्यनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकता
चेत् समनैयत्यशरीरे निवेश्यते तदा व्यधिकरणधर्मावच्छिन्नयो-
र्भावाभाववृत्तिप्रतियोगितयोर्द्वयोरेव प्रत्येक प्रमेयनिष्ठान्योन्याभाव-

(१) प्रमेयसामान्यसाधके चेति पा० ।

(२) समनियताभावानामैक्यानभ्युपगमेऽपि दोषमाह किञ्चिदित्यादि ।

प्रतियोगितावच्छेदकतया नोक्ताभावस्य साध्यतावच्छेदकसम-
नियतप्रतियोगिताकत्वम् इत्यतोऽभावान्तरमाह, 'वह्नित्वेनेति
'प्रमेयमात्रस्याभाव इत्यग्रिमेणान्वयः, वह्नित्वेन प्रमेयं नास्तीति-
प्रतीत्या प्रमेयसामान्य एव वह्नित्वावच्छिन्नप्रतियोगित्वावगाह-
नात् प्रमेयत्वव्यापिकैव तादृशाभावीयवह्नित्वावच्छिन्नप्रतियोगि-
तेति भावः। यदि च तत्र वह्निर्नास्तीतिप्रतीतिसिद्धवह्नि-
मात्रनिष्ठप्रतियोगितैव प्रमेयत्वसामानाधिकरण्येन भासत इत्यु-
पेयते प्रमेयसामान्यस्यैव तत्प्रतियोगितया भानोपगमे वह्नि-
र्नास्तीत्यादावपि तादृशप्रतीतिसिद्धनिखिलप्रमेयनिष्ठप्रतियोगि-
ताया वह्नित्वादिविशेषितप्रतियोगिवृत्तित्वेन भानोपगमसम्भ-
वात् समानाधिकरणधर्मावच्छिन्नवह्नित्वादिनिरूपितप्रतियोगि-
त्वाप्रसिद्धया वह्निभिन्नत्वादिना वह्न्याद्यभावमादाय वह्निमान्
प्रमेयत्वादित्यादावतिव्याप्त्यापत्तेरित्युच्यते, तदा तादृशाभावस्यापि
नोक्तरूपत्वमित्याशङ्क्य अभावान्तरमुपन्यस्यति.(१) 'वृत्तिमात्रेति.
गगनं नास्तीत्यत्र गगनत्वसामानाधिकरण्येन या गगनत्वावच्छिन्न-
प्रतियोगिता प्रतीयते सैव गगनत्वेन गगनभिन्नं नास्तीत्यादौ गगन-
भिन्नत्वादिसामानाधिकरण्येन प्रतीयते अवच्छेदकैक्येऽपि बाधकं
प्रतियोगिताया ऐक्यस्वीकारात् गगनभिन्ननिष्ठप्रतियोगिताया-
गगनावृत्तित्वेन (२) गगनत्वरूपप्रतियोगितावच्छेदकविशिष्टप्रति-
योगिनोऽवृत्तित्वेन गगनतया गगनभिन्नाभावस्य केवलान्वयित्वोप-
पत्तेः, वह्नित्वाद्यवच्छिन्नघटादिनिष्ठप्रतियोगिताया वह्निनिष्ठ-

---

(१) अभावान्तरमिति पा०। (२) गगनवृत्तित्वेनेति पा०।

[illegible]
रूपनिरूपितावच्छेदकतानिरूपितप्रतियोगिताकाभावा-
प्रसिद्धेर्गगनादेरपि विषयितासम्बन्धेन ईश्वरज्ञानादिसम्बद्धत्वात् तादृशसम्बन्धेन गगनत्वादिना प्रमेयसामान्याभावस्य साधन-सामानाधिकरण्यासम्भवादित्यतोऽभावान्तरमाह, 'विरुद्धेति येन सम्बन्धेन घटत्व-पटत्वाद्योर्विरोधस्तत्सम्बन्धावच्छिन्नतदुभयनिष्ठ-प्रतियोगितावच्छेदकताकप्रमेयसामान्याभाव इत्यर्थः, प्रतियोगि-तावच्छेदकतावच्छेदकोभयत्वविशिष्टघटत्व-पटत्वाद्यवच्छिन्नप्रति-योगिनोऽप्रसिद्धया विरोधविरहेणास्याभावस्य केवलान्वयितेत्यव-धेयम्। इदमुपलक्षण व्यधिकरणधर्मावच्छिन्नाभाववादिना प्रति-योगितावच्छेदकतावच्छेदकरूपेणैव तादृशसम्बन्धेनाप्यवच्छेदकस्य वृत्तिमत्ताया अवच्छेदकतायामतन्त्रत्वात् समवायादिसम्बन्धेन गगनाद्यवच्छिन्नप्रमेयसामान्याभावस्यापि सौलभ्य बोध्यम्। अत्य-न्ताभावस्येवान्योन्याभावस्यापि व्याधिकरणधर्मावच्छिन्नप्रतियोगि-ताकत्वोपगमात् प्रमेयसामान्यस्य यत्र तादात्म्यसम्बन्धेन साध्यता

(१) अवृत्तिमात्रवृत्तित्वकीर्त्तनमिति पा०।

तत्र घटत्व-पटत्वाभ्यां समवायेन गगनादिना वा प्रमेयसामान्य-भेदोलक्षणघटकः प्रतियोगितावच्छेदकावृत्तिसमवायित्वाद्यवच्छिन्नप्रमेयत्वादिना प्रमेयसामान्यभेदो वा तथेत्यवधेयम्।

तत्त्वचिन्तामणिदीधितिः।

ननु पारिभाषिकमेवाव्यभिचरितत्वं, तथाहि यत्-समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकता-वच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगि-समानाधिकरणास्तत्त्वं सर्व्वत्र वाच्यत्वाद्यभावस्य तथा-त्वाद्यावत्त्वोपादानम्। अतएव भूतत्व-मूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोगिसामा-नाधिकरण्येऽपि भूतत्व-मनोन्यत्वाद्यभावस्यातथात्वा-न्नातिप्रसङ्गः। गोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य वा तथात्वात् साध्यतावच्छेदकेत्यादि।

गादाधरी विवृतिः।

ननु व्यधिकरणधर्म्मावच्छिन्नसाध्याभावप्रसिद्धावपि व्यभिचारा-भावरूपव्याप्तौ साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य लक्षणघट-कतया अप्रसिद्धिनिबन्धनाऽव्याप्तेर्दुरुद्धरतयैव वादिनो निवृत्ते-र्व्यधिकरणधर्म्मावच्छिन्नाभावखण्डनपरग्रन्थानुत्थितिरित्यतस्तादृश-ग्रन्थमवतारयति, 'नन्वित्यादिना, 'पारिभाषिकमिति तान्त्रिक-

गह्वितरूपपरिभाषया व्याप्तिप्रतिपादकं न तु योगेनेत्यर्थः, 'अव्यभिचरितत्वम्' अव्यभिचरितत्वपदम्, अथवा 'पारिभाषिकमव्यभिचरितत्व' परिभाषया अव्यभिचरितत्वपदप्रतिपाद्यं, व्याप्यत्वमिति शेषः, न तु योगेन तत्पदलभ्यमित्येवार्थः, तथाच व्यभिचारघटक-साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य व्याप्तिघटकत्वविरहेऽपि न क्षतिरिति भावः। 'यदिति, 'यत्पदं यद्धर्मावच्छिन्नपरम्, अग्रे 'तत्-पदमपि तद्धर्मावच्छिन्नपरं, स च धर्मो हेतुतावच्छेदकीभूतधूम-त्वादिः, सद्धेतुस्थले हेतुतावच्छेदकावच्छिन्नसमानाधिकरणः साध्य-तावच्छेदकावच्छिन्नेत्यादिविशेषणाक्रान्तः व्यधिकरणधर्मावच्छिन्न-प्रतियोगिताको घटत्वादिना वह्न्याद्यभावादिरेव तस्य च प्रतियोगि-सामानाधिकरण्यमावश्यकमिति लक्षणसमन्वयः। व्यभिचा-रिणि व्यभिचारनिरूपकाधिकरणीभूतहेत्वधिकरणे साध्यतावच्छे-दकेत्यादिविशेषणाक्रान्तसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकः साध्याभावादिरपि(१) तस्य च प्रतियोगिसामानाधिकरण्याभावात् तादृशाभावस्य च प्रतियोग्यधिकरणे कालिकादिसम्बन्धेन वृत्तावपि विवक्षणीयस्य स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगिसा-मानाधिकरण्यस्य विरहान्नातिव्याप्तिः। अयमात्मा ज्ञानादित्यादौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावादिमादाया-व्याप्तेर्वारणाय हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यमभाव-विशेषणम् अभावस्य वृत्तौ सम्बन्धभेदानिवेशेन वह्निमान्धूमा-दित्यादौ वह्नित्वादिना वह्न्याद्यभावस्य प्रतियोगिमति पर्व-

(१) आदिपदात् व्यभिचारस्थलान्यत्वाभावपरिग्रहः।

तादौ कालिकसम्बन्धेन वृत्तेर्लक्षणसमन्वयसम्भवान्न तत्राव्याप्तिवारणं तत्फलमिति तु ध्येयम्। अयमात्मा पृथिव्याद्यष्टद्रव्यातिरिक्तत्वे सति द्रव्यत्वादित्यादौ द्रव्यत्वसमानाधिकरणात्मत्वत्वाद्यवच्छिन्नात्मत्वाद्यभावानां प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिरतो हेतुसामानाधिकरण्यघटकहेतौ हेतुतावच्छेदकावच्छिन्नत्वनिवेशः। यद्यप्ययमात्मा ज्ञानादित्यादौ समानाधिकरणधर्म्मावच्छिन्नाभावमादायाव्याप्तिरभावे साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यविशेषणेनापि वारयितुं शक्यते धूमवान् वह्नेरित्यादौ धूमादिसमानाधिकरणस्य घटत्वादिना धूमाद्यभावस्य प्रतियोगिसामानाधिकरण्यावच्छेदकत्वेऽपि स्वविशिष्टयावद्धेत्वधिकरणासत्त्वेन प्रतियोगिसामानाधिकरण्यस्यैव विवक्षणीयतया अयोगोलकाद्यन्तर्भावेन च तादृशाभावस्यातथात्वान्नातिप्रसङ्गः, स्वविशिष्टहेत्वधिकरणेत्यत्र यत्पदेनैव हेतोरुपादेयतया तद्वदित्यत्र तत्पदेन तस्यैव परामर्शाद्व्याप्तेर्निरुक्तोपपत्तिरिति, तथापि कपिसंयोगाभाववान् ज्ञातत्वादित्यादौ साध्यसमानाधिकरणस्य कपिसंयोगाद्यात्मकाभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्धा सत्तावान् जातित्वादित्यादौ (१) सत्ताधिकरणे जाते कालिकादिसम्बन्धेन वर्त्तमानस्य सत्ताभावस्य तदप्रसिद्धा (२) अव्याप्तिर्दुर्वारैवेति हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यमेवोपादेयम्।

---

(१) [illegible]

(२) [illegible]

यत्तु अयमात्मा ज्ञानादित्यादौ आत्मत्वादिना आत्मत्वादेरभावस्य लक्षणघटकत्वेऽपि नाव्याप्तिस्तस्यापि प्रतियोग्यधिकरणीभूते आत्मादावेकज्ञानविषयत्व-स्वाश्रयाश्रयत्वादिरूपपरम्परासम्बन्धेन वर्त्तमानतया प्रतियोगिसमानाधिकरणत्वात् इति सामानाधिकरण्यान्तविशेषणमनर्थकम्, तन्न, एकज्ञानविषयत्वादिना विशिष्टबुद्धौ प्रमाणाभावेन तेषां संसर्गत्वाभावात्। नचैवमपि यदभावो व्यभिचारविरोधीत्युपाधिलक्षणे इह हेतावुपाधिर्नेह हेतावुपाधिरिति प्रतीतिव्यवहारानुरोधेन अव्याप्यत्वस्य सम्बन्धतया अन्यकृतैव स्वीकृतत्वात् तेन सम्बन्धेनैवात्मादावात्मत्वाभावादेर्वृत्तेः प्रतियोगिसामानाधिकरण्यमक्षतमेवेति वाच्यम्। अव्याप्यत्वादेः सम्बन्धताया विवादेन यदभावपदस्य यदव्याप्यत्वाद्यभावपरतामभ्युपगम्यापि अन्यकृता तादृशलक्षणव्याख्यानात् तत्सम्बन्धतायाम् अप्रामाणिकत्वाभिप्रायेणैवात्र यत्समानाधिकरणा इत्युपादानात्। यावत्पदासत्त्वे साध्यतावच्छेदकेत्यादिविशेषणस्य व्यावृत्तिर्न सङ्गच्छते यत्किञ्चिदभावमादायैव लक्षणसमन्वयसम्भवात् अतश्चरमोक्तस्यापि तत्पदस्य व्यावृत्तिं प्रथमतो दर्शयति, 'सर्व्वत्रेति, 'तथात्वात्' प्रतियोगिसमानाधिकरणत्वात्, तथाच यावत्पदानुपादाने व्यभिचारिमात्र एवातिव्याप्तिरिति भावः। यद्यपि व्यभिचारिस्थल एव दोषस्य कथनीयतया सर्व्वत्र तादृशाभावस्य तथात्वकथनमयुक्तं, तथापि यावत्पदानुपादानेऽतिव्याप्तिरेव नाव्याप्तिस्त्वित्येतत्सूचनाय सर्व्वत्रेत्युक्तम्। अथवा 'सर्व्वत्र' सर्व्वाधिकरणावच्छेदेन, तथाच विवक्षणीयस्य

स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यस्य सत्त्वं सूचितम्। ननु यावत्पदानुपादाने साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वं परित्यज्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेनैवाभावो विशेषणीयः तद्व्याप्यत्वस्य स्वव्यापकतत्त्वात्त्वन् अतो नानवस्था, वह्निमान् धूमादित्यादौ तत्तद्वह्न्याद्यभावानां साध्यतावच्छेदकव्याप्यप्रतियोगिताकानां यथाविवक्षणीयप्रतियोगिसामानाधिकरण्यविरहेऽपि घटत्वादिना वह्न्याद्यभावमादायैव लक्षणसमन्वयः (१) इत्थञ्च धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादाय नातिव्याप्तिसम्भवस्तस्य धूमत्वाद्यव्याप्यप्रतियोगिताकत्वेन लक्षणघटकताविरहात् एवं सति हेतुसमानाधिकरणत्वविशेषणमप्यनर्थकमिति (२) चेत्तदपि नहि लघुतामित्याशङ्कापरिहाराय तथाविधाभावनिवेशनेऽपि : यत्रातिव्याप्तिस्तत्र तत्पदव्यावृत्तिमाह, 'इतरथेति', 'इतरत्र' यावत्पदोपादानादेव, 'तत्त्वाद्यवच्छिन्नाभावस्य' भूतत्व-मूर्तत्वोभयत्वाद्यवच्छिन्नाभावस्य, 'प्रतियोगिसामानाधिकरण्येऽपि' गगनयोः प्रत्येकं भूतत्व-मूर्तत्वाश्रयप्रतियोगिसामानाधिकरण्येऽपि, तथाच यावत्पदानुपादाने साध्यतावच्छेदकव्याप्यप्रतियोगि-ताकताभावमादायैव प्रतियोगिसामानाधिकरण्यता इति-

(१) [illegible]

(२) [illegible]

(३) [illegible]

व्याप्तिः स्यादिति भावः। यावत्पदसत्त्वे यादृशाभावमादाया-तिव्याप्तिवारणं तादृशाभावं दर्शयति, 'भूतत्व-मनोन्यत्वाद्यभावस्येति भूतत्वाभावस्य मनोऽन्यत्वाभावस्य चेत्यर्थः, 'अतथात्वात्' प्रतियोग्यसमानाधिकरणत्वात्, यावत्पदे दत्ते साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशने वह्निमान् धूमादित्यादौ तादृशयावदभावान्तर्गतमहानसीयवह्न्याद्यभावमादायाव्याप्तिः स्यात् इति यथोक्तविशेषणस्यैव (१) उपादेयतया तादृशाभावयोरपि (२) लक्षणघटकत्वादिति भावः। भूतत्वस्य वह्निरिन्द्रियग्राह्यविशेषगुणात्मकतया प्रतियोगिस्वरूपाणां तन्निष्ठप्रतियोगितानाञ्चालीन्यायेन उत्पत्तिकालावच्छेदेन वा साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया भूतत्वाभावस्य न साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमित्याशयेनाखण्डव्याप्यवृत्तिमनोभेदाभावानुधावनमिति। उक्तरीत्या 'अतएवेत्यादिग्रन्थावतारणात् प्रथमतो वाच्यत्वाद्यभावमादाय सर्व्वत्रैव व्यभिचारिण्यतिव्याप्तिदर्शितत्वात् साध्याभावमादाय व्यभिचारिविशेषेऽतिव्याप्तिप्रदर्शनं सन्दर्भविरुद्धमित्याशङ्कानवकाशः।

केचित्तु यावत्पदानुपादाने वाच्यत्वादिकदाचीनपदार्थस्याभावमादाय व्यभिचारिसामान्येऽतिव्याप्तिर्व्विधायस्तु साध्याभावमादायाऽपि क्वचिदतिव्याप्तिः स्यात् सा च यावत्पदोपादानात्र भवतीत्यभिप्रायकतया न सन्दर्भविरोध इत्याहुः।

---

(१) साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविशेषणस्ये-त्यर्थः।

(२) भूतत्वाभाव-मनोऽन्यत्वाभावयोरित्यर्थः।

परे तु ननु साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताक-यावदभावनिवेशेनैवोपपत्तेः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावनिवेशनमफल तादृशप्रतियोगिताकत्वविशेषणव्यावर्त्तनीयस्य तत्तद्घटाद्यभावस्य वह्नित्वव्यापकप्रतियोगिताकत्वाभावेनोक्तविशेषणेनापि व्यावर्त्तनसम्भवात् अत-आह, 'अतएवेति यतः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावे यावत्त्वमुपात्तं न तु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावे अतएवेत्यर्थः, 'भूतत्वेति, साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे भूतत्व-मूर्त्तत्वोभयवान् मूर्त्तत्वात् इत्यादौ भूतत्वाभाव-मनोऽन्यत्वाभावप्रतियोगिताया-उभयत्वाव्यापकत्वेन उभयत्वावच्छिन्नाभावादेरेव लक्षणघटकतया अतिव्याप्तिः स्यात् यथोक्तविशेषणाक्रान्ताभावनिवेशे च भूतत्व-मनो-ऽन्यत्वाभावानामपि लक्षणघटकतया नातिव्याप्तिरिति भाव.(१)। न च साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशेऽपि हेतु-समानाधिकरणस्य मनोभिन्नभेदस्य प्रतियोगितावच्छेदकता-दात्म्यसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः साध्यतावच्छेदकव्यापकप्रतियोगिताया लक्षणे अनिवेशे तादृश-व्यापकताघटकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशासम्भवात् प्रतियोगितावच्छेदकसम्बन्धेनैव तत्सामानाधिकरण्यस्य विवक्षणीयत्वादिति वाच्यम्। प्रतियोगितावच्छेदकसम्बन्धेन प्रति-योगिसामानाधिकरण्यनिवेशे वह्निमान् धूमादित्यादौ हेतुमना-

---

(१) भावसम्बन्धिविशेषं इति पाठः।

नाधिकरणस्य वह्नित्वव्यापकप्रतियोगिताकस्य पर्व्वतभिन्नभेदस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यं पर्व्वतान्तर्भावेन नास्तीत्यव्याप्त्यापत्त्या तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यस्य निवेशासम्भवात् साध्यतावच्छेदकसम्बन्धेनैव प्रतियोगिसामानाधिकरण्यमगत्या वाच्यं तथाच मनोभिन्नभेदस्य तेन सम्बन्धेन मूर्त्तत्वादिरूपप्रतियोगिसामानाधिकरण्यमक्षतमेवेत्यतिव्याप्तिः साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे वक्ष्यमाणस्थलान्तरेऽप्यतिव्याप्तिः (१) स्यादिति तु नास्माकं दोषः इत्यभिप्राय इति व्याचक्रुः। तत्समीचीनतया न प्रतिभाति साध्यतावच्छेदकेत्यादिविशेषणव्यावृत्तेः पश्चाद्वक्ष्यमाणतया तदुत्तरमेव साध्यतावच्छेदकेत्यादिविशेषणस्थले साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वविशेषणं किन्नोपात्तमित्याकाङ्क्षोदयादादावेव तादृशविशेषणपरित्यागवीजकथनस्यासङ्गतत्वादिति।

'गोत्वाद्यभावस्येति, प्रतियोग्यसमानाधिकरणत्वादित्यर्थकेन 'अतथात्वादित्यनेनान्वयः, तथाच साध्यतावच्छेदकेत्याद्यनुपादाने चासम्भव इति भावः। यद्यपि गोत्वाभावादेरपि पूर्व्वक्षणवृत्तित्वादिविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यं पर्व्वतादावप्यस्ति तथापि व्यापकताया लक्षणाघटकत्वे भावरूपप्रतियोगिसामानाधिकरण्य धूमवान् वह्नेरित्यादौ धूमाभावादेः पूर्व्वक्षणवृत्तित्व-

(१) घटत्वाभाववान् मेयत्वादित्यादौ घटत्वाद्यात्मकस्वाभावस्य साध्यतावच्छेदकवैशिष्ट्यविशेषणताविशेषसम्बन्धेन किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणत्वादिति भाव ।

विशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादाय अतिव्याप्ति-वारणायावश्यं विवक्षणीयं तथाचायमसम्भव इति भावः। साध्य-प्रतियोगिकाभावनिवेशे गोत्वाभावमादायासम्भवस्य वारणसम्भ-वात् 'तत्तत्साध्यव्यक्त्यभावस्येति, अस्य च नानाव्यक्तिसाध्यक-इत्यादिः, तथाच साध्याभावनिवेशेऽपि वह्निमान् धूमादित्यादा-वव्याप्तिः स्यादिति भावः। साध्यतावच्छेदकावच्छिन्नव्यापकताव-च्छेदकत्वञ्च साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगि-तानवच्छेदकत्वं, गुण-कर्म्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्ताव्यापकतावच्छेदिकाया अपि द्रव्यत्वाद्यभावीयप्रति-योगितायाः न साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्व सत्त्वावति गुणादौ तादृशप्रतियोगित्वावच्छिन्नाभावसत्त्वादतो विशिष्टसत्ता-द्यभाव एव लक्षणघटकः तस्य च गुणादौ सत्तादिरूपप्रतियोगि-समानाधिकरणत्वादतिव्याप्तिरिति साध्यतावच्छेदकावच्छिन्नत्वो-पादानं, तथाच सति द्रव्यत्वाद्यभावीयप्रतियोगिताया अपि विशि-ष्टसत्तात्वावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकतया तादृशा-भावानाञ्च गुणादावतथात्वान्नातिव्याप्ति। यत्किञ्चिद्रूपावच्छिन्न-साध्यवत्त्वनिवेशे च सत्तावान् जातेरित्यादौ विशिष्टसत्ताव्याप-कतावच्छेदकप्रतियोगिताकद्रव्यत्वाभावादिकमादायाव्याप्तिर्बोध्या, साध्यवत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यम् अन्यथा धूमवान् वह्नेरित्यादौ धूमाभावायोगोलकान्यत्वाभावादिप्रतियोगितायाः कालिकविशेषणता-विषयितादिसम्बन्धेन धूमादिमति काल-ज्ञानादौ संयोगादिसम्बन्धेन स्वावच्छिन्नाभावसत्त्वात् केनापि

धूमादिमत्त्वभावसत्त्वेऽपि सम्बन्धत्वरूपव्यापकधर्म्मावच्छिन्न(१)-संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकतदभावासत्त्वात् तथाच धूमाद्यभावस्यापि लक्षणघटकतया तस्य च साध्यतावच्छेदक-सम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितत्वप्रतियोगित्वावच्छिन्न-व्यापकताघटकसंयोगत्वाद्यवच्छिन्नसंयोगादिसम्बन्धेन प्रतियोगि-सामानाधिकरण्यविरहान्नातिव्याप्तिरिति वाच्यम्। सम्बन्धत्वेन सम्बन्धानामभावप्रतियोगितावच्छेदकसम्बन्धत्वे मानाभावात् तेन रूपेण सम्बन्धाना व्यापकताघटकत्वासम्भवात्। वस्तुतस्तु प्रति-योगिसामानाधिकरण्यशरीरे व्यापकतायाः स्वातन्त्र्येण निवेशस्य प्रतिक्षेप्यत्वात् ज्ञानवान् द्रव्यत्वादित्यादावतिव्याप्तिरस्त्येवेति ध्येयम्। वस्तुतस्तु संयोग-समवायादिसाधारणानुगतसम्बन्धत्वस्य कथञ्चित् सुवचत्वेऽपि तेन रूपेण संयोगादीनां संसर्गतया भानस्य निर्युक्ति-कतया व्यापकताशरीरे लाघवानुरोधात् साध्यप्रकारेणाधिकरणस्य निवेशे साध्यसम्बन्धो विशिष्य संसर्गतया निवेशनीयः तथाच वि-शिष्य साध्यतावच्छेदकसम्बन्धनिवेशनमावश्यकं यत्किञ्चित्सम्बन्धेन साध्यवत्ताया व्यापकताघटकत्वे तु वह्निमान् धूमादित्यादौ विष-यितादिसम्बन्धेन साध्यं प्रति गुणत्वाद्यभावप्रतियोगिताया अपि व्यापकतावच्छेदकतया तादृशाभावस्य च पर्व्वतादौ प्रतियोगिसा-मानाधिकरण्यविरहात् असम्भवो बोध्यः। साध्यवन्निष्ठाभावाप्रति-योगिप्रतियोगिकत्वनिवेशे सर्व्वस्यैव साध्यवन्निष्ठद्वित्वाद्यवच्छि-न्नाभावप्रतियोगितया तादृशाभावाप्रतियोगिनोऽप्रसिद्धिरित्यतो-

(१) सम्बन्धत्वरूपानुगतधर्म्मावच्छिन्नेति पा०।

इत्यवच्छेदकभेदेन साध्यप्रतियोगितानवच्छेदकत्वं साध्याभावप्रति-योगितायाः, असाधारण्यस्य च प्रत्यक्षं तत्त्वात, प्रमाणा-श्रितविशिष्टप्रतियोगिताभावस्येव अधिकरणभेदतया साध्यविशिष्टा-भावप्रतियोगितावच्छेदकतया विरुद्धस्य प्रत्येकमात्रावच्छिन्न-प्रतियोगिताकभेदप्रमाणाभावस्येव अन्यापेक्षकत्वेन व्यभि-चारित्वनियमभङ्गात् ।

यत्तु साध्याभावच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितान-वच्छेदकप्रतियोगिकत्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकप्रतियो-गिकत्वनिवेशनेन सर्वेषामन्वये निरुक्तव्यापकतावच्छेदकप्रति-योगिताकत्वनिवेशनमफलं वह्निमान् धूमादित्यादौ घटत्वादिना वह्न्याद्यभावप्रतियोगिना वह्न्यादीना चालनीन्यायेन साध्य-वन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि घटत्वादिना द्रव्यत्वाभाव-मादायैव लक्षणसमन्वयसम्भवात् व्यभिचारिणि व्यभिचार-निरूपकाधिकरणभेदाभावमादायैवातिव्याप्तिवारणसम्भवाच्च । न च साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वापेक्षया तादृशविशेषणस्य न लघुशरीरतेति वाच्यम् । व्यापकतावच्छेद-कघटकाभावप्रतियोगितावच्छेदकताया स्वरूपसम्बन्धावच्छिन्नत्व-स्याधिकस्य निवेशनीयत्वात् एतन्मते तदनिवेशेन लाघवात्, तन्मते तदनिवेशे सर्व्वासामेव प्रतियोगितानां साध्यवन्निष्ठो यो विषयिता-दिसम्बन्धेन प्रतियोगिताविशिष्टस्याभावः (१) तत्प्रतियोगिताव-च्छेदकतया व्यापकतावच्छेदकप्रतियोगिताया एवाप्रसिद्ध्यापत्तेः,

(१) स्वावच्छिन्नस्याभाव इति पा० ।

भेदप्रतियोगितावच्छेदकतायां व्यापकताघटकसम्बन्धावच्छिन्नत्वस्यैतन्मते निवेशवदस्मन्मतेऽपि अभावप्रतियोगितायां तन्निवेशस्यावश्यकतया तदंशे साम्यादिति। तदसत्, यतोऽनवच्छेदकप्रतियोगिकत्वम् अनवच्छेदकनिष्ठप्रतियोगितानिरूपकत्वं प्रतियोगितायां तन्निष्ठत्वञ्च स्वरूपसम्बन्धेन वाच्यम् अन्यथा वह्निमान् धूमादित्यादावपि विषयतासम्बन्धेन साध्यव्यापके प्रमेयमित्याकारकविश्वविषयकज्ञाने विषयितासम्बन्धेन जलत्वाद्यभावप्रतियोगिताया वृत्तेस्तादृशाभावस्य लक्षणघटकत्वापातात्। विषयिताया वृत्त्यनियामकतया एतद्दोषानवकाश इति चेदेवमपि एतद्वह्निमान् एतद्धूमात् एतद्रूपवान् एतद्रसादित्यादौ जलत्वाद्यभावप्रतियोगितायाः कालिकसम्बन्धेन साध्यव्यापकसाध्य-तत्समानाधिकरणकर्म्मादौ वर्त्तमानतया लक्षणघटकतापातात् तथाच व्यापकनिरूपितवृत्तौ स्वरूपसम्बन्धावच्छिन्नत्वनिवेशस्यैव तन्मतेऽप्यावश्यकतया न लाघवाद्यवकाशो विपरीतमेव गौरवम् आधेयत्वांशाधिक्येनेति (१)। न च व्यापकनिष्ठप्रतियोगिताकत्वेन नाभावो विशेषणीयः येनोक्तं गौरवं स्यादपि तु अनुयोगितासम्बन्धेन व्यापकविशेषित एव तत्र च व्यापकतावच्छेदकप्रतियोगिताकत्वेनाभावनिवेशापेक्षया लाघवमक्षुण्णमेवेति वाच्यम्। प्रतियोगिविशेषणतापन्नधर्म्मावच्छिन्ननिरूपितत्वानवच्छिन्नानुयोगितायाः (२) अभावांशे प्रतियोगिसम्बन्ध-

---

(१) विपरीतगौरवमेवाधेयत्वनिवेशाधिक्येनेतीति पा०।

(२) प्रतियोगितावच्छेदकविशेषानवच्छिन्ननिरूपितत्वावच्छिन्नानुयोगितायाः इति पा०।

तया भाने (१) पटादिमति घटत्वाद्यवच्छिन्नाभावविषयिन्या द्रव्यं नास्तीत्याकारिकायाः प्रतीतेरापत्तेः तदवच्छिन्ननिरूपितानुयोगिताया एव संसर्गतया भानोपगमात् व्यापकत्वावच्छिन्नविशेषिताभावस्य लक्षणे निवेशे व्यापकत्वावच्छिन्ननिरूपितानुयोगितायाः संसर्गतया निवेशनीयतया सद्धेतौ हेतुसमानाधिकरणसाध्यव्यापकत्वावच्छिन्नाभावस्य (२) सम्बन्धविशेषावच्छिन्नप्रतियोगिताकस्य कथञ्चित् प्रसिद्ध्या लक्षणसमन्वयेऽपि व्यभिचारिण्यतिव्याप्तिः व्यभिचारनिरूपकाधिकरणेऽपि कस्यचित् साध्यव्यापकस्य वृत्तेः व्यधिकरणधर्म्मावच्छिन्नाभावस्य लक्षणघटकत्वानुपपत्तिश्चेति। एवं अनवच्छेदकपदेन अवच्छेदकत्वपर्य्याप्त्यनधिकरणत्वमवश्यं वाच्यम् (३) अन्यथा द्रव्यत्वाभावादेरपि वह्निमन्निष्ठपूर्व्वक्षणवृत्तित्वविशिष्टद्रव्यत्ववद्भेदप्रतियोगितावच्छेदकद्रव्यत्वप्रतियोगिकत्वाल्लक्षणाघटकत्वापत्तेः (४) तथाच घटत्वावच्छिन्नघटाभावादेरपि लक्षणघटकत्वापत्तिः वह्निमन्निष्ठभेदप्रतियोगितावच्छेदकताया घटत्वविशिष्टपर्य्याप्ततया शुद्धघटस्य तत्-

---

(१) प्रतियोगितावच्छेदकविशेषावच्छिन्ननिरूपितत्वानवच्छिन्नानुयोगिताया प्रतियोगिविशेषणतानापन्नधर्म्मावच्छिन्नप्रतियोगिताकत्वेनाभासमाने प्रतियोगिसम्बन्धतया भान इति पा०।

(२) हेतुसमानाधिकरणसाध्यव्यापकत्वावच्छिन्नसाध्यव्यापकाभावस्येति पा०।

(३) एवमनवच्छेदकपदेन अवच्छेदकानवच्छिन्नावच्छेदकतान्यत्वपर्य्यन्तम् अवश्यं वक्तव्यमिति पा०।

(४) वह्निमन्निष्ठद्रव्यत्वाद्यवृत्तिघटत्वाद्यवच्छिन्नद्रव्यत्वादिमद्भेदप्रतियोगितावच्छेदकद्रव्यत्वप्रतियोगिकत्वात् लक्षणघटकत्वानुपपत्तेरिति पा०।

पर्य्याप्त्यनधिकरणत्वात् (१)। अथ निरुक्तव्यापकतायाः (२) निवेशे कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावानां लक्षणघटकत्वानुपपत्तिः कपिसंयोगाभावादिनिष्ठप्रतियोगितानां साध्यवन्निष्ठकपिसंयोगात्मकाभावप्रतियोगितावच्छेदकत्वादित्यग्रिमग्रन्थविरोधः। न च व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणसत्त्वात् साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावस्य न व्यापकतालक्षणघटकतेति वाच्यम्। प्रकृते व्यापकतायां तादृशविशेषणप्रवेशस्य निष्प्रयोजनकत्वात्।

अत्र केचित्, व्यापकतालक्षणेऽभावे प्रतियोगिवैयधिकरण्यमावश्यकम् अन्यथा अभावे सम्बन्धसामान्येन साध्यवन्निष्ठत्वनिवेशे कालपरिमाणवान् द्रव्यत्वादित्यादौ व्यतिरेकितावच्छेदकप्रतियोगितामात्रस्यैव कालिकसम्बन्धेन साध्यवद्वृत्तित्वं स्वावच्छिन्नाभावप्रतियोगितावच्छेदकतया परिमाणत्वादिनिष्ठप्रतियोगिताया एव व्यापकतावच्छेदकतया अतिव्याप्त्यापत्तेः। दैशिकविशेषणताविशेषसम्बन्धेन तन्निष्ठत्वनिवेशे भावस्य तेन सम्बन्धेन वृत्तेरप्रसिद्धतया वह्निमान् धूमादित्यादौ पर्वतत्वाद्यभाववन्निष्ठप्रतियोगिताया अपि साध्यव्यापकतावच्छेदकतापत्त्या पर्वतत्वाद्यात्मकाभावस्यापि लक्षणघटकत्वापातात् प्रतियोगिव्यधिकरणघटकाभावेऽ वृत्त्यादपि तादृशसम्बन्धावच्छिन्नत्वनिवेशे नानात्मकानि तादृश-

१ [illegible]

२ [illegible]

सम्बन्धनिवेशेन प्रतियोगितानवच्छेदकत्वमित्यत्र च व्यधिकरण-धर्म्मावच्छिन्नाभावप्रतियोगितावच्छेदकतावारणाय सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्य निवेशेन च गौरवात् अभावे प्रतियोगिवैयधिकरण्यनिवेशनमेवोचितं, व्यधिकरणधर्म्मावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणतयैव तमादाय दोषासम्भवादेतन्मतेऽवच्छेदकतायां सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्यानिवेशनात् अभावीयवृत्तौ सम्बन्धभेदानिवेशाच्च। प्रतियोगिवैयधिकरण्यञ्च न प्रतियोगिसमानाधिकरणभिन्नत्वं तथा सति तद्वह्निसंयोगाद्यभावस्य प्रतियोगिसमानाधिकरणतया अभावान्तरमादाय तद्वह्निसंयोगादिनिष्ठप्रतियोगिताया अपि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकतापत्त्या तदभावमादायाव्याप्त्यापत्तेः। किन्तु प्रतियोग्यनधिकरणवृत्तित्वं तथाच प्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठात्यन्ताभावेत्यभावान्तार्थनिष्कर्षः। अत्र च व्यापकतावटकत्वेनाभिमतो यः सम्बन्धस्तेन प्रतियोग्यनधिकरणत्वं वाच्यं तेन कालपरिमाणादिसाध्यकस्थले सम्बन्धसामान्येन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्धावपि न क्षतिः। कालः सर्व्वत्रान् कालपरिमाणादित्यादौ साध्यतावच्छेदककालिकसम्बन्धेन प्रतियोग्यनधिकरणसाध्याधिकरणाप्रसिद्ध्या तादृशसम्बन्धस्य व्यापकतावटकत्वासम्भवेऽपि न क्षतिः। तत्र समवायादिसम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकं घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसम्भवात्। अत्रैवं दैशिकविशेषणतासम्बन्धस्य क्वापि व्यापकतावटकत्वं न स्यात् सर्व्वस्यैवाभावस्य

पूर्व्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिनस्तेन सम्बन्धेन साध्यवति वृत्तेः तेन सम्बन्धेन स्वप्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावाप्रसिद्धेः। न च तादृशसम्बन्धस्य व्यापकत्वाघटकत्वेऽपि क्षतिविरहः सामान्यादिमात्रवृत्तिसाध्यकस्थलेऽपि विषयतासम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकसाध्यवत्त्वादिप्रकारकप्रमाभावमादायैवोपपत्तिसम्भवात् इति वाच्यम्। तादृशसम्बन्धस्यातथात्वे तेन सम्बन्धेन कपिसंयोगाभावादिसाध्यकमेयत्वादिहेतुकस्थले तन्निष्ठकपिसंयोगाद्यात्मकाभावीयप्रतियोगिताया व्यापकतावच्छेदकत्वानुपपत्त्या अग्रिमग्रन्थासङ्गतितादवस्थ्यादिति चेन्न. लाघवानुरोधेन येन सम्बन्धेन यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणं साध्यवत्तादृशप्रतियोगितानवच्छेदकत्वमेव तादृशसम्बन्धघटितव्यापकतावच्छेदकत्वमिति वक्तव्यम् इत्यञ्च कपिसंयोगाभावादिसाध्यकस्थले तन्निष्ठप्रतियोगित्वावच्छिन्नप्रतियोगिता नोक्तयादृशपदेनोपादातुं शक्यते तादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वस्य साध्यवत्यसम्भवात् किन्तु घटत्वाद्यभावनिष्ठप्रतियोगितैव, दैशिकविशेषणतया तदवच्छेदकावच्छिन्नानधिकरणत्वस्य (१) साध्यवति घटादौ सत्त्वात् तदनवच्छेदकत्वञ्च कपिसंयोगाभावादिनिष्ठप्रतियोगिताया इति कपिसंयोगादेर्दैशिकविशेषणताघटितव्यापकतावच्छेदकप्रतियोगिताकत्वनिर्व्वाहः. समनियततया अभावैक्यमते (२) घटाद्यभा-

(१) तदवच्छेदकावच्छिन्नानधिकरणत्वस्येति पा०।

(२) समनियताभावैक्यमत इति पा०।

तानामपि [illegible] प्रमेय
मात्रवृत्तित्व[illegible]
[illegible] प्रतियोगितावच्छेदकाधिकरण[illegible]
दकविशिष्टानधिकरणत्वनिवेश: । न च [illegible]भावानां प्रमेय
मात्रप्रतियोगिकत्वेऽपि [illegible] प्रतियोगितावच्छे-
दकत्व[illegible] । तादृ
शाभावानामपि तथा [illegible]नामपि घटत्वादि-
विशेषितघटादिवृत्तित्वेन [illegible]प्रतियोगिताया[illegible]
साध्यघटादिमात्रवृत्तिप्रतियोगिताया अप्रामाणिकत्वात् । मत
नियताभावानामभेदानभ्युपगमेऽपि साध्याभावादिप्रतियोगि
तया साध्यवद्वृत्तिपदार्थाभावस्य प्रतियोगितामादाय तादृशप्रति-
योगिताया व्यापकतानवच्छेदकत्वापत्तिवारणाय तादृशप्रतियोगि-
तावच्छेदकविशिष्टानधिकरणत्वनिवेशनमावश्यकम । अथ द्रव्यत्वा-
द्यभावीयद्रव्यत्वादिनिष्ठप्रतियोगितानामपि संयोगादिव्यधिकरण-
सम्बन्धघटितव्यापकतावच्छेदकत्वापत्ति: संयोगादिना तादृशप्रति-
योगितात्मकप्रतियोगितावच्छेदकविशिष्टाधिकरणाप्रसिद्धा यादृ-
शप्रतियोगितित्वत्र तादृशप्रतियोगित्वावच्छिन्नाया: प्रतियोगिताया
उपादातुमशक्यतया प्रतियोगितान्तरमुपादाय तत्त्वानवच्छेदकत्वा-
न्तसत्त्वात् तथाच यावद्व्यापकताघटकसम्बन्धान्तर्गतसंयोगादिना
द्रव्यत्वाद्यभावस्य प्रतियोगिसामानाधिकरण्यासम्भवादसम्भव., एव
समवायादिसम्बन्धावच्छिन्नाकाशानिष्ठप्रतियोगितायामपि तथा-
त्वापत्ति: । न च संयोगादिना द्रव्यत्वाद्यभावस्य स्वसमनियतघट

त्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावाभिन्नतया संयोगादिना वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वानासम्भव इति वाच्यम्। एवमपि सत्तावान् जातेरित्यादौ हेत्वधिकरणावच्छेदेन तादृशाभावाना स्वयोगेन प्रतियोगिसामानाधिकरण्यासम्भवेनाव्याप्तेर्दुर्व्वारत्वात् नैवं, व्यापकताघटकसम्बन्धत्वेनाभिमतो यः सम्बन्धस्तेन सम्बन्धेन वृत्तिमन्निष्ठत्वेन प्रतियोगिताया विशेषणीयत्वात्, द्रव्यत्वादेः संयोगादिना अवृत्तितया उक्तदोषानवकाशादित्याहुः।

वस्तुतस्तु लघुरूपसत्त्वनियतगुरुधर्म्मस्यानवच्छेदकत्वे घटाद्यभावप्रतियोगिताया अपि वह्न्यादिव्यापकतावच्छेदकत्वापत्तिः तादृशप्रतियोगिनःविशिष्टघटाद्यभावप्रतियोगिताया लाघवेन घटत्वादावेवावच्छेदकतया घटाद्यभावीयप्रतियोगितानां तदनवच्छेदकत्वात्। न च प्रतियोगितायास्तत्तदभावीयप्रतियोगितात्वेनावच्छेदकताया गौरवेऽपि स्वरूपतोऽवच्छेदकत्वेऽविशेषः, प्रतियोगितायाः स्वरूपतोभानाभावेन तेन रूपेणावच्छेदकताया-प्यसम्भवादिति पारिभाषिकमवच्छेदकत्वं व्यापकताशरीरे निवेशनीयं तथाच साध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्म्मस्तदवच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकं फलतः साध्यवद्-वृत्तिच्छिन्नात्यसम्बद्धस्वविशिष्टसामान्यकं यद्यत् स्वं तदन्यत्वमेव व्यापकतावच्छेदकत्वं. तथाच कपिसंयोगाद्यात्मकाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमनायासेनैव निर्व्वहति यतः कपिसंयोगाद्यभावनिष्ठप्रतियोगिताविशिष्टस्य सर्वत्रैव साध्यवति वृत्तेः तस्याः स्वपदेनोपादातु-

मगवात्वात् तादृशं स्वं धर्म्मान्तरमेव तदन्यत्वञ्च तादृशप्रतियोगितायामक्षतमिति । स्वसम्बन्धत्वशरीरेऽपि व्यापकताघटकतेनाभिमतो यः सम्बन्धः स एव निवेशनीयः, द्रव्यत्वादिनिष्ठप्रतियोगित्वञ्च संयोगादिसम्बन्धेन साध्यवदसम्बन्धत्वविशिष्टसामान्यकमेयातो न संयोगादिघटितव्यापकतावच्छेदकत्वन्तस्येति नोक्तदोषावकाश इति दिक् ।

तत्त्वचिन्तामणिदीधितिः ।

येन सम्बन्धेन हेतुः तेनैव तदधिकरणं बोध्यं तेनात्मत्वे साध्ये समवायेन हेतोर्ज्ञानस्य विषयतयाऽधिकरणे घटादौ वर्त्तमानस्य साध्याभावस्य तथात्वेऽपि न क्षतिः, एवं दृष्टान्तरेऽपि सम्बन्धभेदनिबन्धनो दोषः सम्बन्धैक्यविवक्षया निरसनीयः ।

गादाधरी विवृतिः ।

'येन सम्बन्धेन हेतुरिति व्यापकतावटकतयाभिमतो [illegible] [illegible], 'बोध्यमित्यस्य हेतुमानाधिकरण्यघटक[illegible] [illegible] येन [illegible], 'आत्मत्वे साध्ये [illegible] [illegible], 'साध्याभावस्य' [illegible] [illegible] [illegible] [illegible]

[illegible]

विशेषणतया तदभावस्यापि सत्त्वेन विवक्षणीयप्रतियोगिसामाना धिकरण्यसम्भवात्, वृत्त्यनियामकसंयोगस्यापि संयोगत्वेन हेतुतावच्छेदकसम्बन्धत्वात्। न च तथापि वृत्तिनियामकसंयोगेन धूमहेतुकस्थलेऽव्याप्तिरस्त्येवेति वाच्यम्। तेन रूपेण सम्बन्धतायां मानाभावात् कालस्यावृत्तितया काले धूमसंयोगस्य कालनिष्ठ धूमाधेयत्वानियामकत्वेऽपि धूमस्य तेन सम्बन्धेन कालवृत्तित्वमस्त्येवेत्यस्यापि सुवचत्वाच्च वह्निमान् धूमादित्यादौ साध्याभावमादाय नाव्याप्तिसम्भवः किन्तु चरमक्रियात्मकाभावमादायैवेति, अव्याप्तेः स्फुटतरप्रतिपत्त्यर्थमात्मत्वादिसाध्यकस्थलानुधावनस्य सार्थकत्वाच्चेति। ननु ज्ञानवानात्म-महाकालान्यतरत्वादित्यादौ हेतुसमानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावानामेव स्वविशिष्टहेत्वधिकरणमहाकाले कालिकादिसम्बन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिः। न च तादात्म्येन ज्ञानव्यापकस्यात्मनोऽभाव एव काले न प्रतियोगिसमानाधिकरणः आत्मनोऽवृत्तितया कालिकसम्बन्धेनाप्यवृत्तेरिति वाच्यम्। आत्मनः कालावृत्तित्वे कालवृत्तित्वघटितकारणत्वाद्यनुपपत्त्या तदुपगमस्यावश्यकत्वात्। नित्यद्रव्याना कालावृत्तित्वेऽपि महाकालभिन्नो द्रव्यत्वात् ईश्वरज्ञानभिन्न गुणत्वादित्यादावतिव्याप्तिः वृत्तिमतामेव महाकालभेदेश्वरज्ञानभेदादीना व्यापकतया तदभावाना यावतामेव महाकाले ईश्वरज्ञानादौ कालिकविशेषणता-विषयितादिसम्बन्धघटितप्रतियोगिसामानाधिकरण्यसत्त्वादित्यत आह, 'एवं दलान्तरेऽपीति, 'दलान्तरे' प्रतियो-

गिसामानाधिकरण्यघटकप्रतियोगिमत्त्वादले,'सम्बन्धभेदनिबन्धनो-दोषः' कालिकादिसम्बन्धमादायातिव्याप्तिरूपः, 'सम्बन्धैक्यविवक्षया' व्यापकताघटकसम्बन्ध-प्रतियोगिमत्त्वाघटकसम्बन्धयोरैक्य-विवक्षया, तथाच ज्ञानवानात्म-महाकालान्यतरत्वात् महाकालभिन्नोद्रव्यत्वादित्यादौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितव्यापकताघटकसमवाय-दैशिकविशेषणतादिसम्बन्धेन ज्ञानाभाव-महाकालभेदाभावादिप्रतियोगिना (१) कालादावहत्तेर्नातिव्याप्तिरिति भावः। अत्र च येन येन सम्बन्धेन स्वप्रतियोगित्वावच्छिन्नस्य साध्यतावच्छेदकावच्छिन्नव्यापकता तेन तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यमभावस्य विवक्षणीयम् अन्यथा इदं नित्यज्ञानं नित्यत्वे सति सविषयकत्वादित्यादौ हेतुसमानाधिकरणनित्यज्ञानत्वाद्यभावस्य प्रतियोगिनः साध्यं प्रति विषयितासम्बन्धेनापि व्यापकतया तेन सम्बन्धेन हेत्वधिकरणेश्वरेच्छा-हत्योः प्रतियोगिसामानाधिकरण्येनातिव्याप्तिः येन येनेत्युक्तौ च तथाविधसमवायादिसम्बन्धेनातथात्वात् नातिव्याप्तिः। अत्र च साध्यतावच्छेदकावच्छिन्ननिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकसम्बन्धत्वेन तादृशसम्बन्धस्य प्रतियोगिसामानाधिकरण्यशरीरे न स्वातन्त्र्येण निवेशस्तथा सति अभावे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविशेषणवैयर्थ्यात्। न हि तादृशविशेषणानुपादाने गोत्वाद्यभावमादायासम्भवः सम्भवति, गोत्वाद्यभावानामपि हेत्वधिकरणे पूर्व्वक्षणवृत्तित्वविशिष्ट-

(१) ज्ञानाभाव महाकालादिभेदाभावप्रतियोगिनामिति पा०।

स्वाभावरूपप्रतियोगिना तन्निष्ठव्यापकताघटकदैशिकविशेषणता-सम्बन्धेन सामानाधिकरण्यसत्त्वात्, धूमवान् वह्नेरित्यादौ धूमाद्य-भावस्यायोगोलके पूर्व्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगि-सामानाधिकरण्येऽपि यावद्व्यापकताघटकसम्बन्धान्तर्गतसंयोगा-दिना प्रतियोगिसामानाधिकरण्यविरहात्। घटत्वाभाववान् प्रमेयत्वादित्यादौ घटत्वाद्यात्मकाभावस्य तादृशप्रतियोगिसामाना-धिकरण्येऽपि विशेष्यतासम्बन्धघटितसाध्यव्यापकावच्छेदकप्रति-योगिताकस्य घटावृत्तेर्घटत्वाभावादिप्रमायाः तादृशसम्बन्धेना-भावस्य यावद्व्यापकताघटकसम्बन्धान्तर्गततादृशसम्बन्धेन घटे प्रतियोगिसामानाधिकरण्यविरहादतिव्याप्त्यनवकाशात्। अपि तु साध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपितयद्यत्सम्बन्धघटितव्याप-कतावच्छेदकप्रतियोगिताका ये येऽभावास्तत्तत्सम्बन्धेन प्रतियोगि-समानाधिकरणाः एव क्रमेणैव निवेशाद्व्यापकताया एकधैव लक्षणे निवेश इति।

यत्तु साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्य-निवेशात् न ज्ञानवानात्म-महाकालान्यतरत्वादित्यादावतिव्याप्तिः, इत्यञ्च व्यापकतापि साध्यतावच्छेदकसम्बन्धघटिता ग्राह्या, तेन वह्निमान् धूमादित्यादौ घटत्वादिना घटवृत्तित्वविशिष्टद्रव्यत्वत्वा-दिना वा द्रव्यत्वादेरभावस्य समवायादिसम्बन्धघटितसाध्यव्यापक-तावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिरिति, तन्न, तथा सति कालिकविशेषणतया महाकालान्यत्वविशिष्टघटादौ साध्ये

कालत्वादिहेतावतिव्याप्त्यापत्तेः तत्र महाकालान्यत्वविशिष्ट-
घटाभाव-महाकालान्यत्वाभावादीनां कालिकसम्बन्धेन महाकाले
घटादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वादिति। यदि च महा-
कालान्यत्वविशिष्टोऽपि घटो महाकाले वर्त्तते अन्यथा सिद्धान्त-
लक्षणे महाकालो घटवान् कालपरिमाणादित्यादौ महाकाला-
न्यत्वविशिष्टघटाभावस्यैव प्रतियोगिव्यधिकरणस्य सुलभतया उभ-
याभावघटितप्रतियोगिवैयधिकरण्यनिर्व्वचनायासस्य निष्प्रयोजन-
कतापत्तेरिति दर्शितविशिष्टसाध्यकस्थले कालत्वादिः सद्धेतुरे-
वेति मन्यते तदापि घटत्वाभाववान् प्रमेयत्वादित्यादौ घटत्वात्य-
न्ताभावस्य साध्यतावच्छेदकदैशिकविशेषणतासम्बन्धेन किञ्चि-
द्विशिष्टत्वाभावात्मकप्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्ति-
रेतन्मते दुर्व्वारैव। न च तेन सम्बन्धेन भावरूपप्रतियोगिसामाना-
धिकरण्यस्य विवक्षणीयतया नायं दोष इति वाच्यम्। तथा-
सत्यभावसाध्यकसद्धेतौ निरुक्तयावदभावान्तर्गतभावरूपसाध्याद-
भावस्य भावरूपप्रतियोग्यप्रसिद्ध्या भावरूपप्रतियोगिसामानाधि-
करण्यासम्भवादव्याप्तेः, अभावपदस्य भावभिन्नाभावपरत्वे कपि-
संयोगाभावसाध्यकस्थले कपिसंयोगात्यन्ताभावाभावादावपि स्वविशि-
ष्टपदव्यावृत्तिप्रदर्शनस्यासङ्गत्यापत्तेः। एवं साध्यतावच्छेदकसम्ब-
न्धेन व्यापकत्वादिनिवेशे 'सत्तावानित्यादिना' पूर्व्वम् उक्तेरित्यादौ
वाच्यत्वादभावसाधनादावतिव्याप्तिप्रदर्शनस्यासङ्गत्यापत्तेरिति।

यत्तु दैशिकविशेषणताविशेषेण व्याप्यता तेनैव च सम्बन्धेन
प्रतियोगिसामानाधिकरण्यं वाच्यं साध्यतावच्छेदकसम्बन्धप्रतियोगित्व-

त्वाभावमादायैव लक्षणसङ्गमनमतिव्याप्तिवारणञ्चेति, तदपि उक्ता-तिव्याप्तेः (१) आत्मत्वादिसाध्यकस्थले साध्याभावमादाय हेतुताव-च्छेदकसम्बन्धव्याप्तिप्रदर्शनविरोधाच्चानुपादेयमेव ।

केचित्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामाधि-करण्यनिवेशान्न प्रागुक्तातिव्याप्तिः, इत्यत्र व्यापकतापि तेन सम्बन्धेनैव वाच्या अतो वह्निमान् धूमादित्यादौ संयोगादिघटित-व्यापकतावच्छेदकप्रतियोगिताकस्य समवायादिसम्बन्धावच्छिन्न-प्रतियोगिताकवह्न्याद्यभावस्य हेत्वधिकरणे समवायादिना प्रति-योगिसामानाधिकरण्यविरहेऽपि न क्षतिः तादृशाभावानां साध्य-तावच्छेदकासम्बन्धघटितसाध्यनिष्ठव्याप्यतानिरूपितव्यापकतावच्छे-दकप्रतियोगिताकत्वेऽपि स्वप्रतियोगितावच्छेदकसम्बन्धघटित-व्यापकतावच्छेदकप्रतियोगिताकत्वाभावेन निरुक्तयावदभावा-नन्तःपातित्वात् । न चैवं व्यधिकरणधर्मावच्छिन्नाभावस्य सम्बन्धावच्छिन्नप्रतियोगिताकत्वे मानाभावेन तादृशाभावस्य लक्षणघटकत्वानुपपत्तिरिति वाच्यम् । संयोगेन घटत्वेन पटो नास्तीत्यनुभवबलात्तादृशाभावप्रतियोगितायामपि सम्बन्ध-स्यावच्छेदकत्वात् (२) अनुभवानादरे तु समानाधिकरणधर्मा-वच्छिन्नाभावप्रतियोगितायामपि सम्बन्धस्यावच्छेदकत्वासिद्धेः । अथ बाधबुद्धिप्रतिबन्धकतायाः सम्बन्धविशेषनियन्त्रितत्वानुरो-धेन समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य सम्ब-

(१) घटत्वाभाववान् प्रमेयत्वादित्यादावतिव्याप्तेरित्यर्थः ।

(२) सम्बन्धावच्छिन्नत्वादिति पा० ।

न्यावच्छिन्नप्रतियोगिताकत्वमावश्यकम् अन्यथा एकैकविध-घटाद्यभावज्ञानस्य संयोग-समवायादिरूपनिखिलसंसर्गावगाहि-ज्ञानप्रतिबन्धकत्वप्रसङ्गात् (१)। न च संयोगादिसम्बन्धावच्छिन्न-घटादिप्रकारताकबुद्धिं प्रति वस्तुगत्या संयोगादिसम्बन्धेन घटादि-सत्ताविरोधी योऽभावस्तज्ज्ञानत्वेन प्रतिबन्धकत्वान्नोक्तातिप्रसङ्ग-इति वाच्यम्। वास्तवतादृश्याभावज्ञानत्वादिना प्रतिबन्धकत्वे घटाभावत्वेन पदार्थान्तरावगाहिज्ञानस्य घटादिसत्ताज्ञानाविरो-धित्वप्रसङ्गात् (२) तस्मात् तत्तत्संसर्गकविशिष्टबुद्धौ तत्तत्संसर्गा-वच्छिन्नप्रतियोगिताकाभावत्वावगाहिज्ञानत्वेनैव प्रतिबन्धकताया-वक्तव्यतया समानाधिकरणधर्मावच्छिन्नप्रतियोगितायां सम्बन्ध-स्यावच्छेदकतासिद्धिरिति चेत्, तर्हि घटत्वविशिष्टपटाद्यवगाहि-भ्रम-घटत्वादिनापटाद्यभावज्ञानयोरपि प्रतिबध्य-प्रतिबन्धक-भावस्य सत्त्वात् तादृशप्रतिबध्य प्रतिबन्धकभावस्य सम्बन्धविशेष-नियन्त्रितत्वानुरोधेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अपि सम्बन्धावच्छिन्नत्वावश्यकत्वाद्व्यधिकरणधर्मावच्छिन्नाभावज्ञानस्या-प्रतिबन्धकत्वे बाधग्रन्थे लाघवोपनीतकाञ्चनमयत्वादिना वह्न्या-द्यनुमितिविरोधितया काञ्चनमयत्वाद्यवच्छिन्नप्रतियोगिताक-वह्न्याद्यभावस्य हेत्वाभासतोक्तेरसङ्गत्यापत्तेरित्यलमप्रकृतविचारे-णेति वदन्ति। तदपि न साधीयः, निखिलाभावस्य किञ्चि-

(१) ज्ञानविरोधित्वप्रसङ्गादिति पा०।

(२) न चेत्यादिः ज्ञानाविरोधित्वप्रसङ्गादित्यन्तः पाठः क्वचित्पुस्तके नास्ति।

द्विशिष्टस्वाभावनिष्ठप्रतियोगितावच्छेदकीभूतदैशिकविशेषणतासम्बन्धेन तादृशप्रतियोगिसमानाधिकरणत्वसत्त्वेन व्यभिचारिण्यति व्याप्तिः । यावत्प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे च निखिलव्यधिकरणधर्म्मावच्छिन्नाभावानामैक्य मते निखिलसम्बन्धानामेवैकैकतादृशाभावप्रतियोगितावच्छेदकतया क्वचिदपि हेत्वधिकरणे संयोग-विषयित्वादिरूपसकलसम्बन्धेन प्रतियोगिनोऽवृत्तेरसम्भवापत्तेः प्रकारान्तरानुसरणे च (१) गौरवादिति ।

तत्त्वचिन्तामणि-दीधितिः ।

रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरेव । प्रलये परमाणावुत्पत्तिकाले चावयविनि तत्सत्त्वात् । न च प्रतियोगिवत्तद्ध्वंस-प्रागभावयोरत्यन्ताभावविरोधित्वं, मानाभावात् अतएव अन्तरा श्यामे रक्तं रूपं नास्तीतिप्रत्ययः, न चैष रक्तिमध्वंसाद्यवगाही, पूर्व्वापररक्तिमध्वंस-प्रागभाववति रक्तेऽपि तथा प्रत्ययप्रसङ्गात् । तत्सामानाधिकरण्यञ्च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यं तेन गोत्व-जन्यद्रव्यत्व-प्रलयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरणधर्म्मावच्छेदेन तद्वति काले

(१) साध्यवत्त्वव्यापकाधिकरणतानिरूपितस्वप्रतियोगिनिष्ठाधेयतावच्छेदक स्वप्रतियोगितावच्छेदकयासम्बन्धेन प्रतियोगिसामानाधिकरण्येत्यर्थः ।

महाकाले वा वृत्तावपि यदा गोत्वं तदा गौर्यन्न कालत्वं तन्न जन्यद्रव्यं प्रलयावृत्तिर्वेत्यादौ नातिप्रसङ्गः हेतुमति प्रलये तत्सामानाधिकरण्याभावात्। स्वविशिष्टेतिविशेषणात् कपिसंयोगाभाववान् सेयत्वादित्यादौ संयोगाद्यात्मकस्य साध्याभावस्य सकलहेत्वधिकरणावृत्तित्वेऽपि नाव्याप्तिः, जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावस्तु जलत्वाद्यभावो न तु धूमाद्यभावो जलादावपि तदभावप्रत्ययप्रसङ्गात्।

गादाधरी-विवृतिः।

अथ यावत्त्वमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकस्य तदुपादाय साध्यतावच्छेदकव्यापकप्रतियोगिताकस्य वा अभावस्य निवेशे उभयत्वावच्छिन्नसाध्यकव्यभिचारिस्थलेतिव्याप्तिरुक्ता न तु रूपसामान्याभावादिसाध्यकस्थले, प्राचां मते विरुद्धे पृथिवीत्वादिहेतावित्यत्र किं वीज तथा सति तत्रापि रूपसामान्याभावाभावस्य रूपस्य (१) स्वध्वंस-प्रागभावादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वेनातिव्याप्तिसम्भवादित्याशङ्कापरिहाराय तस्य स्वमते लक्ष्यत्वमेवोपपादयति, 'रूपादीति। यथोक्तलक्षणेऽतिव्याप्तिशङ्कया तु नैतद्ग्रन्थावतारः तत्र पृथिव्यन्यत्वाभावस्यापि

---

(१) रूपाद्यात्मकाभावस्येति पा०।

[illegible]

[illegible] ।

[illegible] पृथिव्यां [illegible] रूपसामान्याभाव [illegible]

[illegible]

[illegible] 'रूपादीति', [illegible] पृथिव्यां [illegible]

[illegible] इति व्याख्याने, [illegible] पृथिव्यां रूपसामान्याभाव [illegible] शब्दासम्भवेनापि पृथिव्यां रूपसामान्याभावस्य व्याप्यवृत्तिकाद्या- नुत्पत्त्या तदसद्वृत्त्यापत्तेः।

'प्रलये' महाप्रलये, परमाणूनां नित्यतया तदोत्पत्तिकाला- वच्छेदेन रूपसामान्याभावासम्भव इति भावः। यद्यपि पाका- द्रूपनाशोत्पत्तिकाले पूर्व्वरूपात्मकप्रतिबन्धकसत्त्वेन रूपान्तरा- नुत्पादेन तदानीमपि परमाणौ रूपसामान्याभावसम्भवः। तथाप्य- विनश्यदवस्थस्य रूपस्य रूपप्रतिबन्धकत्वे पूर्व्वरूपनाशोत्पत्ति- क्षण एव पाकजरूपान्तरोत्पत्तिसम्भव इत्यभिप्रायेण प्रलयपर्य्यन्ता- नुधावनं, 'उत्पत्तिकाल इति, अवयविद्रव्यस्य जन्यतया प्रलये- ऽसत्त्वात्तदवच्छेदेन तदभावासम्भव इति भावः। 'तत्सत्त्वात्' रूपादिसामान्याभावसत्त्वात्। ननु सामान्यधर्म्मावच्छिन्नप्रति-

(५) अतिव्याप्त्यभावादिति पा०।

योगिताकाभावस्य अत्यन्ताभावात्मकतया रूपप्रागभाववत्युत्पत्ति-कालावच्छिन्नावयविनि रूपध्वंसवति प्रलयावच्छिन्नपरमाणौ कथं रूपसामान्याभावसम्भवः ध्वंस-प्रागभावयोरत्यन्ताभावविरोधित्वादित्याशङ्कां निरस्यति, 'न चेति, 'प्रतियोगिवदिति यथा प्रतियोगिन एककालावच्छिन्नैकदेशावृत्तित्वरूपस्वात्यन्ताभावविरोधिता तथा ध्वंस-प्रागभावयोरप्यत्यन्ताभावविरोधितेति नेत्यर्थः, 'मानाभावादिति । ननु रूपध्वंस-प्रागभावावच्छिन्नाधिकरणे तदत्यन्ताभावस्य वृत्तौ प्रमाणाभावः घटाद्युत्पत्तिक्षणे तद्द्वितीयक्षणे च तत्प्रत्यक्षासम्भवेन तद्वृत्तित्वेन रूपात्यन्ताभावप्रत्यक्षस्य सुतरामसम्भवात् द्वितीयादिक्षणावच्छेदेन रूपस्यैव तत्रोत्पत्त्या तदभावीयविशेष्यताया असत्त्वेन तृतीयक्षणादावपि तादृश-प्रत्यक्षासम्भवात् अनुभवे विप्रतिपन्नस्य प्रत्यक्षप्रमाणमनुद्भाव्य निरसितुमशक्यत्वात् अनुमानस्याप्रयोजकमिति ध्वंस-प्रागभावयोरत्यन्ताभावविरोधित्वमर्थायातमित्यत आह, 'अतएवेति ध्वंस-प्रागभावयोरत्यन्ताभावाविरोधित्वादेव, 'अन्तरा श्यामे' पूर्व्वापरदशायां रक्ते मध्यदशाया श्याम इत्यर्थः, 'रक्तं रूपं नास्तीति प्रत्यय इति, ध्वंस-प्रागभावयोरत्यन्ताभावविरोधित्वे तत्र पूर्व्वरक्तध्वंस-भाविरक्तप्रागभावयोः सत्त्वेनात्यन्ताभावावगाहिन्याः प्रमात्मकतादृशप्रतीतेरनुपपत्तिरिति भावः। 'एषः' रक्तः रूपं नास्तीति-प्रत्ययः, 'ध्वंसादीत्यादिना प्रागभावपरिग्रहः, 'पूर्व्वापरेति यत्र घटादौ पाकादेव रक्तनाशानन्तरं रूपान्तरमुत्पन्नं तन्नाशा-नन्तरञ्च रक्तान्तरं ततस्तन्नाशानन्तरोत्पन्नरूपान्तरनाशानन्तरं

रक्तान्तरमुत्पत्स्यते तत्र मध्यरक्तदशायां रक्तं रूपं नास्तीति प्रतीत्यापत्तेरित्यर्थः, तत्रापि रक्तरूपध्वंस-प्रागभावयोः सत्त्वादिति भावः। एतेन भवन्मते रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववत् तादृशावेव (१) ध्वंस प्रागभावावेतादृशप्रतीतिविषयौ अन्तरा रक्तसमानकालीनौ पूर्व्वापररक्तध्वंस-प्रागभावौ च न तथाविधाविति नातिप्रसङ्ग इति निरस्तम्। तादृशध्वंस-प्रागभावयोरेव (२) रूपान्तरदशायां तादृशप्रतीतिनियामकतया तयोरपि तथात्वस्वीकारस्यावश्यकत्वात्। तत्र मध्यमरक्तरूपध्वंस-प्रागभावयोस्तथात्वस्वीकारे च पूर्व्वापररक्तदशायां तादृशप्रत्ययापत्तेः। अथ रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन ध्वंस-प्रागभावावेव तादृशप्रतीतिविषयौ इत्यत्र रक्तरूपदशायां लौकिकप्रत्यक्षात्मकस्तादृशप्रत्यय आपाद्यते अनुमित्यात्मको वा आद्ये रक्तरूपलौकिकप्रत्यक्षसामग्र्या रक्तत्वावच्छिन्नप्रतियोगिताकत्वेन तदभावप्रत्यक्षं प्रति प्रतिबन्धकत्वान्नापत्तिः अन्यथा भवन्मतेऽपि रूपान्तरकालावच्छेदेन तद्वृत्तिरक्तत्वावच्छिन्नात्यन्ताभावस्यैव तदानीं धर्म्मान्तरघटितसन्निकर्षात्तद्वृत्तितया प्रत्यक्षापत्तेः विशेष्यघटितसन्निकर्षत्वेन सन्निकर्षस्याहेतुत्वात् (३) रक्तरूपग्रहप्रतिबन्धकदोषादिमत्त्वे च तादृशप्रत्ययस्येष्टत्वात्। नान्त्यतद्रूपावच्छिन्नव्याप्यवत्ताज्ञानादिमत्त्वे आनुमानिकतयाविधप्रत्यय-

---

१ [illegible]

२ [illegible]

३ [illegible]

येटत्वात् । न च तादृशप्रत्ययस्य प्रमात्वापत्तिः, भवन्मतेऽपि तथा-विधात्यन्ताभावस्य तत्र सत्त्वात्तादृशप्रत्ययस्य प्रमात्वेनेष्टापत्तेः । यदा च तत्र रक्तं रूपं तत्कालावगाहिन इदानीमत्र रक्तं रूपं नास्तीतिप्रत्ययस्य प्रमात्वं पुनरशक्यापादनं तादृशप्रत्ययेन रक्तत्वा-वच्छिन्नप्रतियोगिताकत्वे तत्कालावच्छिन्नत्वावगाहनात् यदा च तत्र न रक्तं रूपं तत्कालावच्छेदेनैव ध्वंस-प्रागभावयोः रक्तत्वाव-च्छिन्नप्रतियोगिताकत्वस्वीकारेण तादृशविषयबाधात् तद्धर्म्मोप-लक्षिताभावांशे तत्कालावच्छिन्नत्वावगाहिप्रत्ययस्य प्रमात्वं पुन-रिष्टमेव । न च तद्धर्म्मिनिष्ठध्वंसादौ तत्कालावच्छेदेन रक्तत्वाव-च्छिन्नप्रतियोगिताकत्वं कल्प्यते किं वा तत्कालावच्छेदेन तद्धर्म्मि-ण्येव रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावः कल्प्यत इत्यत्र विनिगमनाविरहात् ध्वंसाद्यधिकरणे अत्यन्ताभावसिद्धिर्निष्प्रत्यू-हैवेति वाच्यम् । ध्वंस-प्रागभावाधिकरणेऽत्यन्ताभावाकल्पने ध्वंसा-देरतिरिक्तात्यन्ताभावाकल्पनेन लाघवात् रक्तरूपात्यन्ताभावस्यैत-न्मते रक्तरूपध्वंसात्यन्ताभावसमनियततया तस्यैव ध्वंसात्यन्ताभाव-त्वात् । एवम् । तत्तद्धर्म्मावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्ति-त्वोपगमे विशेषाभावानामेवाधिकरणविशेषवृत्तित्वावच्छेदेन सामा-न्यधर्म्मावच्छिन्नप्रतियोगिताकत्वसम्भवात् अतिरिक्तसामान्याभावा-प्रसिद्धिप्रसङ्गः । एवमेकस्यैवाभावस्य चाधिकरणविशेषकाल-विशेषवृत्तित्वावच्छेदेन घटत्व-पटत्वादिरूपनानाधर्म्मावच्छिन्नप्रति-योगिताकत्वसम्भवेनाभावभेदविलोपप्रसङ्गः । एवं रक्तानधिक-रणकालावच्छेदेन रक्तभ्रमादेः रक्तत्वावच्छिन्नप्रतियोगिताकत्वो-

पगमे तत्समानाधिकरणतदसमनियतध्वंसान्तरस्य (१) तत्स-
मानाधिकरणस्यैकत्वादेरेव वा तादृशकालावच्छेदेन तत्कल्पना-
मादाय विनिगमनाविरहप्रसङ्गश्चेति ध्वंस-प्रागभावाधिकरणेऽत्य-
न्ताभावकल्पनमेव न्याय्यम्। अथैतादृशयुक्त्या रक्तध्वंसादिमति तद-
त्यन्ताभावसिद्धावपि रूपध्वंसादिमत्यां पृथिव्यां रूपत्वावच्छिन्ना-
भावो निर्युक्तिक एवेति चेन्न, रूपोत्पत्तिद्वितीयादिक्षणे पुनस्तद-
धिकरणे सामान्यसामग्रीबलाद्रूपान्तरोत्पत्तिवारणाय रूपं प्रति
रूपत्वावच्छिन्नाभावस्य हेतुत्वं कल्पनीयम् एवञ्च उत्पत्तिकाले
पाकाद्रूपनाशोत्पत्तिक्षणे च रूपत्वावच्छिन्नाभावास्वीकारे तदुत्तर-
रूपानुत्पादप्रसङ्गः रूपोत्पादानन्तरं रूपसामान्यस्य पुनरुत्पाद-
प्रसङ्गश्च प्रागभावहेतुतयापि दुर्वार. रूपवत्यपि पाकजभाविरूप-
प्रागभावसत्त्वात्। नचैवमपि पृथिव्यां रूपात्यन्ताभावो निर्युक्तिक,
यत्कालावच्छेदेन तत्र रूपात्यन्ताभावो भवता स्वीक्रियते तत्काला-
वच्छेदेन रूपप्रागभावे रूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेणै-
वोपपत्तिरिति वाच्यम्। दत्तोत्तरत्वात्। इदन्त्ववधेयम् उक्तयुक्त्या
उत्पत्तिकालावच्छेदेन घटादौ रूपत्वावच्छिन्नाभावसिद्धावपि
प्रलयकालावच्छेदेन परमाणौ तत्सत्त्वे मानाभाव, एवं रूपं प्रति
रूपत्वावच्छिन्नाभावहेतुत्वमेव न कल्प्यते स्पर्शोत्पत्त्यनुरोधेनावश्य-
कल्पनीयस्पर्शसामान्याभावस्य तद्धेतुतयैव रूपवति रूपान्तरोत्-
पत्तेः शक्यवारणत्वात्, वायौ स्पर्शोत्पत्त्यनन्तरं स्पर्शोत्पत्तिवारणाय
स्पर्शं प्रति रूपाभावहेतुतया अशक्यत्वात् तत्र स्पर्शाभावहेतुताया

(१) तत्समानाधिकरणतत्समनियतप्रागभावादिध्वंसान्तरस्येति पा०

आवश्यकत्वात्। न च रूपं प्रति स्पर्शाभावहेतुत्वे यत्र पाकाद्रूपनाश एव स्पर्शनाशस्तत्र स्पर्शान्तरोत्पत्तिकाले रूपान्तरोत्पादप्रसङ्ग इति वाच्यम्। एकजातीयस्यैवाग्निसंयोगस्य रूप-रस-गन्ध-स्पर्शनाशकतया स्पर्शनाशकाले रूपनाशस्यावश्यकत्वादिति। ध्वंस-प्रागभावाधिकरणे सामयिकात्यन्ताभावानभ्युपगन्तृमते तादृशात्यन्ताभावो न तदनधिकरणेषु कल्प्यते अनन्ताधिकरणेषु तादृशाभावकल्पनामपेक्ष्य लाघवादेकैकेषु तद्धर्मावच्छिन्नवद्भेदेषु तद्धर्मावच्छिन्नप्रतियोगिताकत्वकल्पनयैवोपपत्तेरिति ध्येयम्। 'तत्सामानाधिकरण्य' प्रतियोगिसामानाधिकरण्यं, 'स्वविशिष्टेति, स्व यत्राभावे प्रतियोगिसामानाधिकरण्यं ग्राह्यं स एव, 'हेत्वधिकरणावच्छेदेनेति हेतुतावच्छेदकसम्बन्धेन यद्धेतुतावच्छेदकावच्छिन्नाधिकरणं तत्सामान्यान्तर्भावेनेत्यर्थः, तेन कर्माद्यभावस्य धूमावयवाद्यवच्छेदेन द्रव्य विशिष्टसत्त्वादित्यादौ द्रव्यत्वाद्यभावस्य गुणाद्यवच्छेदेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः। पर्व्वतादेः कालोपाधित्वानभ्युपगमे धूमवत्त्वप्रकारकप्रत्यक्षविशेष्यत्वाभावस्य क्वचिदपि प्रतियोगिसामानाधिकरण्योपपादयितुमशक्यतया धूमवान् वह्निरित्याद्यनतिव्याप्त्यापत्तेर्दैशिकविशेषणता[illegible] प्रवेशनाय, 'तेन कालेति, '[illegible]' इत्यादिमति, कालिकसम्बन्धेन कालादिना [illegible] प्रति-[illegible] कालादिनो [illegible] कालावच्छिन्न[illegible] [illegible] [illegible]

योगिसामानाधिकरण्यमक्षतमेव, एवं दैशिकविशेषणताविशेष-
गवादिव्यापकप्रलयान्यत्वादेरभावोऽपि तेन सम्बन्धेन प्रलयान्य-
त्वादिमति महाकाले कालिकसम्बन्धेन वर्त्तमानतया प्रतियोगि-
समानाधिकरण एव प्रतियोगिसामानाधिकरण्यघटकीभूताभावी-
यवृत्तौ सम्बन्धविशेषानिवेशादित्यतिव्याप्तिः स्यात्, निरुक्तविवक्षायां
च स्वविशिष्टयावद्वृत्त्यधिकरणान्तर्गतप्रलयान्तर्भावेन तादृशाभावाना-
न प्रतियोगिसामानाधिकरण्यं तत्र प्रतियोगिनोऽवृत्तेरिति समुदा-
यार्थः । गवादिव्यापकस्य चरमध्वंसादेरभावस्य योऽभावश्चरम-
ध्वंसादिस्तस्य गवादिमति खण्डकाले न प्रतियोगिसामानाधि-
करणमिति न तत्र तद्व्याप्तिरतो 'महाकाले वेत्युक्तं, महाकाले
च कालिकसम्बन्धेन वृत्तेस्तथात्वमक्षतमेव । गोसाध्यकसद्धे-
साध्यव्यापकतावच्छेदकजन्यद्रव्यत्व-प्रलयावृत्तित्वाद्यवच्छिन्नाभाव-
मादायातिव्याप्तिवारणं न सम्भवतीति स्फुटीकरणाय तद्रूपाव-
च्छिन्नसाध्यकस्थलेऽप्यतिव्याप्तिमाह, 'यत्र कालत्वमित्यादिना ।
अथैतादृशविवक्षापेक्षया लाघवात् प्रतियोगिसामानाधिकरण्य-
घटकाभावीयवृत्तौ दैशिकविशेषणताविशेषसम्बन्धावच्छिन्नत्वमेव
निवेश्यतां तथा सति दैशिकविशेषणताविशेषसम्बन्धेन प्रलया-
न्यत्वादेरभावस्य प्रतियोगिसामानाधिकरण्यविरहेणातिव्याप्ति-
वारस्य सम्भवात् । न चैवं वह्निमान् धूमादित्यादौ कालि-
कसम्बन्धेन [illegible]द्रव्यत्वत्वादिना द्रव्यत्वादेरभावस्य
दैशिकविशेषणतया द्रव्यवृत्तित्वाभावादव्याप्तिरिति वाच्यम् ।
[illegible]सामानाधिकरण्यघटकेऽपि अभावीयवृत्तौ दैशिकविशेष-

तासम्बन्धावच्छिन्नत्वस्यैव निवेशनीयत्वात् तावतापि लाघवान-
पायात्। न च दैशिकविशेषणताविशेषेण प्रतियोगिसामाना-
धिकरण्यनिवेशेऽपि कालत्वेऽतिव्याप्तिस्तदवस्थैव प्रलयान्यत्वा-
भावस्य प्रलयमात्रवृत्तेरभावमात्राधिकरणकतया प्रलयात्मकाधि-
करणस्वरूपत्वात् तस्य च प्रलयान्यत्वरूपप्रतियोग्यधिकरणे पर-
माणौ वृत्तेरिति वाच्यम्। एवमपि प्रलयान्यकालत्वप्रकारक-
प्रमाविशेष्यत्वादेरभावस्य प्रलयातिरिक्तगगनादावपि वर्त्तमानस्य
प्रलयानात्मकतया प्रतियोगिसामानाधिकरण्यस्य दुरुपपादतया
ऽतिव्याप्त्यनवकाशात्। मैवम्। दैशिकविशेषणतया प्रतियोगि-
सामानाधिकरण्यनिवेशेऽपि दैशिकविशेषणतासम्बन्धेन प्रलया-
वृत्तिसाध्यके कालत्वादिहेतावतिव्याप्तिर्दुर्वारैव तत्र प्रलयमात्रस्य
व्यभिचारनिरूपकाधिकरणतया साध्यतावच्छेदकसम्बन्धेन साध्यं
प्रति व्यापकतावच्छेदिका यदभावप्रतियोगिता व्यापकताघटक-
सम्बन्धावच्छिन्नप्रतियोगिताकस्य तस्य प्रलयमात्रवृत्तितया प्रलया-
त्मकत्वाधिकरणरीत्यैव प्रतियोगिसमानाधिकरणत्वात् इतरसम्ब-
न्धावच्छिन्नाभावस्य प्रलयानात्मकत्वेऽपि प्रलयावृत्तितया इत-
रादेव प्रतियोगिसमानाधिकरण्यादिति निरुक्तविवक्षणमाव-
श्यकम् एतदभिप्रेत्यैव प्रलयावृत्तिसाध्यकानुसरणं ग्रन्थकृत इति।
यत्तु प्रलयादिमात्रवृत्तेरभावस्य प्रलयाद्यनात्मकत्वेऽपि तद्धि-
नस्य प्रकृतविवक्षणेनातिव्याप्तिवारणमसङ्गतं प्रलयान्यत्वादेर-
भावस्यापि स्वप्रतियोगिनिष्ठव्यापकताघटकस्वरूपविशेषणसम्बन्धेन
प्रलयात्मकानात्मकान्तर्गतत्वविशिष्टवृत्तिविशिष्टस्याभाव-

पप्रतियोगिनोऽधिकरणे ध्वंसान्तरे स्वस्य प्रतियोगिसमानाधिकरणत्वात् यत्किञ्चिद्ध्वंसान्यत्वाभावस्य यत्किञ्चिद्ध्वंसमात्रवृत्तेस्तद्ध्वंसवृत्तित्वविशिष्टस्वाभावाधिकरणे ध्वंसान्तरेऽसत्त्वेऽपि कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावस्य स्वानधिकरणध्वंसावच्छेदेन स्वाधिकरणेऽपि सत्त्वेन तत्रैव तत्प्रतियोगिसमानाधिकरणत्वात् प्रलयान्यविषयकत्वोपलक्षितप्रमाया विषयतासम्बन्धेन केवलान्वयितया तादृशसम्बन्धावच्छिन्नतादृशप्रमाभावाप्रसिद्धेः प्रलयान्यविषयकत्वविशिष्टप्रमाभावस्य प्रलये प्रसिद्धावपि प्रलय-तदन्यविषयकप्रमारूपप्रतियोगिसमानाधिकरणत्वात् प्रलयाविषयकप्रमाभावस्य च जन्यप्रमामात्रप्रतियोगिकतया कालिकाव्याप्यवृत्तित्वेन प्रतियोगिमत्यपि तच्छून्यकालावच्छेदेन वृत्तेस्तादृशाभावमादायाप्यतिव्याप्तिवारणासम्भवात् प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतियोगिभेदेन भिन्नतया प्रलयान्यभेदप्रतियोगितायाः न तादात्म्येन साध्यव्यापकतायामवच्छेदकत्वमिति तादृशभेदस्याधिकरणे प्रलयान्यरूपप्रतियोगिनस्तेन सम्बन्धेनासत्त्वेऽपि नातिव्याप्त्युद्धारः (१)। उक्तविवक्षणे तु प्रलये प्रलयाविषयकप्रमाभावस्य (२) विषयतया प्रतियोगिसामानाधिकरण्यविरहादतिव्याप्तिवारणसम्भवः। एवमुक्तरीत्या घटत्वाभाववान्नेयत्वा-

(१) प्रतियोगितायाः इत्यादि नातिव्याप्त्युद्धारः इत्यन्तः पाठः कस्मिंश्चिदादर्शपुस्तके नास्ति।

(२) प्रलये प्रलयाविषयकप्रलयान्यत्वप्रकारकयावत्प्रलयान्यविशेष्यकप्रमाभावस्येति पा०।

दित्वादावपि व्यावृत्तिर्बोध्या। 'हेतुमति प्रत्यय इति हेतुमत्-सामान्यावच्छेदेन प्रत्ययान्तर्भावेनेत्यर्थः. 'तत्सामानाधिकरण्याभावात्' गवादिरूपप्रतियोगिसामानाधिकरण्याभावात्, अत्र 'गवादेरभाव-स्येत्यनुषज्यते। हेतुमति सर्वांशिन्यदलनिवेशनस्य फलमाह, 'स्व विशिष्टेनेति, साम्प्रदायिकैर्द्रव्ये संयोगसामान्याभावानभ्युपगमात् सद्धेतुत्वार्थं कपिसंयोगाभावपर्यन्तानुधावनं, 'स्वसमानाधिकरणा-वृत्तित्वेऽपीति, नित्यगुणादौ कपिसंयोगासत्त्वादिति भावः, [illegible] हेत्वधिकरणसामान्यानाभावेन प्रतियोगिसामानाधिकरण्य [illegible] तिरुचितम्। 'नाव्याप्तिरिति नित्यगुणादि [illegible]-कर्मादिनानयात्वेऽपि सद्विशिष्टत्वविवरणा[illegible] स्तत्वात्। अतोऽन्यत्र व्यापकताघटकाभावे प्रतियोगि[illegible]-रण्य निवेशनीयतया साध्यवद्वृत्ति [illegible] [illegible] [illegible] [illegible] अपि [illegible] [illegible] [illegible]

सामान्यान्तर्भावेन तत्प्रतियोगिसामानाधिकरण्यं तादृशा यावन्तोऽभावा यद्रूपविशिष्टाधिकरणत्वव्यापकतावच्छेदकप्रतियोगिताकास्तद्रूपवत्त्वमित्यादिकं तादृशाभावे हेतुसामानाधिकरण्यविशेषणाघटितं हेत्वधिकरणे स्वविशिष्टत्वविशेषणाघटितञ्च व्यधिकरणधर्म्मावच्छिन्नाभावघटितलघुलक्षणं सम्भवतीति बोध्यम्।
ननु धूमवान् वह्नेरित्यादावतिव्याप्तिर्धूमाभावादेरप्ययोगोलकादौ गोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वात् गोत्वाद्यभावस्य तत्प्रतियोगित्वञ्च धूमाद्यभावे जलवृत्तित्वविशिष्टगोत्वाभावो नास्तीति प्रतीतिनियामकाभावस्याभावाधिकरणकाभावप्रतियोगिकाभावतया अधिकरणीभूतधूमाभावस्वरूपत्वात् जलवृत्तित्वविशिष्टगोत्वाभावस्य शुद्धविशेष्यानतिरिक्तत्वात् इत्याशङ्का जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावातिरिक्तकूटाभावस्वरूपता प्रदर्शयंस्तत्स्वरूपता प्रतिक्षिपति, 'जलेत्यादि। न च धूमाभावस्य स्वप्रतियोगिनिष्ठव्यापकतावटकयावत्सम्बन्धान्तर्गतसंयोगसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहात् कथमतिव्याप्तिशङ्केति वाच्यम्। जलवृत्तित्वाविशिष्टगोत्वाभाव-द्रव्यान्यतराभावस्याप्युक्तयुक्त्या धूमाभावस्वरूपतासम्भवात् संयोगसम्बन्धेन द्रव्यात्मकप्रतियोगिनैव सामानाधिकरण्यसत्त्वात्। न चैवं जलवृत्तिद्रव्यमेव तत्प्रतियोगि तस्यैव प्रतियोगितावच्छेदकजलवृत्तित्ववैशिष्ट्याक्रान्तत्वात् तस्य च धूमाभाववविशिष्टसकलवह्निमति वृत्तौ मानाभावान्नातिव्याप्तिप्रसक्तिः(१)।

---

(१) नातिव्याप्तिः प्रसक्ता इति।

यदि च जलवृत्तित्ववैशिष्ट्यम् अन्यतरत्वघटकीभूतभेदप्रतियोगिनि गोत्वाभावत्वावच्छिन्न एव विशेषणं न त्वन्यतरत्वावच्छिन्नविशेषणतया प्रतियोगितावच्छेदकमिति जलवृत्तिद्रव्यस्यापि तत्प्रतियोगित्वमित्युच्यते, तदा तादृशाभावस्य विशिष्टाभावानात्मकतया अन्यतरत्वरूपप्रतियोगितावच्छेदकविशिष्टगोत्वाभावाधिकरणे यो धूमाद्यभावस्तदधिकरणकत्वानुपपत्तिरिति वाच्यम्। जलवृत्तिद्रव्यं धूमाभावविशिष्टयादृशहेत्वधिकरणे नियमतो वर्त्तते तादृशव्यभिचारिहेतुकस्थल एव धूमाभावात्मकनिरुक्तविशिष्टाभावप्रतियोगिद्रव्यसामानाधिकरण्यमादायातिव्याप्तिमाशङ्क्य 'जलवृत्तीत्यादिग्रन्थस्यावतारणीयत्वात्। न चैवं तादृशान्यतराभावस्यैव धूमाभावस्वरूपताप्रतिक्षेप उचित इति 'विशिष्टगोत्वाभावस्याभाव-इति ग्रन्थासङ्गतिर्दुर्व्वारैवेति वाच्यम्। एतादृशग्रन्थस्यापि गोत्वाभावप्रतियोगिकाभावत्वेन रूपेण जलवृत्तित्वविशिष्टतादृशान्यतरत्वावच्छिन्नप्रतियोगिताकाभावपरत्वात्। न चैवमप्ययोगोलकभेदाभावस्यायोगोलकत्वादिरूपभावात्मकस्य स्वनिष्ठजलवृत्तित्वविशिष्टगोत्वाभावाभावस्वरूताविरहात् तस्य प्रतियोगिसामानाधिकरण्यं न घटत इत्यतिव्याप्त्यप्रसक्तिः साध्यतावच्छेदकसम्बन्धेन व्यापकताया लक्षणघटकत्व प्रागेव दूषितमतो नायोगोलकभेदाद्यभावस्य लक्षणाघटकत्वसम्भव इति वाच्यम्। अयोगोलकभेदाभावादेरपि पूर्व्वलक्षणवृत्तित्वादिविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसम्भवात्। अयोगोलकभिन्नभेदस्वरूपायोगोलकत्वनिरूपितायोगोलकभिन्ननिष्ठप्रतियोगितायास्तादात्म्यसम्बन्धेन साध्य-

व्यापकतायामवच्छेदकत्व प्रतियोगितायाः प्रतियोगिस्वरूपता-मते न सम्भवतीति अयोगोलकभिन्नात्मकतत्प्रतियोगिनस्तादात्म्ये नायोगोलकेऽसत्त्वेऽपि नातिव्याप्त्युद्धारः एवञ्च धूमसाध्यकस्थले धूमसामान्याभावीयप्रतियोगिताया धूमसामान्यव्यापकतावच्छेदकत्वासम्भवेऽपि तत्तद्धूमव्यक्तिसाध्यकस्थले तादृशाभावस्य लक्षण-घटकतया तदभिप्रायेणैव तस्य गोत्वाभावप्रतियोगित्वनिराकरणं तत्तद्धूमव्यक्तेरप्यनेकाधिकरणवृत्तितया नायोगोलकभिन्नस्य तादात्म्येन तत्साध्यव्यापकत्वमिति। न चैवं धूमाभावस्य गोत्वाभावा-द्यप्रतियोगिकत्वेऽपि पूर्व्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तितादवस्थ्यमिति वाच्यम्। तादृश प्रतियोगिना स्वप्रतियोगिनिष्ठव्यापकताघटकयावत्सम्बन्धान्तर्गत-संयोगादिना सामानाधिकरण्यविरहात् घटत्वाभाववान् प्रमेय-त्वादित्यादावपि घटत्वाभावादिप्रकारकप्रमाया अभावस्य याव-द्व्यापकताघटकसम्बन्धान्तर्गतविशेष्यतासम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेणातिव्याप्त्यनवकाशात्। न चैवं जलवृत्तित्व विशिष्टगोत्वाभाव-द्रव्यान्यतराभावस्य धूमाद्यभावस्वरूपतया संयो-गेन प्रतियोगिसामानाधिकरण्यसम्भवेन धूमादिप्रकारकप्रमा-भावस्य यावद्व्यापकताघटकसम्बन्धान्तर्गतविशेष्यतासम्बन्धेन प्रति-योगिसामानाधिकरण्याभावात् धूमवान् वह्नेरित्यादावतिव्याप्ति-प्रसक्त्या तादृशाभावस्य धूमाभावस्वरूपताप्रतिक्षेपोऽयुक्त इति वाच्यम्। तादृशाभावस्य तत्स्वरूपत्वे तुल्ययुक्त्या धूमादिप्रकारक-प्रमाभावनिष्ठस्य जलादिवृत्तित्वविशिष्टगोत्वाभाव-द्रव्यत्वप्रकारक-

प्रमान्यतराभावस्य तत्स्वरूपतया द्रव्यत्वप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन तयैव समं विशेष्यतासम्बन्धेन तादृशाभावस्य सामानाधिकरण्यसत्त्वादतिव्याप्तिप्रसक्तेरिति। नन्वेवमपि धूमवान् वह्नेरित्यादावतिव्याप्तिर्दुर्वारैव धूमाद्यभावस्य धूमत्वादिना प्रमेयसामान्याभावसमनियतत्वेन तदभिन्नत्वोपगमात् प्रमेयमात्रस्यैव तत्प्रतियोगित्वात्। यदि च धूमत्वादिना प्रमेयं नास्तीत्यादिप्रतीतौ धूममात्रस्यैव प्रतियोगित्वग्रहः न तु प्रमेयान्तरस्य, अथवा प्रतियोगिसामानाधिकरण्यशरीरे न्यूनवृत्तिसमानाधिकरणधर्म्मानवच्छिन्नप्रतियोगिता निवेशनीया यावत्प्रमेयनिष्ठप्रतियोगिता च तथाविधधूमत्वाद्यवच्छिन्नैव तादृशधर्म्मानवच्छिन्ना च धूमादिमात्रवृत्तिप्रतियोगितैव तदाश्रयसामानाधिकरण्यञ्च नायोगोलकाद्यन्तर्भावेनेति मन्यते, तथापि धूमाभावस्य वह्निधूमोभयत्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन वह्नेरपि तदभावप्रतियोगितया अयोगोलकान्यत्वाभावस्यायोगोलकान्यवृत्तित्वविशिष्टाकाशाभावाभावसमनियततया तदभिन्नत्वेनाकाशाभावस्यापि तत्प्रतियोगितया हेतुसमानाधिकरणधूमवत्त्वप्रकारकप्रमाभावस्य धूमवद्विशेष्यकत्वविशिष्टद्रव्यत्वादिप्रकारकप्रमाभावसमनियततया द्रव्यत्वादिप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन धूमभेदस्य धूमत्व-समवेतोभयत्वावच्छिन्नाभावसमनियतत्वेन समवेतमात्रस्यैव तत्प्रतियोगितया हेतुसमानाधिकरणतादृशाभावानां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन दर्शितप्रतियोगिसामानाधिकरण्यसत्त्वेनैवातिव्याप्तिः।

तत्त्वचिन्तामणि-दीधितिः ।

यत्सामानाधिकरण्यानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावद्भावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत्, ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभ एव । शेषं दर्शितदिशावसेयमत आह, प्रतियोग्यवृत्तिश्चेति ।

गादाधरी-विवृतिः ।

अथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका या या प्रतियोगिता तन्निरूपकाभावानां स्वविशिष्टयावद्धेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षणीयमिति नातिव्याप्तिरिति चेत्, तर्हि तादृशी या या प्रतियोगिता तत्तदाश्रयसामानाधिकरण्य यत्र क्वचन यावदधिकरणान्तर्भावेन तत्त्वमित्येतावतैव सामञ्जस्येऽभावे यावत्त्वस्य, तत्तत्प्रतियोगितानिरूपकत्वस्य हेतुसामानाधिकरण्यविशेषणस्य, हेत्वधिकरणे च स्वविशिष्टत्वविशेषणस्य वैयर्थ्यप्रसङ्गः, एवं सर्व्वत्र हेतुसमानाधिकरणमुभयत्वावच्छिन्नप्रतियोगिताकसाध्याद्यभावमादाय लक्षणसमन्वयसम्भवाद्व्यधिकरणधर्म्मावच्छिन्नाभावस्याप्रामाणिकत्वेऽपि क्षतिविरहेण एतादृशव्याप्तिलक्षणाशङ्कायां 'प्रतियोग्यवृत्तिश्चेत्यादिना तादृशाभावखण्डनस्यासङ्गत्यापत्तिः एवं जलवृत्तित्वविशिष्टगोत्वा-

तत्त्वचिन्तामणि-दीधितिः ।

यत्सामानाधिकरण्यानां साध्यतावच्छेदकावच्छिन्न व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यत्-दभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत्, ज्ञेयत्वत्वादिना वाच्यत्वादेरभावः सुलभ एव । शेषं दर्शितदिशावसेयमत आह प्रतियोग्यवृत्तिश्चेति ।

गादाधरी-विवृतिः ।

अथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका या या प्रतियोगिता तन्निरूपकाभावाना स्वविशिष्टयावद्धेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षणीयमिति नाति व्याप्तिरिति चेत्, तर्हि तादृशी या या प्रतियोगिता तत्तदाश्रय सामानाधिकरण्यं यत्र क्वचन यावदधिकरणान्तर्भावेन तत्त्वमित्य तावतैव सामञ्जस्येऽभावे यावत्त्वस्य, तत्तत्प्रतियोगिनानिरूपकत्वस्य हेतुसामानाधिकरण्यविशेषणस्य, हेत्वधिकरणे च स्वविशिष्टत्व विशेषणस्य वैयर्थ्यप्रसङ्गः, एवं सर्व्वत्र हेतुसमानाधिकरण मुभयत्वावच्छिन्नप्रतियोगिताकसाध्याद्यभावमादाय लक्षणसमन्वय सम्भवाद्व्यधिकरणधर्म्मावच्छिन्नाभावस्याप्रामाणिकत्वेऽपि क्षति विरहेण एतादृशव्याप्तिलक्षणाशङ्काया 'प्रतियोग्यवृत्तिश्चेत्यादि' तादृशाभावखण्डनस्यासङ्गत्यापत्तिः एवं जलवृत्तित्वविशिष्टगोत्वा-

भावाभावस्य जलत्वाभावस्वरूपतावत् धूमाभावाधिकरणकधूमवद्वृत्तित्वविशिष्टगोत्वाभाव-द्रव्यान्यतराभावस्य धूमाभावस्वरूपतया व्यापकताघटकयावत्सम्बन्धेन तादृशाभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यसत्त्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिश्च (१) इत्यतो लक्षणान्तरमाह, 'यत्समानाधिकरणानामिति, अत्रापि यत्तत्पदयोः पूर्व्ववत् यत्तद्धर्म्मावच्छिन्नपरता बोध्या, वह्निमान् धूमादित्यादौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्म्मावच्छिन्नप्रतियोगिताकाभावा वह्नित्वादिना घटाद्यभावा एव तेषाञ्च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन वह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतया लक्षणसमन्वयः। अत्रापि प्रतियोगिसामानाधिकरण्यनिवेशे उक्तक्रमेण धूमवान् वह्नेरित्यादावतिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः, तथाच धूमाद्यभावानां वह्नि-धूमोभयत्वाद्यवच्छिन्नप्रतियोगिताश्रयवह्न्यादिना सामानाधिकरण्यसत्त्वेऽपि प्रतियोगितावच्छेदकीभूततादृशोभयत्वावच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्तिः, द्रव्यत्वेन धूमो नास्तीत्यादिप्रतीतौ च द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वं न भासते अपि तु धूमत्वादेरेव द्रव्यत्वादिस्तु तृतीयोल्लिखितवैशिष्ट्यमात्रं धूमादौ भासते इत्युपेयते अतस्तादृशप्रतीतिविषयाभावस्य धूमाभावादिसमनियततया तत्प्रतियोगितावच्छेदकं द्रव्यत्वादिकमपि धूमाद्यभावप्रतियोगितावच्छेदकमिति प्रतियोगितावच्छेदकावच्छिन्नसामानाधि-

(१) एवमित्यादि अतिव्याप्तिश्चेत्यन्तः पाठः केषुचिदादर्शपुस्तकेषु नास्ति।

तत्त्वचिन्तामणि-दीधितिः।

यत्सामानाधिकरण्यानां साध्यतावच्छेदकावच्छिन्न व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत्, ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभ एव। शेषं दर्शितदिशावसेयमत आह, प्रतियोग्यवृत्तिश्चेति।

गादाधरी-विवृतिः।

अथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका या या प्रतियोगिता तन्निरूपकाभावाना स्वविशिष्टयावद्धेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षणीयमिति नातिव्याप्तिरिति चेत्, तर्हि तादृशी या या प्रतियोगिता तत्तदाश्रयसामानाधिकरण्यं यत्र क्वचन यावदधिकरणान्तर्भावेन तत्त्वमित्येतावतैव सामञ्जस्येऽभावे यावत्त्वस्य, तत्तत्प्रतियोगितानिरूपकत्वस्य हेतुसामानाधिकरण्यविशेषणस्य, हेत्वधिकरणे च स्वविशिष्टत्वविशेषणस्य वैयर्थ्यप्रसङ्गः, एवं सर्व्वत्र हेतुसमानाधिकरणमुभयत्वावच्छिन्नप्रतियोगिताकसाध्याद्यभावमादाय लक्षणसमन्वयसम्भवाद्व्यधिकरणधर्म्मावच्छिन्नाभावस्याप्रामाणिकत्वेऽपि क्षतिविरहेण एतादृशव्याप्तिलक्षणाशङ्कायां 'प्रतियोग्यवृत्तिश्चे'त्यादिना तादृशाभावखण्डनस्यासङ्गत्यापत्तिः एवं जलवृत्तित्वविशिष्टगोत्वा-

भावाभावस्य जलत्वाभावस्वरूपतावत् धूमाभावाधिकरणकधूमवद्वृत्तित्वविशिष्टगोत्वाभाव-द्रव्यान्यतराभावस्य धूमाभावस्वरूपतया व्यापकताघटकयावत्सम्बन्धेन तादृशाभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यसत्त्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिश्च (१) इत्यतो लक्षणान्तरमाह. 'यत्समानाधिकरणानामिति, अत्रापि यत्तत्पदयोः पूर्व्ववत् यत्तद्धर्म्मावच्छिन्नपरता बोध्या, वह्निमान् धूमादित्यादौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्म्मावच्छिन्नप्रतियोगिताकाभावा वह्नित्वादिना घटाद्यभावा एव तेषाञ्च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन वह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतया लक्षणसमन्वय.। अत्रापि प्रतियोगिसामानाधिकरण्यनिवेशे उक्तक्रमेण धूमवान् वह्नेरित्यादावतिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः, तथाच धूमाद्यभावाना वह्नि-धूमोभयत्वाद्यवच्छिन्नप्रतियोगिताश्रयवह्न्यादिना सामानाधिकरण्यसत्त्वेऽपि प्रतियोगितावच्छेदकीभूततादृशोभयत्वावच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्तिः, द्रव्यत्वेन धूमोनास्तीत्यादिप्रतीतौ च द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वं न भासते अपि तु धूमत्वादेरेव द्रव्यत्वादिस्तु तृतीयोल्लिखितवैशिष्ट्यमात्र धूमादौ भासते इत्युपेयते अतस्तादृशप्रतीतिविषयाभावस्य धूमाभावादिसमनियततया तत्प्रतियोगितावच्छेदकं द्रव्यत्वादिकमपि धूमाद्यभावप्रतियोगितावच्छेदकमिति प्रतियोगितावच्छेदकावच्छिन्नसामानाधि-

(१) एवमित्यादि अतिव्याप्तिरेवेत्यन्तः पाठः क्वचिदादर्शपुस्तके नास्ति।

तत्त्वचिन्तामणि-दीधितिः।

यत्सामानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत्, ज्ञेयत्वत्वादिना वाच्यत्वादीनमभावः सुलभ एव। शेषं दर्शितदिशावसेयमत आह प्रतियोग्यवृत्तिश्चेति।

गादाधरी-विवृतिः।

अथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका या या प्रतियोगिता तन्निरूपकाभावानां स्वविशिष्टयावद्धेत्वधिकरणावच्छेदे तत्तत्प्रतियोगिताश्रयसामानाधिकरण्यं विवक्षणीयमिति नातिव्याप्तिरिति चेत्, तर्हि तादृशी या या प्रतियोगिता तत्तदाश्रयसामानाधिकरण्यं यत्र क्वचन यावदधिकरणान्तर्भावेन तत्तद्भिन्नतावतैव सामञ्जस्येऽभावे यावत्त्वस्य, तत्तत्प्रतियोगितानिरूपकत्वस्य हेतुसामानाधिकरण्यविशेषणस्य, हेत्वधिकरणे च स्वविशिष्टत्वविशेषणस्य वैयर्थ्यप्रसङ्गः, एवं सर्वत्र हेतुसमानाधिकरणमुभयत्वावच्छिन्नप्रतियोगिताकसाध्याद्यभावमादाय लक्षणसमन्वयसम्भवात् स्वाधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वेऽपि नातिरिक्तेन एतादृशव्याप्तिलक्षणाशङ्काया 'प्रतियोग्यवृत्तिश्चे'त्यादिना तादृशाभावमादायाव्याप्त्यापत्तिः एवं जन्यवृत्तित्वविशिष्टत्वा-

भावाभावस्य जलत्वाभावस्वरूपतावत् धूमाभावाधिकरणकधूमवद्वृत्तित्वविशिष्टगोत्वाभाव-द्रव्यान्यतराभावस्य धूमाभावस्वरूपतया व्यापकताघटकयावत्सम्बन्धेन तादृशाभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यसत्त्वाद्धूमवान् वह्नेरित्यादावतिव्याप्तिः (१) इत्यतो लक्षणान्तरमाह, 'यत्समानाधिकरणानामिति, अत्रापि यत्तत्पदयोः पूर्ववत् यत्तद्धर्मावच्छिन्नपरता बोध्या, वह्निमान् धूमादित्यादौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावा वह्नित्वादिना घटाद्यभावा एव तेषाञ्च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन वह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतया लक्षणसमन्वयः। अत्रापि प्रतियोगिसामानाधिकरण्यनिवेशे उक्तरीत्या धूमवान् वह्नेरित्यादावतिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः, तथाच धूमाद्यभावानां वह्नि-धूमोभयत्वाद्यवच्छिन्नप्रतियोगिताकत्वेन वह्न्यादिना सामानाधिकरण्यसत्त्वेऽपि प्रतियोगितावच्छेदकीभूततादृशोभयत्वावच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्तिः, द्रव्यत्वेन धूमाभावत्वादिप्रतियोगि[illegible] च द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वं न सम्भवति अपि तु धूमत्वादेरेव द्रव्यत्वादिः [illegible] धूमादौ [illegible] [illegible] [illegible] धूमाभावादि[illegible] [illegible] द्रव्यत्वादि[illegible] [illegible]

[illegible]

करणविवक्षणेऽप्यतिव्याप्तेर्दुर्व्वारत्वाशङ्कायाः नावकाशः। एतेन धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टस्य वह्नित्वरूपेण योऽभावस्तस्य धूमाभावसमनियततया वह्नित्वमपि धूमाभावप्रतियोगितावच्छेदकमित्यपास्तम्। वह्नित्वेन तादृशधूमवद्वृत्तित्वविशिष्टं नास्तीति प्रतीतौ तादृशधूमवद्वृत्तित्ववैशिष्ट्यस्यैव प्रतियोगितावच्छेदकत्वावगाहनोपगमात् अन्यथा धूमवद्वृत्तिवह्निमति धूमशून्ये वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिसत्त्वेन तादृशप्रतीत्यनुदयप्रसङ्गात्। अस्तु वा तादृशवैशिष्ट्यसहितस्य वह्नित्वस्य तथात्वं तावतापि न क्षतिः प्रतियोगितावच्छेदकपदस्य प्रतियोगितावच्छेदकतापर्य्याप्त्यधिकरणपरत्वात्। अथैवमपि घटभिन्नत्वेन धूम-घटान्यतरन्नास्तीत्यत्र घट-धूमान्यतरत्वमात्रस्य प्रतियोगितावच्छेदकत्वभानं धूमशून्ये घटवति तादृशप्रतीत्यनुपपत्तेः। नापि घटभिन्नत्वसहितस्य तस्य गौरवात्, किन्तु घटभिन्नत्वमात्रस्यैव, एवञ्च तादृशाभावस्य धूमाभावसमनियततया धूमाभावस्यापि घटभिन्नत्वं प्रतियोगितावच्छेदकम्, एवं भेदत्वेनायोगोलकभेद-घटात्यन्ताभावान्यतराभावस्यायोगोलकभेदत्वावच्छिन्नाभावसमनियततया भेदत्वमप्ययोगोलकभेदाभावप्रतियोगितावच्छेदकम् (१) एवं द्रव्यत्वभिन्नत्वेन द्रव्यत्व-धूमत्वान्यतराभावस्य धूमभेदसमनियततया द्रव्यत्वभिन्नत्वमपि धूमभेदप्रतियोगिता-

(१) तादृशान्यतराभावस्य तादृशान्यतरत्वमात्रस्य न प्रतियोगितावच्छेदकत्वभानम् अयोगोलकभेदशून्ये घटात्यन्ताभाववति अयोगोलके तादृशप्रतीत्यनुपपत्तेः, नाप्ययोगोलकभेदसहितस्य गौरवात् किन्तु भेदत्वमात्रस्यैवेति भावः।

वच्छेदकान्, एवम् इच्छान्यत्वेन इच्छायोगोलकाविषयकज्ञानान्यतराभावस्यायोगोलकाविषयकज्ञानाभावसमनियततया इच्छान्यत्वमपि तादृशज्ञानाभावप्रतियोगितावच्छेदकं तादृशधर्म्मावच्छिन्नानाञ्चायोगोलकादावपि सत्त्वादतिव्याप्तिस्तदवस्थैवेति चेत्तर्हि, प्रतियोगितावच्छेदकत्वेन प्रतियोगितायाः न्यूनवृत्तिभिन्नं यद्यदवच्छेदकं तदेव विवक्षणीयं, न्यूनवृत्तित्वञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति स्वसमानाधिकरणत्व, तद्भिन्नत्वञ्च व्यधिकरणधर्म्मसाधारणमपि, घट-धूमान्यतरादिनिष्ठप्रतियोगितायाञ्च न्यूनवृत्त्येव घटभिन्नत्वादिकम्। न च वह्नित्वेन प्रमेयं नास्तीत्यत्र प्रमेयसामान्यवृत्तित्वेन या वह्नित्वावच्छिन्नप्रतियोगिता प्रतीयते वह्निर्नास्तीत्यत्रापि वह्निवृत्तितया सैव प्रतियोगिता प्रतीयते, इत्युपेयते एकधर्म्मावच्छिन्नविभिन्नप्रतियोगिताकल्पने गौरवात्, तथाच कालिकादिसम्बन्धेन हेतुसमानाधिकरणवह्नित्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितायाः न्यूनवृत्तिभिन्नावच्छेदकाप्रसिद्धा अव्याप्तिरिति वाच्यम्। वह्नित्वेन प्रमेयं नास्तीति प्रतीतौ प्रमेयत्वविशेषितस्य वह्नेरेव प्रतियोगित्व भासते नान्यस्येत्यभ्युपगमात् तादृशाभावप्रतियोगितायाः प्रमेयसामान्यवृत्तित्वस्यैवासिद्धेः। अथवा प्रतियोगितावच्छेदकपदं प्रतियोगितायाः अनतिरिक्तवृत्ति यद्यदवच्छेदकं तत्परं अनतिरिक्तवृत्तित्वञ्च स्वव्यापकतत्त्वान्यत्व-तत्समानाधिकरणोभयाभाववत्त्वं (१)। तथा-

(१) [illegible]

[illegible]

[illegible] व्यधिकरणधर्म्मावच्छिन्न[illegible], तत्प्रतियोगितासामानाधि-
करण[illegible]प्रतियोगितानिरूपकाभाववृत्तितावच्छेदक यत् तद्-
प्रतियोगितावच्छेदकं वा निवेश्यं । एवञ्च साध्यतावच्छेदका-
वच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावनिवेशे वह्निमान्
धूमादित्यादौ वह्नित्वादिना घटाभावसमनियतत्वेन घटत्वादिना
वह्न्याद्यभावस्य हेत्वधिकरणावृत्तेन वह्न्यादिरूपप्रतियोगि
सामानाधिकरण्यसत्त्वेऽपि वह्नि-घटोभयत्वादावच्छिन्नाभावस्यापि
तथाविधतया तस्य च प्रतियोगितावच्छेदकावच्छिन्नसामानाधि-
करण्याभावेनासम्भव इत्यतोव्यापकतावच्छेदकरूपावच्छिन्नप्रति-
योगिताकत्वमुक्तम् अतएव व्यधिकरणधर्म्मावच्छिन्नाभावानभ्युपगमे
हेतुसमानाधिकरणसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरू-
पावच्छिन्नाभावस्याप्रसिद्धा असम्भव । अयमात्मा ज्ञानादित्यादौ
केवलान्वयिसाध्यके चाव्याप्तिर्वा भवतीत्यभिप्रायकतया प्रतियोग्य-
वृत्तियेत्यादिग्रन्थसङ्गतिः । न चायमात्मा ज्ञानादित्यादौ पूर्व्वक्षण-
[illegible]त्व विशिष्टात्मत्वादेरात्मत्वादिव्यापकतावच्छेदकतया तद-

वच्छिन्नाभावस्योत्तरक्षणावच्छेदेन हेतुसमानाधिकरणतया इदं वाच्यं ज्ञेयत्वादित्यादावपि एतत्क्षणान्यक्षणवृत्तित्वविशिष्टवाच्यत्वत्वादेः(१) विषयतासम्बन्धेन जन्यज्ञानत्व-विश्वविषयकजन्यज्ञाननिष्ठतद्व्यक्तित्वादेश्च साध्यव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्य तत्क्षणावच्छेदेन प्रलयाद्यवच्छेदेन च हेतुसमानाधिकरणतया च व्यधिकरणधर्म्मावच्छिन्नाभावानभ्युपगमेऽपि न तादृशाभावाप्रसिद्धिरिति वाच्यम्। प्रतियोगिवैयधिकरण्यघटितव्यापकताया एव निवेशनीयतया निरुक्तधर्म्मावच्छिन्नाभावानामपि साध्यवति सत्त्वेन तादृशधर्म्माणां व्यापकतावच्छेदकत्वासम्भवात्। न च साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव एव किन्तु निवेश्यते प्रमेयसाध्यकस्थले संयोग-समवायादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रमेयत्वादिनिष्ठप्रतियोगितावच्छेदकताकाभावमादाय लक्षणसमन्वयसम्भवादिति वाच्यम्। तथा सति लघुरूपसमनियतगुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वेन तद्रूपावच्छिन्नसाध्यके तथाविधाभावाप्रसिद्ध्या अव्याप्त्यापत्तेः। [illegible] च ज्ञानवान् [illegible] इत्यादौ [illegible] साध्यतावच्छेदकसम्बन्धेन व्यापकत्वे [illegible] सम्बन्धेन [illegible] सामानाधिकरण्य [illegible]

(१) [illegible]

साध्यके कालत्वादेर्व्यभिचारित्वेऽपि तत्र हेतुसमानाधिकरणस्य महाकाशान्यत्वविशिष्टघटाद्यभावस्य प्रतियोगितावच्छेदकविशिष्ट सामानाधिकरण्याभावेनातिव्याप्त्यभावात्. तादात्म्यसम्बन्धेन प्रमेयसाध्यकस्थले तादृशसम्बन्धेन साध्यं प्रति तादृशसम्बन्धेन व्यापकतायामवच्छेदकीभूतो यः प्रमेयत्वादिरूपकेवलान्वयिधर्म्मस्तदवच्छिन्नस्य संयोग-समवाय-विषयितादिसम्बन्धावच्छिन्नाभावमादायैव लक्षणसमन्वयसम्भवात्, अभावप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रयोजनविरहेणानिवेशात् तन्निवेशेऽपि व्यधिकरणसमवायित्वाद्यवच्छिन्नप्रतियोगितावच्छेदकताकप्रमेयत्वादिमद्भेदमादाय लक्षणसमन्वयसम्भवात् 'समवायितया वाच्यत्ववद्भेदोऽपि द्रष्टव्य' इति मिश्रोक्तेः तादृशभेदस्यापि सोन्दडसम्मतत्वादिति केचित्, तदसत्. घटत्वाभाववान् प्रमेयत्वादित्यादौ मूर्त्तोक्तदिशा अतिव्याप्तेः। स्वप्रतियोगितावच्छेदकावच्छिन्नव्यापकताघटकयावत्सम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं विशेषणमपि न सत्, तथा सति (१) इदं वाच्यं ज्ञेयत्वादित्यादौ (२) विषयिता-संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावमादाय व्यधिकरणधर्म्मावच्छिन्नाभावानभ्युपगमेऽपि लक्षणसामञ्जस्यात् 'प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थासङ्गतेः। एतेन विषयतासम्बन्धेन व्यापकता तेन सम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्न

(१) स्वप्रतियोगितावच्छेदकावच्छिन्नेत्यादि तथा सतीत्यन्त पाठ केषुचिदादर्शपुस्तकेषु नास्ति।

(२) कथञ्चित् तद्व्यावर्त्तनेऽपि इदं वाच्यं ज्ञेयत्वादित्यादाविति पा०।

सामानाधिकरण्यं विवक्षणीयं, साध्यवत्त्वप्रकारकप्रमात्वाद्यव-
च्छिन्नाभावमादाय सर्वत्र लक्षणासङ्गमनमतिव्याप्तिनिरासश्चेत्यपि
निरस्तं, 'ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभ' इत्यतादृश-
ग्रन्थासङ्गतेश्च, ज्ञेयत्वस्य ज्ञानविषयतात्मकस्य विषयतासम्बन्धेना-
व्यापकत्वात्, किन्तु स्वप्रतियोगितावच्छेदकसम्बन्धेन व्यापकत्वं
तेनैव च प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं विवक्ष-
णीयं व्यभिचारिणि साध्याभावस्य किञ्चिद्विशिष्टस्वाभावनिष्ठ-
प्रतियोगितावच्छेदकविशेषणताविशेषेण तादृशाभावत्वरूपप्रतियो-
गितावच्छेदकावच्छिन्नसामानाधिकरण्येऽपि तदवच्छिन्नभावसा-
मानाधिकरण्यासम्भवान्नातिव्याप्तिः। किञ्चिद्विशिष्टस्य स्वस्य योऽ-
भावः सामानाधिकरण्यसम्बन्धेन तद्विशिष्टस्वाभावश्च विशिष्टस्वस-
मनियतोऽपि स्वरूपादतिरिक्त एव अभावमात्रप्रतियोगिकाभावस्यैव
तदभावप्रतियोगिरूपतायाः सिद्धान्तसिद्धत्वात्। अतो धूमवदै-
भावस्य सामानाधिकरण्यसम्बन्धेन ह्रदादिवृत्तित्वविशिष्टधूमाद्य-
भावाभावविशिष्टत्वावच्छिन्नाभावसामानाधिकरण्येऽपि न क्षतिः।
वस्तुतस्तु प्रतियोगितावच्छेदकावच्छिन्ने भावत्वविशेषणमुपेक्ष्य प्रति-
योगितावच्छेदके अभाववृत्तित्वं निवेशनीयं तादृशाभावविशिष्ट-
त्वञ्च (१) अभावसाधारणमिति न दोषः (२) यावदभावानामित्य-
त्राभावपदं भावभिन्नपरम्, अतः कालिकादिसम्बन्धेन हेतु-
समानाधिकरणस्य वह्न्यादिव्यापकतावच्छेदकह्रदत्वाभावत्वाद्य-

(१) सामानाधिकरण्यसम्बन्धेन ह्रदवृत्तित्वविशिष्टधूमाभावविशिष्टत्वञ्चेत्यर्थः।
(२) धूमवान् वह्नेरित्यादौ नातिव्याप्तिरित्यर्थः।

वच्छिन्नप्रतियोगिताकस्य कृटत्वादेः स्वप्रतियोगितावच्छेदकाव-च्छिन्नभावसामानाधिकरण्यासम्भवेऽपि न क्षतिः। न च कूट-त्वाभावाभावस्य कूटत्वाभावप्रकारकप्रमाविषयत्वाभावसमनियत-तया स्वप्रतियोगितावच्छेदकतादृशप्रमाविषयत्वत्वावच्छिन्नाभाव-सामानाधिकरण्यमस्त्येवेति वाच्यम्। तस्य भावतया भिन्नत्वात्। एवं सति कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगाद्या-त्मकाभावस्य लक्षणाघटकत्वेऽपि विवक्षणीयस्वविशिष्टत्वस्य सत्ता-वान् जातेरित्यादौ सार्थकता पूर्व्वोक्तदिशावसेया। न च भावभि-न्नाभावविवक्षणेऽपि अयमात्मा ज्ञानादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य साध्यव्यापकतावच्छेदकीभूतकालिकसम्ब-न्धावच्छिन्नप्रतियोगिताकागाभावाभावत्वाद्यवच्छिन्नप्रतियोगिता-कस्याकाशाभावादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामा-नाधिकरण्यासम्भवाल्लक्षणसमन्वयासम्भव इति वाच्यम्। आकाशा-भावीयतादृशाभावत्वस्य दैशिकविशेषणतया साध्यवद्वृत्तेराकाशा-भावस्य प्रतियोगितावच्छेदकतया साध्यव्यापकतावच्छेदकत्व-विरहेण तदवच्छिन्नाभावस्य लक्षणाघटकत्वात्। अस्तु वा व्यापक-तावच्छेदकरूपांश एव भाववृत्तित्वविशेषणं, इदं वाच्यं ज्ञेयत्वादि-त्यादौ च व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाद्य-भावस्य प्रतियोगितावच्छेदकं न प्रतियोगितावच्छेदकसम्बन्ध-घटितव्यापकतावच्छेदकमलम्तादृशाभावस्य न लक्षणघटकतेति नोक्तप्रतियोग्यवृत्तित्वेत्याद्यन्यासङ्गतिरिति। न च प्रतियोगि-तावच्छेदकसम्बन्धेन व्यापकताविवक्षणेऽपि इदं वाच्यं ज्ञेयत्वादि-

त्यादौ विषयितादिसम्बन्धेन वाच्यत्वादिमतो ज्ञानादेर्यः स्वरूपसम्बन्धेनाभावस्तस्य स्वप्रतियोगितावच्छेदकीभूतस्वरूपसम्बन्धघटितवाच्यत्वनिष्ठव्यापकतावच्छेदकवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकतया हेतुसामानाधिकरण्यतया स्वरूपसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नवाच्यत्वादिसमानाधिकरणतया च तत्र व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि तमादायैव लक्षणसामञ्जस्यमिति तादृशग्रन्थासङ्गतितादवस्थ्यमिति वाच्यम्। धूमवान् वह्नेरित्यादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाद्यभावस्य कालिकसम्बन्धेन धूमत्वादिविशिष्टवह्न्यादिना समं संयोगेन, समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्यायोगोलकावृत्तिजातित्वाद्यवच्छिन्नाभावस्य कालिकसम्बन्धेन तादृशजातित्वादिविशिष्टस्यायोगोलकीयरूपादिना समं समवायेन, स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य धूमवत्त्वप्रकारकप्रमाविषयत्वाद्यभावस्य कालिकसम्बन्धेन तादृशविषयत्वत्वादिविशिष्टसंयोगादिध्वंसेन अनुयोगिताविशेषसम्बन्धेन तादृशविषयत्वत्वादिविशिष्टतादृशविषयत्वाद्यभावेन च समं स्वरूपसम्बन्धेन, विषयतासम्बन्धावच्छिन्नप्रतियोगिताकधूमवत्त्वप्रकारकप्रमाद्यभावस्य विषयितासम्बन्धेन कालिकसम्बन्धेन वा तादृशप्रमात्वादिविशिष्टम् यद्गोलकादिविषयकज्ञानं तेन समं विषयतासम्बन्धेन सामानाधिकरण्यसत्त्वादतिव्याप्तेर्वारणाय प्रतियोगितावच्छेदकत्वघटकसम्बन्धेनैव प्रतियोगितावच्छेदकवैशिष्ट्यस्य विवक्षणीयतया वह्निमान् धूमादित्यादौ विषयितासम्बन्धेन द्रव्यत्वत्वादिमतः समवायादिसम्बन्धावच्छिन्नाभावस्य स्वप्रतियो-

गितावच्छेदकसमवायादिसम्बन्धघटितद्रव्यत्वादिनिष्ठव्यापकतायाः स्वरूपादिसम्बन्धेन अवच्छेदकीभूतो यो द्रव्यत्वत्वादिस्तदवच्छिन्न-प्रतियोगिताकस्य स्वप्रतियोगितावच्छेदकत्वघटकविषयितादिस-म्बन्धेन प्रतियोगितावच्छेदकविशिष्टज्ञानादिना समं हेत्वधि-करणे स्वप्रतियोगितावच्छेदकसमवायादिना सामानाधिकरण्यं न सम्भवतीति व्यापकतावच्छेदकतायामपि स्वप्रतियोगितावच्छेदक-ताघटकसम्बन्धावच्छिन्नत्वस्यावश्यं निवेशनीयत्वेन इदं वाच्यम् ज्ञेय-त्वादित्यादौ दर्शिताभावाना लक्षणघटकत्वाभावादिति दिक्। नन्वत्र लक्षणे समवायित्वादिना वाच्यत्वाभावीयसमवायित्वादि-रूपप्रतियोगितावच्छेदकस्य वाच्यत्वादिव्यापकतानवच्छेदकत्वाद् वाच्यत्वादिसाध्यकस्थले न तादृशाभावानां लक्षणघटकता तथाच तत्र तादृशभाव एव दुर्लभ इत्यत आह, 'ज्ञेयत्वत्वादिनेति, 'वाच्य-त्वादीनामित्यादिपदाद्घटादेरपि परिग्रहः, 'शेषमिति स्वविशिष्ट-यावद्धेत्वधिकरणान्तर्भावेन प्रतियोगितावच्छेदकावच्छिन्नसा-मानाधिकरण्यविवक्षणं हेतुसामानाधिकरण्यादिशरीरे सम्बन्ध विशेषनिवेशनं तत्प्रयोजनञ्चेत्यर्थः। अत्र च निरुक्ताभावेषु स्वविशिष्टहेत्वधिकरणसामान्यान्तर्भावेन प्रतियोगितावच्छेदकाव-च्छिन्नसामानाधिकरण्यनिवेशापेक्षया प्रतियोगिवृत्तित्वमेव निवे-शयितुमुचितं सद्धेतौ व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकानां तादृशाभावानां केवलान्वयितया प्रतियोगिन्यपि वृत्तेर्लक्षण-समन्वयसम्भवात् वह्निमान् धूमादित्यादौ कालिकादिसम्ब-न्धेन हेतुसमानाधिकरणस्य ऋदान्यत्वप्रकारकप्रमाविषयत्वाद्य-

भावस्य (१) दैशिकविशेषणतया हेतुसामानाधिकरण्यनिवेशनेन वह्न्यादिभेदस्य प्रतियोगितावच्छेदकतादात्म्यसम्बन्धघटितसाध्य-व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटक-तया प्रतियोग्यवृत्तित्वेऽपि क्षतिविरहात्, कपिसंयोगाभाववान् सत्त्वादित्यादौ कपिसंयोगादेरुक्तरीत्या व्यापकतावच्छेदका-वच्छिन्नप्रतियोगिताकत्वविरहेण दैशिकविशेषणतया हेतुसा-मानाधिकरण्याभावेन भावभिन्नत्वविरहेण च लक्षणाघटक-तया प्रतियोग्यवृत्तित्वेऽपि न क्षतिः, धूमवान् वह्नेरित्यादौ च धूमाद्यभावस्य प्रतियोगिवृत्तित्वेऽपि अयोगोलकान्यत्वादि-प्रकारकप्रमाविषयत्वाभावस्य भावप्रतियोगिकतया अयोगो-लकत्वाद्यतिरिक्तस्य प्रतियोग्यवृत्तित्वान्नातिव्याप्तिरित्यवधेयम् ।

नन्वयोगोलकान्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्यायोगोलक[illegible]-त्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन तादृशाभावप्रति[illegible] योगोलावृत्तौ अयोगोलके अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वा-भावसत्त्वादतिव्याप्तिरिति चेत्, न हेतुसमानाधिकरणाभाव[illegible] च्छेदकावच्छिन्नव्यापकतावच्छेदकायोगोलकत्वप्रकारकप्रमा[illegible] त्वाभावत्वावच्छिन्नप्रतियोगिताकस्यायोगोलकत्वप्रकारकप्रमा[illegible] यत्वस्वरूपाभावस्याभावत्वावच्छिन्नप्रतियोगिताकत्वेन [illegible] तादृशभावत्वावच्छिन्नप्रतियोगिताकत्वेन [illegible]

[illegible]

१ [illegible]

त्वञ्च तादृशाभावत्वरूपेण बोध्यं, तेनाधिकरणस्वरूपाभावमादाय कुत्राप्यव्याप्त्यतिव्याप्त्योर्नावकाशः। एवमयोगोलकभेदत्वेन प्रमेय सामान्याभावीयप्रतियोगिताया यदि यावत्प्रमेयवृत्तित्वं विवक्षितं तदा प्रतियोगितावच्छेदकसमानाधिकरणत्वमेव विवक्षणीयमित्यवधेयम् (१)।

तत्त्वचिन्तामणि-दीधितिः।

केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्य प्रतियोगिताया अनवच्छेदकं हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरणस्य वा अभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः। एवञ्च व्याप्तेरव्यभिचारिसम्बन्धरूपतापि सङ्गच्छते हेतौ साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव साध्यतावच्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात्, अवच्छेदकत्वञ्चेह तत्पर्य्याप्त्यधिकरणत्वं तेन विशिष्टवह्न्यभावस्य ह्रदत्व-वह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः। सत्त्ववति गुणादौ संयोगाद्य-

(१) तत्त्वादि अवधेयमित्यन्तः पाठः बहुषु आदर्शपुस्तकेषु नास्ति।

भावोऽपि व्याप्यवृत्तिर्वक्ष्यमाणं वा प्रतियोगितावच्छेद-कानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्यं, भवति च गुणत्व-गुणावृत्तित्व-द्रव्यमात्रसमवेतत्वाद्यव-च्छिन्नप्रतियोगिताक-व्याप्यवृत्त्यभावप्रतियोगितावच्छेद-कगुणत्वाद्यनतिरिक्तवृत्त्यैव संयोगत्वमित्याहुः।

गादाधरी-विवृतिः।

चक्रवर्त्तिलक्षणमाह, 'केचित्त्विति, 'व्याप्यवृत्तेरिति, स्वेतरी-साध्यावृत्तित्वघटत्वादिना साध्याभाव एव लक्षणघटकप्रतियोगि-तानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् लक्षणसमन्वयः, व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापि लक्षण-घटकत्वान्नातिव्याप्तिः। कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्ति-वारणाय 'व्याप्यवृत्तेरिति, व्याप्यवृत्तित्वञ्च निरवच्छिन्नवृत्तिकत्वं, न त्ववच्छिन्नवृत्तिकान्यत्वं, कपिसंयोगी सत्त्वादित्यादौ कपिसंयोग-त्वावच्छिन्नकपिसंयोगाभावादेर्द्रव्येऽवच्छिन्नवृत्तिकतया तदन्य[illegible]-भावाद्घटत्वादिना साध्याभावस्यैव लक्षणघटकतया अतिव्याप्त्या-पत्तेः। निरवच्छिन्नवृत्तित्वविशिष्टस्य च [illegible] बोध्यम्, अन्यथा कपिसंयोगी एतत्त्वादित्यत्र [illegible] [illegible] [illegible] [illegible] [illegible]।

केचित्तु व्याप्यता[illegible]सम्बन्धाधिकरण[illegible]

[illegible] सम्बन्धाधिकरणं व्याप्यतावच्छेदकः [illegible], [illegible]

[illegible] व्याप्यतावच्छेदक सम्बन्धाधिकरण[illegible]

[illegible]तावच्छेदकताया: [illegible]धिकरणसमानाधिकरणत्वे [illegible]

[illegible] तत्त्वम् । न च निरूपकत्वाभावात् जातिविशेषादौ गुणादिनि

[illegible] निरूपकत्वाभावनिबन्धना[illegible]

[illegible]वच्छेदकत्वात् निरूपकत्वाभावस्य व्याप्यतावच्छेदका[illegible]

[illegible]त्वानवच्छिन्नाधिकरणत्वे [illegible] नि

[illegible] व्यधिकरण[illegible]भावा[illegible]

[illegible] । यत्किञ्चित्सम्बन्धाधिकरणता[illegible]वच्छेदकावच्छिन्न[illegible]

[illegible]वच्छेदकत्वे [illegible] निरूपितत्वात् । गुणे गुणा

[illegible]निरूपकत्वा[illegible] (१) निरूपकत्वा[illegible]

[illegible]वच्छिन्न[illegible]निरूपक[illegible] गुणादि

[illegible] निरूपकत्वाभावस्य व्याप्यतावच्छेदकत्वा

[illegible] ।

ननु [illegible]

(१) [illegible]

संतेदप्रतियोगितावच्छेदकोभिन्नसंयोगाभावस्याव्याप्यवृत्तित्वेन लक्षणघटकत्वाभावाद्व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणगमनादिति चेन्न, संयोगिभेदस्य व्याप्यवृत्तित्वे तस्य द्रव्यत्वसंयोगप्रकारकप्रमाविशेष्यत्वाद्यवच्छिन्नभेदसमनियततया तदभिन्नत्वेन तन्नेदप्रतियोगितावच्छेदकद्रव्यत्वादिकमपि संयोगिभेदाभावः तस्य सत्त्वधिकरणे व्याप्यवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य च साध्यतावच्छेदके सत्त्वेनातिव्याप्त्यनवकाशात्। एव द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादौ व्याप्यवृत्तेः सत्तादिरूपाभावस्य प्रतियोगितावच्छेदकं साध्यतावच्छेदकमित्यव्याप्तिरित्यपि नाशङ्कनीय, सत्तादिमत्त्वेऽपि द्रव्यादौ द्रव्यान्यत्वविशिष्टसत्ताभावो नास्तीत्यादिप्रत्ययानुदयात् विशिष्टनिरूपिताधिकरणताविशेषस्यैव विशिष्टाभावाभावत्वोपगमात् तावतापि नाभावाभावस्य प्रतियोगिरूपतात्ततिर्विशिष्टाभावस्य विशिष्टाधिकरणत्वाभावसमनियतत्वेन तदभिन्नतया विशिष्टसत्ताधिकरणताया अपि विशिष्टाभावप्रतियोगित्वात्।

परे तु संयोगत्वेन संयोगनिरूपिताया अधिकरणतायाः किञ्चिदवच्छिन्नत्वेऽपि संयोगिभेदाभावत्वेन तन्निरूपिताधिकरणता निरवच्छिन्नैव द्रव्ये संयोगिभेदस्याप्रत्ययादवच्छेदकमनन्तर्भाव्यैव तदभावत्वावच्छिन्नवत्ताप्रतीतेः। एवं द्रव्यादौ सत्तात्वाद्यवच्छिन्नसत्ताद्यधिकरणतासत्त्वेऽपि द्रव्यान्यत्वविशिष्टसत्तात्वादिनेव तदवच्छिन्नप्रतियोगिताकाभावाभावत्वेनापि न वृत्तिः तत्र विशिष्टाभावो नास्तीत्यप्रत्ययात्, तथाच साध्यनिष्ठयादृशप्रति-

केचित्तु व्याप्यवृत्तिहेतुसमानाधिकरणसाध्याभावप्रति
दायस्य हेत्वधिकरणे व्याप्यवृत्तिर्यः साध्याभावस्तस्येत्यर्थः, हे
धिकरणे व्याप्यवृत्तित्वञ्च हेत्वधिकरणीभूतयत्किञ्चिदात्मनिष्ठ
भावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदक यन्निष्ठतद्
त्तित्व तत्त्वम्। न च विशिष्टसत्तावान् जातेरित्यादौ गुणादिनि
सत्तादिरूपाभावप्रतियोगितया विशिष्टसत्ताद्यभावनिष्ठतद्धर्म
त्वस्यावच्छेदकत्वात् विशिष्टसत्ताद्यभावस्य व्याप्यवृत्तित्वानुपपत्ति
यदभावाभावत्वावच्छिन्नानधिकरणत्वं हेतुमतस्तत्त्वमिति वि
क्षणे व्यधिकरणधर्मावच्छिन्नाभावासंग्रहप्रसङ्गस्तदभावाप्रसिद्धेरिति
वाच्यम्। यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकानुयोगितानि
पकतानवच्छेदकं यदभावत्वं तत्त्वस्य विवक्षितत्वात्। गुणे गुणा
न्यत्वविशिष्टसत्ताभावो नास्तीत्यप्रत्ययेन (१) विशिष्टसत्ताभाव
त्वाद्यवच्छिन्ननिरूपितानुयोगिताविशिष्टायाश्च सत्ताया गुणादि
वृत्तितानभ्युपगमेन विशिष्टसत्ताद्यभावस्य व्याप्यवृत्तित्वनिर्वा
हादित्याहुः।

ननु संयोगिभिन्नं मेयत्वादित्यत्रातिव्याप्तिः संयोगिभेदाभावस्य

(१) अयं भावः वह्न्यादिसाध्यकसद्धेतौ घटत्वेन वह्न्यभावादिकमेव व्याप्य
वृत्त्यभावः यतो यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकीभूत यद्धर्मावच्छिन्न
प्रतियोगितानिरूपितवह्न्यभावनिष्ठानुयोगित्वं तन्निरूपकतावच्छेदकत्वस्य वह्नि
त्वादौ सत्त्वात्, तदवच्छेदकत्वं वह्न्यभावत्वादावक्षतं, विशिष्टसत्तावान् जाते
रित्यादौ तु गुणादिनिष्ठसत्तात्वादिरूपाभावत्वस्य तादृशनिरूपकतानवच्छेदकत्व
विरहेण विशिष्टसत्ताभावत्वस्यैव तादृशनिरूपकतानवच्छेदकतया तमादायैव
लक्षणागमनसम्भवेन न काप्यनुपपत्तिरिति ध्येयम्।

[illegible] इति [illegible]

[illegible] प्रत्यायः ।

[illegible] (१) । [illegible] इति [illegible]

[illegible] इति [illegible]

(१) [illegible] ।

सम्बन्धेन हेत्वधिकरणवृत्तिर्योऽभावस्तदीयतादृशप्रतियोगितानवच्छेदकत्वस्यैव निवेशनीयत्वात् । आकाशाभावस्य दैशिकविशेषणतासम्बन्धश्च न दर्शिताकाशाभावाभाववत्ताज्ञानविरोधिज्ञानविषयः अपि तु कालिकसम्बन्ध एव । न च तेन सम्बन्धेनाकाशाभाव आत्मनि वर्त्तते, अत आकाशाभावीयसाध्यनिष्ठप्रतियोगिताया यादृशप्रतियोगितेत्यनेनोपादानासम्भवः, अपि तु व्यधिकरणधर्म्मावच्छिन्नसाध्याभावीयप्रतियोगिताया एव, तादृशाभावज्ञानस्य (१) दैशिकविशेषणतासंसर्गकस्य व्यधिकरणधर्म्मप्रकारिणं साध्यवत्त्वावगाहिनं भ्रमं प्रति विरोधित्वात्, सामान्यतश्च प्रतियोगिप्रकारकज्ञाननिवेशे आकाशप्रकारकज्ञानं प्रति दैशिकविशेषणतासम्बन्धेन आकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकतया उक्तदोषतादवस्थ्यमिति यादृशप्रतियोगिताश्रयेत्युक्तं, प्रतियोगिताश्रयवत्ताज्ञानञ्च तत्प्रतियोगितावच्छेदकधर्म्मावच्छिन्नप्रकारकं ग्राह्यं (२) तेनाकाशत्वेन तादृशसाध्यवत्त्वज्ञानं प्रति दैशिकविशेषणतया आकाशाभावप्रकारकज्ञानस्य विरोधित्वेऽपि न क्षतिः । एवञ्च यादृशप्रतियोगिताश्रयावगाहित्वनिवेशे प्रयोजनाभावात् यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानं प्रति प्रतिबन्धकमित्येव वक्तव्यं, साध्यवत्ताज्ञानविरोधित्वं वा एतन्मते निवेश्यं (३), न च आकाशत्वादिना साध्यवत्ताज्ञानविरोधितामादाय दर्शितदोषतादवस्थ्यात्

(१) व्यधिकरणधर्म्मावच्छिन्नसाध्याभावज्ञानस्येत्यर्थः ।

(२) तत्प्रतियोगितावच्छेदकधर्म्मप्रकारकमिति पा० ।

(३) साध्यवत्ताज्ञानविरोधित्वमेतद्दले एतन्मते निवेश्यमिति पा० ।

साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानविरोधित्वगर्भनिवेशे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाकाशाभाववत्ताज्ञानस्य व्यधिकरणधर्मादिप्रकारकसाध्यवत्ताज्ञानं प्रत्येव विरोधित्वेन साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानाविरोधितया तादृशसाध्याभावाप्रसिद्धेरिति वाच्यम्। घटत्वविशिष्टवह्निमदित्यादिज्ञानस्यापि साध्यतावच्छेदकावच्छिन्नप्रकारकत्वस्याधिकन्त्वित्यादिन्यायेनाक्षतत्वात् न च तन्मात्रावच्छिन्नप्रकारताकत्वमवश्यमेव निवेश्यं अन्यथा आकाशत्व-निरुक्तसाध्यतावच्छेदकोभयरूपेण साध्यवत्ताज्ञानं प्रति दैशिकविशेषणतया आकाशाभाववत्ताज्ञानस्य विरोधितया तद्दोषतादवस्थ्यादिति कथं व्यधिकरणधर्मावच्छिन्नाभावसंग्रह इति वाच्यम्। प्रतियोगितावच्छेदकमात्राद्यवच्छिन्नप्रकारकत्वनिवेशेऽपि व्यधिकरणधर्मावच्छिन्नाभावासंग्रहात् तदवच्छिन्नप्रकारतामात्रनिवेशे उक्तस्थले आकाशाभावीयदैशिकविशेषणतावारणासम्भवात्, द्वितीयलक्षणे यादृशप्रतियोगितावच्छेदकयादृशप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकातिरिक्तानवच्छिन्नप्रकारताशालिज्ञानं प्रति येन सम्बन्धेन स्वप्रकारकज्ञानं विरोधीति विवक्षणवदेतल्लक्षणेऽपि साध्यतावच्छेदकप्रकृतप्रतियोगितावच्छेदकातिरिक्तानवच्छिन्नप्रकारताकज्ञानविरोधिताविवक्षणेन प्रतीकारसम्भवात् आकाशत्वादेस्तादृशाकाशाभावाभावत्वरूपसाध्यतावच्छेदकाद्यतिरिक्ततया तदवच्छिन्नप्रकारकज्ञानविरोधितामादाय न दोषः(१)। हेतुसमानाधिकरणस्य व्याप्यवृत्तेर्वह्नित्वादिना घटाद्यभावस्य

(१) दोषासम्भव इतीति पा०।

प्रतियोगितावच्छेदकमेव वह्नित्वादिरूपं साध्यतावच्छेदकमतः 'साध्याभावस्येति। यद्यपि वह्नित्वेन घटाभावादेर्घटत्वेन वह्न्यभावाद्यभिन्नतया तादृशाभावोऽपि साध्याभाव एव, तथापि प्रतियोगितावच्छेदकभेदेनाभावभेदमतेनेदं लक्षणं, समनियताभावानामैक्याभिप्रायेणाग्रिमलक्षणम्, अथवा हेतुसमानाधिकरणाभावीयसाध्यनिष्ठप्रतियोगितानवच्छेदकत्वनिवेशान्न दोषः वह्नित्वादिना घटाद्यभावस्य घटत्वादिना वह्न्याद्यभावाभिन्नत्वेऽपि तदीयघटादिनिष्ठप्रतियोगिताया एव व्यधिकरणवह्नित्वाद्यवच्छिन्नत्वेन वह्न्यादिनिष्ठप्रतियोगितायां वह्नित्वादेरनवच्छेदकत्वात् प्रतियोगिता साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन निवेशनीया तेन सम्बन्धान्तरावच्छिन्नप्रतियोगिताकसाध्याभावमादाय नासम्भवः, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अपि सम्बन्धावच्छिन्नत्वं व्यवस्थितमेव। प्रतियोगितावच्छेदकत्वञ्च साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्न ग्राह्यं तेन गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणस्य विषयितया गुणत्वादिमतः समवायेनाभावस्य या ज्ञानादिनिष्ठप्रतियोगिता तदवच्छेदकत्वेऽपि साध्यतावच्छेदकस्य न क्षतिः (१) सर्व्वत्र हित्वाद्यवच्छिन्नप्रतियोगिताकसाध्याभाव-

---

(१) नन्वत्रापि लघुरूपसमनियतगुरुधर्म्मावच्छिन्नसाध्यकव्यभिचारिणि व्याप्तिवारणाय पारिभाषिकावच्छेदकत्वमेवानुसरणीयं तथाच वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणस्येन्धनस्येव वह्न्यभावस्य प्रतियोगितावच्छेदक यदिन्धनत्व तस्य वह्नित्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतया वह्नित्वस्यापि पारिभाषिकावच्छेदकत्वमित्यव्याप्तिरिति चेन्न, हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदक स्वसमानाधिकरणयद्धर्म्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगिता-

मादायैवेतल्लक्षणसमन्वयसम्भवात् व्यधिकरणधर्म्मावच्छिन्नाभावा-नभ्युपगमेऽपि अतिविरहेण व्यधिकरणधर्म्मावच्छिन्नाभावखण्डनं मूलकृतोऽकिञ्चित्करमतो लक्षणान्तरमाह, 'हेतुसमानाधिकरणस्येति, अत्र च (१) व्यधिकरणधर्म्मावच्छिन्नाभावस्याप्रामाणिकत्वे व्यधिकरणधर्म्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमादायाव्याप्ति-वारणायोपात्तस्य सामानाधिकरण्येनेत्यस्य वैयर्थ्यात् लक्षणा-सामञ्जस्यमिति तादृशाभावखण्डनं सङ्गच्छते (२) अत्रापि 'हेतु-समानाधिकरणस्य व्याप्यवृत्तेरित्यस्य पूर्व्वोक्त एव पर्य्यवसि-तार्थः, व्यावृत्त्यादिकमपि पूर्व्वोक्तमेव। कालिकसम्बन्धावच्छिन्न-प्रतियोगिताकाभावाभाववान् आत्मत्वादित्यादावव्याप्तिर्वार-णाय पूर्व्वोक्तरीत्यनुसरणे गौरवाद्व्याप्यवृत्तित्वं परित्यज्य प्रति-योगिव्यधिकरणत्वेनाभावं विशेषयति, 'प्रतियोगिव्यधिकरणस्-येति, पूर्व्वलक्षणे साध्याभावस्य विशिष्योपादानात् तस्य च हेत्व-धिकरणे साध्यरूपप्रतियोगिना सामानाधिकरण्यमावश्यक-

नवच्छेदकतत्त्वमित्यस्य विवक्षितत्वात् तथाच वह्नित्वस्य इन्धनत्वसामानाधिक-रण्याभावात् नोक्तदोष इति ध्येयम्।

(१) व्यधिकरणधर्म्मावच्छिन्नाभावविनिर्मोकेण सर्व्वत्र लक्षणसमन्वयेऽपि न मूलकृतस्तादृशाभावखण्डनम् अकिञ्चित्करं व्यधिकरणधर्म्मावच्छिन्नाभावासत्त्वे । ।ऽ८ व्यधिकरणधर्म्मेण घटाद्यभावमादायाव्याप्तिवारकसाध्यघटित-स्य व्यर्थविशेषणघटितत्वेन दुष्टत्वादित्यवधेयम्।

(२) अत्रेदं बोध्यं पूर्व्वलक्षणे समनियताभावैक्ये वह्नित्वेन घटाभावप्रतियोगि- ... ८ त्वमा.८। ।व्याप्तिवारणायोक्तसाध्यनिष्ठप्रतियोगितेत्यस्य वैयर्थ्यात् लक्ष-।ण। ... तादृशाभावखण्डनं निराबाधमिति।

नैकव्यक्तिवृत्तिसाध्यके (१) अतस्तत्र प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्ध्या अव्याप्तिरिति तन्नोक्तम्। प्रतियोगिव्यधिकरणत्वञ्च न प्रतियोग्यधिकरणावृत्तित्वं, संयोगि सत्त्वादित्यादौ संयोगाद्यभावस्यातथात्वादभावान्तरमादायातिव्याप्तिः किन्तु प्रतियोग्यनधिकरणवृत्तित्वम्, एवञ्च प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तेरिति दलद्वयपर्य्यवसितार्थः, प्रतियोग्यनधिकरणत्वञ्च साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणभिन्नत्वम्, अतः समवायादिना ज्ञानादिसाध्यक-द्रव्यत्वादिहेतौ नातिव्याप्तिः, इत्थञ्च प्रतियोगिता न सम्बन्धविशेषावच्छिन्नत्वेन विशेषणीया विशेषणताविशेषेण अभावसाध्यके सर्व्वस्यैवाभावस्य तेन सम्बन्धेन किञ्चिद्विशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरतो यादृशप्रतियोगिताश्रयानधिकरणत्व हेतुमतस्तादृशप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति सिद्धान्तलक्षणवक्ष्यमाणरीत्या निष्कर्षणीयम्। अथ विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तेर्वारणाय यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं हेतुमत इत्यस्यैव वाच्यतया वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाद्यभावीयप्रतियोगिताया लक्षणघटकत्वासम्भवस्तदवच्छेदकवह्नित्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमत्यसत्त्वात् तथाच सामानाधिकरण्येनेत्यनर्थकम्।

अत्र केचित् यादृशप्रतियोगितावच्छेदकविशिष्टयादृशप्रति-

(१) तत्तद्घटवृत्तिरूपवान् तत्तद्रूपादित्यादावित्यर्थः।

योगिताश्रयोभयानधिकरणत्वं हेतुमत इत्येव तत्सार्थक्याय विव
क्षणीयं दर्शिताभावीयप्रतियोगितावच्छेदकवह्नित्वादिविशिष्ट
हेतुमति सत्त्वेऽपि तादृशप्रतियोगिताश्रयघटादेरसत्त्वात् उभया
नधिकरणत्वं हेतुमतोऽक्षतमेवेति तादृशप्रतियोगितावच्छेदक
त्वमादाय दोषवारकतया सामानाधिकरण्येनेत्यस्य सार्थकता। न
च वह्नित्वेन घटाद्यभावस्य प्रतियोगिता यावद्वह्निभिन्नवृत्ति
रेकैव (१) स्वीक्रियते न तु घट-पटादिरूपप्रतियोगिभेदेन भिन्ना
अभावस्य प्रतियोगितावच्छेदकस्य चैक्यात् तथाच घटादिनिष्ठ
प्रतियोगिताश्रयसाधनादेरेव साधनवति सत्त्वात् तादृशप्रति
योगिताश्रयानधिकरणत्वं न तत्रेति न सामानाधिकरण्येनेत्यस्य
सार्थकतासम्भवः प्रतियोगिभेदेन प्रतियोगिताभेदे तु महानसीय
वह्न्यादिनिष्ठाया वह्न्यादिसामान्याभावीयप्रतियोगितायाः पर्व्व
तीयवह्न्याद्यवृत्तितया तादृशप्रतियोगिताश्रयानधिकरणत्वस्य हेतु
मति पर्व्वतादौ सत्त्वात् वह्नित्वादेस्तदवच्छेदकत्वमादायाव्याप्ति
रिति वाच्यम्। यतः प्रतियोगिभेदेन न प्रतियोगिताभेदः, अपि
त्ववच्छेदकभेदेनैव, एवमपि वह्निभिन्नवान् घटादित्यादौ वह्नि
भिन्नत्वेन वह्न्यभावीयप्रतियोगिताया वह्निभिन्ने असम्भाविततया
तदाश्रयानधिकरणत्वस्य वह्निशून्ये हेतुमत्यक्षततया तादृशप्रति-
योगितावच्छेदकत्वमादायाव्याप्तेर्वारकतया सामानाधिकरण्येने
त्यस्य सार्थक्यं, महाकालो घटवान् कालपरिमाणादित्यादौ तु
महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितैव तादृशी महा-

(१) यावदिति वह्निभिन्नविशेषणम्।

कालस्य तदवच्छेदकमहाकालान्यत्वविशिष्टघटत्वाद्यवच्छिन्नाधिकरणताशून्यत्वात् । अथवा (१) वक्ष्यमाणरीत्या साध्यतावच्छेदकसम्बन्धसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वयादृशप्रतियोगिताकत्वप्रतियोगिकत्व-हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वैतन्निरूपितत्वावच्छिन्नाभावत्वानवच्छेदकत्वमेव वाच्यं, एवञ्च तथाविधनिरूपिताद्यभावप्रतियोगितैव तादृशी, एवञ्च वह्नित्वादिना घटाद्यभावप्रतियोगितावच्छेदकवह्नित्वविशिष्टप्रतियोगिकत्व-तदाश्रयवह्निनिष्ठप्रतियोगिकत्वयोरेकस्मिन् सम्बन्धे असत्त्वेन तादृशप्रतियोगिताया अपि सत्त्वात् तद्वारकतयापि सामानाधिकरण्यैवेत्यस्य तत्फलत्वमवधेयमित्याहुः ।

वह्निनिष्ठप्रतियोगितायाः ताद्दशत्ववारणाय प्रकृतप्रतियोगिता-
समानाधिकरणत्व-तदवच्छेदकावच्छिन्नत्वयोर्भेदप्रतियोगितावच्छे-
दकतायां निवेशनं, महाकालो घटवान् कालपरिमाणात्
इत्यादौ महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितामादायैव
लक्षणसमन्वयः न तु गगनत्व पटत्वादिना घटाद्यभावीयप्रति-
योगितां, तस्या गगनाद्यवच्छिन्न-घटाद्यवच्छिन्नकालभेदं गगनत्व-
पटत्वाद्यवच्छिन्नघटाद्यवच्छिन्नभेदद्वादाय पूर्व्वप्रतीकानामसम्भ-
वेऽपि (१) सामानाधिकरण्येन तदवच्छेदकस्याप्रसिद्धेः । अथवा
ताद्दशप्रतियोगितासामान्ये यद्धर्म्मसामानाधिकरण्यविशिष्टयद्धर्म्मा-
वच्छेद्यत्वाभावः यद्धर्म्मसामानाधिकरण्य-यद्धर्म्मावच्छेद्यत्वोभया-
भावो वा तद्धर्म्मविशिष्टसामानाधिकरण्यं व्याप्तिरित्येव विव-
क्षणीयम्, एवञ्च व्यधिकरणधर्म्मावच्छिन्नप्रतियोगितामादायापि
लक्षणसमन्वयस्तत्र सम्भवतीति ध्येयम् । वह्नित्वेन वह्नि-धूमोभयं
नास्तीत्येताद्दशप्रतीतिविषयाभावस्य वह्निमान् वह्नित्वेन वह्नि-धूमो-
भयवान् नेति प्रतीतिसिद्धभेदमादाय प्रतियोगिव्यधिकरणत्वेऽपि
तस्य प्रतियोगितावच्छेदकत्व न वह्नित्वमात्रे पर्य्याप्तं तदा सति वह्नि-
त्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिमति ताद्दशा-
भावप्रत्ययाप्रसङ्गात्(२) किन्तु वह्नित्वसहितनदुभयत्व एव तत्पर्य्या-
प्तिरतस्ताद्दशप्रतियोगितायाः समानाधिकरणतया तदवच्छेदकत्वे-

(१) [illegible]

(२) [illegible]

ऽपि वह्नित्वस्य न क्षतिः। यदि च तादृशाभावप्रतियोगितावच्छेदकं वह्नित्वादिकमेव न तु प्रतियोगिविशेषणतापन्नमुभयत्वं, प्रतियोगिविशेषणतानापन्ने प्रतियोगितावच्छेदकत्वावगाहिप्रतीत्या तद्विशेषणतापन्ने तदनवगाहनात् अन्यथा वह्नित्वेन घटो नास्तीत्यादावपि घटत्व-वह्नित्वाद्युभयस्मिन्नवच्छेदकत्वपर्य्याप्त्यवगाहनौचित्यात् सामानाधिकरण्येनेत्यस्य वैयर्थ्यापत्तेः, वह्नित्वेनोभयाभावप्रतियोगिता च व्यासज्यवृत्तिरतो न तादृशाभावस्य केवलान्वयित्वानुपपत्तिरथवा सौन्दडमते प्रतियोगितावच्छेदकधर्म्मावच्छिन्नवदेतद्धर्म्मावच्छिन्नप्रतियोगिनोऽपि नाभावविरोधित्वं किन्तु अभावबुद्धौ प्रतियोग्यंशे प्रकारीभूतो यो धर्म्मस्तद्विशिष्टप्रतियोगितावच्छेदकावच्छिन्नस्यैवेति न केवलान्वयित्वानुपपत्तिरिति मन्यते, तदा सामानाधिकरण्येनेत्यस्य प्रतियोगितापर्य्याप्त्यधिकरणवृत्तित्वेन, प्रतियोग्यंशे प्रकारीभूतधर्म्मपर्य्याप्त्यधिकरणवृत्तित्वेन वा इत्येवार्थः इत्याहुः। तदुभयमपि न युक्तम्, एवं सति घटत्वादिना साध्याभावप्रतियोगितायामपि निरुक्तप्रतियोगिवैयधिकरण्यनिरूपकत्वसम्भवेन प्रथमलक्षणे प्रतियोगिव्यधिकरणस्येत्यनभिधानस्य निर्वीजतया सन्दर्भविरोधापत्तेः। वस्तुतो यादृशप्रतियोगितासम्बन्धावच्छिन्नप्रकारकतावच्छेदकयत्किञ्चिद्धर्म्मावच्छिन्नानधिकरणत्वं हेतुमतस्तदनवच्छेदकत्वं साध्यतावच्छेदकस्य विवक्षणीयं कपिसंयोगत्वावच्छिन्नकपिसंयोगादिनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारताच्छेदकं कपिसंयोगत्वादिकमेव तदवच्छिन्नानधिकरणत्वञ्च न हेतुमत इति न कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्ति-

घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन च प्रमेयत्वादिना प्रति-
योगिनो घटत्वेन प्रमेयं नास्तीत्यादिज्ञाने भानात् प्रमेयत्वाद्य-
वच्छिन्नाधिकरणत्वस्य हेतुमत्त्वसम्भवात् घटत्वाद्यवच्छिन्नप्रति-
योगिताया यादृशप्रतियोगितात्वेन उपादानासम्भवात् तथाविध-
प्रतियोगिताया अप्रसिद्धिरतो यत्किञ्चिदित्युक्तं, दण्डिमान् दण्डि-
संयोगादित्यादौ तत्तद्दण्डावच्छिन्नाधिकरणत्वमादाय दण्डि-
सामान्याभावस्य प्रतियोगिव्यधिकरणत्वेऽपि न क्षतिः तत्तद्दण्डा-
वच्छिन्नान्यतमाभावप्रतियोगितावच्छेदकत्वमादाय दोष[illegible]
तत्र परम्परासम्बन्धेन दण्डत्वादेः साध्यतावच्छेदकत्वस्या-
वश्यकत्वात्, तत्संयोगत्व तद्वह्नित्वादिविशिष्टप्रतियोगि[illegible]
भावमाने संयोगत्व-वह्नित्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगि-
ताया' संसर्गतया भाने मानाभावात् तत्संयोगत्व तद्वह्नित्वाद्यवच्छि-
न्नाधिकरणत्वेऽपि हेतुमत्तो न क्षतिः, वह्नित्वावच्छिन्नप्रति[illegible]
ताया घटत्वाद्यवच्छिन्नत्वेन घटे नास्तीत्याद[illegible]

साध्यनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्रकारतानवच्छेदकावच्छिन्नान-धिकरणत्वं न चेत्तत्र इति साध्यवृत्तितयाविशेषप्रतियोगिताया पर्यवसिता न पूर्वोक्तलक्षणे प्रतियोगिव्यधिकरणत्वं निवेशितम्। वह्नित्वादिना उभयाभावमादाय दोषस्तु पूर्वरीत्या वारणीय इति।

परे तु (१) यदि न घटत्वेन वह्निर्नास्ति वह्नित्वेन घटो नास्तीत्यादौ वह्नित्व-घटत्वादिरूपसमानाधिकरणधर्म्मस्यापि प्रतियोगितावच्छेदकत्वं भासते, अन्यथा तादृशप्रतीतौ प्रतियोगितद्धर्म्मयोरुपलक्षणतया भानेन तद्विशिष्टवैशिष्ट्यानवगाहितया तन्निर्व्विकल्पकानन्तरमप्युत्पत्त्यापत्तेः। न च वह्नित्व-घटत्वादेः प्रतियोगितावच्छेदकत्वानवगाहने तन्निर्विकल्पकानन्तर तादृशाभाव बुद्धिरिष्टैव प्रतियोगितावच्छेदकतया यद्भासते तन्निर्व्विकानन्तर-मेवाभावप्रतीत्यनुपगमात् इति वाच्यम्। वह्नित्वादिनिर्व्विकल्प कानन्तरं तथाविधप्रत्ययोपगमे विशेषाभावेन तदुत्तरम् उपलक्षणविधया वह्नित्वाद्यवगाहिनो वह्निर्नास्तीत्याकारकसमाना-धिकरणधर्म्मावच्छिन्नाभावप्रत्ययस्यापि (२) स्वीकारापत्तेः एवं स्वातन्त्र्येण प्रतियोगितावच्छेदकत्वविषयकाभावबुद्धौ प्रतियोगिनि प्रकारस्योपलक्षणतया भानोपगमे वह्निमति वह्नित्वेन द्रव्यं नास्तीतिप्रतीत्यापत्तिः। यत्तु प्रतियोगिप्रकारविरुद्धधर्म्म एव

सम्बन्धावच्छिन्नप्रकारतावच्छेदकतत्तद्वह्निवृत्तिसाध्यमात्रवृत्तिधर्म्मावच्छिन्नानधिकरणत्वं हेतुमति सत्त्वात् तादृशप्रविष्टत्वा तत्र न दोषसम्भव इत्येकमात्रवृत्तीति।

(१) अन्ये त्विति पा०।

(२) तदुत्तरं वह्नित्वाद्यपि प्रतियोगितावच्छेदकत्वानवगाहिवह्निर्नास्तीत्याकारकसमानाधिकरणधर्म्मावच्छिन्नाभावप्रत्ययस्यापीति पा०।

स्वातन्त्र्येण प्रतियोगितावच्छेदकत्वं भासते इति नियमान्न तदापत्तिरिति, तन्न, तथा सति ह्रदादौ वह्नित्वेन किमपि द्रव्यं नास्तीति प्रतीत्यनुपपत्तेः। न च प्रतियोगित्वे प्रतीतिप्रकारीभूतधर्म्मान्यूनवृत्तित्वभाननियमात् पर्व्वतादिवृत्तिवह्नित्वाद्यवच्छिन्नाभावप्रतियोगिताया द्रव्यत्वन्यूनवृत्तित्वान्नोक्तापत्तिरिति वाच्यम्। वह्नित्वेन द्रव्यं नास्तीति शब्दजबोधे प्रतियोगिताया द्रव्यत्वान्यूनवृत्तित्वभासकाभावात्। न च संसर्गतया भासमाने वह्नित्वावच्छिन्नप्रतियोगित्वे द्रव्यत्वान्यूनवृत्तित्वस्य संसर्गतावच्छेदकतया भानमाकाङ्क्षाबलादेव सम्भवतीति वाच्यम्। अन्यूनवृत्तित्वस्य नानापदार्थघटितस्य संसर्गघटकतया भाने मानान्तरविरहेण स्वरूपसम्बन्धावच्छिन्नत्वभानोपगमस्यैवोचितत्वात् (१)। इत्युच्यते, तदा व्याप्यवृत्तितानिवेशपक्षे वह्नित्वादेर्व्याप्यवृत्तिघटत्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकत्वमादायासम्भवप्रसक्तिरित्यालोच्य प्रतियोगिवैयधिकरण्यनिवेशनमनुससार। तदर्थश्च प्रतियोगितावच्छेदकविशिष्टानधिकरणवृत्तित्वमेव तथा सत्यपि हेतुमतो घटत्वादिविशिष्टानधिकरणतया वह्नित्वादिना घटाद्यभावमादाय दोषप्रसक्त्या सामानाधिकरण्येनेत्यस्य सार्थक्यसम्भवात्। न च प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकभेदवत्त्वं तथाच संयोगत्वावच्छिन्नघटादिसम्भेदमादाय संयोगात्यन्ताभावस्य प्रतियोगिवैयधिकरण्यापत्तिः भेदप्रतियोगितावच्छेदकताया प्रकृत-

(१) एतस्मिन्नादि उचितत्वादित्यन्त पाठः केषुचित्पुस्तकेषु नास्ति।

प्रतियोगितायाः सामानाधिकरण्यनिवेशेन सामञ्जस्यात्। न च(१) घटे नित्यादिभिन्नभिन्नत्वादिना घटत्वाद्यवच्छिन्नप्रतियोगिताकभेदसाधनमिति घटत्वादिना वह्न्याद्यभावस्यापि घटत्वाद्यवच्छिन्नभेदमादाय प्रतियोगितावच्छेदकताया वह्नित्वादेः प्रतियोगितायाः सामानाधिकरण्येनावच्छेदकताया असम्भव इति वाच्यम्। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वे तत्र भेदान्यप्रतियोगितापत्तावप्यस्य घटत्वेन घटाद्यत्वादौ घटत्वावच्छिन्नघटाद्यन्यताभावस्येव विरहत्वापत्तेः, प्रतियोगितावच्छेदक सामानाधिकरण्येन यावदवच्छेदक ताहृशप्रतियोगितावच्छेदकताक एव या भेदो निवेश्य(२) अथैवमपि घटत्वाद्यवच्छिन्नवह्न्याद्यभावस्य घटत्वाद्यवच्छिन्नघटिभेदमादाय घटत्वाद्यवच्छिन्नघटादिव्यधिकरणस्य प्रतियोगितावच्छेदकत्वमादायाव्याप्तिर्दुर्वारैवेति चेन्न, सामानाधिकरण्येन प्रतियोगिताया अवच्छेदक यद्यत् तदवच्छिन्नप्रतियोगितावच्छेदकताकभेदस्यैव निवेशनीयत्वात्। अत्र वह्नित्वादि

(१) सामञ्जस्यादित्यनन्तर "न च घटत्वादिना वह्न्याद्यभावस्यापि घटत्वाद्यवच्छिन्नवह्न्यादिभेदमादाय प्रतियोगित्वेयधिकरणय दुर्वार ताहृशभेदीयवह्न्यादिनिष्ठप्रतियोगितावच्छेदकताया घटत्वाद्यवच्छिन्नवह्न्यभावीयवह्न्यादिनिष्ठप्रतियोगिताव्यधिकरणघटत्वादेरिव तत्समानाधिकरणवह्नित्वादेरपि सामानाधिकरण्येनावच्छेदकतायास्ताहृशात्यन्ताभावप्रतियोगितावच्छेदकतावद्वह्न्याद्यैयत्वात् स्वप्रतियोगितासमानाधिकरणधर्मावच्छिन्नत्वस्य भेदघारणासम्भवादिति वह्नित्वादेस्तत्प्रतियोगिताया सामानाधिकरण्येनावच्छेदकतया अव्याप्तिरिति वाच्यम्।" इत्यधिक पाठ कुत्रचिदादर्शपुस्तके वर्त्तते।

(२) प्रतियोगितावच्छेदकसमानाधिकरण्येन यावच्छेदकता ताहृशावच्छेदकताकप्रतियोगिताकभेद एव वा निवेश्य इति पा०।

घटाद्यभावस्य यदि घटत्वादिकं प्रतियोगितावच्छेदकं तदा घटादिमति तादृशाभावासत्त्वप्रसङ्ग इति वह्नित्व-घटत्वाद्योरेवावच्छेदकतापर्य्याप्तिरुपगन्तव्या तथाचानवच्छेदकपदस्यावच्छेदकतापर्य्याप्त्यनधिकरणपरतया व्याख्येयतयैव तादृशाभावप्रतियोगितामादाय दोषाप्रसक्तेः सामानाधिकरण्येनेत्यस्य वैयर्थ्यमशक्यवारणमेवेति चेन्न, प्रतियोगिविशेषणतापन्न-तदनापन्नयोरवच्छेदकतावैलक्षण्येन प्रत्येकमेवावच्छेदकतापर्य्याप्तेः पर्य्याप्तिविवक्षामात्रेण प्रतीकारासम्भवात् सामानाधिकरण्येनेत्यस्य सार्थक्यात् तदपि प्रतियोगिविशेषणतापन्नस्य यादृशं विलक्षणमवच्छेदकत्वं तत्पर्य्याप्त्यनधिकरणत्वलाभायैव. एवञ्च विलक्षणावच्छेदकतात्वेन प्रत्येकं पर्य्याप्तयोरवच्छेदकत्वयोस्तत्तत्प्रतियोगितावच्छेदकत्वत्वेनानुगतयोः समानाधिकरण-व्यधिकरणधर्म्मद्वये पर्य्याप्त्यन्तरं स्वीक्रियते तादृशानुगतरूपावच्छिन्नपर्य्याप्त्यधिकरण-धर्म्मावच्छिन्नस्यैवाभावविरोधितेति(१) व्यधिकरणधर्म्मावच्छिन्नाभावस्य प्रतियोगिमति सत्त्वोपपत्तिः। एवञ्च छदत्व-वह्नित्वोभयावच्छिन्नवह्न्यभावमादाय पर्य्याप्तिनिवेशव्यावृत्तिप्रदर्शनं समानाधिकरणधर्म्मस्य व्यधिकरणधर्म्मावच्छिन्न-

---

(१) कुत्रचिदादर्शपुस्तके लक्षणाभिप्रायेणेत्यनन्तरम् अधिकपाठो वर्त्तते यथा, व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्यैव तत्प्रतियोगितावच्छेदकविशिष्टविरोधित्वोपगमेनोक्ताभावस्य घटादिमति वृत्तौ बाधकाभावात्. अस्तु वा विलक्षणावच्छेदकतात्वेन प्रत्येकं पर्य्याप्तयोरप्यवच्छेदकत्वयोस्तत्तत्प्रतियोगितावच्छेदकतात्वेनानुगतयोः समानाधिकरण-व्यधिकरणधर्म्मद्वये पर्य्याप्त्यन्तरं तादृशानुगतरूपावच्छिन्नपर्य्याप्त्यधिकरणधर्म्मावच्छिन्नस्यैव वाभावविरोधितेति नानुपपत्तिरिति वदन्ति।

प्रतियोगितानवच्छेदकत्वाभोगव्याप्यत्वानतिरिक्तत्वाभिधे-
यत्वात् ।

'अव्यभिचारितस्सम्बन्धो' इत्यत्रत्यमव्यभिचारित-
मानपदप्रतिपाद्यता, तथाच पर्यवसन्नं तत्पदस्य पारिभाषि-
कमिति भावः । ननु साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्ति-
रूपस्य व्यभिचारपदार्थेन तदन्तर्भावेऽनिवेशात् कथमेवमित्यत
आह, 'हेताविति' हेतावपि साध्यतावच्छेदकावच्छिन्नसाध्याभाव-
वद्वृत्तित्वं यथा व्यभिचारः तथा साध्यतावच्छेदकान्वयिनो हि
समानाधिकरणाभावप्रतियोगितायाः सामानाधिकरण्येनावच्छे-
दकत्वस्यापि तथात्वादित्यर्थः, वह्निर्धूमस्य व्यभिचारीत्यत्राभाव-
वद्वृत्तित्वं व्यभिचारपदार्थः, तदेकदेशे चाभावे षष्ठ्यर्थप्रतियोगि-
ताया निरूपकत्वसम्बन्धेनान्वयः, प्रतियोगितायां चाधेयतासम्बन्धेन
धूमस्य, अवच्छिन्नत्वसम्बन्धेन धूमविशेषणतापन्नधूमत्वस्यान्वय इति
धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वलाभः, साध्यतावच्छेदकावच्छिन्न-
साध्यान्तर्भावेण च न व्यभिचारपदार्थता शक्त्यानन्त्यप्रसङ्गात् साध्य-
वाचकपदवैयर्थ्यापाताच्च । एवं समानाधिकरणाभावप्रतियोगि-
ताया सामानाधिकरण्येनावच्छेदकत्व व्यभिचारपदार्थः, सामाना-
धिकरण्ये च व्युत्पत्तिवैचित्र्यात् प्रथमान्तपदोपस्थाप्यस्यापि वह्नेः
निरूपकत्वेनान्वय., वह्न्याद्यन्तर्भावेनैव वा शक्तिः, धूमपदं लक्षणया
धूमत्वपरम्, आधेयत्व षष्ठ्यर्थः, अन्वयश्चास्यावच्छेदकत्वे, निरूपकत्व-
मिन्प्रत्ययार्थः, तथाच धूमत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगि-
तावच्छेदकतानिरूपको वह्निरित्यन्वयबोधः । यद्यपि लाघवरूप-

विनिगमकसत्त्वादभाववद्वृत्तित्व एव व्यभिचारपदशक्तिकल्पनमुचितं, तथापि ज्ञेयत्वं वाच्यत्वस्याव्यभिचारीति प्रामाणिकव्यवहारानुरोधादुपदर्शितगुरुरूपस्यापि व्यभिचारपदार्थत्वमावश्यकं, तत्र वाच्यत्वाभावाप्रसिद्ध्या तदभाववद्वृत्तित्वाभावबोधासम्भवात्, उक्तरूपस्य व्यभिचारपदार्थत्वे च व्यभिचारस्याभावोऽव्यभिचारमित्यव्ययीभावान्वयणात् ज्ञेयत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमव्यभिचारपदार्थः, इन्प्रत्ययार्थः निरूपकत्वं, वाच्यत्वपदं वाच्यत्वत्वपरं, षष्ठ्यर्थश्चाधेयत्वं, तथाच वाच्यत्वत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वनिरूपकं (१) ज्ञेयत्वमित्यन्वयबोधः। अथैवमपि अव्यभिचारिसम्बन्धपदेनोक्तव्याप्तेः कथं लाभः। न चाव्यभिचारिपदं नाद्दशप्रतियोगितानवच्छेदकत्वान्वयपरं, सम्बन्धश्च तदान्वयसामानाधिकरण्यमिति तल्लाभ इति वाच्यम्। धूमाव्यभिचारिवह्नित्वमितिप्रयोगाभावादुक्तधर्म्मबोधकाव्यभिचारपदसमभिव्याहृतमत्वर्थीयस्यान्वयत्वाबोधकत्वादव्यभिचारपदार्थान्वयितावच्छेदकं यद्रूपं तदवच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकताबोधकताया व्युत्पत्तिसिद्धत्वात्, साध्यतावच्छेदकस्याव्यभिचारिपदार्थत्वे हेतुसमानाधिकरणेत्यादिव्याप्तिबोधस्याशक्यत्वाच्चेति चेन्न, अव्यभिचारिसम्बन्ध इत्यस्याव्यभिचारिहेतुनिष्ठं साध्यसामानाधिकरण्यमित्यर्थः, एवञ्च साध्यतावच्छेदकनिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकताकहेतुनिष्ठसाध्यसामानाधिकरण्यमिति पर्य्यवसितं, उक्तलक्षणवाक्य-

---

(१) स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकताकमिति पा० ।

योग्यवृत्तिधर्म्मसहितप्रतियोगिवृत्तिधर्म्मपर्य्याप्तप्रतियोगितावच्छेद-कताकोप्यभावोस्तीति व्युत्पादनाय तादृशाभावमादायापि दूषणं दर्शयति,'कृदत्वेति उभयावच्छिन्नाभावप्रतियोगितावच्छेदकोभय-घटकप्रत्येकस्यावच्छेदकताया अव्याहतत्वादिति भावः। 'न चाति-रिति, अवच्छेद्यान्वयविशेषणभावापन्नेषु तदानापन्नेषु वा नाना-धर्म्मेषु पर्य्याप्तं यदवच्छेदकत्वं पर्य्याप्तिसम्बन्धेन तदवच्छिन्नभेदस्य तत्पर्य्याप्त्यनवच्छेदकप्रत्येकधर्म्मसमावृत्तिधर्म्मावच्छेदेन सत्त्वाद्वह्नि-त्वादेस्तादृशप्रतियोगितानवच्छेदकत्वस्य घटत्वाद्यवच्छिन्ने घट-पटोभयत्वावच्छिन्नभेदवन्निष्ठत्युवृत्त्वादिति भावः। न च वह्नि-निष्ठकृदत्वावच्छिन्नोभयावच्छिन्नप्रतियोगितायाः सामानाधिक-रण्येन यदवच्छेदकत्वं तद्वह्नित्वमात्रे पर्य्याप्तं कृदत्वस्य व्यधि-करणतयैवावच्छेदकत्वादिति कथं वह्नित्वस्य तादृशावच्छेदका-वच्छिन्नान्यत्वनिर्व्वाह इति वाच्यम्। यतः सामानाधिकरण्येना-नवच्छेदकमित्यस्य तत्तत्प्रतियोगितासमानाधिकरणवृत्तियत्-प्रतियोगितावच्छेदकत्वं तदवच्छिन्नभेदकूटवत्त्वमित्यर्थः, इत्यञ्च कृदत्व-वह्नित्वोभयावच्छिन्नप्रतियोगितायाः समानाधिकरणवृत्त्ये-कमेवावच्छेदकत्वमुभयत्वपर्य्याप्तं तदवच्छिन्नभेदो वह्नित्वेऽव्याहत-एवेति। ननु संयोगादिसाध्यकसद्धेतावव्याप्तिवारणाय तदभाव-व्यावर्त्तकव्याप्यवृत्तित्वादिविशेषणोपादाने तत्साध्यकसत्त्वादिरूप-व्यभिचारिहेतावतिव्याप्तिप्रसङ्गः अभावान्तरस्यैव लक्षणघटक-त्वादित्याशङ्का व्यभिचारिहेतुकस्थले संयोगाद्यभावस्य लक्षणघट-कत्वप्रदर्शनेन परिहरति, 'सत्त्ववतीति. 'व्याप्यवृत्तिरित्युपलक्षणं

व्याप्यत्वेवार्थे तात्पर्य्यं न तु यथाश्रुतविशेष्य-विशेषणभावे, तदाधत्व-व्याव्यभिचारिसम्बन्धपदेन बोधयितुमशक्यतया पारिभाषिकताया-दुर्व्वारत्वात्। न च यद्रूपावच्छिन्नस्य यस्य व्याप्तिस्तदन्यत्वेन तस्याव्यभिचारिसम्बन्धपदार्थत्वेऽपि न क्षतिरिति वाच्यम्। एवं सति साध्याभाववद्वृत्तित्वमात्रस्य व्यभिचारपदार्थत्वेऽपि व्यतिरेकिसाध्यकोक्तव्याप्तेरव्यभिचारिसम्बन्धरूपतोपपत्तेरुक्तधर्म्मस्य व्यभिचारपदार्थत्वव्यवस्थापनाया अनुपयुक्तत्वात्। उक्तलक्षणेऽपि साध्यसामानाधिकरण्यमन्तर्भाव्याव्यभिचारिसम्बन्धरूपताया व्यवस्थापयितुं शक्यत्वात् साध्यसामानाधिकरण्यानन्तर्भावेऽपि प्रतियोगिसमानाधिकरणस्वसमानाधिकरणनिरुक्तयावदभावकत्वरूप-पर्य्यवसितपूर्व्वलक्षणार्थस्य सम्बन्धरूपतासम्भवात्। 'अवच्छेदकत्व'-मिति अनवच्छेदकमित्यत्र यदवच्छेदकपदं तत्तात्पर्य्यविषयतावच्छेदकमित्यर्थः, 'तत्पर्य्याप्त्यधिकरणत्वं' पर्य्याप्तिसम्बन्धेनावच्छेदकतावत्त्व, तथाच पर्य्याप्तिसम्बन्धेनावच्छेदकत्वावच्छिन्नस्य भेदोऽनवच्छेदकपदेन विवक्षित इति भावः। 'विशिष्टवह्न्यभावस्य' 'प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्येत्यन्वयः, महानसीयत्वादिविशिष्टवह्न्यभावस्य प्रतियोगितायां महानसीयत्वसहितवह्नित्वस्यावच्छेदकत्वेऽपि आश्रयतासम्बन्धेनावच्छेदकतावदन्यत्वस्य वह्नित्वे दुर्लभत्वादिति भाव। प्रतियोगिविशेषणतापन्नधर्म्मान्तरसहितवह्नित्वावच्छिन्नाभावमादाय दोषं प्रदर्श्य प्रतियोगिविशेषणतापन्नधर्म्मस्यैव प्रतियोगितावच्छेदकत्वं प्रतीयते इति नियममनभ्युपगन्तुर्व्यधिकरणधर्म्मावच्छिन्नाभाववादिनः प्रति-

Āīn-i-Akbarī, Fasc 1-22 @ 1/8/ each .. .. 3[illegible]
Ditto (English) Vol I, Fasc 1-7, Vol II, Fasc 1-5, Vol III, 3[illegible]
Ditto (English) Vol I, Fasc 1-8, Vol II, Fasc 1-7 Vol 3 @ 1/4/ each 2[illegible]
Arabic Bibliography, by Dr A Sprenger, @ /10/ . 0
*Bādshāhnāmah, with Index Fasc 1-19 @ /10/ each 11
Conquest of Syria, Fasc 1-9 @ /10/ each . Rs 5
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each 2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal Fasc 1-3 @ 1/ each 3
Dictionary of Arabic Technical Terms, and Appendix, Fasc 1-21 @ 1/8/ each 31
Farhang-i-Rashīdī, Fasc 1-14 @ 1/8/ each 21
Fihrist-i-Ṭūsī or, Ṭūsy's list of Shy'ah Books, Fasc 1-4 @ 1/- each . 4
Futūḥ-ush-Shām of Wāqidī, Fasc 1-9 @ /10/ each 5
Ditto of Āzādī, Fasc 1-4 @ /10/ each . . 2
History of Gujarat .. 1
Haft Asmān, History of the Persian Masnawi, Fasc 1 @ /12/ each .. 0
History of the Caliphs, (English) Fasc 1-6 @ 1/4/ each 7
Iqbālnāmah-i-Jahāngīrī, Fasc 1-3 @ /10/ each 1
Iṣābah with Supplement, 51 Fasc @ 1/ each 51
Maāṣir-i-Ālamgīrī, Fasc 1-6 @ /10/ each 3
Ma'āṣir-ul-Umarā, Vol I, Fasc 1-9, Vol II, Fasc 1-9, Vol III, 1-10, Index to Vol I, Fasc 10-11, Index to Vol II, Fasc 10-12, Index to Vol III, Fasc 11-12 @ /1/ each 35
Maghāzi of Wāqidi, Fasc 1-5 @ /10/ each ... 3
Marhamu 'L Ilah 'L-Mu'Dila . .. 1
Muntakhabu-t-Tawārīkh, Fasc 1-15 @ /10/ each 9
Ditto (English) Vol I, Fasc 1-7, Vol II, Fasc 1-5 and 3 Indexes, Vol III, Fasc 1 @ 1/ each ... 16
Muntakhabu-l-Lubāb, Fasc 1-19 @ /10/ each . . . 11
Ditto Part 3, Fasc 1 1
Nukhbatu-l-Fikr, Fasc 1 @ /10/ .. . 0
Nizāmi's Khiradnāmah-i-Iskandari, Fasc 1-2 @ /12/ each .. 1
Qawaninu 's Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut Col D C Phillott .. 5
Riyāzu-s-Salātīn, Fasc 1-5 @ /10/ each 3
Ditto (English) Fasc 1-5 @ 1/ ... 5
Tadhkira-i-khushnawīsān . . 1
Ṭabaqāt-i-Nāṣirī, (English), Fasc 1-14 @ 1/- each . 14
Ditto Index 1
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni Fasc 1-7 @ /10/ each 4
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif Fasc 1-6 @ /10/ each 3
Ten Ancient Arabic Poems, Fasc 1-2 @ 1/8/ each . 3
Tuzuk-i-Jahāngīrī, (Eng.) Fasc 1 @ 1/ 1
Wis-o-Rāmīn Fasc 1-5 @ /10/ each . 3
Zafarnāmah, Vol I, Fasc 1-9, Vol II, Fasc 1-8 @ /10/ each 10

ASIATIC SOCIETY'S PUBLICATIONS

1 Asiatic Researches Vols XIX and XX @ 10/ each . 20
2 Proceedings of the Asiatic Society from 1870 to 1904 @ /8/ per No
3 Journal of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8) 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7) 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No to Members and @ 2/ per No to Non Members

N B.—The figures enclosed in brackets give the number of Nos in each Volume.

4 Journal and Proceedings, N S, 1905, to date, (Nos 1-4 of 1905 are out of [illegible]) @ 1/8 per No to Members and Rs 2 per No to Non Members [illegible] to date Price varies from number to number [illegible] 25 to Members
[illegible] Researches of the Society from 1784-1883 ... 3
[illegible] Library of the Asiatic [illegible] Bengal, 1910, 8
[illegible] Descriptions [illegible] I
[illegible] 13
[illegible] Parts I & II @ [illegible] [illegible]

BIBLIOTHECA INDICA

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES No 1314

तत्त्वचिन्तामणि-दीधिति-विवृति



TATTVACINTĀMANI DIDHITI-VIVRITI

BY

GADADHARA BHATTACHARYYA

[illegible]

[illegible] TARKAVAGISA

Calcutta.

[illegible] PRESS

[illegible] Nandakumar Ch[illegible] 2nd Lane

[illegible]

1911

Āīn i Akbarī, Fasc 1 22 @ 1/8/ each 3
Ditto , (English) Vol I, Fasc 1-7, Vol II, Fasc 1 5, Vol III, . 3
Ditto (English) Vol I, Fasc 1 8, Vol II, Fasc 1 7 Vol 3 @ 1/4/ each 2
Arabic Bibliography, by Dr A Sprenger, @ /10/ , (
*Bādshāhnāmah, with Index Fasc 1--19 @ /10/ each . 11
Conquest of Syria, Fasc 1-9 @ /10/ each Rs
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal Fasc 1-3 @ 1/ each
Dictionary of Arabic Technical Terms, and Appendix, Fasc 1 21 @ 1/8/ each 3
Farhang i Rashīdi, Fasc 1-14 @ 1/8/ each 2
Fihrist i Tūsī or, Tūsy's list of Shy'ah Books, Fasc 1-4 @ 1/- each
Futūh-ush Shām of Wāqidī, Fasc 1--9 @ /10/ each . ...
Ditto of Āzādi, Fasc 1--4 @ /10/ each .
History of Gujarat . ..
Haft Asmān, History of the Persian Masnawi, Fasc 1 @ /12/ each . (
Hisātory of the Caliphs, (English) Fasc 1-6 @ 1/4/ each --
Iqālnamah i Jahāngīrī, Fasc 1-3 @ /10/ each . .
Isābah with Supplement, 51 Fasc @ 1/- each . 51
Ma'āsir i- Ālamgīrī, Fasc 1-6 @ /10/ each 3
Ma'āsir-ul Umarā, Vol I, Fasc 1-9, Vol II, Fasc 1-9, Vol III, 1-10, Index to Vol I, Fasc 10 11, Index to Vol II, Fasc 10 12, Index to Vol III, Fasc 11-12 @ /1/ each . 35
Maghāzi of Wāqidī, Fasc 1-5 @ /10/ each . 3
Marhamu 'L Ilah 'L-Mu'Dila 1
Muntakhabu t Tawārīkh, Fasc 1--15 @ /10/ each . . 9
Ditto (English) Vol I, Fasc 1-7, Vol II, Fasc 1--5 and 3 Indexes, Vol III, Fasc 1 @ 1/ each . ... 1(
Muntakhabu l Lubāb, Fasc 1-19 @ /10/ each . . 1
Ditto Part 3, Fasc 1 .. .
Nukhbatu l Fikr, Fasc 1 @ /10/ . . . (
Nizāmi s Khirādnāmah i Iskandari, Fasc 1 2 @ /12/ each . 1
Qawwamnu 's Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut Col D C Phillott . 5
Riyāzu s Salātīn, Fasc 1 5 @ /10/ each . .
Ditto (English) Fasc 1-5 @ 1/ ..
Tadhkira i khushnawīsān
Tabaqāt i Nāsiri, (English), Fasc 1 14 @ 1/ each . 1
Ditto Index 1
Tārīkh i Fīrūz Shāhi of Ziyāu d dīn Barni Fasc 1 7 @ /10/ each 4
Tārīkh i Fīrūzshāhi, of Shams i Sirāj Aif Fasc 1 6 @ /10/ each 3
Ten Ancient Arabic Poems, Fasc 1 2 @ 1/8/ each . . 3
Tuzuk-i Jahāngīrī, (Eng) Fasc 1 @ 1/ 1
Wis o Rāmīn, Fasc 1 5 @ /10/ each 3
Zafarnāmah, Vol I, Fasc 1 9, Vol II, Fasc 1-8 @ /10/ each . . 10

ASIATIC SOCIETY'S PUBLICATIONS

1 ASIATIC RESEARCHES Vols XIX and XX @ 10/ each 20
2 PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No
3 JOURNAL of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8) 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10, 1890 (11), 1891 (7) 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No to Members and @ 2/ per No to Non Members

N B—The figures enclosed in brakets give the number of Nos in each Volume

4 Journal and Proceedings, N S, 1905, to date, (Nos 1 4 of 1905 are out of stock), @ 1 8 per No to Members and Rs 2 per No to Non Members.
[illegible]oirs, 1905, to date Price varies from number to number. [illegible]iscount of 25% to Members
[illegible] [illegible]nary Review of the Researches of the Society from 1781 1883 ... 3
[illegible]gue of the Library of the Asiatic Society, Bengal, 1910, 8
[illegible] and Hewitson's Descriptions of New Indian Lepidoptera, [illegible] I-III with 8 coloured Plates, 4to @ 6/ each .. 18

BIBLIOTHECA INDICA

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES No 1311

तत्त्वचिन्तामणि-दीधिति-विवृति



TATTVACINTAMANI DIDHITI-VIVRITI

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS MR BERNARD QUARITCH, 11, GRAFTON STREET NEW BOND STREET, LONDON, W, AND MR O HARRASSOWITZ, BOOKSELLER, LEIPZIG GERMANY

*Complete copies of those works marked with an asterisk * cannot be supplied — of the Fasc. being out of stock*

LIBLIOTHECA INDICA

Sanskrit Series

*Advaita Brahma Siddhi, Fasc 2 4 @ /10/ each . Rs 1
Advaitachintā Kaustubha Fasc 1-3 @ /10/ each . 1
*Agni Purāṇa, Fasc. 6-11 @ /10/ each . 5
Aitareya Brāhmaṇa, Vol I, Fasc 1-5, Vol II, Fasc 1-5, Vol III Fasc 1-5, Vol IV, Fasc 1-8 @ /10/ each . 14
Aitereya Lochana . . . 2
*Aṇu Bhāshya, Fasc 2-5 @ /10/ each . 2
Aphorisms of Sāṇḍilya, (English) Fasc 1 @ 1/ . 1
Aṣṭasāhasrikā Prajñāpāramitā Fasc 1-6 @ /10/ each 3
*Atharvana Upanishad, Fasc 4 5 @ /10/ each 1
Atmatattvaviveka, Fasc I @ /10/ each . . . 0
Açvavaidyaka, Fasc 1-5 @ /10/ each 3
Avadāna Kalpalatā, (Sans and Tibetan) Vol I, Fasc 1-7, Vol II, Fasc 1-7 @ 1/ each . 15
Bālam Bhatti Vol I, Fasc 1-2, Vol 2, Fasc 1 @ /10/ each . . 1
Baudhāyana S'rauta Sūtra Fasc 1 3 Vol II, Fasc 1-3 @ /10/ each 3
*Bhāmatī, Fasc 4-8 @ /10/ each . 3
Bhātta Dīpikā Vol I, Fasc 1-6, Vol. 2 Fasc 1, @ /10 each 4
Baudhyostatrasangraha . . . 2
Bṛhaddevatā Fasc 1-4 @ /10/ each . . . 2
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each . . . 3
Bodhicaryāvatāra of Çantideva, Fasc 1 5 @ /10/ each . . 3
Çri Cantinatha Charita Fasc. 1-3 . 1
Çatadūṣaṇī, Fasc 1-2 @ /10/ each . . 1
Catalogue of Sanskrit Books and MSS, Fasc 1-4 @ 2 each . . 8
Çatapatha Brāhmaṇa Vol I, Fasc 1-7, Vol II, Fasc 1-5, Vol. III, Fasc 1-7 Vol 5, Fasc 1-4 @ /10/ each . 14
Ditto Vol 6 Fasc 1-3 @ 1/4/ each . . . 3
Ditto Vol VII, Fasc 1-5 @ /10/ . 3
Çatasāhasrikā Prajñāpāramitā Part, I Fasc 1-14 @ /10/ each . 8
*Caturvarga Chintāmaṇi, Vol II, Fasc 1-25; Vol III Part I, Fasc 1-18 Part II, Fasc 1-10 Vol IV Fasc 1-6 @ /10/ each . 2?
Ditto Vol 4 Fasc 7-8 @ 1/4/ each . . 2
Ditto Vol IV, Fasc 8-9 @ /10/ . . 1
Çlockavartika, (English) Fasc 1 7 @ 1/4/ each . . 8
*Çrauta Sūtra of Āpastamba Fasc 1-17 @ /10/ each . 8
Ditto Çānkhāyana, Vol I, Fasc 1-7, Vol II, Fasc 1-4, Vol III, Fasc 1-4, Vol 4 Fasc 1 @ /10/ each . . 16
Çrī Bhāshyam Fasc 1-3 @ /10/ each . 1
Dāna Kriyā Kaumudī, Fasc 1-2 @ /10/ each . 1
Gadadhara Paddhati Kālasāra Vol I, Fasc 1-7 @ /10/ each 4
Ditto Āchārasārah Vol II, Fasc 1-4 @ /10/ each 3
Gobhilīya Grihya Sutra, Vol I @ /10/ each . 3
Ditto Vol II Fasc -2 @ 1/4/ each . . 2
Ditto (Appendix) Gobhila Parisista . . . 2
Ditto Grihya Sangraha . . 0
Haralata . . . 1
Karmapradipika, Fasc I . . 1
Kāla Viveka, Fasc 1-7 @ /10/ each . . 4
Kātantra, Fasc 1-6 @ 1/4/ each . 4

योगितानवच्छेदकतत्त्वरूपतदनतिरिक्तवृत्तित्वस्यैव विवक्षणीयतया तद्घटकाभावे (१) व्याप्यवृत्तित्वनिवेशे प्रयोजनविरहेण संयोगादिसाध्यकसद्धेतौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसंयोगत्वादेर्निरुक्तानतिरिक्तवृत्तित्वस्य संयोगत्वादिसाधारण्यविरहेणाव्याप्त्यनवकाशेन हेतुसमानाधिकरणाभावे व्याप्यवृत्तित्वविशेषणवैयर्थ्यात् । न च स्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणादाने संयोगेन द्रव्यस्याव्याप्यवृत्तितापत्तेः संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकं तादृशधर्माप्रसिद्धेः तादृशाभावप्रतियोगितावच्छेदकीभूतसकलधर्मावच्छिन्नानामेव संयोगेनाभावानां केवलान्वयित्वादिति स्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणस्यावश्यकतेति वाच्यम् । संयोगाद्यभावव्यावर्त्तकस्यावच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वस्य निवेशे संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नाभावो गुणादीनामेव व्याप्यवृत्तिर्न तु द्रव्यस्येति तादृशाभावप्रतियोगितावच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठतादृशाभावप्रतियोगितानवच्छेदकं तादृशधर्माप्रसिद्धितादवस्थ्यात् प्रतियोगितायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं परित्यज्य एकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विशेषणत्वपक्षस्यैवावलम्बनीयतया व्याप्यवृत्तित्वविशेषणवैयर्थ्यस्य दुर्वारत्वात् तस्मात्

(१) साध्यतावच्छेदकतावच्छेदकत्वघटके इत्यर्थः ।

'धर्म्माणां चेत्यादिग्रन्थस्य (१) तथाच व्याप्यवृत्तित्वविशेषणं न देयमेव तद्दानेऽपि संयोगत्वादौ द्रव्यत्वसमानाधिकरणाभावप्रतियोगित्वीयपारिभाषिकावच्छेदकत्वविरहेणाव्याप्तेरित्याशयः । ननु पारिभाषिकावच्छेदकत्वशरीरनिविष्टस्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणमावश्यकम् अन्यथा गुणवृत्तिसत्तादिहेतुकेऽपि संयोगत्वादौ पारिभाषिकावच्छेदकत्वानिर्व्वाहादिति हेतुसम्बन्धिनिष्ठाभावेऽपि तद्विशेषणमावश्यकम् अन्यथाव्याप्तेरित्याशङ्का सत्तादिहेतुकस्थले गुणत्वाद्यवच्छिन्नाभावप्रतियोगितायाः पारिभाषिकावच्छेदकत्वं संयोगत्वादौ प्रदर्श्य वारयति, 'भवति चेति, गुणत्वाद्यवच्छिन्नाभावाना व्याप्यवृत्तित्वाभिधानञ्च संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वसूचनाय, जन्यद्रव्योत्पत्तिकालावच्छेदेन गुणत्वाद्यवच्छिन्नाभावस्य नवीनैरुपगमात्तन्मते गुणत्वस्य संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगितानवच्छेदकत्वं न सम्भवतीति 'गुणावृत्तित्वानुसरणं, संयोगि गुणान्यत्वे सति सत्त्वादित्यादौ गुणावृत्तित्वं न विशिष्टहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमतः संयोगसाध्यकव्यभिचारिमात्रे यादृशप्रतियोगितावच्छेदकमुपादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्व निर्व्वहति तादृशधर्म्ममाह, 'द्रव्यसात्वमवेतत्वेति ।

इति चक्रवर्त्तिलक्षणव्याख्या ।

---

(१) [illegible]

प्रगल्भलक्षणद्वयम् ।

तत्त्वचिन्तामणि-दीधितिः ।

साध्यतावच्छेदकविशिष्ट(१)साध्यसामानाधिकरण्या-वच्छेदकस्वसमानाधिकरणसाध्याभावत्वकत्वं, यत्समानाधिकरणसाध्याभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं वा व्याप्तिरिति तु न युक्तं सर्व्वत्र साध्याभावपदवैयर्थ्यात् ।

गादाधरी विवृतिः ।

प्रगल्भलक्षणद्वयमेकटोपेण दूषयितुमुपन्यस्यति, 'साध्यतावच्छेदकविशिष्टेत्यादि, विशिष्टाभावो विशेष्य-विशेषणसम्बन्धाभावरूपः, उभयाभावश्च परम्परासम्बन्धेन द्वित्वाभावरूप इति मतेनेदं लक्षणमन्यथा व्यधिकरणधर्म्मावच्छिन्नाभावं विनापि तादृशाभावमादाय लक्षणसमन्वयसम्भवे 'प्रतियोग्यवृत्तिश्चेति ग्रन्थानुत्थितेरिति ध्येयम्। अवच्छेदकत्वमिहानतिरिक्तवृत्तित्वं न तु स्वरूपसम्बन्धविशेषः यथोक्तधर्म्मयोस्तादृशावच्छेद्यावच्छेदकभावे मानाभावात्। 'स्वपदं हेतुतावच्छेदकावच्छिन्नहेतुपरं, तथाच साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यानतिरिक्तवृत्ति यद्धर्म्मविशिष्टसमानाधिकरणसाध्याभावत्वं तद्धर्म्मवत्त्वं व्याप्तिरिति तु समुदितार्थः, सद्धेतौ साध्यासमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य हेतुसमानाधिकरणत्वनियमात् तादृशसाध्याभावत्वं साध्यसामा-

---

(१) [illegible]

नाधिकरणस्यानतिरिक्तवृत्तीति लक्षणसमन्वयः । व्यभिचारि-
ताहशसाध्याभावस्यापि हेतुसमानाधिकरणतया तदतिरि-
क्तवृत्त्येव तदिति न लक्षणसमन्वयः । गुणकर्मान्यत्वविशिष्टसत्त्व-
वान् जातेरित्यादावतिव्याप्तेर्वारणाय 'साध्यतावच्छेदकविशिष्टे'ति
साध्याधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन बोध्यं तेन संयोगा-
दिना धूमादेरभावस्य कालिकादिना धूमादिमति वृत्तावपि (१)
नातिव्याप्तिः । द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तेर्वारणाय हेतु-
तावच्छेदकविशिष्टत्वेनोपादानं, तद्विशिष्टाधिकरणत्वं हेतुता-
वच्छेदकसम्बन्धेन बोध्यं तेन धूमादिसमवायिनिष्ठवह्नित्वाद्यवच्छि-
न्नवह्न्याद्यभावस्य वह्न्यादिसामानाधिकरण्यविरहेऽपि न क्षतिः
साध्य-हेतुसामानाधिकरण्यघटकवृत्तिद्वयमेकसम्बन्धेन बोध्यं तेन
द्रव्यं सत्त्वादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य
द्रव्यत्वत्वाद्यवच्छिन्नद्रव्यत्वाद्यभावस्य कालिकादिसम्बन्धेन साध्य-
वन्महाकालादिवृत्तित्वेऽपि न क्षतिः । यद्यपि हेतुसमाना-
धिकरणसाध्याभावत्वघटकमभावत्वरूपं विशेष्यं व्यतिरेकिसाध्यके
साध्यासमानाधिकरणाभावसाधारणमिति विशिष्टसाध्यसामाना-
धिकरण्यशून्यावृत्तित्वरूपन्तदनतिरिक्तवृत्तित्वं दुर्वचं, तथापि
यावन्तः स्वसमानाधिकरणसाध्याभावा विशिष्टसाध्यसमानाधिक-
रणाः इत्यर्थस्य विवक्षणीयतया न दोषः । अव्याप्यवृत्तिसाध्यकव्यभि-
चारिण्यतिव्याप्तिः साध्याभावस्य साध्यवत्यपि वृत्तेरिति तु नाश-
ङ्कनीयं व्यभिचारनिरूपकाधिकरणं यत् तदवृत्तित्वावच्छिन्ना-

(१) समवायादिना धूमादिमति वृत्तावपीति पा० ।

भावस्यापि साध्याभावतया तस्य च साध्यवत्यवृत्ते (१)। 'यत्समानाधिकरणेति यद्रूपविशिष्टसमानाधिकरणेत्यर्थः, तेन द्रव्यं गुणकर्म्मान्यत्वे सति सत्त्वादित्यादौ सत्तासमानाधिकरणद्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावप्रमाया साध्यवत्त्वज्ञानप्रतिबन्धकत्वेऽपि न क्षति.। यद्धर्म्मावच्छिन्नसामानाधिकरण्यशरीरे च हेतुतावच्छेदकसम्बन्धेन यद्धर्म्मावच्छिन्नाधिकरणत्व निवेशनीय तत्प्रयोजनन्तु स्फुटमेव (२)। अधिकरणवृत्तित्वञ्च निरवच्छिन्नं ग्राह्यं, तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ हेतुसमानाधिकरणकपिसंयोगत्वावच्छिन्नकपिसंयोगाभावादिविषयकप्रमाया अव्याप्यवृत्तित्वज्ञानविरहकालीनाया. साध्यवत्त्वज्ञानप्रतिबन्धकत्वेऽपि न क्षतिः, 'प्रमायां' प्रमासामान्ये, तेन व्यभिचारिणि नातिव्याप्तिः, समानाधिकरणधर्म्मावच्छिन्नाभावत्वेन व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववत्त्वज्ञानस्य साध्यवत्त्वज्ञानविरोधित्वात् सद्धेतावपि लक्षणगमनासम्भव इत्यतो ज्ञानसामान्यमुपेक्ष्य प्रमासामान्यनिवेशनं, प्रमापदञ्च भ्रमसामान्यभिन्नज्ञानपरम् (३) अत उक्तभ्रमात्मकज्ञानस्याभावत्वाद्यशे प्रमात्वेऽपि न क्षतिः'। साध्यवत्ताज्ञानपदमपि तत्सामान्यपरं अतो व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववत्ताज्ञानस्य तद्धर्म्मवत्त्वेन साध्यवत्तावगाहिज्ञानविरोधित्वेऽपि न क्षति एवञ्च साध्यपदं साध्यतावच्छेदकविशिष्टपरं ज्ञानञ्च स्वसमानधर्म्मितावच्छेदककत्वेन

(१) अव्याप्यवृत्तेत्यादि अवृत्तेरित्यन्तः पाठः केषुचिदादर्शपुस्तकेषु नास्ति ।

(२) वह्निमान् धूमादित्यादावव्याप्तिवारणमेव प्रयोजनम् ।

(३) तादृग्भ्रमभिन्नेत्यर्थमिति पा० ।

नाधिकरणानतिरिक्तवृत्तीति लक्षणसमन्वयः। व्यभिचारिणि तादृशसाध्याभावव्यापि हेतुसमानाधिकरणतया तदतिरिक्तवृत्त्येव तदिति न लक्षणसमन्वयः। गुण-कर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेर्वारणाय 'साध्यतावच्छेदकविशिष्टेति, साध्याधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन बोध्यं तेन संयोगादिना धूमादेरभावस्य कालिकादिना धूमादिमति वृत्तावपि (१) नातिव्याप्तिः। द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तेर्वारणाय हेतुतावच्छेदकविशिष्टत्वेनोपादानं, तद्विशिष्टाधिकरणत्वं हेतुतावच्छेदकसम्बन्धेन बोध्यं तेन धूमादिसमवायिनिष्ठवह्नित्वाद्यवच्छिन्नवह्न्याद्यभावस्य वह्न्यादिसामानाधिकरण्यविरहेऽपि न क्षतिः। साध्य-हेतुसामानाधिकरण्यघटकवृत्तिद्वयमेकसम्बन्धेन बोध्यं तेन द्रव्यं सत्त्वादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य द्रव्यत्वाद्यवच्छिन्नद्रव्यत्वाद्यभावस्य कालिकादिसम्बन्धेन साध्यवन्महाकालादिवृत्तित्वेऽपि न क्षतिः। यद्यपि हेतुसमानाधिकरणसाध्याभावत्वघटकसमभावत्वरूपं विशेष्यं व्यतिरेकिसाध्ये साध्यासमानाधिकरणाभावसाधारणमिति विशिष्टसाध्यसामानाधिकरण्यशून्यावृत्तित्वरूपस्तदनतिरिक्तवृत्तित्वं दुर्वचं, तथापि यावन्तः स्वसमानाधिकरणसाध्याभावा विशिष्टसाध्यसमानाधिकरणाः इत्यर्थस्य विवक्षणीयतया न दोषः। अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिः साध्याभावस्य साध्यवत्यपि वृत्तेरिति तु नाशङ्कनीयं व्यभिचारनिरूपकाधिकरणं यत् तदवृत्तित्वावच्छिन्ना-

(१) समवायादिना धूमादिमति वृत्तावपीति पा०।

भावस्यापि साध्याभाववतया तस्य च साध्यवन्यवृत्तेः (१)। 'यत्समानाधिकरणेति यद्रूपविशिष्टसमानाधिकरणेत्यर्थः, तेन द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ सत्तासमानाधिकरणद्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभावप्रमायां साध्यवत्त्वज्ञानप्रतिबन्धकत्वेऽपि न क्षतिः। यद्धर्मावच्छिन्नसामानाधिकरण्यशरीरे च हेतुतावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्नाधिकरणत्वं निवेशनीयं तत्प्रयोजनन्तु स्फुटमेव (२)। अधिकरणवृत्तित्वञ्च निरवच्छिन्नं ग्राह्यं, तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ हेतुसमानाधिकरणकपिसंयोगत्वावच्छिन्नकपिसंयोगाभावादिविषयकप्रमाया अव्याप्यवृत्तित्वज्ञानविरहकालीनायाः साध्यवत्त्वज्ञानप्रतिबन्धकत्वेऽपि न क्षतिः, 'प्रमायां' प्रमासामान्ये, तेन व्यभिचारिणि नातिव्याप्तिः, समानाधिकरणधर्मावच्छिन्नाभाववत्त्वेन व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्त्वज्ञानस्य साध्यवत्त्वज्ञानविरोधित्वात् सद्धेतावपि तदवगमनासम्भव इत्यतो ज्ञानसामान्यमुपेक्ष्य प्रमासामान्यनिवेशनं, प्रमापदञ्च भ्रमसामान्यभिन्नज्ञानपरम् (३)। अत उक्तभ्रमात्मकज्ञानस्याभावत्वादंशे प्रमात्वेऽपि न क्षतिः। साध्यवत्ताज्ञानपदमपि तत्सामान्यपरं अतो व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्य तद्धर्मवत्त्वेन साध्यवत्तावगाहिज्ञानविरोधित्वेऽपि न क्षतिः, एवञ्च साध्यपदं साध्यतावच्छेदकविशिष्टपरं, ज्ञानञ्च स्वसमानधर्मितावच्छेदकत्वेन

---

(१) वृत्तेरित्यादि वृत्तेरित्यन्तः पाठः केषुचित्पुस्तकेषु नास्ति।

(२) [illegible] पूर्वोक्तोदाहरणे व्यभिचारएवैव स्फुटम्।

(३) ज्ञानद्भ्रमभिन्नमित्यर्थः।

स्वविषयीभूताभावप्रतियोगितावच्छेदकसंसर्गकत्वेन च विशेषणीयं तेन धूमत्वाद्यवच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाद्यभाववत्ताज्ञानस्य साध्यवत्ताज्ञानसामान्यान्तर्गतद्रव्यत्वादिना धूमादिप्रकारकं भिन्नधर्म्मावच्छिन्नविशेष्यकधूमत्वाद्यवच्छिन्नप्रकारकं समवायादिसम्बन्धेन धूमत्वाद्यवच्छिन्नप्रकारकञ्च ज्ञानं प्रत्यप्रतिबन्धकत्वात् कामिनीजिज्ञासादेरेव च तादृशज्ञानसामान्यविरोधित्वात् अतिव्याप्तेर्नावकाशः। 'साध्याभावपदवैयर्थ्यादिति, अत्र च साध्यतावच्छेदकविशिष्टसामानाधिकरण्यावच्छेदकत्वं स्वव्यापकतादृशसामानाधिकरण्यकत्वं तथाच साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यत्वं यत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकं तत्त्व व्याप्तिरित्येतादृशार्थकत्वे प्रथमलक्षणे न साध्याभावपदवैयर्थ्यं, यत्समानाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपयत्सामानाधिकरण्यव्यापकतावच्छेदकत्वात् यत्समानाधिकरणसाध्याभावनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपस्य यत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकत्वस्यातिरिक्ततया तद्घटितलक्षणे यत्सामानाधिकरण्यव्यापकतावच्छेदकत्वस्यानिवेशात् तद्घटितलक्षणसम्भवेऽपि प्रकृतलक्षणे वैयर्थ्यानवकाशात्। एवं यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकः साध्यवत्ताज्ञानप्रतिबन्धकत्वाभावस्तत्त्वमित्येतादृशार्थकत्वे द्वितीयलक्षणेऽपि न तद्वैयर्थ्यं, यत्समानाधिकरणप्रमात्वव्यापकताघटकाभावात् यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकतायामभावान्तरस्यैव निवेशादि [illegible]। इति प्रगल्भलक्षणद्वयव्याख्या समाप्ता।

तत्त्वचिन्तामणि-दीधितिः।

यत्तु साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिरिति, तन्न, अनुमित्यविरोधित्वज्ञानस्यानुमितिजनकत्वे साध्याभाववद्वृत्तित्वज्ञानस्यानुमित्यविरोधितया व्यभिचारिण्यतिप्रसङ्गात्।

गादाधरी विवृतिः।

'साध्याभाववतीति यन्निष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावस्तत्त्वमित्यर्थः, वह्निमान् धूमादित्यादौ हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपिता विषयिता व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वत्वविशिष्टविषयितैव सा च न वह्न्यनुमितिप्रतिबन्धकतावच्छेदिका तज्ज्ञानस्यानुमित्यप्रतिबन्धकत्वात्. व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितापि तादृशी तद्वतो ज्ञानस्य च व्यभिचारज्ञानविधयानुमितिप्रतिबन्धकत्वात् तादृशविषयिताया अनुमितिप्रतिबन्धकतावच्छेदकत्वान्नातिव्याप्तिः। यन्निष्ठत्वस्यानुपादाने धूमादौ वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वावगाहिभ्रमनिष्ठवह्न्यभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताया अनुमितिप्रतिबन्धकतावच्छेदकत्वात् वह्निमान् धूमादित्यादावव्याप्तिः १ अतस्तदुपादानं, तथाच

---

१ [illegible]

विशेष्यस्य भाने विशेषणांशे प्रकारीभवन्त्यां (१) व्यक्तौ विशेष्य सम्बन्धितावच्छेदकताया विशिष्टवैशिष्ट्यबोधे भानात् साध्याभाववद्वृत्तित्वत्वरूपविशेषणविशिष्टविषयेण निरूपकीभूय विषयिताव्यावर्त्तने व्यावर्त्तकविषयस्याश्रयतया व्यावर्त्तकं यत् साध्याभाववद्वृत्तितात्वं तस्यापि निरूपकतावच्छेदकीभूय विषयिताव्यावर्त्तकत्वादुक्तभ्रमविषयिताव्यावृत्तेः (२) तद्व्यावर्त्तकविषयव्यावर्त्तकस्य तन्निष्ठसाध्याभाववद्वृत्तितात्वस्य तादृशविषयितानिरूपकतानवच्छेदकत्वात् इति तादृशविषयिताया लक्षणाघटकत्वादेवञ्च भ्रमविषयिताव्यावर्त्तकतयैव साध्याभाववत्पदसार्थक्यं, तादृशविषयिताया उक्तक्रमेण हेतुनिष्ठसाध्याभाववद्वृत्तितात्वविशिष्टानिरूपितत्वेऽपि हेतुनिष्ठाधेयतात्वविशिष्टनिरूपितत्वानपायात् साध्याभावमनुपादायाभावाधिकरणवृत्तित्वत्वविशिष्टविषयितानिवेशे वृत्तौ समानाधिकरणधर्म्मावच्छिन्नाधिकरणीयत्वभ्रमविषयितावारणेऽपि वृत्तिविशेषणे तन्निरूपकेऽधिकरणे यत्र समानाधिकरणधर्म्मावच्छिन्नाभावभ्रमस्तद्विषयितावारणासम्भवेन साध्याभावांशनिवेशस्यावश्यकत्वात्। न च साध्याभावपर्य्यन्तनिवेशेऽपि (३) वह्नित्वावच्छिन्नवह्न्यभावत्वेन व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकवह्न्यभावमवगाह्य तादृशाभाववद्वृत्तित्वावगाहि यज्ज्ञानं तदीयतादृशाभाववद्वृत्तित्वविषयितापि साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितैव

(१) आश्रयतयेत्यादि ।

(२) तथाच उक्तक्रमेण साध्याभाववद्वृत्तित्वविशिष्टनिरूपितविषयितापदेन तदवच्छिन्नतदाश्रयनिष्ठनिरूपकताकविषयितालाभात् न तादृशविषयिताया लक्षणघटकत्वमिति भावः ।　　　(३) तादृशपर्य्यन्तनिवेशेऽपीति पा० ।

व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताको यः साध्याभावस्तद्वृत्तित्वस्यैव तत्र विशेषणतया भानात्तद्विशिष्टत्वस्य न तादृशज्ञाननिष्ठविषयितानिरूपकसाध्याभाववद्वृत्तित्वे सत्वादिति तद्दोषतादवस्थ्यमिति वाच्यम्। अभावांशे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यप्रकारकं व्यभिचारज्ञानमेवानुमितिविरोधि, यत्र च व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यं प्रकारस्तादृशज्ञानविषयघटकस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टस्य व्यधिकरणधर्म्मावच्छिन्नाभावस्याप्रसिद्धेस्तादृशज्ञानविषयिताया विशिष्टनिरूपितत्वासम्भवात्। न चैवमपि समानाधिकरणधर्म्मावच्छिन्नसाध्याभाव-व्यधिकरणधर्म्मावच्छिन्नसाध्याभावद्वयविशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्म्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य विषयिताया व्यधिकरणधर्म्मावच्छिन्नाभाववद्वृत्तितात्वविशिष्टनिरूपितत्वात् समानाधिकरणधर्म्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपिताधेयत्वविषयितात्वेन च प्रतिबन्धकतावच्छेदकत्वादव्याप्तिरिति वाच्यम्। हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षितत्वात् उक्तभ्रमे च समानाधिकरणधर्म्मावच्छिन्नाभावविषयितायास्तादृशविशिष्टनिरूपितत्वाभावेन तस्या एव च प्रतिबन्धकतावच्छेदकत्वेनाव्याप्त्यनवकाशात्। अथ यत्र ज्ञाने हेतुसमानाधिकरणतया भासमाने व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताक-

त्व-साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धेन साध्यस्यैका प्रकारता तादृशज्ञानीयव्यधिकरणधर्म्मावच्छिन्नाभावविषयितायां साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य विषयीभवदभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वासम्भवेऽपि व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धविषयितानिरूपकविषयितात्वेनानुमितिप्रतिबन्धकतावच्छेदकत्वस्य चाचतत्वादव्याप्तिर्दुर्वारैव इति चेन्न, तादृशभ्रमस्याप्रामाणिकत्वात् प्रामाणिकत्वे च संसर्गीयविषयिताद्वयानिरूपकत्वेनाभावविषयिताया विशेषणीयतया सामञ्जस्यात्। अथ साध्यरूपविशेषणविशिष्टस्याभावस्य विषयितानिरूपकतया लक्षणघटकत्वे साध्याभावयोः सम्बन्धस्य सम्बन्धविधया लक्षणघटकत्वमावश्यकं स च सम्बन्धः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूप, व्यधिकरणघटत्वावच्छिन्नप्रतियोगिताकत्वरूपश्चाननुगत इति प्रथमस्य निवेशे केवलान्वयिनि साध्यविशेषिताभावस्यैवाप्रसिद्धिः व्यतिरेकिसाध्यकसद्धेतौ च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिरित्यनभ्रवश्चरमस्य निवेशे च सर्व्वत्र व्यभिचारिण्यतिव्याप्तिः प्रतियोगितावच्छेदकधर्म्माणाञ्च उपलक्षणीभूतेन केनचिद्रूपेणानुगमय्य तेन रूपेण तेषां निवेशो न सम्भवति प्रतियोगितावच्छेदकोपलक्षणस्य सम्बन्धघटकतया भानासम्भवात्। न चावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताया एव सम्बन्धतया निवेशाचाननुगमनिबन्धनोक्तदोष इति

[illegible]

योगिविशेषणतानापन्ने वह्निमति वह्नित्वेन घटो नास्तीति प्रतीतिः न तु वह्नित्वेन नास्तीति तथाच विशिष्य प्रतियोग्यविशेषितस्य उक्तसम्बन्धेन नास्तितावच्छेदकविशेषितस्याभावस्य विषयित्वनिरूपकतया निर्देशो न सम्भवतीति । नैवं, प्रतियोग्यादिविशेषिताभावीयत्वेन विशिष्टनिरूपितविषयिता लक्षणे न निवेश्यते अपि तु स्वनिरूपकहेतुसमानाधिकरणाभावनिष्ठा च. तत्त्व-

न्धस्तत्प्रतियोगिसाध्यनिष्ठतत्सम्बन्धावच्छिन्ननिरूपकतावच्छेदकतावच्छेदकतात्वेन, यत्र हेतुसमानाधिकरणघटत्वाद्यवच्छिन्नवह्न्यभावे वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्न्यादेः साध्यस्य प्रकारता तादृशज्ञानविषयितानिरूपकाभावनिष्ठो न निरुक्ततन्निरूपकतावच्छेदकसम्बन्ध इति तद्विषयिताव्युदासः, यत्र वह्नित्वावच्छिन्नघटाभावे तन्निष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वेनैव वह्नेः सम्बन्धतया भासते तत्र तत्सम्बन्धप्रतियोगी न वह्निरपि तु घट एवेति साध्ये वास्तवतत्सम्बन्धप्रतियोगित्वनिवेशात्तादृशज्ञानीयाभावविषयिताव्युदासः, साध्यनिवेशाद्यत्र वह्नित्वेन घट एव वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तत्सम्बन्धानुयोगिनि वह्नित्वावच्छिन्नघटाभावे प्रकारस्तादृशज्ञानीयाभावविषयितायास्तत्सम्बन्धप्रतियोग्यवच्छिन्ननिरूपकताकत्वेऽप्यनुमितिविरोधित्वेऽपि च न दोषः, यत्र घटत्वावच्छिन्नवह्न्यभावे घटत्वावच्छिन्नप्रतियोगिताकत्वेनैव वह्नित्वावच्छिन्नप्रतियोगिताकत्वेन वह्नेः संसर्गतया भासते तादृशज्ञानस्य प्रामाणिकत्वे साध्यप्रतियोगिको हेतुसमानाधिकरणाभावानुयोगिको यद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धस्तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धावच्छिन्नसाध्यनिष्ठनिरूपकतावच्छेदकत्व विवक्षणीयमिति(१)। साध्याभाववद्वृत्तित्वरूपविषयस्य प्रतिबन्धकतावच्छेदककोटिप्रवेशादतिव्याप्तिरतो विषयितापर्यन्तनिवेशनम्। हेतुनिष्ठसाध्याभाववद्वृत्तितात्वविशिष्टे प्रतिबन्धकतावच्छेदकविषयितापर्याप्त्यभावविवक्षणे साध्यप्रति-

(१) नव्यैर्वह्न्यादि [illegible] कौटस्थ्यम्।

अनुमित्यप्रतिबन्धकत्वमुपेक्ष्य निरुक्तविषयितासामान्येऽनुमितिप्रतिबन्धकतावच्छेदकत्वाभावपर्य्यन्तानुधावनम् । अवच्छेदकत्वञ्च स्वरूपसम्बन्धविशेषः । न च धूमाभाववद्वृत्तितात्वेन घटादिविषयकज्ञानस्यानुमितिप्रतिबन्धकतया धूमाभाववद्वृत्तित्वत्वविशिष्टविषयिताशालिज्ञानत्वेन प्रतिबन्धकताकल्पनस्यासम्भवात् तादृशविषयितायां प्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वानन्तत्वेनातिव्याप्तिरिति वाच्यम् । धूमाभाववद्वृत्तित्वप्रकारितानिरूपितविषयिताशालिज्ञानत्वेन भ्रमसाधारणप्रतिबन्धकताकल्पनसम्भवात् तादृशविषयितात्वेन वास्तवधूमाभाववद्वृत्तित्वविशिष्टनिरूपितविषयिताया अपि प्रतिबन्धकतावच्छेदकत्वस्यावृतत्वात् । न चैवं समानाधिकरणधर्म्मावच्छिन्नसाध्याभाव—व्यधिकरणधर्म्मावच्छिन्नसाध्याभावद्वयविशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्म्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य (१) विषयिताया व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तितात्वविशिष्टनिरूपितत्वात् समानाधिकरणधर्म्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपितविषयितात्वेन च प्रतिबन्धकतावच्छेदकत्वादव्याप्तिरिति वाच्यम् । हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टनिरूपितविषयिताया प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षणीयत्वात् उक्तभ्रमे च समानाधिकरणधर्म्मावच्छिन्नाभावनिरूपितविष-

(१) समानाधिकरणधर्म्मावच्छिन्नाभावांशे भ्रमात्मके तादृशज्ञानविषयिताया हेत्वधिकरणसाध्याभाववद्वृत्तितात्वविशिष्टनिरूपितत्वेन तद्वारणासम्भवात् दोष इति भ्रमत्वेनोक्तम् ।

अनुमित्यप्रतिबन्धकत्वमुपेत्य निरुक्तविषयितासामान्येऽनुमितिप्रतिबन्धकतावच्छेदकत्वाभावपर्य्यन्तानुधावनम्। अवच्छेदकत्वञ्च स्वरूपसम्बन्धविशेषः। न च धूमाभाववद्वृत्तितात्वेन घटादिविषयकज्ञानस्यानुमितिप्रतिबन्धकतया धूमाभाववद्वृत्तित्वत्वविशिष्टविषयिताशालिज्ञानत्वेन प्रतिबन्धकताकल्पनस्यासम्भवात् तादृशविषयितायां प्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वासत्त्वेनातिव्याप्तिरिति वाच्यम्। धूमाभाववद्वृत्तित्वत्वप्रकारितानिरूपितविषयिताशालिज्ञानत्वेन भ्रमसाधारणप्रतिबन्धकताकल्पनसम्भवात् तादृशविषयितात्वेन वास्तवधूमाभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताया अपि प्रतिबन्धकतावच्छेदकत्वस्याक्षतत्वात्। न चैवं समानाधिकरणधर्म्मावच्छिन्नसाध्याभाव--व्यधिकरणधर्म्मावच्छिन्नसाध्याभावद्वयविशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्म्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य (१) विषयिताया व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तितात्वविशिष्टनिरूपितत्वात् समानाधिकरणधर्म्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपितविषयितात्वेन च प्रतिबन्धकतावच्छेदकत्वादव्याप्तिरिति वाच्यम्। हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टनिरूपितविषयिताया प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षणीयत्वात् उक्तभ्रमे च समानाधिकरणधर्म्मावच्छिन्नाभावनिरूपितविष-

---

(१) समानाधिकरणधर्म्मावच्छिन्नाभावांशे भ्रमात्मकत्वे तादृशज्ञानविषयिताया एतन्निष्ठसाध्याभाववद्वृत्तितात्वविशिष्टानिरूपितत्वेन लक्षणाघटकत्वात् दोष इति भ्रमत्वोत्कीर्त्तनम्।

स्यापि सम्बन्धविधया लक्षणघटकत्वमावश्यकं स च सम्बन्धः साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकत्वरूपः, व्यधिकरणघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वरूपश्चाननुगत इति प्रथमस्य निवेशे केवलान्वयिनि साध्यविशेषिताभावस्यैवाप्रसिद्धिः व्यतिरेकिसाध्यकसद्धेतौ च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिरित्यसम्भवः चरमस्य निवेशे च सर्व्वत्र व्यभिचारिण्यतिव्याप्तिः, प्रतियोगितावच्छेदकधर्म्माणामुपलक्षणीभूतेन केनचिद्धर्म्मेणानुगमस्य निवेशो न सम्भवति प्रतियोगितावच्छेदकोपलक्षणस्य सम्बन्धघटकतया अभानात् । न चावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगितायाः एव सम्बन्धविधया निवेशान्नाननुगमनिबन्धनो दोष इति वाच्यम् । अवच्छेदकावच्छिन्नत्वानिवेशितप्रतियोगिताविषयकाभावज्ञानस्य प्रतियोगिमत्ताज्ञानाविरोधितया तज्ज्ञानाविरोधिनः प्रतियोगिविशेषिताभावज्ञानस्य चानुभवविरुद्धतया अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगितायाः संसर्गतया अभानात् । न च स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यतावच्छेदकविशेषित एवाभावो निवेश्यो न तु साध्यविशेषितः, वह्नित्वादिना घटाद्यभाव एव वह्न्यादिसाध्यकधूमादिहेतुकस्थले लक्षणघटक इति वाच्यम् । प्रमेयत्वाद्यवच्छिन्नसाध्यके तादृशाभावाप्रसिद्धेः (१) एव स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्नित्वादिविशेषिते वह्नित्वादिना घटादेरभावे भासमाने यत्र सम्बन्धघटकप्रतियोगितायां बाधितस्य वह्न्यानिष्ठत्वस्य भानं तादृशज्ञानीयाभावविषयि-

---

(१) सामान्यरूपेण विशेषाभावासम्भवात् प्रमेयत्वे तत्र दर्शितम् ।

तथा उक्तसम्बन्धेन साध्यतावच्छेदकविशिष्टाभावनिरूपित(त्व)
अनुमितिविरोधितया चानुपपत्तेर्दुर्वारत्वात् साध्यसमाना
धिकरणविशिष्टप्रतियोगिताविरहे च सत्येव सद्धेतावप्रसिद्धिः, ए
प्रतियोगिविशेषणतापन्न एवाभावे प्रतियोगिपारतन्त्र्येण समाना
धिकरणधर्म्मस्य स्वातन्त्र्येण व्यधिकरणधर्म्मस्य स्वावच्छिन्नप्रति
योगिताकत्वसम्बन्धेन प्रकारत्वं प्रामाणिकं न तु प्रतियोगिविशेष
णतापन्ने तत्रापि वह्नित्वेन घटो नास्तीत्यत्र प्रतीतौ ह
[illegible] नास्तीति, तथाच विशिष्य प्रतियोग्यविशेषितस्तो
[illegible] साध्यतावच्छेदकविशेषितस्याभावस्य विषयतानिरूप
[illegible] इति न समाना [illegible] । [illegible] । प्रतियोग्यविशेषिता
[illegible] न निवेश्यते [illegible]
[illegible]

तद्वृत्तित्वाभावश्च तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्या-
सज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताको बोध्यः, तेन सा-
ध्याभाववद्व्यक्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशेषितस्य
द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमा-
दाय नातिप्रसङ्गः। अत्र च हेतुतावच्छेदकसम्बन्धेन
साध्याभाववद्वृत्तित्वं बोध्यं तेन वह्न्यभाववति स्वावयवे
धूमस्य वृत्तावपि न दोषः, इत्यञ्च साध्याभावोऽपि हेतु-
तावच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्त्तमानोग्राह्यः,
तेन जातिमान् सत्त्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन
साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिः।

गादाधरी विवृतिः।

भिन्नरीत्या साजात्यघटनेन साध्याभाववदवृत्तित्वरूपव्याप्तिं परिष्कृत्योपन्यस्यति,(१) 'यावन्त इति, धूमवान् वह्नेरित्यादौ व्यधिकरणधर्म्मावच्छिन्नाभावसजातीयस्य घटत्वादिना तदधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरतः 'यावन्त इति, तथाच यावदन्तर्गतसमानाधिकरणधर्म्मावच्छिन्नाभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावसत्त्वान्नातिव्याप्ति. तत्रैव समानाधिकरणधर्म्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वस्य व्यधिकरण-

---

(१) साध्याभाववद्वृत्तित्वाभावरूपां व्याप्तिमेव परिष्करोतीति पा०।

[illegible]

[illegible] 'तत्तदिति'। 'तत्तत्सजातीय' इत्यन्तेनोपस्थितानां [illegible] करणधर्मावच्छिन्नाभावप्रतियोगितानाम् [illegible] एकत्वाभावे पृथक् पृथगेकाभाव सजातीयाभिप्रायेण उपादानम्, [illegible] 'प्रत्येक मिति, [illegible] विशेषणं, यावत्साध्याभाववत्त्वेन साध्याभावानामधिकरणेऽन्वये वह्निमान् धूमा-दित्यादौ तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकसाध्याभावघटित-समुदायाधिकरणताया: क्वचिदप्रसत्त्वेनाव्याप्तिः स्यादतस्तत्तद्-व्यक्तित्वेन साध्याभावानामधिकरणेऽन्वयलाभाय चरमं 'तत्तदिति, 'तत्त्वमिति अव्यभिचरितत्वमित्यर्थः। ननु तत्तत्सजातीयत्वं तत्त-द्वृत्तिधर्मवत्त्व तथाच समानाधिकरणधर्मावच्छिन्नाभाववृत्त्यभाव-त्वादिधर्मवत्त्वं व्यधिकरणधर्मावच्छिन्नाभावेऽपि वर्त्तत इति तस्यापि तत्सजातीयत्वादव्यभिचारिण्यतिव्याप्तिरत आह, 'साजात्य-

ष्वेति, 'समानासमानाधिकरणेति समानाधिकरणधर्म्मावच्छिन्न-प्रतियोगिताकत्व—व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वान्यतर-रूपेणेत्यर्थ., तृतीयार्थश्चाभेदः, तस्य च साध्यत्वेन्वयः, विवक्षणीय-मिति शेषः। तथाच 'तत्तत्सजातीया इत्यस्य तत्तदभाववृत्ति-तादृशान्यतररूपवन्त इत्यर्थः (१)। यद्यपि वह्नित्वावच्छिन्नाभाव-निष्ठसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वं स्वसमानाधि-करणवह्नित्वाद्यवच्छिन्ना या प्रतियोगिता तन्निरूपकतावत्त्वरूपं तच्च तदधिकरणवृत्तित्वाभावेऽसम्भवितमेव, तथापि स्वासमाना-धिकरणधर्म्मावच्छिन्ना या या प्रतियोगिता तदनिरूपकत्व समाना-धिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वं, स्वसमानाधिकरणधर्म्मा-वच्छिन्ना या या प्रतियोगिता तदनिरूपकत्वमेव व्यधिकरण-धर्म्मावच्छिन्नप्रतियोगिताकत्वमिह विवक्षितं तच्च साध्याभाव-तद्वृत्तित्वाभावेऽप्यव्याहतमेव। [illegible] स्वाधिकरणावृत्तिधर्म्मावच्छिन्ना या प्रतियोगिता तन्निरूपकत्व-रूपं व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वमपि [illegible] एवादरणीयः, तन्मते व्यधिकरणधर्म्मावच्छिन्न[illegible] [illegible] तानिरूपकत्वं साध्यप्रतियोगिता[illegible] त्वाभावेऽपि सम्भवात्। [illegible] धर्म्मावच्छिन्नप्रतियोगिता[illegible] [illegible]

(१) [illegible]

धर्मावच्छिन्नगगनादिनिष्ठप्रतियोगितानिरूपकत्वाद्यधिकरणधर्म-
र्मावच्छिन्नाभावस्य निरुक्तरूपसत्त्वानुपपत्त्या समानाधिकरण
धर्मावच्छिन्न-समानाधिकरणसकलाभावच्छिन्नप्रतियोगित्वानिरूप
कत्वपर्य्यन्तनिवेशनायासो नोपादेयः, समनियताभावैक्यमते गगना-
भावत्व-गगनाभावभिन्नत्वान्यतररूपेणापि साजात्यविवक्षणं सम्भव
तीति ध्येयम्। ननु यावत्साध्याभावान्तर्गतानां तत्तत्साध्यत्व
भावादीनामधिकरणे हेतोर्वृत्त्या वह्निमान् धूमादित्यादावव्याप्ति
रत आह, 'साध्याभावस्येति, 'पूर्व्वोक्तद्वितीयरीत्येति 'यत्समानाधि
करणानामित्यादिद्वितीयलक्षणरीत्येत्यर्थः, साध्यतावच्छेदकावच्छि
न्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाव एव साध्या
भावपदेन विवक्षित इति भावः। साध्यतावच्छेदकावच्छिन्नव्याप
कतावच्छेदकप्रतियोगिताकाभावविवक्षणे तथाविधवह्नि-घटोभया
भावमादाय तद्दोषतादवस्थ्यमतः प्रथमरीत्येति नोक्तं, साध्यता
वच्छेदकावच्छिन्नप्रतियोगिताकाभावविवक्षणे वाच्यत्वादिना-
घटाद्यभावमादाय लक्षणसमन्वयसम्भवेऽपि स्वरूपसम्बन्धेन प्रमेय
भावसाध्यकस्थले तथाविधाभावाप्रसिद्धा अव्याप्तिरतो व्यापकता
वच्छेदकपर्य्यन्तानुधावनं, तथाच ज्ञेयत्वत्वादिना वाच्यत्वाभाव एव
तथेति न दोषः। साध्यतावच्छेदकसमनियतप्रतियोगिताकाभाव-
निवेशे च वह्न्यादिसाध्यकस्थले तार्णतार्णदहनोभयाभावमादाय
दोषस्य व्यासज्यवृत्तिधर्म्मानवच्छिन्नत्व प्रतियोगितायान्निवेश्य वार-
णेऽपि सत्तादिसाध्यकस्थले विशिष्टसत्ताद्यभावमादाय दोष इति
तादृशाभावो न निवेशितः। व्यापकतावच्छेदकावच्छिन्नप्रति-

ह्निरिति, तन्न, वह्निमान् धूमात् गुणवान् द्रव्यत्वादित्यादौ विषयितादिसम्बन्धेन वह्नित्व-गुणत्वादिमतः साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावव्यावर्त्तनाय व्यापकतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वेन प्रतियोगितावच्छेदकताया अवश्यनिवेशनीयतया तादृशाभावस्य प्रामाणिकत्वेऽपि लक्षणघटकत्वासम्भवात् ।

ननु कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगत्वावच्छिन्नकपिसंयोगाद्यभावस्यापि लक्षणघटकतया तदधिकरणे च हेतोर्वृत्तेरव्याप्तिः । न च साध्यतावच्छेदकावच्छिन्नव्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्य निष्फलतया कपिसंयोगत्वादेः साध्यव्यापकतावच्छेदकत्वाभावात् तादृशाभावानां लक्षणघटकतेति वाच्यम् । संयोगेन वह्न्यादिसाध्यकस्थले वह्नित्वादीनां संयोगरूपसाध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकत्वसम्पत्त्यर्थं व्यापकताशरीरे प्रतियोगिवैयधिकरण्यस्यावश्यकत्वात् अन्यथा साध्यवदुत्पत्तिकालावच्छेदेन वह्नित्व-द्रव्यत्वाद्यवच्छिन्नस्य संयोगसम्बन्धेनाभावसत्त्वात् साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकत्वाप्रसिद्धिप्रसङ्गात् तथाच तत्तदधिकरणपदेन तत्तदभावीयव्यापकतानिरूपकाधिकरणमेव विवक्षणीयं व्यापकतानिरूपकत्वञ्च निरवच्छिन्नाधेयतानिरूपकत्वम्, तच्च संयोगाभावस्य [illegible] गुणादिवृत्तित्वेन दोषः । [illegible] कपिसंयोगाभाववान् कपिसंयोगाधिकरणत्वाभाववान् वा सत्त्वादित्यादौ [illegible] [illegible]

विशिनष्टि, 'व्याप्यवृत्तिश्चेति, तथाच तादृशाभावस्य तथाविधयावद्-भावान्तर्गततया तथाविधाधिकरणाप्रसिद्धावपि न क्षतिः। व्याप्यवृत्तित्वञ्च निरवच्छिन्नवृत्तिकत्वं न त्ववच्छिन्नवृत्तिकान्यत्वं, तथासति संयोगेन धूमादिसाध्यके व्यभिचारिणि संयोगेन धूमत्वाद्यवच्छिन्नधूमाद्यभावस्यावच्छिन्नवृत्तिकतया अयोगोलकान्यत्वाद्यभावस्य च साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया अतिव्याप्तिः, एवञ्च वह्न्यभावसंयोगाद्यभावस्यापि क्वचिन्निरवच्छिन्नवृत्तिकत्वेन लक्षणघटकतया तदीयव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वाभावमादाय दोषवारणायाधिकरणपदस्य व्याप्यवृत्तितानिरूपकाधिकरणपरत्वमावश्यकमित्यवधेयम्। कालिकसम्बन्धावच्छिन्नप्रतियोगिताके आकाशाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिः व्याप्यवृत्ते. साध्याभावस्याकाशाभावस्य व्याप्यवृत्तितानिरूपकाधिकरणे आत्मादौ हेतोर्वृत्तेरतस्तत्तदभावीयप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणमेव तत्तदधिकरणपदेन विवक्षणीयं, प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशनादेतद्रूपान्यत्वविशिष्टगुण--त्ववान् गुणत्वादित्यादौ समवायरूपसाध्यतावच्छेदकसम्बन्धघटितविशिष्टसाध्यव्यापकतावच्छेदकविशिष्टगुणत्वत्वाद्यवच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्यनिरूपकतया हेतुमत्यसत्त्वेऽपि नातिव्याप्तिः, तथाच कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशत्वाभावाभावादिसाध्यकात्मत्वादिहेतावव्याप्तिः तत्र व्याप्यवृत्ति-

यावत्साध्याभावान्तःपातिन आकाशत्वाभावादेः प्रतियोगिता
वच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसि
कालेऽप्याकाशावच्छेदेन तादृशसाध्यरूपतदभावीयप्रतियोगिसत्त्वात्
सर्व्वत्रैव तादृशाभावस्य प्रतियोगिसमानाधिकरणत्वादतो व्याप्य
वृत्तित्वमुपेक्ष्याभावे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधि
करण्यमेव विशेषणमाह, 'प्रतियोगितावच्छेदकावच्छिन्नेति, अ
च समनियताभावैक्यमते विशेषामेव व्यधिकरणधर्म्मावच्छिन्नाभाव
प्रतियोगितया तत्प्रतियोग्यनधिकरणाप्रसिद्ध्या तदसंग्रहः विशिष्ट
साध्यव्यापकतावच्छेदकावच्छिन्नयत्किञ्चित्प्रतियोगिताश्रयवैयधि
करण्यनिवेशे च वाच्यत्वत्वादिना घटाद्यभावस्य घटादिवैयधिकरण्ये
लक्षणघटकतानिर्व्वाहेऽपि प्रतियोगिभेदेन प्रतियोगिताभेदमते
जन्यज्ञानविषयत्वादिसाध्यके किञ्चित्कालावच्छेदेन परमाण्वादौ
प्रसिद्धस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य यत्किञ्चित्प्रति
योग्यनधिकरणवृत्तेः प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणा
प्रसिद्ध्या अव्याप्तिः तत्रापि यत्किञ्चित्प्रतियोगितान्तर्भावेन तादृशा
धिकरणप्रसिद्धिसम्पादने यत्किञ्चित्प्रतियोगिताश्रयप्रतियोगिवैय
धिकरण्यनिरूपकाधिकरणे तत्र हेतोर्वृत्त्या अव्याप्तितादवस्थ्यम्।
न च वह्निमान् धूमादित्यादौ द्रव्यत्वाद्यवच्छिन्नस्य संयोगेन
[illegible]भावस्य द्रव्योत्पत्तिकालावच्छेदेन वर्त्तमानस्य गुणादौ
प्रतियोगिव्यधिकरणस्य प्रतियोगिवैयधिकरण्यनिरूपकाधिकरण
गुणादौ [illegible]तावच्छेदकसम्बन्धेन हेतोरप्रसिद्ध्या अव्याप्ति[illegible]
[illegible]सम्बन्धेन [illegible]धिकरणे प्रतियोगिवैयधिकरण्ये

भभावे विशेषणं देयम् एवञ्च एतद्रूपान्यत्वविशिष्टसत्तावान् जातेरित्यादौ समवायघटितसाध्यव्यापकतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नाभावस्य हेत्वधिकरणे सत्तादिरूपप्रतियोगिसमानाधिकरणतया व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव लक्षणघटकता स्यादित्यतिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नत्वोपादानम्। अथ केवलान्वयिस्थले लक्षणघटकानां वाच्यत्वत्वाद्यवच्छिन्नघटाद्यभावानां सर्व्वेषामेव प्रतियोगितावच्छेदकवाच्यत्वत्वावच्छिन्नानधिकरणाप्रसिद्धिः। न च यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वमेव निवेशनीयं तथाच समनियताभावानामैक्योपगमेन व्यतिरेकिनावच्छेदकधर्म्मस्याप्युक्ताभावप्रतियोगितावच्छेदकतया प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य प्रसिद्ध्या तेषां लक्षणघटकतेति वाच्यम्। तथा सति संयोगाभावसाध्यकस्थले संयोगाद्यात्मकाभावस्य यत्किञ्चित्प्रतियोगितावच्छेदकसमवेतसामान्याभावत्वावच्छिन्नानधिकरणवृत्तित्वात्तद्व्यावर्त्तनासम्भवात् विशिष्टसाध्यव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकविशेषणे उक्तस्थले तादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणाप्रसिद्धेर्दुर्व्वारत्वात्, प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वनिवेशे च व्यधिकरणधर्म्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यप्रसिद्ध्या प्रतियोगिवैयधिकरण्यं दुर्घटम्। अत्र केचित्, प्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणा ये ये तदन्यत्वं व्यधिकरणान्तार्थः, न तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वं, व्यधिकरणधर्म्मावच्छि-

न्नाभावस्य विशिष्टप्रतियोग्यप्रसिद्धा असंग्रहात्। न चैवं सति धूम-वान् वह्नेरित्यादौ संयोगसम्बन्धघटितव्यापकतावच्छेदकधूमत्वाद्य-वच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकानां धूमाभावाना-मुत्पत्तिकालावच्छेदेन धूमादिमति वृत्तेर्व्यधिकरणधर्म्मावच्छिन्ना-भावस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणतया अतिव्याप्तिरिति वाच्यम्। साध्यतावच्छेदकसम्बन्धेन व्यापकता-मनिवेश्य येन सम्बन्धेन व्यापकता तत्सम्बन्धावच्छिन्नव्यापकता-वच्छेदकावच्छिन्नाभावं निवेश्य विषयतासम्बन्धेन साध्यव्यापकस्य ज्ञानस्य समवायसम्बन्धावच्छिन्नाभावमादायोक्तदोषस्य वारणीय-तया (१) अयोगोलकभेदादेरभावमादायैवातिव्याप्तिवारणसम्भवात्

[illegible] प्रतिय[illegible] तावच्छेदको यो धर्म्मस्तद्विशिष्टतादृशप्रतियोगिताश्र-यसामानाधिकरण्यं विवक्षणीयं तेन समनियताभावैक्यमते वाच्य-त्वत्वादिना घटाद्यभावस्यापि घटत्वादिना वाच्यत्वाद्यभावाभिन्न-तया वाच्यत्वादिप्रतियोगिकत्वेन प्रतियोगितावच्छेदकवाच्यत्वत्वा-दिविशिष्टवाच्यत्वादिरूपप्रतियोगिसामानाधिकरण्येऽपि न क्षतिः। न चैवमपि वाच्यत्वादिसाध्यकस्थले सर्व्वेषामेवाभावानां पूर्व्वक्षणा-दिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्रति-योग्यसमानाधिकरणाभावाप्रसिद्धिरिति वाच्यम्। स्वावच्छेदक-विशिष्ट(२)स्वाश्रयाधिकरणवृत्त्यभावीयप्रतियोगिताभिन्नत्वेन व्याप-

[illegible] वच्छेदक[illegible] वच्छि[illegible] तियो[illegible]ता विशेषणीयेत्यत्रैव प्रतियोगिता-

(१) द्रव्यत्वसाध्यकस्थले दोषस्य वारणीयतयेति पा०।

(२) उभयत्र स्वपदं प्रतियोगितापरम्।

वच्छेदकीत्यादिस्तात्पर्य्यात् । वाच्यत्वत्वाद्यवच्छिन्नघटादिनिष्ठप्रति-
योगितायाः स्वावच्छेदकविशिष्टस्वाश्रयाप्रसिद्धा निरुक्तप्रति-
योगिताभिन्नत्वेन तन्निरूपकाभावमादाय वाच्यत्वादिसाध्यकस्थले
लक्षणसमन्वयसम्भवात् । न च तथापि एतदभावभिन्नं मेयत्वादि-
त्यादौ साध्यव्यापकतावच्छेदकसमानाधिकरणधर्म्मावच्छिन्नप्रति-
योगिताकाभावस्य एतदभावमात्रवृत्तेरभावमात्राधिकरणकतया
अधिकरणस्वरूपत्वादेतदभावभेदादिरूपप्रतियोगिसमानाधिकरण-
तया निरुक्तप्रतियोगिताभिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगि-
ताकोऽभावो व्यधिकरणधर्म्मावच्छिन्नाभाव एवेत्यतिव्याप्तिरिति
वाच्यम् । स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणे स्वनिरूपकाभाव-
त्वेन वर्त्तते योऽभावस्तदीयप्रतियोगिताभिन्नत्वेन च व्यापकता-
वच्छेदकावच्छिन्नप्रतियोगिताया विशेषणीयतया एतदभावा-
धिकरणे च एतदभावभिन्ने एतदभावरूपैतदभावभेदाभावस्य वृत्ता-
वपि तादृशाधिकरणे एतदभावभेदो नास्तीत्यप्रतीत्या एतदभाव-
भेदत्वावच्छिन्नप्रतियोगिताकाभावत्वेन तस्यावृत्तित्वादेतदभावभेद-
त्वावच्छिन्नप्रतियोगिताया निरुक्तप्रतियोगिताभेदस्याक्षतत्वादि-
त्याहुः । तच्चिन्त्यं, व्यापकताघटकसम्बन्धावच्छिन्नाभावनिवेशे व्याप-
कताशरीरे प्रतियोगिवैयधिकरण्यस्याभावाविशेषणत्वेऽपि संयोगा-
दिना धूमादिसाध्यकव्यभिचारिण्ययोगोलकान्यत्वाभावमादायाति-
व्याप्तिवारणसम्भवात् तत्र तन्निवेशप्रयोजनाभावेन १ पर्य्याप्य-
रसिताद्यभावमादायाव्याप्त्यनवकाशात् [illegible] व्याप्यवृत्तित्वादि-

१ [illegible] प्रतियोगिवैयधिकरण्य[illegible] ।

विशेषणवैयर्थ्यप्रसङ्गे, यत्तु वा साध्यतावच्छेदकत्वादि- साध्यवन्निष्ठव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदक- तदभावसामानाधिकरण्यस्य गमकतायामपि प्रतियोगिव्यधिकरणवि- शेषणाभिन्नप्रतियोग्यसामानाधिकरण्यविशेषणे तथा(१) अव्याप्ति- वारणप्रयोजकताभिधानासङ्गतं, अभावे तदनिवेशे साध्यवनि- ष्ठाभावेऽपि साध्यताभावादिप्रयोजकज्ञानविषयतानिरोधस्य प्रतियोगि- वैयधिकरण्यघटितसाध्यव्यापकतायामभावात् कालविशेषावच्छेदेन हेतुमति तदभाववृत्तेरसम्भवादेव प्रसङ्गात्। अत तदस्मि(२), प्रति- योगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणे वृत्तित्वमेव तदर्थः(३) अथ (४) व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकवि- शिष्टप्रतियोग्यप्रसिद्धा केवलान्वयिसाध्यके प्रतियोगिव्यधिकरण- तादृशाभावाप्रसिद्धेः (५) अव्याप्तिरिति चेन्न (६) प्रतियोगिताव- च्छेदकावच्छिन्नप्रतियोग्यनधिकरणत्वं हि स्वप्रतियोगितावच्छेद- कावच्छिन्नस्वप्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकभेदवत्त्वं (७) ज्ञेयत्वत्वादिना वाच्यत्वाद्यभावस्य तादृशभेदसामानाधिकरण्य-

---

(१) व्याप्यवृत्तित्वादिविशेषणस्य ।

(२) अत्र वदन्तीत्यत्र परे त्विति पा० ।

(३) प्रतियोगितावच्छेदकेत्यादेरर्थ इति पा० ।

(४) अथेत्यत्र न चेति पा० ।

(५) प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरिति पा० ।

(६) इति चेन्नेत्यत्र इति वाच्यमिति पा० ।

(७) स्वप्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकभेदवद्वृत्तित्वमिति पा० ।

रूपं (१) प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं सुघटमेव, व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकस्य (२) ज्ञेयत्वत्वेन वाच्यत्ववद्भेदस्यैव तथात्वात्, कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगादिरूपसाध्याभावस्यापि ज्ञेयत्वत्वादिना कपिसंयोगाभावादिमद्भेदसामानाधिकरण्यसत्त्वात् तस्य च स्वप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धा अव्याप्तिरतः स्वप्रतियोगितावच्छेदकावच्छिन्नत्वं भेदप्रतियोगितावच्छेदकतायां विशेषणं, तत्रैव कपिसंयोगात्मकाभावीयप्रतियोगितावच्छेदकीभूतसमवेतसामान्याभावत्वावच्छिन्नसमवेतसामान्याभाववद्भेदस्यापि निरुक्तप्रतियोगितावच्छेदकतानिरूपकत्वात् तत्सामानाधिकरण्यमादाय कपिसंयोगाद्यात्मकाभावाना प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यवारणाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकं विशेषणीयं, समवेतसामान्याभावत्वादेश्च कपिसंयोगाभावादिव्यापकतानवच्छेदकतया न दोषः। न चात्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदके विशेषिते तत्तत्साध्यव्यापकाभावादीनामीदृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं न घटते साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूत-स्वप्रतियोगिताव-

(१) तादृशभेदप्रतियोगितावच्छेदकेति पा०।

(२) व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमेव तादृशभेदप्रतियोगितावच्छेदकेति पा०।

च्छेदकाप्रसिद्धेः तथाच 'साध्याभावश्चेत्यादिना साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावविवक्षणासङ्गतिरिति वाच्यम्। 'साध्याभावश्चेत्यादिग्रन्थस्य व्याप्यवृत्तित्वनिवेशकल्पे अभावे साध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणदानपरत्वात्, द्वितीयकल्पे च प्रतियोगितावच्छेदकावच्छिन्नेत्यत्र प्रतियोगितावच्छेदकस्य तादृशव्यापकतावच्छेदकत्वेन विशेषणात्तादृशरूपावच्छिन्नप्रतियोगिताक एवाभावो लक्षणघटक इत्यर्थकत्वात्। एतत्कल्पे अभावांशे तादृशप्रतियोगिताकत्वविशेषणविरहेऽपि क्षतिविरहात् तत्रैव कपिसंयोगाभावत्वादिना घटादिमद्भेदसामानाधिकरण्यमादाय तद्दोषवारणाय स्वप्रतियोगिवृत्तित्वं भेदप्रतियोगितावच्छेदकतायां विशेषणं, संयोगसामान्याभावादेरपि कपिसंयोगाद्यात्मकाभावप्रतियोगितया कपिसंयोगाद्यत्मकाभावस्य प्रतियोगितावच्छेदककपिसंयोगाभावत्वादिना संयोगसामान्याभाववद्भेदसामानाधिकरण्यमादाय तद्दोषतादवस्थ्यवारणाय यादृशप्रतियोगितावच्छेदको यो धर्म्मस्तदवच्छिन्नतादृशप्रतियोगिताश्रयवृत्तित्वमेव भेदप्रतियोगितावच्छेदकताया निवेशनीयं, कपिसंयोगाभावत्वञ्च कपिसंयोगाभावनिष्ठप्रतियोगितायामेवावच्छेदकं संयोगसामान्याभावश्च न तादृशप्रतियोगिताश्रय इति न तादृशभेदमादाय दोषः। भेदप्रतियोगितावच्छेदकतायां स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वमपि निवेशनीय तेन कपिसंयोगाद्यात्मकाभावस्य कपिसंयोगाभावत्वाद्यवच्छिन्नकपिसंयोगाभावादिनिष्ठविषयितादिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदसामानाधि-

करणेऽपि न तद्दोषतादवस्थ्यम्। एवं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिरूपकत्वं स्वनिष्ठ यत्स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठप्रतियोगितावच्छेदकताकभेदसामानाधिकरण्यं तन्निरूपकत्वम् अतो व्यधिकरणधर्म्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्धावपि न तादृशाधिकरणाप्रसिद्धिः(१)कपिसंयोगी एतद्वृक्षत्वादित्यादौ हेत्वधिकरणेऽपि द्रव्यत्वादिना कपिसंयोगादिमतः कपिसंयोगत्वादिना च द्रव्यत्वादिमतोभेदसत्त्वात्तस्यापि तादृशाधिकरणत्वापत्तिरतोऽवच्छिन्नान्तनिष्ठान्तयोरुपादान, पूर्व्वक्षणादिवृत्तित्वविशिष्टस्वाभावत्वादिरूपप्रतियोगितावच्छेदकरूपेण कपिसंयोगादिमद्भेदमादाय तद्दोषतादवस्थ्यमतस्तत्प्रतियोगितान्वयनिष्ठप्रतियोगितावच्छेदकतायां तदवच्छेदकावच्छिन्नत्वं विशेषणीयम्। एवं विशिष्टसाध्यव्यापकतावच्छेदकत्वेनापि प्रतियोगितावच्छेदकं विशेषणीयं, तेन संयोगी द्रव्यत्वादित्यादौ संयोगाभावस्य द्रव्यवृत्तित्वात्तत्प्रतियोगितावच्छेदकद्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावत्वावच्छिन्नद्रव्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वस्य द्रव्ये सत्त्वात्तस्य न प्रतियोगिवैयधिकरण्यनिरूपकत्वापत्तिः। एवं सम्बन्धविशेषनिवेशनमपि (२) पूर्व्ववद्बोध्यमिति। तथाच स्वान्वयनिष्ठभेदप्रतियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक—

(१) प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धि।

(२) स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वं भेदप्रतियोगितावच्छेदकतायां निवेश्यं तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ नाव्याप्तिरिति

[illegible]

...लक्षणगमनासम्भवात् (४)। [illegible]

[illegible] तथापि लक्षणगमनासम्भवात्। न च [illegible] प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वं [illegible] प्रतियोगितावच्छेदकीभूतोभयत्वेन रूपेण उभयवद्भेदस्य उभयत्वाप्रसिद्धत्वेनाप्रसिद्धेरिति वाच्यम्। उभयत्वेनान्यतरवद्भेदस्य तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नतत्प्रतियोगिवृत्तिप्रतियोगितावच्छेद-

---

(१) इति निष्कर्षः इत्यनन्तर 'एवं सम्बन्धविशेषनिवेशनमपि पुनरुद्बोध्यमिति माङ्ग' इति पाठ कश्चिदादर्शपुस्तके वर्त्तते।

(२) साक्षात्वन्न समानाधिकरणधर्मावच्छिन्नत्व-व्यधिकरणधर्मावच्छिन्नत्वान्यतरद्धर्मेणेतीति पा०।

(३) प्रयोजनमाहेति पा०।

(४) प्रतियोगितानवच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभाववन्निसाध्यमेव तत्र ऐतोरहत्तेर्लक्षणगमनाद्वासम्भव इति पा०।

कताकस्य उभयत्वेनान्यतराभाववति सत्त्वात् (१) तस्यापि (२) तादृशभेदमादाय तत्त्वात् (३) इति चेन्न, व्यासज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकस्य स्वव्यापकसाध्यतावच्छेदककप्रतियोगिताकस्य वा अभावस्य निवेशे तादृशोभयाभावादिवारणं सम्भवति इत्यभिप्रायेणाव्याप्तिलिखनात् । 'अव्याप्यवृत्तेर्वेति । यद्यप्येतद्ग्रन्थस्य स्वयमुक्तस्याभावे व्याप्यवृत्तित्वादिविशेषणस्य प्रयोजनदर्शनपरत्वे साध्यपदं कपिसंयोगाभावादिपरमेव वाच्यं न तु कपिसंयोगादिपरं, कपिसंयोगादिसाध्यकस्थले कपिसंयोगाद्यभावस्य लक्षणघटकत्वेऽपि अधिकरणपदस्य व्याप्यवृत्तित्वादिनिरूपकाधिकरणपरताया अभावे व्याप्यवृत्तित्वादिनिवेशेऽपि आवश्यकत्वात्तदीयव्याप्यवृत्तितानिरूपकाधिकरणे गुणादौ हेतोरवृत्तेरव्याप्त्यनवकाशात्, कपिसंयोगाभावादेर्गुणादौ निरच्छिन्नवृत्तिकत्वादिरूपव्याप्यवृत्तित्वादिसत्त्वेन तादृशविशेषणेन व्यावर्त्तनासम्भवाच्च, तथाच कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावस्य लक्षणघटकत्वेऽपि तदीयव्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिरेवाव्याप्तिप्रयोजिका न तु तादृशाभावीयाव्याप्यवृत्तितानिरूपकाधिकरणे हेतोर्वृत्तिरिति 'वृत्तावपि हेतोरिति न सङ्गच्छते, तथाप्यभावे व्याप्यवृत्तितानिवेशानुपादाने यावदन्तर्गतकपिसंयोगादीना व्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिः स्यादिति

(१) उभयत्वेनान्यतराभाववति साध्यवति सत्त्वादिति पा० ।

(२) उभयत्वेनान्यतराभावस्यापीति ।

(३) प्रतियोगिव्यधिकरणत्वात् ।

ताद्दशाधिकरणपर्य्यन्तं न विवक्षणीयं तथा सति अव्याप्यवृत्ति-साध्यकस्थले हेतोः साध्याभाववद्वृत्तित्वनिबन्धनाव्याप्तिः सा च व्याप्यवृत्तित्वाद्युपादानान्न भवतीत्यभिप्रायः। अथवा कपिसंयोगादिसाध्यकस्थले हेतोः साध्याभावीयाव्याप्यवृत्तितानिरूपाधिकरण-वृत्तित्वं तत्स्थलीयाव्याप्तिवारकव्याप्यवृत्तितानिरूपकाधिकरण-वृत्तित्वनिवेशनौपयिकम् अतस्तदधीना या कपिसंयोगाभावादि-साध्यकस्थले कपिसंयोगाद्यात्मकाभावीयताद्दशाधिकरणाप्रसिद्धि-निबन्धनाव्याप्तिस्तत्सम्पादकमपीति न ताद्दशग्रन्थासङ्गतिः। एतेन व्याप्यवृत्तितानिरूपकाधिकरणानिवेशे व्याप्यवृत्तिसाध्यकस्थलेऽपि क्षणविशेषवृत्तित्वविशिष्टसाध्याभावस्य प्रतियोगिवैयधिकरण्य-घटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकस्याव्याप्यवृत्ते-रधिकरणे हेतोर्वृत्त्या लक्षणगमनासम्भवात् असम्भव एव सम्भवती-त्यव्याप्तिरिति लिखनं न युज्यते इत्यपि निरस्तम्। ननु तत्तत्सा-ध्याभावाधिकरणवृत्तित्वस्य हेतुवृत्तितानवच्छेदकविशेषधर्म्म-व्यास-ज्यवृत्तिधर्म्मावच्छिन्नाभावमादाय व्यभिचारिण्यतिव्याप्तिस्तत्तत्सा-ध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावं निवेश्य तद्वार्य्यते चेत्, तदा व्यधिकरणधर्म्मावच्छिन्नसाध्याभावसजातीयस्य ताद्दशस्य तद्वृत्ति-त्वेन घटाद्यभावस्य प्रसिद्धिर्गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वा-ङ्गीकार एव सम्भवति, अन्यथा ताद्दशाभाववद्वृत्तित्वत्वरूपलघुधर्म्म-समनियततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावा-प्रसिद्धेः, अन्यूनानतिरिक्तवृत्तित्वरूपावच्छिन्नत्वनिवेशे ह्रदवृत्तित्व-ह्रदान्यनिर्धूमवृत्तित्वोभयाभावादेर्निर्धूमवृत्तित्वत्वादिसमनियतप्र-

तियोगिताकतया तद्दति धूमादिसाध्यकवह्न्यादिहेतावतिव्याप्तेः, तत्तत्साध्याभाववद्वृत्तित्वत्वविशिष्टव्यापकतावच्छेदकरूपावच्छिन्नाभावादिनिवेशे च निर्धूमवृत्तित्वत्वादिना ह्रदवृत्तित्व-घटाद्यन्यतराभावमादाय (१) तद्दोषतादवस्थ्यमित्यन्यादृशमभावं तत्तदधिकरणवृत्तित्वाभावपदेन विवक्षति, 'तद्दिति, व्यापकान्तमनवच्छिन्नान्तञ्च प्रतियोगिताविशेषणं,प्रथमविशेषणप्रयोजनमाह,'साध्याभाववद्व्यक्तिविशेषेति यत्र व्यक्तौ हेतुरपि न वर्त्तते तादृशह्रदादिव्यक्तीत्यर्थः, व्यभिचारनिरूपकहेत्वधिकरणमात्रवृत्तिर्योऽयोगोलकादिव्यक्तिविशेषावृत्तित्वादिरूपसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावः (२) तद्दद्व्यक्तिविशेषवृत्तित्वाभावस्य हेतावसम्भवात् किञ्चिद्विशिष्टस्य तादृशाभाववद्वृत्तित्वस्याभावमादायातिप्रसङ्गं दर्शयति, 'पार्थिवत्वादिविशेषितस्येति, अग्रिमेण 'साध्याभाववद्वृत्तित्वस्येत्यनेनान्वितं, वह्न्यादौ पार्थिवत्वादिविशेषणाभावात्तद्विशिष्टनिर्धूमवृत्तित्वाभावस्यापि तत्र सत्त्वात्तमादायेत्यर्थः, द्वितीयविशेषणप्रयोजनं दर्शयति, 'द्वित्वाद्यवच्छिन्नस्येति घट-निर्धूमवृत्तित्वोभयत्वाद्यवच्छिन्नस्येत्यर्थः, 'नातिप्रसङ्ग इति, ह्रदादिवृत्तित्वत्व-पार्थिवत्वादिविशिष्टनिर्धूमवृत्तित्वत्वावच्छिन्नाभावप्रतियोगिताया वह्न्यादिवृत्तिनिर्धूमवृत्तित्वाद्यवृत्तितया तत्तत्साध्याभाववद्वृत्तित्वत्वाद्यव्यापकत्वात्, द्वित्वाद्यवच्छिन्नाभाव-

(१) ह्रदवृत्तित्व घटवृत्तित्वान्यतराभावमादायेति पा० ।

(२) अयोगोलकादिव्यक्तिविशेषावृत्तित्वादिरूपस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपे अभेदेनान्वयः ।

प्रतियोगिताया द्वित्वादिवद्व्यासज्यवृत्तित्वविरहेण निर्धूमवृत्तित्वादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपनिर्धूमवृत्तित्वत्वादिव्यापकत्वसत्त्वेऽपि व्यासज्यवृत्तिधर्म्मावच्छिन्नत्वात्तादृशाभावाना लक्षणाघटकत्वादिति भावः। व्यासज्यवृत्तिधर्म्मस्य तत्तत्साध्याभाववद्वृत्तित्वनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वविरहात् तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकधर्म्मावच्छिन्नाभावनिवेशे द्वित्वाद्यवच्छिन्नाभावमादायातिप्रसङ्गस्य वारणसम्भवेऽपि प्रतियोगिताया व्यापकत्वविशेषणाप्रवेशे निर्धूमवृत्तित्वत्वादिना ह्रदादिवृत्तित्वघटान्यतराभावमादाय (१) अतिप्रसङ्गो न शक्यते वारयितुमिति तत्र तद्विशेषणप्रवेशस्यावश्यकत्वे तत्तदभाववद्वृत्तित्वत्वव्यापकधर्म्मावच्छिन्नायाः तत्तदभाववद्वृत्तित्वत्वव्यापकप्रतियोगितायाः समानाधिकरणधर्म्मावच्छिन्नत्वनियतत्वेन व्यधिकरणधर्म्मावच्छिन्नतदभावासंग्रहः, तत्तदभाववद्वृत्तितात्वव्यापकत्वेन विशेषितायां प्रतियोगितायां तत्तदभाववद्वृत्तितात्वव्यापकतावच्छेदकावच्छिन्नत्वं निवेश्य वाच्यत्वत्वादिना साध्याभाववद्वृत्तित्वाभावसंग्रहसम्भवेऽपि गौरवमिति व्यासज्यवृत्तिधर्म्मावच्छिन्नाभाववारणाय तादृशधर्म्मानवच्छिन्नत्वमेव लाघवान्निवेशयितुमुचितमिति (२) तदेव निवेशितं, व्यासज्यवृत्तित्वञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वम्। 'साध्याभाववद्वृत्तित्वमिति साध्याभाववत्-

(१) ह्रदादिवृत्तित्व घटवृत्तित्वान्यतराभावमादायेति पा०।

(२) तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकधर्म्मावच्छिन्नत्वापेक्षया लाघवान्निवेशयितुमुचितमितीति पा०।

सम्बद्धत्वमित्यर्थः, तेन तादात्म्यादिसम्बन्धेन वृत्तेरप्रसिद्धावपि न तत्सम्बन्धावच्छिन्नहेतुकस्थलेऽव्याप्तिः, सम्बन्धप्रतियोगित्वरूपसम्बद्धत्वैकदेशे सम्बन्धे 'हेतुतावच्छेदकसम्बन्धेनेति तृतीयार्थाभेदान्वयः, 'वृत्तावपीति सम्बद्धत्वेऽपीत्यर्थः, 'न दोष इति, हेतुतावच्छेदकसम्बन्धानिवेशे वह्निमान् धूमादित्यत्र वह्न्यभाववत्संयुक्तत्वावच्छिन्नाभावप्रतियोगितया वह्न्यभाववत्समवेतत्वाद्यवृत्तितया सामान्यतो वह्न्यभाववद्वृत्तित्वं प्रत्यव्यापकत्वेन तादृशाभावस्य लक्षणघटकत्वानुपपत्तेः, वह्न्यभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्य तद्वृत्तित्वसामान्याभावस्य वह्न्यभाववत्समवेतत्ववति धूमेऽसत्त्वादव्याप्तिः प्रसज्यते, हेतुतावच्छेदकसम्बन्धनिवेशे च निर्वह्निसंयुक्तत्वत्वावच्छिन्नाभावस्यापि तादृशसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकतया तमादाय लक्षणसमन्वय इति भावः । 'इत्यत्र' हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वविवक्षणे च, सतीति शेषः, एतदविवक्षणे च वक्ष्यमाणाप्रसिद्धिविरहादुपदर्शनासङ्गतिः, 'हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्त्तमान इति अनुयोगितासम्बन्धेन हेतुतावच्छेदकसम्बन्धवद्वृत्तिरित्यर्थः, अथवा हेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकसम्बन्धेन धर्म्मवद्वृत्तिरित्येवार्थः, विशिष्य हेतुतावच्छेदकसम्बन्धेन धर्म्मनिवेशनस्थलेऽपि वह्नुपदार्थघटितहेतुतावच्छेदकपुरस्कारेण हेतुमत्त्वनिवेशापेक्षया तेन रूपेण निवेशे गौरवमिति सामान्यतो निवेशलाभाय 'कस्यचिदित्यभिहितम् । अत्र द्रव्य-गुण-कर्म्मान्यतमत्वादित्यादौ समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिता-

कस्यापि साध्याभावस्य सत्तादिरूपहेतुसामानाधिकरण्यसम्भवे-
ऽपि हेतुतावच्छेदकविशिष्टहेतुसमानाधिकरणनिखिलसाध्याभावानां
व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वनियमात् तादृशहेतुसमाना-
धिकरणत्वेनाभावविशेषणे केवलव्यधिकरणधर्मावच्छिन्नप्रतियोगि-
ताकत्वरूपेणैव साध्याभावविवक्षणं सम्भवतीति तन्निवेशनमेवो-
चितमिति चेन्न, तथा सति तादृशयावत्साध्याभावसजातीयवत्त्व-
स्यैव लक्षणत्वसम्भवतीति व्यभिचारिणि समानाधिकरणधर्मा-
वच्छिन्नाभावस्यापि विशिष्टहेतुसमानाधिकरणत्वेन लक्षणघटक-
तया तद्घटितयावदभावसजातीयाप्रसिद्धेरवातिव्याप्तिविरहात्,
सद्धेतौ तादृशयावदभावसजातीयव्यधिकरणधर्मावच्छिन्नप्रतियोगि-
ताकयत्किञ्चिदभावमादायैव लक्षणसमन्वयसम्भवादिति साध्या-
भाववद्वृत्तित्वाभाववत्त्वविशेषणवैयर्थ्यापत्तेः। 'हेतुतावच्छेदकसम्ब-
न्धेनेति समवायादिसम्बन्धेनेत्यर्थः, 'साध्याभाववद्वृत्तित्वस्य'
समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य, 'न क्षतिरिति,
तादृशसाध्याभावस्य समवायादिसम्बन्धानुयोग्यवृत्तितया व्यधि-
करणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात्तद्वति च तादृश-
सम्बन्धेनापि वृत्तेः प्रसिद्धेरिति भावः। अत्र च द्रव्यं गुणकर्मा-
न्यत्वे सति सत्त्वादित्यादावव्याप्तिर्विशेष्य-विशेषणसम्बन्धस्य परम्प-
रया हेतुत्वमभ्युपेत्य वारणीयेत्यभिप्रेत्य हेतुतावच्छेदकसम्बन्धेन
किञ्चिद्यत्त्वधिकरणवृत्तित्वमभावे विवक्षितम्। यदि च सत्तादेरेव
विशिष्टसत्तात्वादिना व्याप्यत्वे हेतुतावच्छेदकविशिष्टनिरूपित-
हेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतासामान्ये तत्तत्साध्याभाव-

सजातीयतत्तदधिकरणानुयोगिकत्वाभावं तत्तत्साध्याभाववद्वृत्तितासामान्ये तत्तत्साध्याभावसजातीयहेतुतावच्छेदकसम्बन्धावच्छिन्नत्वविशिष्टहेतुतावच्छेदकावच्छेद्यत्वाभावं वा निवेश्य निर्वाच्यते तदा जातिमान् सत्त्वादित्यादावुपदर्शितप्रसिद्धिनिबन्धनाव्याप्तेरुक्तविवक्षामन्तरेणैव (१) वारणं सम्भवतीत्यवधेयम् ।

इति सिद्धस्य साजात्यघटितप्रथमलक्षणव्याख्या ।

तत्त्वचिन्तामणि-दीधितिः ।

सिद्धोक्तसाजात्यघटितद्वितीयलक्षणम् ।

यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्यधिकरणाभावस्य प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति [illegible] वच्छिद्यते तद्रूपवत्त्वं तत्त्वं साधनस्य तादृशाभावप्रतियोगित्वं तदवच्छेदकत्वं वा साधनतावच्छेदकस्येति [illegible] दवाच्यम् द्रव्यं सत्त्वादित्यादौ सत्त्वादेर्गुण [illegible] शिष्टसत्ताभावप्रतियोगितावच्छेदक [illegible] योगित्वादतिव्याप्तिः [illegible] रम्प्रतियोगितावच्छेदक [illegible] प्रतियोगि [illegible] ।

(१) [illegible]

कावह्नित्वादेर्वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वेऽपि तादृशयावत्साध्याभावान्तर्गतधूमत्वाद्यवच्छिन्नधूमाद्यभावसजातीयतद्व्यापकाभावप्रतियोगितावच्छेदकस्य कस्यापि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वाभावान्नातिव्याप्तिः। प्रथमाभावे व्याप्यवृत्तित्वविशेषणात् कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगाभावस्य केवलान्वयिनः सजातीयस्य व्यापकीभूतव्याप्यवृत्त्यभावस्याप्रसिद्धावपि न क्षतिः व्याप्यवृत्तित्वविशिष्टतदभावं प्रत्येतद्वृक्षत्वाद्यभावस्य व्यापकत्वात्, साध्यतावच्छेदकसम्बन्धेन साध्यव्यापकताया विवक्षणीयतया संयोगेन द्रव्यस्याव्याप्यवृत्तितामते संयोगेन तत्साध्यके तादृशसम्बन्धेन व्यापकताप्रसिद्धये व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यस्यावश्यं निवेशनीयतया साध्यवन्निष्ठप्रतियोगिसमानाधिकरणाभावप्रतियोगितावच्छेदकस्यापि संयोगत्वादेः साध्यव्यापकतावच्छेदकत्वमक्षतमिति ध्येयम्। नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभावस्य नानाधिकरणकैकव्यक्तिसाध्यके यत्किञ्चिदधिकरणवृत्तित्वविशिष्टसाध्याभावस्य व्यापकीभूतोऽभावो न हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताक इति तादृशसाध्याभावव्यावर्त्तनाय साध्यतावच्छेदकावच्छिन्नव्यापकतापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वनिवेशनं, व्यापकता च साध्यतावच्छेदकसम्बन्धघटिता ग्राह्या तेन समवायेन द्रव्यत्वादिसाध्यकगुणादिहेतौ विषयतया साध्यव्यापकस्य ज्ञानादेः साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावं प्रति हेतुतावच्छेदकसम्बन्धावच्छिन्न-

हेत्वभावस्याव्यापकत्वेऽपि (१) न क्षतिः। साध्याभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, तेन संयोगादिना वह्न्यादिसाध्यक-धूमादिहेतौ समवायादिसम्बन्धावच्छिन्नवह्न्याद्यभावं प्रति संयोगादिना धूमादेरभावस्याव्यापकत्वेऽपि न क्षतिः। व्यभिचारिणि समानाधिकरणधर्म्मावच्छिन्नाभावव्यापकव्यधिकरणहेतुतावच्छेदकाद्यवच्छिन्नप्रतियोगिताकाभावमादायातिप्रसङ्गवारणाय सजातीयत्वोपादानम्। व्यतिरेकिसाध्यकस्थले यावत्साध्याभावसजातीयाप्रसिद्ध्या एकैकतत्सजातीयत्वनिवेशनं, साजात्यघटकसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वादिकमनुगतं पूर्व्वनिरुक्तभेदकूटरूपमेव ग्राह्यं अन्यथा यत्र भिन्न–भिन्नसम्बन्धेन साध्यहेतुभावस्तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य यादृशप्रतियोगितानिरूपकत्वं तस्यैव तद्वत्तया सजातीयत्वेन तत्सजातीयाभावनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः (२) सजातीयस्यापि साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावस्य निवेशे हेतुव्यापकताया अपि तत्सम्बन्धघटिताया विवक्षणे उक्ताप्रसिद्धिनिबन्धनदोषासम्भवेऽपि सजातीयव्यापकीभूताभावस्येत्यादिवैयर्थ्यस्य दुर्व्वारत्वात्, (३) तत्परित्यागे च चरमलक्षण एव पर्य्यवसानात्। अथ सजातीया-

(१) हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुव्यापकाभावस्याव्यापकत्वेऽपीति पा०।

(२) सजातीयत्वेन तत्सजातीयहेतुतावच्छेदकसम्बन्धावच्छिन्नाभावाप्रसिद्धेरिति पा०।

(३) व्यापकं सजातीयेत्यादिवैयर्थ्यं दुर्वारमिति पा०।

भावे हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्यानिवेशेऽपि स्वमात्रनिष्ठयथाश्रुतसाजात्यनिवेशपक्षे नातिप्रसङ्गः आत्मत्वादिसाध्यके विषयतासम्बन्धेन हेतौ ज्ञानादौ समवायादिसम्बन्धावच्छिन्नज्ञानाद्यभावस्य साध्याभावव्यापकत्वेऽपि यथाश्रुतसाजात्याभावेनातिव्याप्त्यप्रसक्तेः, संयोगादिना वह्न्यादौ साध्ये समवायादिना हेतुरूपविशेष प्रति हेतुतावच्छेदकसमवायेन वह्न्याद्यभावप्रतियोगिनोऽव्यापकत्वेऽपि च न दोषः साध्यतावच्छेदकसम्बन्धेनैव हेतुव्यापकताया विवक्षणीयत्वात् इति चेत्तर्हि, सजातीयाभावे साध्याभावव्यापकत्वविशेषणस्य वैयर्थ्यमापद्येत स्वाव्यापकाभावस्य स्वसाजात्यविरहेणैव व्यावर्त्तनात्, व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावसजातीयहेतुतावच्छेदकाद्यवच्छिन्नहेत्वाद्यभावमादायातिप्रसङ्गस्य वारणाय व्यापकीभूतस्येति, व्यभिचारिणोऽभावस्य च व्यभिचारनिरूपकाधिकरणसाधारणसाध्याभावाव्यापकत्वान्न दोषः। व्यापकत्वञ्च न तत्समानाधिकरणाभावाप्रतियोगित्वं, सर्व्वस्यैव तादृशहेत्वाद्यवच्छिन्नाभावप्रतियोगितया असम्भवात्। न च तदधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेनावश्यं वाच्यं तथाच वह्न्याद्यभाववति धूमाद्यभावस्य धूमाद्यनात्मकहेत्वाद्यवच्छिन्नाभावस्य संयोगादिरूपहेतुतावच्छेदकसम्बन्धेनावृत्त्या न तमादाय दोषावसर इति वाच्यम्। एवमपि यत्र स्वरूपसम्बन्धेन हेतुता तत्र तादृशाभावप्रतियोगितया हेत्वभावस्य व्यापकत्वानुपपत्तेर्दुर्व्वारत्वात्। नापि तादृशाभावप्रतियोगितानवच्छेदकरूपवत्त्वम् तत्, धूमादित्वाद्यात्मकता-

तुमत्त्वप्रकारकप्रमाविषयत्वाद्यभावप्रतियोगितावच्छेदकावच्छिन्न-व्यापकतामादायैव लक्षणसमन्वयः । धूमवान् वह्नेरित्यादावयोगोलकादावप्युत्पत्तिकालावच्छेदेन वर्त्तमानस्य वह्न्याद्यभावस्य निरुक्तव्यापकतासत्त्वादतिव्याप्तिरतः 'व्याप्यवृत्ते'रिति । यद्यपि तादृशाभावा अपि कुटादौ व्याप्यवृत्तयस्तथापि व्याप्यवृत्तित्वविशिष्टस्य व्यापकत्वं विवक्षणीय अनवच्छिन्नविशेषणतासम्बन्धेन व्यापकतानिवेशलाभायैव वा तदुक्तम् । अवच्छिन्नवृत्तिकान्यत्वरूपं व्याप्यवृत्तित्वन्तु न शक्यते निवेशयितुं संयोगेन सद्धेतौ हेतुतावच्छेदकसम्बन्धावच्छिन्नहेत्वभावस्यातथात्वात् 'प्रतियोगितावच्छेदके'त्यत्र प्रतियोगिता हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या, अन्यथा व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकहेत्वभावस्य साध्याभावव्यापकस्य समनियताभावैक्यमते व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावरूपतया समानाधिकरणधर्म्मावच्छिन्नसाध्याभावासजातीयत्वेन तमादायातिव्याप्तिविरहेऽपि ज्ञात्वादिसाध्यके विषयतया हेतौ ज्ञानादौ साध्याभावव्यापकसमवायसम्बन्धावच्छिन्नज्ञानाद्यभावमादायातिव्याप्तिः (१) अभावे हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वविशेषण प्रवेश्य च नातिप्रसङ्गवारणसम्भव., समनियताभावैक्ये समवायसम्बन्धावच्छिन्नज्ञानाद्यभावस्यापि स्वसमवायिविषयकत्वसम्बन्धेन ज्ञानादिविशिष्टज्ञानादेर्विषयतासम्बन्धावच्छिन्नाभावसमनियतत्वेन तादृशसम्बन्धावच्छिन्नप्रतियोगिताकत्वात्, धूमाद्यभावव्यापकमहानसीयवह्न्यभावप्रतियोगिनो वह्नि-

(१) ज्ञात्वहेतावित्ति ध ।

व्यापकतावच्छेदकं इत्येतावतैव सामञ्जस्ये सजातीयव्यापकाभावांशस्यानतिप्रयोजकत्वापत्तेः, उक्तरीत्यनुसरणे च संयोगेन वह्न्याद्यौ साध्ये रूपविशेषादेः समवायेन हेतुतायां संयोगेन साध्यव्यापकस्य वह्नेर्हेतुतावच्छेदकसमवायेन हेत्वव्यापकत्वेनाव्याप्तेर्वारणाय द्वितीयाभावनिवेशस्यावश्यकत्वात् (१)। 'तदवच्छेदकत्वं' तादृशप्रतियोगितावच्छेदकत्व, आद्ये 'द्रव्यं सत्त्वादित्यादाविति, द्वितीये 'ज्ञेयं प्रमेयादित्यादाविति। ननु प्रमेयत्वादेः केवलान्वयितावच्छेदकत्वेऽपि वाच्यत्वादेरिव साध्याभावव्यापकव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमक्षतमेवेत्याशङ्कां निरस्यति, 'प्रमेयत्वव्यधिकरणेति, प्रमेयत्वस्य केवलान्वयित्वादिति भावः। धूमाद्यभाव प्रति विषयितादिसम्बन्धेन वह्नित्वाद्यवच्छिन्नस्य योऽभावस्तस्य व्यापकत्वात्तमादाय आत्मत्वे साध्ये समवायेन द्रव्यत्वे हेतौ आत्मत्वाभावं प्रति विषयितासम्बन्धेन द्रव्यत्ववज्ज्ञानस्य यः समवायसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावस्तस्य व्यापकत्वात्तमादाय चातिप्रसङ्गस्य वारणाय प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्यावश्यन्निवेशनीयतया व्यधिकरणसमवायादिसम्बन्धेन प्रमेयत्वस्याभावप्रतियोगितायामसमानाधिकरण्यतयावच्छेदकत्वसम्भवेऽपि न निस्तार इत्यवधेयम्। अन्योन्याभाव एव व्यधिकरणधर्मावच्छिन्नावच्छेदकताकोन त्वत्यन्ताभाव इत्याशयेनेदं, अन्यथा घटत्वावच्छिन्नप्रमेयत्वा-

(१) तत्प्रतियोगिताहृद इत्यादि वारणायेत्यन्तः पाठ बहुषु आदर्शपुस्तकेषु नास्ति।

सिद्धान्तलक्षणम् ।

यद्वा यावन्तो यादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिन्नं तद्रूपवत्त्वं वा तत्त्वमित्याह ।

गादाधरी विवृतिः ।

उक्तलक्षणे सजातीयादिपदपरित्यागेन लक्षणमाह, यद्-

(१) तल्लक्षणघटकसजातीयत्वनिवेशे साध्याभावव्यापकत सजातीयाभावप्रति-योगितायां यद्रूपावच्छिन्नत्व समानाधिकरणधर्मावच्छिन्नत्वोभयाभावस्य व्याप्यत्वमिति निष्कर्षेणैव तद्दोषाभावेऽपि गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे कम्बु-ग्रीवादिमत्त्वावच्छिन्नघटत्वव्याप्यमादायावच्छिन्नत्वाभावमादाय ... हुतावच्छेदका-वच्छिन्नाभावाप्रसिद्धिरपि द्रष्टव्या' इति कस्यचिदादर्शपुस्तकस्य ५

ति, व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नाभावादिकमादायाति-व्याप्तेर्व्वारणाय 'यावन्त इति, वह्निमान् धूमादित्यादौ मत्ता-नसीयवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकस्य धूमत्वाद्य-वच्छिन्नव्यापकतानवच्छेदकतया अव्याप्तिरिति 'तादृशा इति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगि-ताका इत्यर्थः। अत्र व्याप्यवृत्तित्वविशेषणं प्रयोजनाभावादनुपा-देयं(१)। साध्याभावसजातीयत्वादिविशेषणावच्छिन्नस्याप्यभावान्त-रस्य प्रक्रान्तत्वात्तादृशपदे तत्परत्वभ्रमस्य झटितिनिरासाय (२) अभावा इत्येतन्मात्रमनभिधाय साध्याभावा इत्युक्तं, यावत्साध्या-भावनिरूपिता न काचिदपि प्रतियोगितेति 'प्रत्येकपदं, अत्र च व्यभिचारिण्यं प्रत्यपि क्वचित् (३) किञ्चित्सम्बन्धेन साध्यतावच्छेदकावच्छिन्नस्य व्यापकतया अतिप्रसङ्गवारणाय प्रतियोगितावच्छेदकसम्बन्धेनैव व्यापकता निवेशनीया, इत्यञ्च समवायसम्बन्धावच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकसमवाया-दिसम्बन्धेन वह्नित्वाद्यवच्छिन्नस्य धूमाद्यव्यापकत्वादसम्भव इति प्रतियोगितावच्छेदकसम्बन्धेनैव साध्यव्यापकता विवक्षणीया तथाच केवलान्वयिसाध्यकस्थले व्यधिकरणसम्बन्धावच्छिन्नसाध्याभाव-

---

(१) तथाच साध्यव्यापकत्वं प्रतियोगिवैयधिकरण्याघटितमेव, तद्विशेषे-प्रयोजनाभावादिति भावः ।

(२) ननु तत्परत्वभ्रमे का क्षतिरिति चेत्, न, वाच्यं ज्ञेयत्वादित्यादौ साध्यव्यापकतावच्छेदकरूपावच्छिन्नाभावसजातीयत्वाद्यभावान्तर्गतघटत्वेन घटा-भावादेर्न प्रतियोगितावच्छेदकस्य हेतोर्व्यापकतानवच्छेदकतया अव्याप्तिरिति ।

(३) जन्यमात्राधिकरणघटस्थले ।

त्वाभावास्तद्रूपवत्त्वं व्याप्तिः येन सम्बन्धेन हेतुता तेनैव वृत्तिसत्त्वमपि बोध्यं तेन व्यधिकरणधर्म्मावच्छिन्नवह्न्यभाववति संयोगेन या वृत्तिस्तदभावस्य जात्यादौ वर्त्तमानस्य धूमादावसत्त्वेऽपि न क्षतिः। साध्याभावश्च पूर्व्ववद्बोध्य., तद्वृत्तित्वाभावोपि स्वव्यापक-तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्म्मेणानवच्छिन्नप्रतियोगिताकोबोध्यः तेनालोकाद्यवृत्तित्वेन रूपेण योवह्निसामान्याभाववद्वृत्तित्वस्य यश्चेन्धनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावस्तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेत्वन्तरवृत्तेः स्वस्मिन्नसत्वेऽपि न क्षतिरित्याहुः।

गादाधरी विवृतिः ।

धूमघटितलक्षणे व्यभिचारिणि साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताको न निर्धूमवृत्तित्वत्वावच्छिन्नाभावः, किन्तु जगद्वृत्तित्वसामान्याभाव एव, स च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तित्वनिष्ठाभिन्नत्वात् कूटपदमुपात्तं तादृशाभिन्नाभिन्न समानाधिकरणधर्मावच्छिन्नाभावसाधारणरूपेण साध्याभावस्य व्यापकाभावदर्शनार्थं प्रवेश-

रित्यादावतिव्याप्तेर्वारणाय हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्यैव निवेशनीयतया (१) यत्र संयोगादिना हेतुत्वं तत्र जगत्संयुक्तत्वत्वाद्यवच्छिन्नाभावस्यापि हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकत्वात्-वृत्तिमत्पदस्य यथाश्रुतार्थकत्वे कालिकसम्बन्धेन गगनादेरवृत्तित्वमते तेन सम्बन्धेन यत्र हेतुता तत्रैव परमव्याप्तिवारकता तेन सम्बन्धेन जगद्वृत्तित्वाभावस्यावृत्तिमात्रे प्रसिद्धत्वादित्यत आह, 'हेतुतावच्छेदकसम्बन्धेनेति, 'न क्षतिरिति नाव्याप्तिरित्यर्थः, न तु नासम्भवः तादात्म्य-कालिकादिसम्बन्धेन हेतौ लक्षणसमन्वयसम्भवात् (२)। ननु नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभाववद्वृत्तित्वाभावस्य हेतावसत्त्वादव्याप्तिः कूटघटितलक्षण इवात्रापि साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशेऽपि तार्णतार्णेतरवह्न्युभयत्वावच्छिन्नाभावमादाय वह्न्यादिसाध्यके गुणादिवृत्तित्वविशिष्टसत्ताद्यभावमादाय सत्तादिसाध्यकेऽव्याप्तिर्दुर्वारैव एवमव्याप्यवृत्तिकपिसंयोगादिसाध्यके हेत्वधिकरणस्यैव जगत एव कपिसंयोगत्वाद्यवच्छिन्नाभाववत्तया तद्वद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वेनाव्याप्तिविरहेऽपि तादृशकपिसंयोगाभावादिसाध्यक-द्रव्यत्वादिहेतौ कपिसंयोगादिरूपसाध्याभाववद्वृत्तित्वाभावासत्त्वादव्याप्तिरित्यत आह,

(१) विवक्षणीयतयेति पा०।

(२) तादात्म्यादिसम्बन्धेन च हेतौ लक्षणगमनसम्भवेनासम्भवाप्रसक्तेरिति पा०।

'साध्याभावेति, 'वर्त्तत इति' मिलितत्वेन यथा साध्यतावच्छेदक वह्नित्वसामान्यतावच्छेदकत्वावच्छिन्नप्रतियोगिताकौ व्याप्य वृत्तित्वाभावौ निवेश्येते तथात्वापि निवेशनीय इत्यर्थः, तत्तद्वि शिष्टोभयत्वावच्छिन्नाभावानां यावत्विशेषणेन कपिसंयोगादि मत्वाभावानान्तु द्वितीयविशेषणेन व्यावृत्तिः। ननु साध्याभाव वद्वृत्तित्वप्रतियोगिताकाभावमात्रनिवेशे प्रकृतहेतुसाधारण व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशेषस्य समानाधि- करणधर्म्मावच्छिन्नाभावोऽपि वृत्तिमद्वृत्तिः सम्भवतीति यावत्ता- दृशाभावान्तर्गततद्वत्त्वस्य हेतावभावादसम्भवः, एवं समानाधि- करणधर्म्मावच्छिन्नाभाववद्वृत्तित्वस्य प्रकृतहेतुवृत्तितावच्छेदकी- भूतकिञ्चिद्धर्म्मावच्छिन्नस्याभावोऽपि यावत्तादृशाभावान्तर्गत इति तद्वत्त्वविरहादपि व्यतिरेकिसाध्यक-हेतूनामव्यभिचारित्वानुप- पत्तिः तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावश्च विवक्षितुमशक्यः केवलान्वयिनि साध्याभाववद्वृत्तित्वत्वेन घटाद्य- भावस्य तादृशगुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वमते प्रसिद्धावपि तस्यातथात्वमते व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य स्वघटककेवलवृत्तित्वत्वसमनियततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेर्दुर्व्वारत्वात्, तत्तदभाव- वद्वृत्तित्वघटकधर्म्मावच्छिन्नाभावनिवेशे च वह्नित्वाद्यवच्छिन्न- वह्न्याद्यभावव्यक्तेस्तत्तदभावत्वावच्छिन्नाभावस्यापि तादृशतया तस्य च धूमादावसत्त्वादव्याप्तिः. साध्याभाववद्वृत्तित्ववृत्तितादृश- धर्म्मावच्छिन्नाभावनिवेशेऽपि घटवृत्तित्वत्वाद्यवच्छिन्नसाध्यकी-

तादात्म्येन घटत्वव्यापकादिहेतौ तादृशसाध्याभाववद्घटादिवृत्ति-त्वनिष्ठतादृशसाध्याभाववत्त्वरूपतयाविधधर्म्मावच्छिन्नाभावस्य (१) घटादिमात्रवृत्तेर्हेतौ (२) असत्त्वादव्याप्तिर्दुर्वारैव (३)। साध्याभावादिव्यावृत्तघटकतानिवेशने च प्रयासगौरवमिति तत्त-त्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकाभावं विवक्षति, 'तद्वदिति, 'स्व' प्रतियोगिना, अत्र साध्याभावस्य साध्याभावत्वेन सामान्यतो निवेशे व्यभिचारिणि निर्धूमवृत्तित्वत्वाद्यवच्छिन्ना-भावप्रतियोगितया व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववत्साध्या-धिकरणवृत्तित्वसाधारणसाध्याभाववद्वृत्तित्वत्वाव्यापकत्वेन तादृ-शाभावस्य लक्षणाघटकतया वृत्तित्वसामान्याभावस्य तथाविध-प्रतियोगिताकस्य च व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तितया अतिव्याप्तिरिति तत्तद्व्यक्तित्वेनाभावस्य व्याप्यता-वच्छेदककोटिनिवेशलाभाय 'तत्तदिति। यद्यपि यत्किञ्चित्साध्या-भाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकवृत्तिमद्वृत्तियावदभाववत्त्वं व्यभिचारिसाधारणं, यावन्तः साध्याभावाः प्रत्येकं तत्तदधिकरण-वृत्तित्वत्वसमनियतैकप्रतियोगितायाञ्च नानाविपक्षकसाध्यके-ऽप्रसिद्धिस्तत्तद्विपक्षावृत्तित्वावच्छिन्नाभाववत्तत्तद्विपक्षवृत्तित्वत्व-

(१) तत्तदभाववद्वृत्तित्वत्वघटकधर्म्मेत्यर्थः ।

(२) घटातिरिक्ते तादृशसाध्याभावावच्छिन्नघटभेदादेः सत्त्वादिति भावः ।

(३) अत्र द्रव्यसमवेतं गुणत्वादिमत्त्वादौ द्रव्यसमवेतत्वाभाववत्समवेतत्वघटकी-भूतेन द्रव्यसमवेतत्वाभाववत्समवेतत्ववृत्तिना द्रव्यसमवेतत्वाभावेनावच्छिन्नप्रति-योगिताकाभावस्य द्रव्ये प्रसिद्धस्य हेतावसत्त्वादव्याप्तिर्दुर्वारैवेत्यधिकः पाठः कश्चि-दादर्शपुस्तके वर्त्तते ।

'साध्याभाववृत्तेति, 'पूर्व्ववदिति मिश्रलक्षणे यथा साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिरभावो निवेश्यते तथात्रापि निवेशनीय इत्यर्थः, तत्तद्वह्निकथितोभयत्वाद्यवच्छिन्नाभावानां प्रथमविशेषणेन कपिसंयोगादिरूपाभावानाञ्च द्वितीयविशेषणेन व्यावृत्तिः। ननु साध्याभाववद्वृत्तित्वप्रतियोगिताकाभावमात्रनिवेशे प्रकृतहेतुसाधारणव्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशेषस्य समानाधिकरणधर्म्मावच्छिन्नाभावोऽपि वृत्तिमद्वृत्तिः सम्भवतीति यावत्तादृशाभावान्तर्गततद्वत्त्वस्य हेतावभावादसम्भव', एवं समानाधिकरणधर्म्मावच्छिन्नाभाववद्वृत्तित्वस्य प्रकृतहेतुवृत्तितावच्छेदकीभूतकिञ्चिद्धर्म्मावच्छिन्नस्याभावोऽपि यावत्तादृशाभावान्तर्गत,इति तद्वत्त्वविरहादपि व्यतिरेकिसाध्यक–हेतूनामव्यभिचारित्वानुपत्तिः तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावस्य विवक्षितुमशक्यः केवलान्वयिनि साध्याभाववद्वृत्तित्वेन घटादिभावस्य तादृशगुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वमते प्रसिद्धावपि तस्यातथात्वमते व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य स्वघटककेवलवृत्तित्वत्वसमनियततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेर्दुर्व्वारत्वात्, तत्तदभाववद्वृत्तित्वत्वघटकधर्म्मावच्छिन्नाभावनिवेशे च वह्नित्वाद्यवच्छिन्नवह्न्याद्यभावव्यक्तेस्तत्तदभावत्वावच्छिन्नाभावस्यापि तादृशतया तस्य च धूमादावसत्वादव्याप्ति. साध्याभाववद्वृत्तित्ववृत्तितादृशधर्म्मावच्छिन्नाभावनिवेशनेऽपि घटवृत्तित्वत्वाद्यवच्छिन्नमात्र

काद्यप्रतियोगिताप्रसिद्धेः, तथापि यावतामभावानां प्रत्येका-धिकरणवृत्तित्वसमनियतायाः प्रत्येकप्रतियोगितान्वयेन एत-दभाववद्वृत्तित्वसमनियतप्रतियोगिताको यो योऽभावस्तदभाव-वद्वृत्तित्वसमनियतप्रतियोगिताकश्च यो योऽभावस्तद्वत्त्वमित्येवं रीत्या निवेशाद्यानुपपत्तिः। एतन्मते साध्याभावसमुदायो न समु-दायत्वेन प्रविष्टः अपि तु प्रातिस्विकरूपेणेति कूटघटिताद्विशेषः। अथात्र स्वपदं न तत्तदभावीयप्रतियोगितात्वरूपेण प्रतियोगि-तापरं साध्याभाववद्वृत्तित्वातिरिक्तेऽपि तत्तदभावीयप्रतियोगिता-न्तरसत्त्वादिति(१) तत्तत्प्रतियोगिताव्यक्तिपरं तद्वाच्यं, तथाच यत्कि-ञ्चित्प्रतियोगितानिरूपकाशेषाभावस्यातिव्यापकतया (२) यावत्य-स्तादृशप्रतियोगिताः (३) प्रत्येकं तन्निरूपकाभाववत्त्वं निवेशनीयं, तथाच समानाधिकरणधर्मावच्छिन्नजगद्वृत्तित्वसामान्याभावप्रति-योगितानिरूपकवृत्तिमद्वृत्त्यभावाप्रसिद्धया अव्याप्तिरिति वृत्ति-मद्वृत्त्यभावीयत्वेन यावत्प्रतियोगिता निवेशनीया तथाच तन्निरूप-काभावे वृत्तिमद्वृत्तित्वनिवेशनं व्यर्थं यावत्त्वविशेषणमपि तथेति चेन्नोपादीयन्त एव तत्र तत्तद्विशेषणं, वृत्तिमद्वृत्त्यभावीययाव-त्प्रतियोगिताविशेष्यीभूताभावे वृत्तिमद्वृत्तित्व-यावत्त्वाभिधानात्। अत्र च गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे स्वव्यापकतत्तद-भाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वस्याव्यावर्त्तकव्याप-

(१) किञ्चिद्विशिष्टस्याभावादिनिष्ठप्रतियोगितान्तरसत्त्वादित्यर्थः।

(२) अतिव्याप्तिसम्पादकतया।

(३) साध्याभाववद्वृत्तित्वसमनियतप्रतियोगिता इत्यर्थः।

कतान्तघटितत्वेनाभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नान्योन्याभावरूपव्यापकत्वपुरस्कारेण न प्रतियोगितानिवेशः सम्भवतीति तादृशावच्छेदकभेदकूटात्मकव्यापकत्वपुरस्कारेणैव तन्निवेशः। न च स्वव्यापकतत्तदभाववद्वृत्तित्वत्वकत्व-तत्तदभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वावच्छिन्नैकभेदोभयरूपेण प्रतियोगितानिवेशसम्भवादवच्छेदकभेदकूटनिवेशनमफलमिति वाच्यम्। घटभेदादिसाध्यकस्थले तदभावव्यक्तित्वेन घटत्वादिघटितस्य तदभाववद्वृत्तित्वत्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य स्वरूपतो घटत्वादिघटितं घटवृत्तित्वत्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमपेक्ष्य गुरुशरीरतया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नैकभेदनिवेशासम्भवात्। अत्र कल्पे व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य पर्व्वतवृत्तित्व-पर्व्वतान्यवृत्तित्वोभयत्वाद्यवच्छिन्नाभावस्य पर्व्वताद्यवृत्तिवृत्तिमद्वृत्तेर्धूमादावभावादेकमात्रवृत्तिहेतावपि तादृशप्रतियोगिताकस्य एतत्क्षणावच्छिन्नवृत्तित्वैतदन्यक्षणावच्छिन्नवृत्तित्वोभयत्वावच्छिन्नाभावस्य एतत्क्षणावच्छिन्नावृत्तौ वृत्तिमति वर्त्तमानस्याभावादसम्भवः तादृशाभावव्यावर्त्तनाय व्यासज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकत्वनिवेशे च गौरवं पर्व्वतवृत्तित्वत्वादिना जगद्वृत्तित्वसामान्याभावस्य व्यावृत्त्यसम्भवश्चेत्यतः कल्पान्तरमनुसरति, 'तत्तत्साध्याभावेति, अतिरिक्तान्तानिवेशे व्यधिकरणधर्म्मावच्छिन्नाभावमात्रस्य संग्रहाद्व्यभिचारिमात्रेऽतिव्याप्तिरिति तन्निवेशनम्। यद्यपि यथाश्रुते-

[illegible]

[illegible]

ऽभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताको यो यः साध्याभाव-
वद्वृत्तित्वत्वसमनियतप्रतियोगिताकश्च यो यः [illegible]
[illegible] निवेशनीयमिति । [illegible] साध्याभाववद्वृत्तेर्न [illegible]
[illegible] अपि तु [illegible] इत्यादिरीत्या ।
[illegible] स्यात् न तत्तदभावीयप्रतियोगितात्वेन प्रतियोगि-
तापर्यं साध्याभाववद्वृत्तित्वादिविशिष्टेऽपि तत्तदभावीयप्रतियोगिता-
नामसत्त्वादिति(१) तत्तत्प्रतियोगितात्वावच्छिन्नं यावत्त्वं, तथाच यत्कि-
ञ्चित्प्रतियोगितानिरूपकाभावाप्रसिद्ध्या [illegible] व्यापकतया (२) यावत्व-
स्यादृशप्रतियोगिता: (३) प्रत्येकं तन्निरूपकाभाववत्त्वं निवेशनीयं,
तथाच समानाधिकरणधर्मावच्छिन्नजगद्वृत्तित्वसामान्याभावप्रति-
योगितानिरूपकवृत्तिमद्वृत्त्यभावाप्रसिद्ध्या अव्याप्तिरिति वृत्ति-
मद्वृत्त्यभावीयत्वेन यावत्प्रतियोगिता निवेशनीया तथाच तन्निरूप-
काभावे वृत्तिमद्वृत्तित्वनिवेशनं व्यर्थं यावत्त्वविशेषणमपि तथेति
चेन्नोपादीयन्त एव तत्र तत्तद्विशेषणं, वृत्तिमद्वृत्त्यभावीययाव-
त्प्रतियोगिताविशेष्यीभूताभावे वृत्तिमद्वृत्तित्व-यावत्त्वाभिधानात् ।
अत्र च गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे स्वव्यापकतत्तद-
भाववद्वृत्तित्वत्ववन्निष्ठभेदप्रतियोगितावच्छेदकत्वस्याव्यावर्त्तकव्याप-

(१) किञ्चिद्विशिष्टस्याभावादिनिष्ठप्रतियोगितान्तरसत्त्वादित्यर्थः ।

(३) अतिव्याप्तिसम्पादकतया ।

(२) साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिता इत्यर्थः ।

लक्षणघटकत्वात्। यदि च साध्यतावच्छेदकावच्छिन्नव्यापकताव-च्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य तेन रूपेण न निवेशः अपि तु तत्तदभावत्वेनैव एतदेव सूचयितुं तत्तत्पदमुपात्तम् एवञ्च तत्तद्व्यक्तित्वेन धूमाद्यभावघटिततत्तदभाववद्वृत्तित्वत्वावच्छिन्ना-भावस्य लक्षणघटकतया न धूमादिसाध्यकेऽतिव्याप्तिरित्युच्यते तथापि एतद्व्यक्तिभिन्नं घटभिन्नं वा प्रमेयत्वादित्यादावतिव्याप्ति-स्तत्तद्व्यक्तित्वरूपेण घटभेदाभावघटिततद्व्यक्तिमद्वृत्तित्वापेक्षया लघोस्तत्समनियतस्य किञ्चिद्विशेषणानवच्छिन्नघटत्वघटितस्य घट-वृत्तित्वत्वस्यैवाभावप्रतियोगितावच्छेदकतया तद्व्यक्तिमद्वृत्तित्व-त्वावच्छिन्नाभावाप्रसिद्धेः घटवृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूप-काभावस्य लक्षणघटकत्वासम्भवाद्व्यधिकरणधर्म्मावच्छिन्नसाध्या-भाववद्वृत्तित्वत्वावच्छिन्नाभावस्यैव तथात्वात्। यदि चाभावधर्म्मो विशेषणविधया न निविश्यते अपि तु अभावप्रसृतिरेव, अभावे तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियो-गिताकत्वमुपलक्षणविधया निविश्यते एतल्लाभायैव तत्तत्पदो-पादानमपि न तु तत्तद्व्यक्तित्वेनाभावविशेषलाभार्थं, उप-लक्षणीभूतप्रतियोगिताविशेषेणैवाभावान्तरव्यावृत्तिसम्भवे तत्त-द्व्यक्तित्वस्योपलक्षणविधया निवेशे प्रयोजनविरहात्, एवञ्च घट-वृत्तित्वत्वावच्छिन्नाभावोऽप्युक्तस्थले लक्षणघटकः घटभेदाभावस्य घटत्वस्य तत्प्रतियोगितावच्छेदकघटकत्वात्प्रतियोगिताविशेषोप-लक्षिताभाववद्वृत्तित्वत्वपर्य्याप्तनिरूपकताकान्यत्वपर्य्यन्तानिवेशात्

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] साध्याभाववद्वृत्तित्व [illegible]

न चैवमपि साध्याभाववन्निष्ठ [illegible]

[illegible]

त्वनिरूपितत्वस्या [illegible]

गुरुधर्मस्याभावप्रतियोगितानवच्छेदकतया [illegible]
त्वस्यानियतोपस्थितिकगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वात्।
अथ गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्यता-
दस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्ना-
परतया धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमत्वादवच्छि-
व्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वस्य [illegible]
धूमत्वाद्यवच्छिन्नाभाववद्वृत्तित्वापेक्षया गुरुत्वेनाभावप्रतियोगिता-
वच्छेदकत्वविरहेण तदवच्छिन्नाभावाप्रसिद्धेः धूमत्वादवच्छिन्ना-
भाववद्वृत्तित्वत्वाद्यवच्छिन्नप्रतियोगिताया धूमत्वाद्यवच्छिन्नव्याप-
कतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थेनावच्छे-
दतया तन्निरूपकाभावस्य निरुक्ताभावविशेषणतानात्वेन अति-
करणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभाववद्वृत्तित्वाभावस्य

लक्षणघटकत्वात्। यदि च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य तेन रूपेण न निवेशः अपि तु तत्तदभावत्वेनैव एतदेव सूचयितुं तत्तत्पदमुपात्तम् एवञ्च तत्तद्व्यक्तित्वेन धूमाद्यभावघटिततत्तदभाववद्वृत्तित्वत्वावच्छिन्नाभावस्य लक्षणघटकतया न धूमादिसाध्यकेऽतिव्याप्तिरित्युच्यते तथापि एतद्व्यक्तिभिन्न घटभिन्नं वा प्रमेयत्वादित्यादावतिव्याप्तिस्तत्तद्व्यक्तित्वरूपेण घटभेदाभावघटिततद्व्यक्तिमद्वृत्तित्वापेक्षया लघोस्तत्समनियतस्य किञ्चिद्विशेषणानवच्छिन्नघटत्वघटितस्य घटवृत्तित्वत्वस्यैवाभावप्रतियोगितावच्छेदकतया तद्व्यक्तिमद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः घटवृत्तित्वत्वावच्छिन्नप्रतियोगिताकस्य साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य लक्षणघटकत्वासम्भवाद्व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावस्यैव तथात्वात्। यदि चाभावधर्मो विशेषणविधया न निविश्यते अपि तु अभावप्रकृतिरेव, अभावे तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितावत्त्वमुपलक्षणविधया निवेश्यते एतल्लाभायैव तत्तत्पदोपादानमपि न तु तत्तद्व्यक्तित्वेनाभावविशेषणतया [illegible] लक्षणाङ्गप्रतियोगिताविशिष्टाभावान्तरव्यावृत्तिः [illegible] व्यक्तित्वोपलक्षणविधया निवेशे प्रयोजनं [illegible] वृत्तित्वत्वावच्छिन्नाभावोऽप्रसिद्ध इति लक्षणघटक [illegible] घटत्वस्य प्रतियोगितावच्छेदकघटक [illegible] तदभाववद्वृत्तित्वत्वयोः निरूपक [illegible]

धूमादिसाधकत्वे निर्धूमवृत्तित्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकशरीरे अभावविशेषणस्याधिकस्य निवेशनेऽपि न क्षतिः। न चाभावप्रतियोगिकोटौ उपलक्षणतया भानस्यानुभवविरुद्धत्वात् विशिष्टनिरूपितत्वाभावरूपस्य निरूपितत्वसम्बन्धावच्छिन्नविशिष्टाभावरूपस्य वा विशिष्टानिरूपितत्वस्य प्रतियोगिकोटौ प्रतियोगिताविशेषस्य कथमुपलक्षणविधया निवेश इति वाच्यम्। अभावप्रतियोगिप्रकारशरीरे प्रतियोगितावच्छेदककोट्यप्रविष्टस्य न भानमित्येव हि अभावप्रतियोगिनि तदवच्छेदके वा उपलक्षणविधया न भानमित्यस्यार्थः, प्रकृते निरुक्तप्रतियोगिताकत्वस्य निरूप्यत्वप्रतियोगिविशिष्टाघटकत्वादेव निरूप्यत्वप्रतियोगिन्युपलक्षणत्व (१) न तु निरूप्यत्वाभावप्रतियोगितावच्छेदकाघटकतया अप्रवेशात् तदभावप्रतियोगितावच्छेदकप्रविष्टाभावस्याभावान्तरव्यावृत्तये तादृशप्रतियोगिताकत्वस्य प्रतियोगितावच्छेदकघटकतयैव निवेशात् यथा द्रव्यत्वस्य द्रव्यत्वोपलक्षितनिरूपितविषयित्वाभावप्रतियोगिनि नोपलक्षणत्वं किन्तु विषयितानिरूपकांश एवेति (२) निर्धूमवृत्तित्वत्वस्य धूमव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तितात्वसमनियतत्वेऽपि व्यापकतावच्छेदकधर्मान्तरावच्छिन्नाभावघटितविशिष्टनिरूप्यत्वे धूम-

---

(१) प्रकृते निरुक्तप्रतियोगिताकत्वस्यावच्छेद्यत्वनिरूपकतावच्छेदकतया अप्रवेशादेव उपलक्षणत्वमिति पा०।

(२) तादृशप्रतियोगिताकत्वस्य उपलक्षणतयैव प्रतियोगितावच्छेदकघटकतया निवेशादिति पा०।

त्वावच्छिन्नधूमाभावघटितविशिष्टनिरूपितत्वरूपताविरहात् तत्त-द्विशिष्टनिरूपितत्वयोर्न समनैयत्यम् इति न व्यापकतावच्छेद-करूपावच्छिन्नप्रतियोगिताकत्वघटितधर्म्मावच्छिन्नप्रतियोगिताक-निरूप्यत्वाभावाप्रसिद्धिः प्रतियोगितासंसर्गकज्ञान एव तादृश-भानस्य तथात्वात् जात्यवच्छिन्नप्रतियोगिताकोऽभाव इत्या-कारस्य स्वरूपतो घटत्वाद्यवच्छिन्नप्रतियोगिताकाभावभानस्य सर्व्वसम्मतत्वात् प्रकृते च साध्यतावच्छेदकावच्छिन्नव्यापकताव-च्छेदकरूपावच्छिन्नप्रतियोगिताको योऽभावस्तद्वद्वृत्तित्वनिरू-पितत्वप्रतियोगिताकाभाववतः समानाधिकरणधर्म्मावच्छेद्यत्वञ्च योऽभावस्तद्वत्प्रतियोगिताका यावन्तोऽभावास्तद्वान् हेतुरित्या-कारकव्याप्तिग्रहे प्रतियोगितायाः विशेषणत्वेनानुपपत्त्यभावात् अतएव च व्यापकतावच्छेदकादेरुपलक्षणविधया भानोपपत्तिः। न च तादृशनिरूपितत्वप्रतियोगिकस्य तत्त्वावच्छिन्नप्रतियोगिता-काभावस्य वा अभावस्य निवेशे निर्धूमवृत्तित्वत्वावच्छिन्नाभावे प्रतियोगितानिष्ठावच्छेद्यतायामपि किञ्चिद्विशिष्टतादृशनिरू-पितत्वत्वावच्छिन्नाभावसत्त्वात्तादृशाभावासंग्रह इति वाच्यम्। तत्तदभाववद्वृत्तित्वनिरूपितत्वपर्य्याप्तप्रतियोगितावच्छेदकता-काभावस्यैव निवेशनीयत्वात् एवञ्च तत्पर्याप्तिभेदेनाभावभेद-ध्रौव्येन तत्तत्पदोपादानमपि साधु सङ्गच्छते इत्युच्यते। तदपि घटत्व [illegible]साध्यके क्वचिद्[illegible] [illegible]-

[illegible]

षणकघटत्वादिवृत्तित्वत्वमेव तत्र घटत्वादिवृत्तित्वाभावप्रतियोगितावच्छेदकतया घटत्वत्वादिरूपसामान्याभावस्य प्रतियोगितावच्छेदकशरीरे ऽनिवेशेन व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात्। न च जातेः समवायेन स्वरूपतोऽवच्छेदकत्वं न तु सम्बन्धान्तरेण अतएव गोत्वादिजातिनिष्ठव्याप्तौ पदविशेषप्रवृत्तिनिमित्तशरीरेतरासमवेतत्वादेरवच्छेदकत्वं स्वीकुर्व्वन्ति न तु तादात्म्यसम्बन्धेन लघोरपि गोत्वादिजातेरिति निर्विशेषणकघटत्वादिघटितस्याभावप्रतियोगितावच्छेदकत्वं न सम्भवतीति वाच्यम्। तादृशनियमे मानाभावात्। यदि चाभावांशस्याप्युपलक्षणत्वं स्वीक्रियते तदा महानसवृत्तित्वत्वावच्छिन्नाभाववारणमशक्यमेव। यदि च साध्याभावातिरिक्तविशेषणाविशेषिताधिकरणवृत्तित्वत्वाद्यवच्छेद्यताभिन्नसमानाधिकरणधर्म्मावच्छेद्यत्वाभाव निवेश्याविशेषितघटत्वादिवृत्तित्वाभावः संगृह्यते तदा तादृशाभावमादाय जातिसाधारणसद्धेतावव्याप्तिर्वज्रलेपायते। एवं साध्याभाववद्वृत्तित्वत्वशरीरेऽभावादेर्विशेषणविधया प्रवेशे वृत्तिमद्वृत्तिपदमनर्थकम् आपद्येत, व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य यः समानाधिकरणधर्म्मावच्छिन्नाभावस्तत्प्रतियोगिताया लाघवेन वृत्तित्वत्वेनैवावच्छिन्नतया तन्निष्ठावच्छेद्यताया अभावघटितविशिष्टपदार्थानिरूपितत्वात्। अत्र वदन्ति, गुरुधर्म्मस्याभावप्रतियोगितावच्छेदकत्वमतेनेदमभिहितं, व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववन्महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणाय च साध्याभाववद्वृत्तित्वत्वपर्य्याप्तावच्छेदकताभिन्नसमानाधिकरणधर्म्मनिष्ठावच्छेदकत्वानिरूपकत्वमेव प्रतियोगि-

तायां विशेषणं देयम् । न चैवं घटत्वादिना साध्याभाववद्वृत्तित्वाभावसंग्रहफलकं समानाधिकरणपदोपादानं निषेधद्वयनिवेशनञ्च विफलं तादृशाभावस्यासंग्रहेऽपि केवलान्वयिसाध्यके साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावमादाय लक्षणसमन्वयसम्भवादिति वाच्यम् । विषयतादिसम्बन्धेन यत्र हेतुता तत्र हेतुतावच्छेदकसम्बन्धेन साध्याभाववति वृत्तेः साध्याभाववद्विषयतादि[illegible] विषयादिस्वरूपत्वेन साध्याभाववद्विषयतात्वादिरूप[illegible] वृत्तित्वत्वस्य केवलान्वयितया तदवच्छिन्नाभावा[illegible] भावघटितलक्षणानुपपत्तेः । न च साध्याभाववद्विषय[illegible] सम्बन्धेनावृत्ति तेन सम्बन्धेन तदवच्छिन्नाभावमादाय [illegible] न्वयः सम्भवतीति वाच्यम् । कालिकसम्बन्धेन [illegible] त्वत्वावच्छिन्नस्य योऽभावस्तस्य ध्वंसादि[illegible] स्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदक[illegible] [illegible]नीयतया व्यधिकरणसम्बन्धावच्छिन्नप्र[illegible] भावस्य लक्षणघटकत्वासम्भवात् वि[illegible] विषयतात्वविशिष्टस्य न समवायादि[illegible] वृत्तेर्जात्यादौ च समवायाभावात् [illegible] समवायादिसम्बन्धावच्छिन्नप्र[illegible] वच्छिन्नाभावो लक्षणघटको [illegible] पद-[illegible]तौ कालिक-विषयि[illegible] [illegible]भावप्रवृत्तित्वत्वावच्छि[illegible] [illegible]योगिताकाभावस्यैव [illegible] न दोष

घटाद्यभावमादायातिव्याप्त्यापत्तेरिति वाच्यम्। तथासत्युक्तरीत्या विषयतासम्बन्धेन यत्र हेतुना तत्र तादृशाभावाप्रसिद्ध्या तद्भिन्नं मेयत्वादित्यादौ निर्विशेषणकघटत्वादिवृत्तितात्वस्य घट-समानाधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तितात्वघटकत्वं तथा वाच्यम् ज्ञेयत्वादित्यादावपि तादृशस्य स्वाविषयकप्रतीत्वविशिष्ट-व्यधिकरणधर्म्मावच्छिन्नसाध्याभावविशेषितघटत्वादिघटिततदभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयताकतया तदभाववद्वृत्तित्वत्वघटकतया वृत्तिमद्वृत्तितदवच्छिन्नाभावस्य हेतावसत्त्वेनाव्याप्त्यापत्तेः तत्तदभाववद्वृत्तित्वत्वावटकधर्म्मावच्छिन्नाभावनिवेशेन वारणसम्भवात्। तादृशधर्म्मे निरुक्तसाध्याभाववद्वृत्तित्वत्वघटकत्वसत्त्वेऽपि स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्धर्म्मत्वघटितत्वविषयिताकत्वेन साध्याभाववद्वृत्तित्वावटकत्वस्यापि सत्त्वे तदवच्छिन्नाभावस्य यथानिरुक्ताभावानात्मकत्वात्। न च स्वाविषयकप्रतीत्यवृत्तितदभाववद्वृत्तित्वत्वनिरूपितविषयितासामान्यस्वरूपतत्तदभाववद्वृत्तित्वत्वघटकतया निवेशे निर्विशेषणक-घटत्वादिवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वाप्रसक्त्या तदघटकधर्म्मावच्छिन्नाभावनिवेशोऽपि सम्भवतीति वाच्यम्। तथा सति व्यापकतावटितसामान्यपदार्थनिवेशेन तदघटकधर्म्मानवच्छिन्नाभावनिवेशापेक्षया अतिगौरवात्। समानाधिकरणपद-सार्थक्यन्तु उक्तरीत्यैवेति ध्येयम् (१)।

केचित्तु व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन पर्व्वत-

(१) यदि चेत्यादि. ध्येयमित्यन्तः पाठः बहुषु आदर्शपुस्तकेषु नास्ति।

वृत्तित्व-घटान्यतराद्यभाववारणाय एतन्मतेऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वकत्वं प्रतियोगिताविशेषणमावश्यकम्। तथाच साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावस्य लक्षणघटकता न सम्भवतीति(१) निषेधद्वयनिवेशन-समानाधिकरणपदोपादानयोः सार्थकतेत्याहुः।

वस्तुतस्तु साध्याभाववद्वृत्तित्वातिरिक्तत्व साध्याभाववद्वृत्तित्वत्वाघटकत्वत्व तच्च स्व यादृशविशिष्टं तादृशविशिष्टाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वकत्वम् एवञ्च महानसवृत्तित्वस्य महानसत्वविशेषितमहानसवृत्तित्वत्वाविषयकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वकत्वात् साध्याभाववद्वृत्तित्वत्वाघटकत्वेन न तद्धर्मावच्छिन्नाभावमादाय दोषप्रसक्तिः, एवञ्च गुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वेऽपि घटभिन्नं मेयत्वादित्यादौ घटत्व[illegible]तघटवृत्तित्वत्वस्य न स्वाविषयकप्रतीतिविषयसाध्याभाव[illegible]त्वत्वकत्वं साध्याभावत्वेन घटत्वविषयकसाध्याभाववद्वृ[illegible] घटत्वविशेषितघटवृत्तित्वत्वाविषयकत्वासम्भवात्। [illegible] प्रमेयत्वादित्यादौ घटत्वत्वविशेषितघटत्ववृत्तित्वत्व न [illegible] यकप्रतीतिविषयसाध्याभाववद्वृत्तित्वत्वकत्वं [illegible] त्वविषयकसाध्याभाववद्वृत्तित्वत्वविषय[illegible] घटत्ववृत्तित्वत्वविषयकत्वासम्भवादिति न [illegible]। न वा वृत्तिमद्वृत्तिपदद्वयं वृत्ति[illegible] साध्याभाववद्वृत्तित्वत्वाघटक[illegible]

(१) [illegible]

णार्थं तदुपादानात् साध्याववद्वृत्तित्वत्वावच्छेदेन च स्वाविषयक प्रतीतिविषयत्वं विवक्षणीयम् । तथाच स्वाविषयकप्रतीतिनिरू पितसाध्याभाववद्वृत्तित्वत्वावच्छिन्नविषयताकत्वं पर्य्यवसितम् । अन्यथा साध्याभाववद्विशेषितवृत्तित्वत्वस्य विशेष्यीभूतकेवलवृत्ति त्वत्वानतिरेकितया विशेष्यीभूतवृत्तित्वत्वस्य साध्याभाववद्वृत्ति त्वत्वाविषयककेवलाधेयतात्वविषयकप्रतीतिविषयत्वे साध्याभाववद् वृत्तित्वस्य तथात्वावश्यकतया तदघटकत्वप्रसङ्गेन केवलवृत्ति त्वत्वावच्छिन्नाभावमादाय व्यभिचारिण्यतिप्रसङ्गापातात् । ननु महानसवृत्तित्वत्वावच्छिन्नाभाववारणार्थं साध्याभाववद्वृत्तित्वत्व घटकधर्म्मावच्छिन्नाभाव एव निवेश्यतां तद्घटकत्वञ्च स्वाविषय कप्रतीत्यविषयसाध्याभाववद्वृत्तित्वत्वकत्व किं निषेधद्वय-समाना धिकरणपदयोरुपादानेनेति वाच्यम् । एवं सति विशिष्टानुयोगि काभावानभ्युपगमे साध्याभाववद्वृत्तित्वत्वेऽपि साध्याभाववद् वृत्तित्वत्वरूपविशिष्टाविषयककेवलाधेयतात्वविषयकप्रतीतिविषय- त्वाभावासत्त्वेन तस्य घटकत्वानिर्व्वाहेण केवलवृत्तित्वत्वस्यैव तद् घटकतया तदवच्छिन्नसमानाधिकरणधर्म्मावच्छिन्नाभावस्य च वृत्तिमदवृत्तितया व्यभिचारिण्यतिप्रसङ्गापातात् । न च स्वा विषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितवि- षयताकत्वरूपघटकत्वमेव निवेश्यता तथा सति नोक्तदोष इति वाच्यम् । तथा सति विषयतासम्बन्धेन यत्र हेतुता तत्र तादृशाभा- वाप्रसिद्ध्यापत्तेः । एवं घटत्वभिन्नं मेयत्वादित्यादौ निर्व्विशेषणघट- त्वादिवृत्तित्वत्वस्य यथा समानाधिकरणधर्म्मावच्छिन्नसाध्याभाव-

षद्वृत्तित्वत्वघटकत्वं तथा वाच्यं ज्ञेयत्वादित्यादावपि तादृशस्य स्वाविषयकप्रतीत्यवृत्तिव्यधिकरणधर्म्मावच्छिन्नसाध्याभावविशेषि-तघटत्वादिघटिततदभाववद्वृत्तित्वत्वविषयताकत्वेन तदभाववद्-वृत्तित्वत्वघटकतया वृत्तिमद्वृत्तितदवच्छिन्नाभावस्य हेतावसत्त्वे-नाव्याप्तेस्तदभाववद्वृत्तित्वत्वाघटकधर्म्मानवच्छिन्नाभावनिवेशे च न दोषः तादृशधर्म्मे निरुक्तसाध्याभाववद्वृत्तित्वत्वघटकत्वसत्त्वेऽपि स्वाविषयकप्रतीति-निरूपितसाध्याभाववद्धर्म्मान्तरवृत्तित्वत्वविषय-ताकत्वेन साध्याभाववद्वृत्तित्वत्वाघटकत्वस्यापि सत्त्वेन तदव-च्छिन्नाभावस्य यथानिरुक्तभावानात्मकत्वात्। न च स्वाविषय-कप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वनिरूपितविषयितासामान्यक-त्वरूपतत्तदभाववद्वृत्तित्वत्वघटकतानिवेशे निर्विशेषणकघटत्वा-दिवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वाप्रसक्त्या तद-घटकधर्म्मावच्छिन्नाभावनिवेशोऽपि सम्भवतीति वाच्यम्। तथा सति व्यापकताघटितसामान्यपदार्थनिवेशेन घटकधर्म्मानवच्छि-न्नाभावनिवेशापेक्षयातिगौरवात्। अत्र विषयत्वं मुख्यविशेष्यत्वं, तेन घटवृत्तित्वत्वावच्छिन्नसाध्यके तादात्म्येन घटत्वव्यापकादि-हेतौ घटवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वाघटकत्वविरहेण तद-वच्छिन्नाभावमादाय नाव्याप्तिः। न च तथापि सास्नाभाववान् द्रव्यत्वादित्यादावतिव्याप्तिः तत्र सास्नावद्वृत्तित्वत्वस्य गुरुतया गोत्ववद्वृत्तित्वत्वस्य च तदघटकत्वेन व्यधिकरणधर्म्मावच्छिन्ना-भावस्यैव संग्रहादिति वाच्यम्। गोत्वाद्यभावादेरपि सास्नाद्यभाव-रूपसाध्यव्यापकतया गोत्वादिरूपतदभावस्यापि लक्षणघटकत्वात्

तद्वद्वृत्तित्वत्वस्य च तद्वद्वृत्तित्वाघटकत्वविरहेण दोषाभावात्। एवं जातिभिन्नं घटत्वत्वादित्यादौ जातित्वादिविशेषितघटत्वादिवृत्तित्वत्वस्य तद्विशेषितघटत्वादिवृत्तित्वत्वाविषयकप्रतीतिविषयत्वेन प्रत्येकं जातित्वविशेषितसकलजातिवृत्तित्वत्वस्य जातिभेदाद्यभाववद्वृत्तित्वाघटकत्वेऽपि घटत्वादिवृत्तित्वत्वस्य घटत्वावच्छिन्नघटत्वभेदरूप-साध्यव्यापकाभाववद्वृत्तित्वाघटकत्वविरहेण तदवच्छिन्नाभावमादायैवातिव्याप्तिवारणसम्भवात्। न च साध्याभाववद्वृत्तित्वत्वघटकधर्म्मानवच्छिन्नाभाव एव निवेश्यतां किं समानाधिकरणपदोपादानेन केवलान्वयिसाध्यकस्थले वृत्तित्वेन घटाभावमादायैव लक्षणसमन्वयसम्भवादिति वाच्यम्। वृत्तित्वत्वपर्य्याप्तवृत्तित्व-घटान्यतराभावमादायाव्याप्तिवारणाय एतन्मतेऽपि साध्याभाववद्वृत्तित्वत्वव्याप्यत्वस्य प्रतियोगितायां निवेशस्यावश्यकतया घटत्वेन साध्याभाववद्वृत्तित्वाभावसंग्रहाय समानाधिकरणपदोपादानस्यावश्यकत्वादिति दिक् (१)। प्रतियोगितायां साध्याभाववद्वृत्तित्वत्वव्याप्यत्वनिवेशप्रयोजनमाह, 'आलोकाद्यवृत्तित्वेनेति वह्निसामान्याभाववद्वृत्तित्वस्य योऽभावस्तस्य धूमादावसत्त्वेपीत्यन्वयः। वह्निसामान्याभावो वह्नित्वावच्छिन्नो वह्न्यभावः। साध्याभाववद्वृत्तित्वत्वव्यापकतानिवेशनप्रयोजनमाह, 'यथेति, 'इन्धनत्वाद्यवच्छिन्नेति, साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेद-

---

(१) वस्तुतस्त्वित्यादिः इति दिगित्यन्तः पाठः बहुषु आदर्शपुस्तकेषु नास्ति।

कारूपावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया घटत्वाद्य-
वच्छिन्नाभावोऽपि लक्षण. 'महानसवृत्तित्वादेरभाव' इत्यत्र महानस-
वृत्तित्वत्वादिनेति बोध्यं. तादृशाभावाधिकरणमहानसवृत्तित्व-
त्वाद्यवच्छिन्नस्येति वा पाठान्तरं । न च गुरुधर्म्मस्याभावप्रतियोगि-
तावच्छेदकत्वेऽपि तादृशाभावाविशेषितमहानसवृत्तित्वत्वावच्छिन्ना-
भावमादायैव दोषप्रसक्तेस्तद्विशेषितमहानसवृत्तित्वत्वावच्छिन्ना-
भावपर्य्यन्तानुसरणं सन्दर्भविरोध इति वाच्यम् । अधिकरण-
त्वान्तस्योपलक्षणतया शेषांशस्य विशेषणतया विवक्षणेनानुपपत्त्य-
भावात् । अधिकरणविशेषानुपसक्तवृत्तेरभावमादायापि दोषं
दर्शयति. 'स्वनिष्ठेति धूमादिनिष्ठसाध्याभाववद्वृत्तित्व[illegible]-
त्वावच्छिन्नाभावस्येत्यर्थः, '[illegible]' [illegible]. [illegible]
वृत्तिमद्वृत्तित्वसत्त्वादिति क्वचित्. 'कस्मिन्' धूमादौ. [illegible]
सत्ताभाववान् द्रव्यत्वादित्यादौ सत्तावत्समवेतत्वाभावस्य [illegible]
करणधर्म्मावच्छिन्नप्रतियोगिताकस्यैव समवेतवृत्ति[illegible] द्रव्य-
वृत्तित्वाद्यवच्छिन्नाभावस्यापि साध्यतावच्छेदकावच्छिन्न[illegible]-
तावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया समानाधिकरणधर्म्मा-
वच्छिन्नप्रतियोगिताकस्यापि [illegible]त्वाभावस्य [illegible]-
त्वादिवृत्तितया द्रव्यत्वादि[illegible] । [illegible]-
साध्यव[illegible] साध्यतावच्छेदका[illegible]
व्याप्तिः । [illegible]
[illegible]
[illegible]

[illegible]

[illegible]

[illegible]

तत्त्वचिन्तामणि दीधितिः ।

कूटघटितलक्षणम् ।

अन्ये तु वृत्तिमद्वृत्तयो यावन्तः साध्याभावसमुदायाधिकरणावृत्तित्वाभावास्तद्वत्त्वं, तादृशवृत्तित्वाभावश्च स्वव्यापकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताको बोध्यः, प्रयोजनञ्चोक्तप्रायम् । साध्याभावाधिकरणावृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्म्मावच्छिन्नत्वेवाभावस्य वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यतिव्याप्तिरतः समुदायेति । साध्याभावश्च साध्यतावच्छेदकसम्बन्धेन बोध्यः तेन समवायेन वह्नेः साध्यत्वे धूमे संयोगेन च तथात्वे वह्न्यवयवत्वे पर्व्वत-वह्न्यवयवसंयोगि च पर्व्वतस्य वह्न्यवयवस्य च सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेऽपि नातिव्याप्तिः ।

गादाधरी विवृतिः ।

'अन्ये त्विति, घटत्वादिना निर्धूमवृत्तित्वाद्यभावमादाय

व्यभिचारिण्यतिव्याप्तिवारणाय 'यावत्त्वोपादानं, एवञ्च (१) केवलान्वयिनः साध्यस्य व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्य प्रसिद्ध्या तत्समुदायाधिकरणजगद्वृत्तित्वस्याहृत्तौ प्रसिद्धः समानाधिकरणधर्म्मावच्छिन्नाभावोपि यावदन्तर्गत इति तद्वत्त्वविरहात्तादृशसाध्यके विषयिताद्यतिरिक्तसम्बन्धेन (२) हेतावव्याप्तिः। साधनसमानाधिकरणत्वेन साध्याभावविशेषणपक्षे च व्यतिरेकिसाध्यस्य व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्य सद्धेतौ लक्षणघटकतया जगत एव तत्कूटाधिकरणत्वाद्व्यतिरेकिसाध्यकेऽपि विषयितातिरिक्तसम्बन्धेन हेतावव्याप्तिरिति वृत्तिमद्वृत्तित्वमभावविशेषण, 'तादृशवृत्तित्वेति साध्याभावसमुदायाधिकरणवृत्तित्वेत्यर्थ., 'प्रयोजनञ्चेति पूर्व्वदलप्रयोजन, आलोकाद्यवृत्तित्वेन निर्वह्निवृत्तित्वाभावमादाय वह्निमान् धूमादित्यत्राव्याप्तिवारणं पूर्व्वलक्षणे उक्तमेव, चरमदलप्रयोजनन्तु साधनसमानाधिकरणत्वस्य साध्याभावाविशेषणत्वे केवलान्वयिसाध्यके ज्ञेयत्वादिहेतौ घटादिवृत्तित्वाभावमादायाव्याप्तिवारणमेव, न तु वह्निमान् धूमादित्यादौ महानसवृत्तित्वाद्यभावव्यावर्त्तन तत्र महानसादेर्वह्नित्वाद्यवच्छिन्नवह्न्यभावानधिकरणत्वेन साध्याभावकूटा-

(१) वृत्तित्वाभावे यावत्त्वोपादाने चेत्यर्थ, अन्यथा घटत्वादिना जगद्वृत्तित्वाभावमादायैव लक्षणसमन्वयाद्वृत्तिमद्वृत्तित्वविशेषणस्य पदकृत्योऽव्यावर्त्तकतापत्तिरिति भाव ।

(२) विषयितासम्बन्धेन हेतौ जगद्वृत्तित्वस्य समानाधिकरणधर्म्मावच्छिन्नाभावोऽप्रसिद्ध एव व्यतिरेकेऽपि विषयितासम्बन्धेन ज्ञानादौ सम्भवात् तदर्थं उक्तं विषयिताद्यतिरिक्तेति आदिपदात् तादात्म्यपरिग्रह ।

भावाधिकरणवृत्तित्वत्वाव्यापकतया तादृशाभावमादाय दोषा-प्रसक्तेः, तदुपादाने व्यतिरेकिसाध्यकमात्र एवोक्तरीत्या तादृश-प्रतियोगित्वाप्रसिद्ध्या अव्याप्तिप्रसङ्गाच्च, तथाच धूमवान् वह्नेरि-त्यादौ घटत्वेन जगद्वृत्तित्वाभावमादायातिव्याप्तिरित्याशयेन दी-धितिकृतेदमभिहितं, अतिव्याप्तिवारणाय शेषदले समुदायप्रवेशने च निर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताकस्यालोकावृत्तित्वावच्छि-न्नाभावस्य वह्निमान् धूमादित्यत्र शेषदलाक्रान्ततया पूर्व्वदलो-पादानमावश्यकं, तत्र च समुदायाप्रवेशे व्यधिकरणधर्म्मावच्छिन्न-साध्याभावाधिकरणवृत्तित्वत्वव्याप्यप्रतियोगिताकस्यालोकावृत्ति-वृत्त्यभावस्य धूमेऽसत्त्वादव्याप्तिरिति तत्रापि तत्प्रवेशनमिति केचित् समादधति ।

परे तु प्रतियोगित्वव्यापकत्वविशेष्यतापन्नमेव साध्याभाव-समुदायाधिकरणवृत्तित्वत्व व्यापकत्वविशेषणविधया निवेश्यते न तु तद्दलस्योक्तरीत्या द्विधा निवेशः, एवञ्च पूर्व्वपक्ष एवायं नावतरति । न च गुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वे प्रतियोगित्वव्यापकत्वविशेषितसाध्याभावसमुदायाधिकरणवृत्तित्व-त्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वं नाभाव-प्रतियोगितावच्छेदकमिति तादृशावच्छेदकत्वत्वावच्छिन्नाभाव-रूपव्यापकतानिवेशासम्भवात् तद्दलस्य द्विधा निवेशनमावश्यक-मिति वाच्यम् । व्यापकात्वस्योपलक्षणविधया साध्याभावसमु-दायाधिकरणवृत्तित्वत्वरूपव्याप्यांशे निवेशसम्भवात् व्यापकता-वच्छेदकावच्छिन्नाभाववानित्यादिस्थाने व्यापकतावच्छेदकत्वाश्र-

स्यैव उक्तावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकत्वेनाभावबुद्धौ व्यापकतायाः उपलक्षणतया भानेऽविरोधात्। वस्तुतस्तु गुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमपि नाभावप्रतियोगितावच्छेदक वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वादिरूपसमनियतधर्म्मापेक्षया व्यधिकरणधर्म्मावच्छिन्नसाध्याभावेनाधिकेन घटितस्य तस्य (१) गुरुत्वादिति तादृशधर्म्मावच्छिन्नाभावो निवेशयितुं न शक्यः, किन्तु तादृशान्योन्याभावप्रतियोगितावच्छेदकं यद्यत्तद्भेदकूटमेव निवेशनीयम्, एवञ्च प्रतियोगिताव्यापकत्वघटितोक्तधर्म्मस्य प्रतियोगितानवच्छेदकत्वमकिञ्चित्करमेवेत्याहुः।

'तेनेति, समवायेन वह्नेः साध्यत्वे पर्व्वतस्य सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेऽपि धूमे नातिव्याप्तिः, संयोगेन वह्नेस्तथात्वे वह्न्यवयवस्य तादृशाभावद्वयानधिकरणत्वेऽपि वह्न्यवयवत्वे नातिव्याप्तिः, समवायेन वह्नेः साध्यत्वे संयोगेन तस्य तथात्वे च पर्व्वतस्य वह्न्यवयवस्य च तादृशाभावद्वयानधिकरणत्वेऽपि -वह्न्यवयवसंयोगे नातिव्याप्तिरिति योजना, 'सम्बन्धद्वयाव-
...' संयोगसम्बन्धावच्छिन्नवह्न्यभाव-समवायसम्ब-
...च्छिन्नवह्न्यभावद्वयं, साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियो-
... [illegible] तादृशाभावद्वयानधिकरणस्य पर्व्वतादेः साध्या-

(१) साध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य।

भावकूटानधिकरणतया तत्कूटाधिकरणवृत्तित्वाभावा यावन्तः तद्वत्त्वं धूमादावव्याहतमेवेत्यतिव्याप्तिः स्यादिति भावः। न च साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावनिवेशनेऽपि समवायेन वह्नौ साध्ये संयोगेन हेतौ धूमे नातिव्याप्तिर्व्वारयितुं शक्यते समवाय-सम्बन्धावच्छिन्नवह्न्यभावकूटाधिकरणसंयुक्तत्वस्य व्यधिकरणधर्म्मा-वच्छिन्नभावस्यैव संयुक्तवृत्तित्वात् संयुक्तमात्रस्यैव तादृशाभावकूटा-धिकरणगगनादिसंयुक्तत्वादिति कथमत्र व्यावृत्तिप्रदर्शनं सम-वायेन धूमहेतुकस्थलपरता च न युज्यते समवायेन धूमवतः साध्याभावकूटाधिकरणत्वानिराकरणादिति वाच्यम्। संयुक्त-मात्रस्य गगनादिसंयुक्तत्वेऽपि तादृशसंयोगस्य वृत्त्यनियामकतया संयोगेन वह्न्यवयवान्यवृत्तित्वाभावस्य संयोगेन वृत्तिमद्वृत्तेः सुलभतया (१) वृत्तिपदस्य यथाश्रुतपरतामते तादृशव्यावृत्तिदान-सङ्गतेः, वृत्त्यनियामकतादात्म्यादिसम्बन्धेन व्याप्तिस्वीकारे वृत्ति-पदस्य सम्बन्ध्यर्थकत्वमावश्यकमित्यभिप्रायेण तदुपेक्ष्य द्वितीय-स्थलानुसरण, साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वपक्षे समवायसम्बन्धावच्छिन्नवह्न्यभावस्य वह्न्यवयवत्वादिरूपसाधनस-मानाधिकरणत्वाभावेन न तत्रातिव्याप्तिसम्भवः, एवं सत्ताभाववान् द्रव्यत्वादित्यादावतिव्याप्तिवारणाय साध्यसामानाधिकरण्ये सतीति विशेषणप्रवेशस्यावश्यकतया संयोगादिना वह्निमत्त्ववर्त्तमान-

(१) [illegible]

वह्न्यभाववत्त्वादौ तेनाप्यतिव्याप्तिवारणेऽपि, अत एव उक्तम्: 'पर्वत-वह्न्यभावसंयोगावच्छिन्नतानवगमे, संयोगेन द्रव्याणामवृत्तितया पर्वतस्य समानाधिकरणावच्छिन्नात्यन्ताभावाद्यधिकरणत्वेऽपि न तत्र व्याप्यवृत्तित्वविशिष्टसाध्याभावकूटाधिकरणत्व विवक्षणीयत्वात्तं तादृशसाध्याभावकूटवत्त्वम्, अन्यथा अव्याप्यवृत्तिसंयोगादिसाध्यके व्यभिचारिणि जगत एव साध्याभावकूटाधिकरणत्वेनातिव्याप्तिरिति दर्शितहेतोः पर्वतवृत्तित्वेऽपि तादृशाभावकूटाधिकरणवृत्तित्वाभावोऽक्षत एवेत्यतिव्याप्तिप्रसक्तिः ।

तत्त्वचिन्तामणि-दीधितिः ।

तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोऽपि वोध्यः तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपक्षावृत्तित्वाद्यवच्छिन्नप्रतियोगिताकाभावकूटाधिकरणमप्रसिद्धं तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववति सामान्यादाववर्त्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिरतिव्याप्तिर्वा, नाप्यभावत्वादिना अभावादौ साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरित्याहुः ।

गादाधरी विवृतिः ।

पूर्ववदत्र साध्याभावपदेन साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकरूपावच्छिन्नाभावविवक्षणे नानाविपक्षके तथाविधतत्त-

द्विपचावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्धा अव्याप्तिः सा-ध्यतावच्छेदकविशिष्टसमव्यापकतावच्छेदकावच्छिन्नाभावनिवेशने च गौरवमिति साध्यतावच्छेदकसमव्याप्तप्रतियोगिताकाभाव एव विवक्षितुमुचितः तार्णातार्णदहनवृत्तिहित्वाद्यवच्छिन्नप्रतियोगिता-काना तथाविधसाध्याभावानामधिकरणे धूमादेर्वृत्तावपि वह्नि-त्वाद्यवच्छिन्नवह्न्यभावघटिततादृशाभावकूटवत्यवृत्तेरव्याप्त्यनवका-शात् इत्याशयेन तथाविधमेवाभावं निवेशयति, 'तथेति, 'स्वं' प्रतियोगिता, समनियताभावैक्यमते साध्याभावप्रतियोगितायाः साध्याभावसमनियताभावप्रतियोगिपदार्थान्तरवृत्तित्वेऽपि (१) सा-ध्यतावच्छेदकेन व्यधिकरणेन वा धर्म्मेणावच्छिन्नायाः साध्यमात्र-वृत्तिप्रतियोगितायाः साध्यतावच्छेदकसमनैयत्यमक्षतमेव । अथ घटत्वाद्यवच्छिन्ना या वाच्यत्वनिष्ठप्रतियोगिता सा घटादिभिन्न-यावद्वस्तुवृत्तिरेव स्वीक्रियते न तु वाच्यत्वादिमात्रवृत्तिस्तथा सति घटत्वेन प्रमेयत्व नास्तीत्यादिप्रतीतिविषयप्रतियोगितान्तरकल्पने गौरवादिति तादृशप्रतियोगितायां न वाच्यत्वत्वादिरूपसाध्यताव-च्छेदकसमनैयत्यमिति चेत्, का क्षतिः, वाच्यत्वभिन्नत्वेन वाच्यत्वं नास्तीत्यादिप्रतीतिविषयमभावमादायैव तल्लक्षणसमन्वयसम्भवात् स्वव्यधिकरणवाच्यत्वभिन्नत्वावच्छिन्नायाः प्रतियोगिताया वाच्यत्व-भिन्नवृत्तित्वस्यासम्भावितत्वात् । वस्तुतस्तु घटत्वाद्यवच्छिन्नवाच्य-त्वाद्यभावप्रतियोगितायां व्यधिकरणघटत्वादेरिव समानाधिकर-

---

(१) साध्यसमनियतपदार्थान्तरवृत्तित्वेऽपीति पा० ।

णवाच्यत्वत्वादेरप्यवच्छेदकत्वमावश्यकं घटत्वेन वाच्यत्वं नास्तीत्यादिप्रतीत्या वाच्यत्वत्वादेः प्रतियोगितावच्छेदकत्वानवगाहनात् तादृशप्रतीतेर्वाच्यत्वत्वादिविशिष्टवैशिष्ट्यानवगाहित्वेन तत्र वाच्यत्वत्वादिप्रकारकज्ञानानपेक्षापत्तेः, एवञ्च घटत्वेन प्रमेयं नास्तीत्यादिप्रतीतिविषयप्रतियोगितानामतिरिक्तत्वमावश्यकम् अवच्छेदकभेदादिति घटत्वेन वाच्यत्वं नास्तीत्यादिप्रतीतिविषयप्रतियोगिता वाच्यत्वादावेव वर्त्तते न त्वन्यत्रापि मानाभावादिति घटत्वादिना वाच्यत्वाद्यभावोऽपि लक्षणघटकः। अथैवं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितलक्षणे वह्नित्वाद्यवच्छिन्नसाध्यकस्थले वह्नित्वादिना घटाद्यभावो लक्षणघटको न स्यात् व्यापकतावच्छेदकवह्नित्वादिपर्य्याप्तप्रतियोगितावच्छेदकताकत्वविरहान्महानसीयवह्नित्वाद्यवच्छिन्नाभाववारणायावच्छेदकतापर्य्याप्तिविवक्षणस्यावश्यकत्वादिति चेन्न, व्यापकतावच्छेदकपर्य्याप्तत्वं हि व्यापकतानवच्छेदकावृत्तित्व तच्चेन्धनत्वाद्यवच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकतायामक्षतमिति तादृशाभावमादायैव तत्तल्लक्षणसमन्वयसम्भव इति। एवञ्च सार्व्वभौमानामेतल्लक्षणाभिप्रायकतया 'समवायितया वाच्यत्वाभावो घट एव प्रसिद्ध' इति मूलग्रन्थोपवर्णनमपि सङ्गच्छते। अथ पर्य्याप्तिसम्बन्धेन यत्रोभयत्वादिकं साध्यतावच्छेदकं तत्र प्रतियोगिताया अव्यासज्यवृत्तित्वेन तत्पर्य्याप्त्यधिकरणे प्रत्येकव्यक्तौ पर्य्याप्तिसम्बन्धेनोभयत्वादिव्यक्तेरत्यन्ताभावस्य तदवच्छिन्नभेदस्य च सत्त्वात्तस्य प्रतियोगिताव्यापकत्वं न सम्भवति। न चाव्याप्यवृत्तिसंयोगादेर्यत्र साध्यताव-

च्छेदकता तत्र तस्य प्रतियोगिताव्यापकत्वनिर्व्वाहाय प्रतियोग्य-सामानाधिकरण्यं व्यापकताघटकाभावे निवेशनीयं तावता उभ-यत्वस्यापि व्यापकत्वं निर्व्वहति पर्य्याप्तिसम्बन्धेनोभयत्वपर्य्याप्त्य-धिकरणस्य प्रत्येकानतिरिक्ततया प्रत्येकवृत्तेरुभयत्वाभावस्यापि प्रतियोगिसमानाधिकरणत्वादिति वाच्यम्। पृथिवीत्व-घटत्वो-भयत्वादिना यत्र साध्यता तत्र जातित्वावच्छिन्नाभावप्रतियो-गित्वसमानाधिकरणस्य तादृशसाध्यतावच्छेदकाभावस्य प्रतियो-ग्यधिकरणावृत्तित्वविरहेण तादृशसाध्यतावच्छेदकस्य तादृशप्रति-योगिताव्यापकत्वापत्त्या तादृशाभावमादाय द्रव्यत्वप्रकारकप्रमा-विषयत्वादिकेतावतिव्याप्त्यापत्तेः प्रतियोग्यनधिकरणवृत्तित्वस्यैवा-भावे निवेशनीयतया उभयत्वाभावव्यावर्त्तनासम्भवात् [illegible] वतः प्रत्येकं तदनधिकरणत्वात् तस्यैव तदधिकरण[illegible] व्यासज्यवृत्तित्वादिति चेन्न, सामानाधिकरण्य[illegible] प्रतियोगिसामानाधिकरण्याभावविशिष्टाभावस्य [illegible] तया एव निवेशसम्भवात् पृथिवीत्वादौ [illegible] त्वावच्छेदेन तदभावस्य प्रतियोगिसामानाधिकरण्य[illegible] [illegible] सामानाधिकरण्याभावविशिष्टतदभाव[illegible] [illegible] तदभाव[illegible] [illegible] भावानुपगमात् [illegible] [illegible]त्वात्। [illegible] [illegible]

नाव्यक्तिसाध्यकस्थले साध्यतावच्छेदकसमनैयत्यस्य प्रत्येकप्रति-
योगितायामसत्त्वेऽपि स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगि-
तात्वेन (१) समनैयत्यविवक्षणान्न दोषः तत्तद्वह्नि-तत्तद्धूमादि-
स्वरूपप्रतियोगितानामपि स्वावच्छेदकवह्नित्व-धूमत्वाद्यवच्छिन्न-
तदभावप्रतियोगितात्वेन वह्नित्व-धूमत्वादिसमनैयत्यात् वह्नित्व-
धूमत्वाद्यवच्छिन्नवह्न्यादिस्वरूपप्रतियोगितानां द्रव्यत्वाद्यवच्छिन्ना-
भावीयवह्न्यादिस्वरूपप्रतियोगितात्मकतया तदवच्छेदकद्रव्यत्वाद्य-
वच्छिन्नप्रतियोगितायाश्च घटादावपि सत्त्वात् न तत्प्रतियोगि-
तावच्छेदकावच्छिन्नप्रतियोगितात्वेन वह्नित्वादिसमनैयत्यमिति
तदभावीयत्वं विशेषणं, तथा सति वह्नित्वाद्यवच्छिन्नाभावीय
प्रतियोगिताया घटादावसत्त्वात् नानुपपत्तिः । [illegible]
वाच्यत्वत्वादिसमनियतप्रतियोगित्वाप्रसिद्धिर्दुर्वारैव [illegible]
र्मावच्छिन्नाभावानामभिन्नतया वाच्यत्वादिनि[illegible]
भिन्नत्वाद्यवच्छिन्नवाच्यत्वाभावीयप्रतियोगिताया [illegible]
वाच्यत्वादिनिष्ठतत्स्वरूपप्रतियोगित्वादि[illegible]
त्वावच्छिन्नप्रतियोगितायां घटादावपि सत्त्वात् [illegible]
धर्मावच्छिन्नतदभावीयप्रतियोगितात्वेन [illegible]

न्येन हेतुत्वानुसरणम्। साधनसमानाधिकरणत्वस्य साध्याभावविशे-षणतापत्ते जातित्वाद्यवच्छिन्नाभावस्य साधनासमानाधिकरणतया वारणसम्भवेऽपि प्रत्येकं साधनसमानाधिकरणजन्यावृत्तित्व-तेजो ऽवृत्तित्वाद्यवच्छिन्नसमवायसम्बन्धावच्छिन्नाभावकूटाधिकरणतायाः सामान्यादावेव सत्त्वादतिव्याप्तिर्दुर्व्वारैवेति ध्येयम्। द्वितीयदल-प्रदेशप्रयोजनमाह, 'नापीति, घटत्वाभावत्वादिना साध्यतायां घटादावेव साध्याभावकूटाधिकरणत्वप्रसिद्धिरत उक्तम् 'अभावत्वा-दिनेति, आदिपदान्मेयत्वादिपरिग्रहः, 'तत्तत्साध्येति घटत्वा-भाव-पटत्वाभावादिरूपसाध्यस्य यः साध्यतावच्छेदकव्याप्यप्रति-योगिताको घटत्व-पटत्वादिरूपोऽभावस्तत्समुदायाधिकरणाप्रसिद्धे-रित्यर्थः, यावतामैकाधिकरण्य सम्भवतीति विवक्षायामपि तादृशा-भावसमुदायवति घटादौ हेतोर्वृत्तेरव्याप्तिरेव। न च यावताम-भावानामैकाधिकरण्यसम्भवस्तादृशाभावकूटाधिकरण यद्यत् ताव-दन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकोऽभावो विवक्षणीयः घटवृत्तित्वत्वाद्यवच्छिन्नाभावश्चोपदर्शितस्थले न तथा जगत एव तावदन्यतमान्तर्गतत्वात्, अपि तु घटत्वादिना जगद्वृत्तित्वसामा-न्याभाव एव वृत्तिमद्वृत्तिस्तथाविधोऽभावः, तावदधिकरणान्यतम-त्वञ्च तत्तदधिकरणावृत्तिशून्यत्वं न तु तत्तदधिकरणान्यान्यत्वमतो नाप्रसिद्धिरिति वाच्यम्। एवमपि जातिप्रतियोगिकाभाववान् मेयत्वादित्यादौ जातिमतामेव घटत्व-पटत्वघटिततादृशकूटाधि-करणतया जातिमद्वृत्तित्वत्वावच्छिन्नाभावस्यापि तादृशतया अव्या-प्तेर्दुर्व्वारत्वादिति। अत्र साध्याभाववत्तायां सम्बन्धविशेषानिवेशे

प्रकारकज्ञानं प्रतिबन्धकम् अभावाभावस्यातिरिक्ततामते तादृश-ज्ञानप्रतिबन्धकताया आवश्यकत्वात्, तस्य प्रतियोगिस्वरूपत्वमते-ऽपि फलबाध्यानुरोधेन तदावश्यकत्वात् अभावाभावस्यातिरिक्तत्व-ग्रहदशाया तत्प्रतिबन्धकताया दुरपह्नवत्वाच्च, एवञ्च कालिकसम्ब-न्धावच्छिन्नप्रतियोगिताके घटत्वाद्यभाव-जातित्वादेरभावे साध्ये आत्मत्व-जातित्वादावव्याप्तिर्दुर्वारैव दैशिकविशेषणतासम्बन्धस्यापि निरुक्तरूपानात्तत्वात्। न चैवं तादृशसाध्यवत्यपि पक्षे तादृश-साध्याभावत्वावच्छिन्नप्रकारकप्रमारूपप्रतिबन्धकज्ञानसम्भवात्तद्वि-षयस्य हेत्वाभासतापत्तिरिति वाच्यम्। तत्र पक्षे साध्यं नास्तीति-ज्ञानस्य भ्रमत्वं निर्विवादमिति तदुपपादनाय तादृशसाध्यप्रति-योगिनस्तादृशसाध्याभावत्वेन दैशिकविशेषणतया वृत्त्यनभ्युपगमा-दित्युच्यते, तदा निरुक्तसम्बन्धेन तादृशसाध्याभावत्वावच्छिन्नाधि-करणतावृत्त्वं विवक्षणीयं हेतुमति च तादृशाधिकरणताविर-हान्नोक्ताव्याप्तिः।

परे तु घटत्वादेरपि दैशिकविशेषणतास्वीकार आवश्यकः अन्यथा घटे न घटत्वाभाव इत्यादिनञ्न्वयिप्रतीति-व्यवहारयो-रनुपपत्तिः काले न द्रव्यत्वमित्यादिप्रयोगविरहेण समस्य-र्वैदैशिकविशेषणतासंसर्गावच्छिन्नाधेयत्वान्वितस्वार्थबोधजनकत्व-स्यैव (१) नञ्पदे व्युत्पन्नत्वात्। न च भावरूपप्रतियोगिवा-चकपदसमभिव्याहृतनञा दैशिकविशेषणतासम्बन्धावच्छिन्नाधेय-तया अभावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञा च प्रति-

(१) दैशिकविशेषणतासंसर्गावच्छिन्नाधेयत्वान्वितस्वार्थबोधजनकत्वस्यैवेति पा० ।

त्वाद्यवच्छिन्नेति शुद्धद्रव्यत्वत्वाद्यवच्छिन्नेत्यर्थः, 'पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वादिति, विशेषणावच्छिन्नस्य शुद्धविशेष्यानतिरिक्तत्वादिति भावः। विशिष्टस्यातिरिक्तत्वे विशिष्टद्रव्यत्वादिसाध्यकस्थले शुद्धद्रव्यत्वाद्यभावस्य वारणसम्भवात् दूषणान्तरमाह, 'किञ्चेति, 'रूपाभावेति रूपत्वाद्यवच्छिन्नाभावेत्यर्थः, 'सद्धेताविल्यव्याप्तिसूचनाय, 'सकलरूपव्यक्त्यधिकरणाप्रसिद्धेरिति, तथाच तद्घटितसाध्याभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरिति भावः। 'यावतामिति, तथाच प्रकृते सकलरूपघटितसमुदायस्य न लक्षणघटकता सकलरूपाणामैकाधिकरण्यविरहात् किन्तु एकैकरूपव्यधिकरणधर्मावच्छिन्नाभावघटितकूटानामेव प्रत्येकं तदधिकरणता च रूपवत्स्वेव प्रसिद्धेति नाव्याप्त्यवकाश इति भावः। 'इदमिति, वायौ पृथिवीवृत्तिद्वित्व संयोगादिसत्त्वाद्वायुत्वादेरुक्तसाध्यव्यभिचारिता, गुणसामान्याभावस्य साध्यत्वे वायवीयस्पर्शादेरपि साध्याभाव' तद्घटितनिरुक्ताभावकूटवद्वृत्तित्वाभावस्य यावदन्तर्गतस्य वायुत्वादावभावान्नातिव्याप्तिसम्भवः इति 'पृथिवीवृत्तीति, घट-तद्वायुद्वित्व-पट-तद्वायुद्वित्वादिरूपपृथिवीवृत्तिगुणाभावाभावाना यावतां वायावेकाधिकरण्यसम्भवेन तद्घटितकूटस्यापि लक्षणघटकतया तद्वति वायौ हेतोर्वृत्त्या नातिव्याप्तिसम्भवः। न च द्वित्वादिरूपसाध्याभावस्य उत्पत्तिकालेऽसत्त्वेन कालिकाव्याप्यवृत्तितया व्याप्यवृत्तित्वविशेषणेन तद्व्यावृत्तिः पार्थिवपरमाण्वेकत्वादिरिव लक्षणघटक इत्यतिव्याप्तिर्दुर्व्वारैवेति वाच्यम्। प्राचीनमते द्वित्वादिमति तत्प्रागभावादिकालावच्छेदेन

BIBLIOTHECA INDICA

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES No 1323

तत्त्वचिन्तामणि-दीधिति-विवृतिः



TATTVACINTĀMANI DIDHITI-VIVRITI

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY

MAHĀMAHOPĀDHYĀYA KAMAKHYANATHA TARKAVAGISA

Late Professor, Sanskrit College

VOLUME I FASCICULUS VI

Calcutta.

PRINTED BY UPENDRANATHA CHAKRAVARTI AT THE SANSKRIT PRESS
5 Nandakumar Chaudhury's 2nd Lane

AND PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL, 1 PARK STREET

1912

वेतत्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन समवेतमात्रस्यैव तदभावतया (१) वायुत्वादेरपि तथात्वात्(२)। न च पृथिवीसमवेतत्वविशिष्टाभाववति जलादौ समवेतत्वावच्छिन्नाभावविरहान्न तयोः समनैयत्यं एवञ्च गुणधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वमतेऽपि पृथिवीसमवेतत्वस्य तादृशविशिष्टाभावप्रतियोगितावच्छेदकत्वमावश्यक समवेतत्वविशिष्टवति जलादौ तत्सत्त्वेन तन्मात्रस्य तत्प्रतियोगितावच्छेदकत्वासम्भवात् इति वाच्यम्। विशिष्टाभावस्य साध्यत्वे तस्य वायुसाधारणतया सद्धेतुत्वप्रसङ्गेन पृथिवीसमवेतत्वोपलक्षिताभावस्यैवात्र साध्यतयोपगन्तव्यत्वादिति गुणपदोपादानं, पृथिवीसमवेतगुणत्वावच्छिन्नाभावश्च गुणादिसाधारणतया न समवेतत्वावच्छिन्नाभावसमनियत इति नोक्तदोषावसरः। ध्वंसप्रागभावावच्छिन्ने सामान्याभावमभ्युपगच्छतां वाय्वादेरुत्पत्तिकालाद्यवच्छेदेन पृथिवीवृत्तिगुणसामान्याभावरूपसाध्यको वायुत्वादि. सद्धेतुरेवेति नातिव्याप्तिरत्र इत्यतः, साध्यान्तरमाह, 'सत्तान्येति सत्तान्यत्वनिवेशप्रयोजनं दर्शयन् [illegible]त्वादेरपि सत्तान्यसमवेताभावाभावत्वात् 'पृथिवीति, अत्र पृथिवीपद पृथिवीसामान्यपरमेव, घट पट-वायुवृत्तित्वादि [illegible]रणात्यन्ताभावप्रतियोगित्वेन [illegible], 'रूपादिघटितत्वेनैतत् रूपपदोपादान [illegible]न्यत्वम्। पूर्व्वसाध्यमिति [illegible]

(१) [illegible]

(२) [illegible]

वागुलेऽतिव्याप्तिवारणसम्भवादाह, 'स्यादेतदि'ति । ननु तद-
निगताभावेऽसति सत्तान्यनिष्ठसमवेतत्वाभावाभावस्य सत्ता-
त्मकसमवेतत्वावच्छिन्नाभावाभिन्नतया विषमस्य, तद्विशेषसम-
वेतत्वावच्छिन्नाभावस्य विषमस्य तद्विशेषसमवेतसामान्याभावा-
भिन्नतया वागुलादिरपि तदभाव इति न तादृशाभावमादायातिव्याप्तिः सम्भवतीति पूर्वोक्ताया स्वाभावत्वात् वागुलादित्वव्याप्तेर्वोक्तविचार्या दुर्व्वारतामाह, 'यन्न' इति, यत्रायमाशयः यावतामेकाधिकरण्यं तावत्समुदायाधिकरणत्वमित्यस्य यत्किञ्चिदधिकरणवृत्तिसकलसाध्याभावाधिकरणत्वं यत्किञ्चिदधिकरणवृत्तिसाध्याभावत्वव्यापकाधेयताकत्वपर्य्यवसितमर्थः, साध्याभावाधिकरणाधिकरणकसकलसाध्याभावाधिकरणत्वं साध्याभावसमानाधिकरणसाध्याभावत्वव्यापकाधेयताकत्वपर्य्यवसितं वा, आद्ये व्यभिचारिमात्रे अतिव्याप्तिः जगत एव साध्यवद्यत्किञ्चिदधिकरणव्यक्तिवृत्तिसाध्याभाववत्त्वादिति समुदायपदोपादानस्याकिञ्चित्करतया तद्विवरणासम्भवः, द्वितीये च साध्याभावसमानाधिकरणसाध्याभावत्वमुक्तस्थले निखिलरूपानामेवाचतमिति तादृशसाध्याभावत्वव्यापिका न केनाप्यधिकरणेन निरूपिताधेयतेति तादृशाधिकरणाप्रसिद्धिस्तदवस्थैवेति ।

तत्त्वचिन्तामणि-दीधितिः ।

किञ्च हेतुतावच्छेदकसम्बन्धेन या साध्याभाववति वृत्तिस्तदभावो वक्तव्यः, अन्यथा धूमादावव्याप्तिः,

साध्यतावच्छेदकसम्बन्धेन साध्याभाववति कालादौ वृत्तिसम्भावस्यैव वृत्तेर्व्यभिचारित्वतिप्रसङ्गो वा, तथाच सत्तादिसाध्यके संयोगेन समवायेन वा हेतावव्याप्तिः साध्याभाववति तेन सम्बन्धेन वृत्तेरप्रसिद्धेः, साधनसमानाधिकरणत्वेन साध्याभावा विशेषणीया इति चेद्विशेष्यन्तां तथापि भूतत्व-मूर्त्तत्वाद्योरन्यतरत्वेनाभावं साध्ये स्पर्शवदन्यत्वाद्यावतिव्याप्तिः तादृशसाध्याभावसमुदायवति पृथिव्यादौ तस्यावृत्तेः । किञ्च महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणताविशेषेण हेतावतिव्याप्तिः तादृशसाध्याभावसमुदायवति महाकाले तेन सम्बन्धेन वृत्तिमन्भावस्यैव वृत्तेः ।

गादाधरी विवृतिः ।

ननु स्ववृत्तिसाध्याभाववत्त्वव्यापका यद्यदधिकरणवृत्तित्वं तत्तदधिकरणवृत्तिसाध्याभाववत्त्वव्यापकवृत्तिताधि[illegible]रणानार्थं, धूमवान् वह्नेरित्यादौ महानसादिषु न तत्र संयोगेनकपिवृत्तितायास्तद्वृत्तिसाध्याभाववत्त्वव्यापकत्वात् पर्वतादिवृत्त्यादिवृत्तिसाध्याभाववत्त्वस्य च समानाधिकरणपर्वताद्यधिकरणाभावाभावसाधारणतया तद्वृत्तित्वाव्याप्यत्वात् [illegible] त्वम् इति नातिव्याप्तिः, तादृशयत्किञ्चिदधिकरणवृत्तित्वविशि[illegible]त्वाभावस्य पर्वतादौ सत्त्वेऽपि न क्षतिः तादृश [illegible]

दन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशात्, अन्यतमत्वञ्च तत्तद्वृत्तिभिन्नत्वं न तु तत्तदन्यान्यत्वम् अतो न केवलान्वयिसाध्यकेऽप्रसिद्धिः, तादृशत्वं यत्तत्तदधिकरणवृत्तित्वाभावकूटवत्त्वनिवेशेऽपि केवलान्वयिसाध्यकेऽव्याप्तिर्जगतोऽपि तथात्वादिति (१) तदुपेक्षितम्। रूपसामान्याभाववान् वायुत्वादित्यादौ च सकलरूपवतामेव तथात्वं सवृत्तिताया एव तत्तद्घटादिवृत्तिसाध्याभावत्वव्यापकत्वादतोनाव्याप्तिः। अथवा स्ववृत्तिसकलसाध्याभावसमानाधिकरणसाध्याभावत्वावच्छेदेन यदधिकरणवृत्तित्व तादृशाधिकरणमेवाधिकरणान्तार्थः, धूमवान् वह्नेरित्यादौ च तादृशाधिकरणं न साध्यवत् तद्वृत्तिसकलसाध्याभावसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य तदवृत्तित्वात् किन्तु अयोगोलकाद्येवेति जगतोऽतथात्वात् नातिव्याप्तिः, रूपाभाववान् वायुत्वादित्यादौ च तादृशाधिकरणं तत्तद्घटादिरेव व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव तद्वृत्तिसकलसाध्याभावसमानाधिकरणत्वात् तादृशस्य च तद्वृत्तित्वनियमात्, तद्वृत्तिसाध्याभाववत्त्वञ्च तत्रैव प्रसिद्धमिति नाव्याप्त्यवसरः, शेषं पूर्व्ववत् (२)। अथवा व्यासज्यवृत्तिसाध्याभावसाववृत्तिधर्मावच्छिन्नाधिकरणत्वमेव साध्याभावकूटाधिकरणत्वं जगत एव साध्याभावत्वावच्छिन्नाधिकरणतया व्यभिचारिण्यतिव्याप्ति-

---

(१) तादृशस्वत्त्वाक्रान्तत्वात् तद्वृत्तित्वाभावस्य हेतावसत्त्वादिति भावः।

(२) तादृशाधिकरणं यद्यत् तावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिता, अन्यतमत्वञ्च पूर्व्ववदित्यर्थः।

धारणाय व्यासज्यवृत्तित्वं धर्म्मविशेषणं, तथासत्यपि जगतएव व्यधिकरणधर्म्मावच्छिन्नसाध्याभावमात्रवृत्तितथाविधधर्म्मावच्छिन्नाधिकरणत्वात् स एव दोष (१) इति आधेयतावच्छेदकतादृशधर्म्मन्यूनवृत्ति सद्व्याप्यं यद्यत्तदन्यत्वेनापि धर्म्मो विशेषणीयः, न्यूनवृत्तित्वञ्च स्वसमानाधिकरणाभावप्रतियोगित्वमात्रम्, उक्तस्थले तद्रूपव्यधिकरणधर्म्मावच्छिन्नसाध्याभावोभयत्वादिरेव तादृशो धर्म्मः तस्य रूपान्तरसाधारणत्रित्वादिन्यूनवृत्तित्वेऽपि तादृशत्रित्वावच्छिन्नस्य क्वचिदप्यवृत्तेः तस्याधेयतानवच्छेदकतया आधेयतावच्छेदकीभूततादृशधर्म्मन्यूनवृत्तिताविरहात्। न च समनियताभावैक्ये व्यधिकरणधर्म्मावच्छिन्नाभावमात्रवृत्तिव्यासज्यवृत्तिधर्म्माप्रसिद्ध्या केवलान्वयिसाध्यकेऽव्याप्तिरिति वाच्यम्। तथा सति व्यासज्यवृत्तित्वस्थले अव्यासज्यवृत्त्यनेकवृत्तिधर्म्मभिन्नत्वस्य विशेषणीयत्वात् केवलान्वयिसाध्यकस्थले साध्याभावत्वस्यैव तथात्वात्। न च तथापि तत्र तादृशाभावत्वन्यूनवृत्तिव्याप्यधर्म्माप्रसिद्ध्या तद्दोषतादवस्थ्यमिति वाच्यम्। न्यूनवृत्तिव्याप्यत्वस्थानेऽन्यूनवृत्तित्वव्याप्यत्वोभयाभाववत्त्वस्य निवेशनीयत्वादित्यतो दोषान्तरदानाय वृत्तौ हेतुतावच्छेदकसम्बन्धं निवेशयति, 'किञ्चेति, 'धूमादावव्याप्तिरिति, वह्निमन्मात्रसमवेतघटादिव्यक्तौ वर्त्तमानस्य निर्वह्निसमवेतत्वाभावस्य तत्रासत्त्वादिति भावः। एतच्च यत्किञ्चित्सम्बन्धावच्छिन्नतादृशवृत्तितात्वसमनियतप्रतियोगिताकाभावनिवेशाभिप्राये-

(१) व्यधिकरणधर्म्मावच्छिन्नसाध्याभावकूटत्वरूपव्यासज्यवृत्तिधर्म्मे तदवच्छिन्नाधिकरणत्व जगत इति।

ण, अन्यथा निर्वह्निसंयुक्तत्वादिसाधारणतादृशवृत्तित्वत्वं प्रति तथ
विधाभावप्रतियोगिताया अव्यापकत्वात्तस्य लक्षणाघटकतय
वृत्तिमन्मात्रस्यैव साध्याभावाधिकरणकालादौ वृत्तेर्निर्वह्निवृत्ति
त्वसामान्याभावस्य व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यैव वृ
त्तिमद्वृत्तित्वादव्याप्त्यसङ्गतेः। अतएव सम्बन्धमनिवेश्य तादृशा
धिकरणवृत्तितात्वसमनियतप्रतियोगिताकाभावनिवेशपक्षे दूषणा
न्तरमाह, 'साध्यतावच्छेदकसम्बन्धेनेति, एतच्च कालिकसम्बन्धाव
च्छिन्नप्रतियोगिताकसाध्याभावस्य कालादावसत्त्वेऽपि तस्य यथा
विवक्षितसाध्याभावसमुदायवत्त्वमक्षतमेवेति सूचनाय। 'कालादा
वित्यादिपदाद्विषयितासम्बन्धेन वस्तुमात्रसम्बन्धिन ईश्वरज्ञानादे
परिग्रहः, 'व्यभिचारिणीति यत्साध्यके वृत्तिमन्मात्राधिकरणस्य
कालादेर्विवक्षितसाध्याभावकूटवत्त्वं तादृशव्यभिचारिहेतावित्यर्थः,
द्रव्यत्वसाधनके द्रव्यत्व-पृथिवीत्वान्यतराभाव-शुद्धद्रव्यत्वाभावयो-
र्वायुत्वादिहेतुके रूपाद्यात्मकसाध्याभावस्य सत्तादिसाध्यके संयो-
गेन समवायेन वा यत्र हेतुता तत्र सत्तात्वावच्छिन्नाभावस्य
च साधनवदवृत्तित्वात् साधनसमानाधिकरणत्वेनाभावे विशे-
षिते न तानभावानादाय (१) उक्तस्थलेषु अव्याप्त्यतिव्याप्तिप्र-
सञ्जनसम्भव इत्याशङ्कते, 'साधनसमानेति, सद्धेतौ व्यधिकरण-
धर्म्मावच्छिन्नसाध्याभावानामेव साधनसमानाधिकरणतया तादृ-
शाभावकूटाधिकरणं जगदेव, व्यभिचारिणि च साध्यतावच्छेद-
कावच्छिन्नसाध्याभावस्यापि तथात्वात् तादृशाभावकूटाधिकरणं

(१) न तादृशाभावमादायेति पा०।

विशिष्टसत्त्वादेः प्रतियोगितानवच्छेदकत्वेऽपि समवेतवान् जाति-रित्यादौ समवायेन एतद्रूपान्यत्वविशिष्टाभाव-तद्रूपान्यत्वविशिष्टा-भावादीनां समवेतत्वसमनियतप्रतियोगिताकतया प्रत्येकं साधन-समानाधिकरणतया च तद्घटितकूटाधिकरणे सामान्यादौ हेतु-तावच्छेदकसमवायसम्बन्धेन वृत्तेरप्रसिद्धा अव्याप्तिवारणासम्भ-वात्, एवं विशिष्टस्यातिरिक्तत्वानामतावत्सम्बन्धादृशितविशिष्टाभा-वानां साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहोपपादनेन समाधानमपि हेयम् उक्तस्थल एव (१) द्रव्यत्व-तदन्यसमवेतो-भय-गुणत्व-तदन्यसमवेतोभय-कर्म्मत्व-तदन्यसमवेतोभयाभावाना साध्यतावच्छेदकसमनियतप्रतियोगिताकानां प्रत्येकं साधनसमा-नाधिकरणाना समुदायवति सामान्यादौ समवायेन वृत्तेरप्रसि-द्धा अव्याप्तेस्तावतापि वारणासम्भवात् । न च यादृशसाध्याभा-वस्तोमाधिकरणं साधनाधिकरणं तादृशस्तोमाधिकरणवृत्तित्वा-भावस्य विवक्षितत्वात् उक्ताभावसमुदायाधिकरणतायाः साधन-वत्यसम्भवात् न तत्समुदायस्य लक्षणघटकतेति नाप्रसिद्धिरिति वाच्यम् । एवं सत्यपि तादृशविशिष्टाभावाद्येकतरत्वधिकरण-धर्म्मावच्छिन्नाभावस्तोमस्य तादृशस्याधिकरणे केपाञ्चिद्वृत्तिमत्ताम-वृत्तेरव्याप्तितादवस्थ्यात्, एतादृशविवक्षानुसरणे भूतत्व-मूर्त्त-त्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यत्र भूतत्व-मूर्त्तत्वोभयघटि-तसाध्याभावकूटवति हेतोरवृत्तितया कस्मादित्यादेरप्रसक्ति-प्रसङ्गाच्च साधनवतो निरुक्तस्य कस्यचिदपि तादृशोभयघटित-

(१) द्रव्यत्वतदन्यसमवेतेत्यादिः ।

वृत्तित्वाभावप्रयुक्ताऽतिव्याप्तेरनवतारितत्वात् लक्षणान्तरादानमनु-चितमिति वाच्यम्। यतो हेत्वादिरूपाभावस्य नवीननये हेत्व-धिकरणे अनवच्छिन्नवृत्तिकत्वविरहः, अतएव 'पृथिवीवृत्तिगुणे-त्वादेः सद्धेतुत्वमाशङ्क्य 'सत्तान्येति ग्रन्थान्तरमनुसृतम्, इत्थञ्च नव्यनये तत्र दोषो न भवतीति भूतत्व-मूर्त्तत्वेत्याद्यनुसरणम्(१)। अथ साधनसमानाधिकरणत्वेन साध्याभावे विशेषितेऽपि सत्तावान् जातेरित्यादावव्याप्तिवारणमशक्यमेव प्रत्येकं साधनसमानाधि-करणाभ्यां द्रव्यत्वविशिष्टसत्ताभाव-द्रव्यान्यत्वविशिष्टसत्ताभावाभ्यां घटितस्याभावसमुदायस्य सामान्यादावेव सत्त्वात्तत्र च हेतुताव-च्छेदकसम्बन्धेन वृत्तेरप्रसिद्धेः।

यत्तु द्रव्यत्वादिविशिष्टसत्ताभावप्रतियोगितावच्छेदककोटौ सत्तात्वं न निविश्यते द्रव्यत्वादिवैशिष्ट्यमात्रस्यैव तत्प्रतियोगिताव-च्छेदकत्वसम्भवात् (२) इति द्रव्यत्वादिवैशिष्ट्यावच्छिन्नतत्प्रति-योगितायाः सत्तात्वसमनैयत्यविरहात् न तादृशाभावस्य लक्षण-घटकतेति समाधानं, तदतितुच्छं, द्रव्यत्वविशिष्टसत्तावान् जाते-रित्यादावपीदृशयुक्त्या साध्यतावच्छेदकतादृशविशिष्टसत्तात्वस्या-भावप्रतियोगितानवच्छेदकत्वात् द्रव्यत्ववैशिष्ट्यावच्छिन्नाभावस्य च साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावाद्व्यधिकरणधर्म्मा-वच्छिन्नाभावमादायातिव्याप्तेर्दुर्वारतया एतल्लक्षणवादिना गुरु-धर्म्मस्याभावप्रतियोगितावच्छेदकत्वमतस्यावलम्बनीयत्वात् द्रव्यत्व-

(१) न चेत्यादिरनुसरणमित्यन्त पाठो बहुष्वादर्शपुस्तकेषु नास्ति।

(२) लघुधर्म्मस्यावच्छेदकत्वसम्भवे गुरुधर्म्मस्यानवच्छेदकत्वादिति भावः।

वक्तव्यत्वात् एतद्विशेषणेन तद्व्यावृत्तेः। न च वाच्यत्वादि-
साध्यकस्थले घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावस्य संयोगादिव्यधि-
करणसम्बन्धावच्छिन्नवाच्यत्वाद्यभावाभिन्नतया साध्यतावच्छेद-
कव्यापकसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वमक्षतमिति
तत्परिहाय समानाधिकरणसम्बन्धावच्छिन्नत्वस्यापि समानाधि-
करणधर्म्मावच्छिन्नप्रतियोगित्वविशेषणतया आवश्यकत्वात् प्रमेय-
साध्यकस्थलीयोक्ताभावस्य व्यधिकरणसम्बन्धावच्छिन्नगगनाद्य-
भावाभिन्नत्वेऽपि प्रतियोगितावच्छेदकधर्म्मे साध्यतावच्छेदकव्याप-
कत्वविशेषणमन्तरेणैव विशिष्टभिन्नत्वमव्याहतमेवेति वाच्यम्।
एवमपि गगनत्वादिना प्रमेयसामान्याभावस्य समानाधिकरण-
धर्म्म-तादृशसम्बन्धावच्छिन्नप्रतियोगिताकतया उक्ताभावस्य तद-
भिन्नत्वेन तत्र विशिष्टभेदनिर्व्वाहाय तादृशविशेषणस्यावश्यक-
त्वात्, समानाधिकरणसम्बन्धावच्छिन्नत्वविशेषणं परित्यज्य साध्य-
तावच्छेदकसम्बन्धावच्छिन्नत्व प्रतियोगितायां निवेश्य तद्गर्भस्य (१)
साध्यतावच्छेदकव्यापकत्वरूपप्रतियोगितावच्छेदकविशेषणसार्थक-
त्वस्य चोपपादनसम्भवाच्च साध्यवद्वृत्तितादृशाभावभिन्नत्वा-
दिना साध्याभाव एव प्रसिद्ध इति न काचिदनुपपत्तिः। एतेन (२)
नीलरूप-घटत्वोभयाभाववान् नीलघटान्यत्वादित्यादौ साध्य-
नसमानाधिकरणं नीलरूपं न घट इति (३) तादृशनीलरूप-घटत्वा-

---

(१) साध्य[illegible] [illegible]।
(२) साध्याभावे एतद्विशेषणदानेन।
(३) घटो[illegible] [illegible]।

स्तोमाधिकरणत्वविरहेण तादृशस्तोमस्य लक्षणाघटकत्वात्, प्रति-योगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणवैयर्थ्यापत्तेश्च पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ जलावृत्तित्व-तेजोऽवृत्तित्वाद्यवच्छिन्नाभावघटितकूटवत्त्वस्य क्वचिदपि साधनवत्यसत्त्वेन तादृश-कूटस्य लक्षणाघटकत्वात्, यादृशकूटवत्त्वं साधनवतस्तद्वृत्तित्वा-भावस्य च साधनेऽसम्भावितत्वादित्यतिव्याप्त्यनवकाशात्। अत्राहुः, साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिसमानाधिकरणधर्म्मावच्छि-न्नाभावभिन्नत्वेन साध्याभावविशेषणादुपदर्शितविशिष्टाभावादिनि-रासः, गुण-कर्म्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्ता-त्वावच्छिन्नसत्ताद्यभावसंग्रहायावच्छिन्नान्तं, वृत्तिर्निरवच्छिन्ना ग्राह्या अन्यथा संयोगि सत्त्वादित्यादौ संयोगत्वावच्छिन्नसंयोगाद्य-भावस्य साध्यवद्वृत्तितया व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव लक्षण-घटकत्वेनातिव्याप्त्यापत्तेः, सद्धेतौ साधनसमानाधिकरणस्य साध्य-वद्वृत्त्यन्यस्याप्रसिद्धेः समानाधिकरणधर्म्मावच्छिन्नेति, तथाच व्यधिकरणधर्म्मावच्छिन्नसाध्याभाव एव विशिष्टभेदप्रसिद्धिः। न चैवं साधनतावच्छेदकव्यापकत्वं प्रतियोगिताविशेषणं व्यर्थम् अभाववान्मेयत्वादित्यादौ घटत्वादिरूपाभावस्योक्तविशेषणेनैव व्यावर्त्तनादिति वाच्यम्। प्रमेयसाध्यकस्थले घटत्व-पटत्वोभ-याद्यवच्छिन्नप्रमेयसामान्याभावस्य गगनत्वाद्यवच्छिन्नगगनाद्यभा-वाभिन्नस्य संग्रहाय साध्यतावच्छेदकव्यापकत्वेन समानाधिकरण-धर्म्मस्यैव विशेषणीयतया घटत्वादिरूपाभावप्रतियोगितावच्छे-दकघटत्वाभावत्वादेर्याभावत्वाव्यापकत्वेन घटत्वादौ विशिष्टभेद-

वत्त्वस्यावृतत्वात् एतद्विशेषणेन तद्व्यावृत्तेः । न च वाच्यत्वादि-साध्यकस्थले घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावस्य संयोगादिव्यधि-करणसम्बन्धावच्छिन्नवाच्यत्वाद्यभावाभिन्नतया साध्यतावच्छेद-कव्यापकसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वमनृतमिति तत्सग्रहाय समानाधिकरणसम्बन्धावच्छिन्नत्वस्यापि समानाधि-करणधर्म्मावच्छिन्नप्रतियोगित्वविशेषणताया आवश्यकत्वात् प्रमेय-साध्यकस्थलीयोक्ताभावस्य व्यधिकरणसम्बन्धावच्छिन्नगगनाद्य-भावाभिन्नत्वेऽपि प्रतियोगितावच्छेदकधर्म्मे साध्यतावच्छेदकव्याप-कत्वविशेषणमन्तरेणैव विशिष्टभिन्नत्वसव्याहतत्वेनेति वाच्यम् । एवमपि गगनत्वादिना प्रमेयसामान्याभावस्य समानाधिकरण-धर्म्म-तादृशसम्बन्धावच्छिन्नप्रतियोगिताकतया उक्ताभावस्य तद-भिन्नत्वेन तत्र विशिष्टभेदनिर्व्वाहाय तादृशविशेषणस्यावश्यक-त्वात्, समानाधिकरणसम्बन्धावच्छिन्नत्वविशेषणं परित्यज्य साध्य-तावच्छेदकसम्बन्धावच्छिन्नत्वं प्रतियोगिताया निवेश्य तत्कार्य्यस्य(१) साध्यतावच्छेदकव्यापकत्वरूपप्रतियोगितावच्छेदकविशेषणसार्थक-त्वस्य चोपपादनसम्भवाच्च साध्यवद्वृत्तितादृशाभावश्चोभयत्वा-दिना साध्याभाव एव प्रसिद्ध इति न काचिदनुपपत्तिः । एतेन (२) नीलरूप-घटत्वोभयाभाववान् नीलघटान्यत्वादित्यादौ साध-नसमानाधिकरणं नीलरूपं न घट इति(३) तादृशनीलरूप-घटत्वा-

(१) वाच्यं ज्ञेयत्वादित्यादौ घटत्वादिना वाच्यत्वाद्यभावरूपस्य ।

(२) साध्याभावे उक्तविशेषणदानेन ।

(३) घटोऽपि नीलरूपस्यैव तथात्वादिति भावः ।

त्मकसाध्याभावघटितकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरित्यपि निरस्तम्। तादृशाभावे उक्तभेदासत्त्वेन व्यधिकरणधर्म्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात्, एवं घटवृत्तित्वविशिष्टाकाशाभावादेरभावे साध्ये मेयत्वादिहेतौ साध्याभावस्य विशिष्टाकाशाभावादेराकाशाभावाद्यनतिरिक्ततया जगत एव साध्याभावकूटाधिकरणतापत्त्या अतिव्याप्तिरिति साध्याभावत्वविशिष्टाधिकरणत्वमेव विवक्षणीय, तथाच पटे घटवृत्तित्वविशिष्टाकाशाभावो नास्तीत्यादिप्रत्ययाभावात् पटादेर्न तादृशविशिष्टाभावाधिकरणत्वमिति न दोषः। एवञ्च साधनाधिकरणेऽपि साध्याभावत्वेन वृत्तिर्विवक्षणीया अन्यथा जातिमदन्यत्वविशिष्टाकाशाभावस्याभावे साध्ये समवायेन हेतौ साधनसमानाधिकरणाकाशाभावस्य साध्याभावत्वविशिष्टस्याधिकरणे सामान्यादौ समवायेन वृत्तेरप्रसिद्ध्या अव्याप्त्यापत्तेस्तादृशविवक्षयाप्युक्तोभयाभावसाध्यकस्थले(१) अव्याप्तिवारणं सम्भवति प्रत्येकाधिकरणे उभयाभावाभावत्वेनावृत्तेः। यदि च घटवृत्तित्वविशिष्टाकाशाभावाद्यभावो घटत्वाद्यभावसमनियततया तदभिन्न इति घटत्वादेरपि तदभावस्तद्घटितकूटाधिकरणता न जगत इति दर्शितातिव्याप्त्यनवकाशात् साध्याभावत्वविशिष्टाधिकरणत्वविवक्षणमफलमित्युच्यते तदापि साध्याभावत्वेन साधनवद्वृत्तित्वन्तु साध्याभावत्वविशिष्टाधिकरणत्वाविवक्षणेऽपि घटान्यत्वविशिष्टद्रव्यत्वाभाववान् घटत्वादित्यत्र साध्याभावस्य द्रव्यत्वस्य द्रव्यत्वत्वादिना साधनसमानाधिकरणतया द्रव्यस्यैव तद्घटितकूटाधिकरणत्वेनाव्याप्ते-

(१) नीलरूप-घटत्वोभयाभाववान् नीलघटान्यत्वादित्यादावित्यर्थः।

वारणाय निवेश्यमेव। न चैवमपि पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौ साध्यतावच्छेदकविशिष्टवद्वृत्त्योः प्रत्येक साधनसमानाधिकरणयोर्घटान्यत्वविशिष्टद्रव्यत्वाभाव-घटेतरपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावयो (१) रधिकरणं गुणाद्येवेत्यतिव्याप्तिर्दुर्वारैवेति वाच्यम्। विशिष्टस्यातिरिक्ततापक्षमवलम्ब्यैव तादृशातिप्रसङ्गस्य समाधास्यमानत्वादिति। 'भूतत्व-मूर्त्तत्वायोरिति, उभयत्वावच्छिन्नाभावस्य साध्यत्वे हेतौ व्यभिचारित्वाभावादन्यतरत्वावच्छिन्नाभावस्य साध्यत्वानुसरण, 'पृथिव्यादाविति आकाशे भूतत्वस्य मनसि च मूर्त्तत्वस्य साधनसमानाधिकरणतया अकाशस्य मनसश्च प्रत्येकं तदुभयनधिकरणत्वेन साध्याभावसमुदायानधिकरणत्वादिति भावः। आदिशब्दाद्भूतभेद-मूर्त्तभेदान्यतराभाववान् भूत-मूर्त्तान्यतरत्वादित्यादौ भूतभेद-मूर्त्तभेदात्मकसाध्याभावघटितसमुदायवति काल-दिगादौ हेतोरवृत्त्या अतिव्याप्तेः परिग्रहः। ननु साधनाधिकरणे येषां परस्परमैकाधिकरण्यं तत्समुदायस्य विवक्षितत्वान्नाय दोष. भूतत्व-मूर्त्तत्वायोः प्रत्येकं साधनसमानाधिकरणत्वेऽपि साधनवति परस्परमैकाधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणाघटकत्वात् तदेकतरघटितकूटस्यैव तथात्वात् तद्वति च हेतोर्वृत्ते प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं त्याज्यमेव एवञ्च विशिष्टस्यानतिरिक्तत्वेऽपि पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वा-

(१) घटवृत्तित्वविशिष्टद्रव्यत्वाभावस्य साध्यवद्वृत्तित्वात् घटेतरेति तथापि तद्दोषात् पृथिवीति।

दित्यादौ नोक्तरीत्या अतिव्याप्तिसम्भवः उक्तविशिष्टाभावानां साधनवति द्रव्यादावैकाधिकरण्याभावात्(२)। एवं तादृगकूटाधिकरण-पृथिव्यादिवृत्तित्वस्य द्रव्यवृत्तित्वत्वादिना योऽभावस्तस्यापि तादृगवृत्तित्वत्वव्यापकप्रतियोगिताकयावदभावान्तर्गततया तद्वत्त्वविरहादप्युक्तहेतौ नातिव्याप्तिसम्भवः॥। न च द्रव्यवृत्तितात्वावच्छिन्नाभावप्रतियोगितायाः आकाशादिवृत्तित्वसाधारणतया तादृगवृत्तित्वत्वाव्याप्यत्वान्न तादृशाभावो लक्षणघटक इति वाच्यम्। साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापक्षे प्रतियोगितायान्तादृशवृत्तित्वत्वव्याप्यत्वविशेषणव्यावृत्त्यभावेन तादृशविशेषणस्य परित्याज्यत्वात् वह्निमान् धूमादित्यत्रालोकान्यवृत्तित्वरूपेण निर्वह्निवृत्तित्वाभावस्य प्रतियोगिताया आलोकादिनिष्ठपर्व्वतादिवृत्तित्वसाधारणसाधनसमानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्वत्वं प्रत्यव्यापकतयैव तादृशाभावव्यावर्त्तनात्। व्यासज्यवृत्तिधर्म्मानवच्छिन्नत्वेन प्रतियोगिताविशेषणात् पर्व्वतसंयुक्तत्व-पर्व्वतान्यसंयुक्तत्वोभयत्वाद्यवच्छिन्नाभावस्य पर्व्वतासंयुक्तघटादौ वर्त्तमानस्य धूमादावसत्त्वेऽपि न क्षतिः। प्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणेऽपि तादृगाभावमादायाव्याप्तेरावश्यकतया एतद्विशेषणस्य तद्विशेषणसत्त्वेऽपि आवश्यकत्वात् चरमाभावप्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणपरित्यागे यत्किञ्चित्साधनाधिकरणवृत्तिसाध्या-

(२) किन्तु तदेकतरघटितकूटस्यैव तथात्वात् तद्वति हेतोर्वृत्तेरिति भावः।

भावसमुदायविवक्षणेऽपि प्रथमाभावप्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं परित्याज्यमेव पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ जलाद्यसमवेतत्वावच्छिन्नाभावकूटवत्त्वस्य साधनवत्यसत्त्वेऽपि तादृशाभावकूटवत्सामान्यादिवृत्तित्वव्यापकप्रतियोगिताकयावदभावान्तर्गतानां पृथिव्यन्यवृत्तित्वाद्यवच्छिन्नाभावानामेव वृत्तिमद्वृत्तीनां हेतावसत्त्वेनातिव्याप्त्यनवकाशात् एवं सत्तावान् जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावघटितकूटाधिकरणसमवेतत्वाप्रसिद्धिनिबन्धनाव्याप्तिवारणायोपात्तस्याभावे साध्यवद्वृत्तिसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्म्मावच्छिन्नाभावभिन्नत्वरूपसाध्याभावविशेषणस्य स्थले साध्याभावप्रतियोगितायां साध्यवद्वृत्त्यभावीयसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताभिन्नत्वं निवेश्य व्यधिकरणधर्म्मावच्छिन्नाभावीयगगनादि-किञ्चिद्विशिष्टतदभावनिष्ठप्रतियोगिताभिन्नव्यधिकरणधर्म्मावच्छिन्नप्रतियोगितामादायैव (१) व्यधिकरणधर्म्मावच्छिन्नाभावसंग्रहे समानाधिकरणधर्म्मे साध्यतावच्छेदकव्यापकत्वस्यानिवेशनीयतया अभावसाध्यकस्थले साध्यतावच्छेदकन्यूनवृत्तिघटत्वाभावत्वाद्यवच्छिन्नप्रतियोगितासु साध्यवद्वृत्त्यभावीयसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताभिन्नत्वाभावेन घटत्वाद्यात्मकाभावव्यावर्त्तनात् साध्याभावप्रतियोगिताया साध्यतावच्छेदकव्यापकत्वविशेषणमपि परित्यजनीयम्, उक्तरीत्यापि पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौ घटाद्यन्यत्व-

---

(१) घटत्वादिविशिष्टव्यधिकरणधर्म्मावच्छिन्नाभावानाञ्च प्रथमाभावस्वरूपत्वेऽपि प्रतियोगिताया अतिरिक्तत्वादिति भावः।

विशिष्टद्रव्यत्वाद्यभावकूटस्य हेतुमन्निष्ठेऽपि घटान्यवृत्तित्वादिना गुणादिवृत्तित्वाभावसाध्यकव्याप्तिर्निर्णीया इत्यतो दोषान्तरमाह, 'किञ्चे'ति।

केचित्तु ननु स्ववृत्तिसाधनसमानाधिकरणसाध्याभावसमुदायाधिकरणं यद्यत् साधनाधिकरणं तद्भिन्नसाध्याभावसमुदायाधिकरणं यद्यत् स्वं तदेव साध्याभावसमुदायाधिकरणभिन्नमिति विवक्षितं सद्धेतौ तादृशं स्वं गगनमेव, वह्न्यधिकरणमहानसादिनिष्ठानां निर्वह्निह्रदादिनिष्ठानाञ्च धूमादिसमानाधिकरणसाध्याभावानां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानां समुदायवद्द्रव्यत्वसाधनाधिकरणं तद्वृत्तितादृशसमुदायवत्त्वञ्च महानसादौ साध्यवति साध्यशून्ये च ह्रदादौ सत्त्वादतो तत्राव्याप्त्यन्वयः। भूतत्व-मूर्तत्वान्यतराभाववान् स्पर्शवद्द्रव्यत्वादित्यादौ पृथिव्यादिचतुष्कान्यं तादृशं स्वं गगनं मनश्च गगनवृत्तिभूतत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य गगनरूपसाधनाधिकरण एव मनोवृत्तिमूर्तत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य च मनस्येव सत्त्वेन निरुक्तसाधनाधिकरणवृत्तिसाध्याभावसमुदायाधिकरणत्वस्य तत्र सत्त्वात्। स्ववृत्तिसाध्याभावे साधनसमानाधिकरणत्वविशेषणानुपादाने वह्न्यादिशून्यह्रदादिनिष्ठसमानाधिकरणधर्मावच्छिन्नसाध्याभावघटितसाध्याभावसमुदायाधिकरणत्वस्य साधनाधिकरणेऽसत्त्वात् साध्यवद्वेव तादृशं स्वं तद्वृत्तित्वाभावस्य वृत्तिमद्वृत्तेर्नावश्यत्वेनाव्याप्तिः(१) अतस्तत्र तद्विशेषणप्रवेशः, प्रथमसमुदायानुपादाने भूत-

(१) [illegible] वैयर्थ्यादिति [illegible]।

त्व-भूतत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादौ गगनं मनश्च न तादृशं स्वं तद्वृत्तिस्वविकरणधर्मावच्छिन्नसाध्याभावाधिकर-मनोगगननिष्ठभूतत्व-मूर्त्तत्ववदितरसाध्याभावसमुदायाधिकरणत्वस्य गगन-मनसोः प्रत्येकमसत्त्वात् किन्तु पृथिव्यादिचतुष्कस्यैव तथा-विधं स्वं तद्वृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरतस्तदुपादानं, धूमवान् वह्नेरित्यादावपि पर्वतादि स्ववृत्तिसाध्याभावकूटाधि-करणमहानसादिरूपसाधनाधिकरणवृत्तिसाध्याभावसमुदायाधिक-रणत्वात् जगदेव तादृशं स्वं स्यादतो यद्यदिति. तथाच पर्व-तादिवृत्तिसाध्याभावकूटाधिकरणं यद्यत्साधनवदयोगोलकादेरपि तदन्तर्गततया तद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभाववदितरसा-ध्याभावकूटस्य पर्वतादावसत्त्वात्तादृशं स्वं धूमादिमन्नैवेति नातिव्याप्तिः । यद्यत्साधनाधिकरणमित्युक्तौ यदधिकरण-मित्येतावदुक्तौ भूतत्व-मूर्त्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादि-त्यादौ गगनादिवृत्तिसाध्याभावकूटाधिकरणं यद्यत् पृथिव्या-देरपि तदन्तर्गततया तद्वृत्तिमूर्त्तत्वादिप्रति[illegible] गग-नादावसत्त्वात् तादृशं स्वं न गगनादिकं [illegible] व्यादिकमेवेत्यतिव्याप्तिरतः साधनाधिकरण[illegible] त्वं साधनानधिकरणत्वाच्च दोषः । [illegible] दावयोगोलकादि[illegible] पर्वतादौ सत्त्वात्तदेव तादृशं स्वं स्यादिति [illegible] पदोपादानं [illegible] त्वव्यापकप्रतियोगिताकाभावो [illegible]

[illegible]

[illegible]

[illegible]

नानिरूपाति, साध्याधिकरण महाकालादेः [illegible] समुदायाधिकरणत्वस्य [illegible] तादृशाप्रसिद्धिपरत्वेऽपि साधनाधिकरणीभूतमहाकालवृत्तिविशिष्टवृत्ति-त्वाद्यभावाभावघटित-तादृशकृष्टाधिकरणताकालवृत्तित्वाभावस्य तत्कालावृत्तौ वृत्तिमति वर्त्तमानस्य साधने ऽभावादव्याप्तिरि-त्यपि मन्द 'एतेनेत्यादिग्रन्थ'मिति एकमात्रविवक्षयानुसरणम्, घटादिपदान्महाकालत्वाभावादिपरिग्रहः, वृत्तिमन्तौ साध्यसामा-नाधिकरण्यविशेषणेनातिव्याप्तिवारणसम्भवात् 'व्यभिचारिणीति, वृत्तिमत्त्वमात्रमत्र विवक्षितं तस्यावश्यैव व्यावर्त्तकत्वात् (२) समवायादिना द्रव्यत्वादिहेतुके तादृशसम्बन्धेन महाकालवृत्तित्वाव-

---

(१) तादृशं च वस्तुकिञ्चित् तद्वृत्तित्वाभावविशिष्टेतिपाठः, ददाद्युतान्यत्र-त्वमपेक्षेऽन्यत्र स्यादेव पूर्ववदिति ।

(२) वृत्तिहेतुव्यावर्त्तकत्वात् ।

च्छिन्नाभावस्यैव वृत्तिमति घटत्वादौ वृत्तेर्हेताववृत्तेर्नातिव्याप्ति-सम्भव इति कालिकसम्बन्धावच्छिन्नहेतुकानुसरणम्। इदमुपलक्षणम्, ईश्वरज्ञानान्यत्वादिसाध्यके (१) विषयितासम्बन्धेन हेतुमात्रे साध्याभावसमुदायवति ईश्वरज्ञानादौ (२) तेन सम्बन्धेन वस्तुमात्रस्यैव वृत्तेरतिव्याप्तिर्द्रष्टव्या। एतेन वृत्तिमद्वृत्तित्वविशेषणस्थले वृत्तिमदवृत्तित्व-तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकत्वोभयाभावस्य (३) वृत्तिमदवृत्तित्व-साध्यवद्वृत्तित्वप्रतियोगिकत्वोभयाभावस्य वा निवेशे महाकालवृत्तित्वस्य समानाधिकरणधर्म्मावच्छिन्नाभावे चरमदत्ताभावेन उभयाभावसत्त्वेऽपि न निस्तारः। एव यथाश्रुते (४) घटत्वादिसाध्यके व्यभिचारिणि संयोगेन हेतौ साध्याभाववति (५) संयुक्तमात्रस्यैव संयुक्तत्वात् एतद्रूपत्वादिसाध्यके व्यभिचारिणि समवायेन हेतौ समवेतमात्रस्यैव एतद्रूपाद्यतिरिक्तसमवेतत्वात् (६) इत्यव्याप्तिरित्यपि द्रष्टव्यम्। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावकूटाधिकरणस्य नानाविपक्षकस्थलेऽप्रसिद्धावपि साधनसमानाधिकरणतादृशाभावकूटाधिकरणस्य नाप्रसिद्धिरिति साधनसमानाधिकरणत्वविशेषणप्रक्षेपे

---

(१) ज्ञानान्यत्वादिसाध्यके इति पा०।

(२) ज्ञानादावित्ति पा०।

(३) वृत्तिमदवृत्तित्व-साध्यवद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वोभयाभावस्येति पा०।

(४) वृत्तिमद्वृत्त्य इत्यस्य यथाश्रुतार्थे।

(५) गगनादावित्ति शेष।

(६) एतद्रूपमात्रसमवेतस्याप्रसिद्धत्वादिति भावः।

व्याप्तिरसम्भवो वा (१) इत्यतो दोषान्तरमाह, 'किञ्चेति, इत्याहुः।

'महाकालेति, कालान्यत्वसाध्यके कालिकविशेषणताविशेषेण हेतौ साध्यसामानाधिकरण्यविशेषणेनातिव्याप्तिवारणमसम्भवान्महाकालभेदसाध्यकानुसरणम्। यद्यपि महाकालत्वसाध्यकेऽप्यतिव्याप्तिः सम्भवति वृत्तिमन्मात्र एव महाकालातिरिक्तकालवृत्तित्वस्यापि सत्त्वात्, तथापि तत्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितवक्ष्यमाणलक्षणे प्रत्येकं तत्तत्कालमात्रवृत्तितत्तत्कालावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्धा नातिव्याप्तिः, साधनाधिकरणे सम्भवदैकाधिकरण्यकसाध्याभावसमुदायाधिकरणत्वस्य प्रयोजनान्तरानुरोधेन निवेशे तादृशाप्रसिद्धिविरहेऽपि साधनाधिकरणीभूतखण्डकालव्यक्तिविशेषावृत्तित्वावच्छिन्नाभावघटित-तादृशकूटाधिकरणतत्कालवृत्तित्वाभावस्य तत्कालावृत्तौ वृत्तिमति वर्त्तमानस्य साधनेऽभावान्नातिव्याप्तिरित्यग्रिमस्य 'एतेनेत्यादेरसङ्गतिरिति एकमात्रविपक्षकानुसरणम्, आदिपदान्महाकालत्वाभावादिपरिग्रहः, अवृत्तिहेतौ साध्यसामानाधिकरण्यविशेषणेनातिव्याप्तिवारणसम्भवात् 'व्यभिचारिणीति, वृत्तिमत्त्वमात्रमत्र विवक्षितं तन्मात्रस्यैव व्यावर्त्तकत्वात् (२) समवायादिना द्रव्यत्वादिहेतुके तादृशसम्बन्धेन महाकालवृत्तित्वाव-

---

(१) तादृशं स्व यत्किञ्चित् तद्वृत्तित्वाभावनिवेशेऽतिव्याप्तिः, यथाश्रुतान्यतमत्वनिवेशे ऽसम्भव स्यादत पूर्व्वेदिति।

(२) अवृत्तिहेतुव्यावर्त्तकत्वात्।

च्छिन्नाभावस्यैव वृत्तिमति घटत्वादौ वृत्तेर्हेतावृत्तेर्नातिव्याप्ति-सम्भव इति कालिकसम्बन्धावच्छिन्नहेतुकानुसरणम्। इदमुपलक्षणम्, ईश्वरज्ञानान्यत्वादिसाध्यके (१) विषयितासम्बन्धेन हेतुमाने साध्याभावसमुदायवति ईश्वरज्ञानादौ (२) तेन सम्बन्धेन वस्तुमात्रस्यैव वृत्तेरतिव्याप्तिर्द्रष्टव्या। एतेन वृत्तिमद्वृत्तित्वविशेषणस्थले वृत्तिमदवृत्तित्व-तादृशवृत्तित्वव्यापकप्रतियोगिताकत्वोभयाभा-वस्य (३) वृत्तिमदवृत्तित्व-साध्यवद्वृत्तित्वप्रतियोगिकत्वोभयाभावस्य वा निवेशे महाकालवृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावे चरमदलाभावेन उभयाभावसत्त्वेऽपि न निस्तारः। एवं यथा-श्रुते (४) घटत्वादिसाध्यके व्यभिचारिणि संयोगेन हेतौ साध्या-भाववति (५) सयुक्तमात्रस्यैव संयुक्तत्वात् एतद्रूपत्वादिसाध्यके व्य-भिचारिणि समवायेन हेतौ समवेतमात्रस्यैव एतद्रूपाद्यतिरिक्त-समवेतत्वात् (६) इत्यव्याप्तिरित्यपि द्रष्टव्यम्। साध्यतावच्छेदका-वच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावकूटाधिकरणस्य नाना-विपक्षकस्थलेऽप्रसिद्धावपि साधनसमानाधिकरणतादृशाभावकूटा-धिकरणस्य नाप्रसिद्धिरिति साधनसमानाधिकरणत्वविशेषणप्रक्षेपे

---

(१) ज्ञानान्यत्वादिसाध्यके इति पा०।

(२) ज्ञानादाविति पा०।

(३) वृत्तिमदवृत्तित्व-साध्यवद्वृत्तित्वव्यापकप्रतियोगिताकत्वोभयाभावस्ये-ति पा०।

(४) वृत्तिमद्वृत्तय इत्यस्य यथाश्रुतार्थे।

(५) गगनादाविति शेषः।

(६) एतद्रूपमात्रसमवेतत्वाप्रसिद्धत्वादिति भावः।

तादृशाभावकूटाधिकरणतागर्भमेव लक्षणं सम्यक् साध्यतावच्छेदक-व्यापकतापेक्षया साध्यतावच्छेदकावच्छिन्नव्यापकत्वस्य गुरुत्वेऽपि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावघटितलक्षणे सत्तावान् जातेरित्यादौ विशिष्टसत्ताभावादिवारकोक्तविशेषणप्रवेशेन (१) म-हागौरवात् (२) विशिष्टस्यानतिरिक्तत्वे पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वा-दित्यादौ घटान्यत्वविशिष्टद्रव्यत्वाभावादेरपि साध्यतावच्छेदकावच्छि-न्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतयोक्तदिशातिव्या-प्तिवारणाय एतादृशाभावघटितलक्षणेऽपि साधनवति सम्भवदेका-धिकरणकतादृशाभावसमुदायस्य विवक्षणीयतया पृथिवी द्रव्यत्वप्र-कारकप्रमाविषयत्वादित्यादौ समवायसम्बन्धावच्छिन्नजलासमवे-तत्वाद्यवच्छिन्नाभावघटितकूटाधिकरणसामान्यादिवृत्तित्वाभाव-वत्त्वेऽप्यतिव्याप्तेरनवकाशात् साधनवति सम्भवदेकाधिकरणकत्व-विवक्षामन्तरेणैव पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौ घटान्यवृत्ति-त्वावच्छिन्नाभावमादायातिव्याप्तिवारणे तु उक्तस्थलेऽपि तादृशाभाव-मादायातिव्याप्तिवारणसम्भवात् प्रतियोगितायां साध्यतावच्छेदका-व्यापकत्वविशेषणं नोपादेयम् ।

तत्त्वचिन्तामणि-दीधितिः ।

एतेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदका-

---

(१) साध्यवद्वृत्तिसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्म्मावच्छिन्नाभाव-भिन्नत्वरूपसाध्याभावविशेषणप्रवेशेनेत्यर्थः ।

(२) एतत्कल्पे विशिष्टसत्तात्वावच्छिन्नाभावस्य व्यापकतावच्छेदकरूपावच्छिन्न-प्रतियोगिताकत्वाभावादेव वारणादिति भावः ।

पावच्छिन्नप्रतियोगिताकव्याप्यवृत्तिस्वसमानाधिकरण-यावदभावाधिकरणवृत्तित्वाभावा यावन्तो वृत्तिमद्वृत्तय-स्तद्वत्त्वं व्याप्तिः केवलान्वयिनः संयोगाद्यभावस्याभावाः संयोगादयो न व्याप्यवृत्तयः एवं साध्यस्य गुणसामान्य-स्याभावो द्रव्यत्वाधिकरणे उत्पत्तिकालावच्छेदेन वर्त्त-मानोऽपि न व्याप्यवृत्तिः उक्तरूपावच्छिन्नप्रतियोगि-ताकाः क्वचिदप्रसिद्ध्यादिसम्पादकाः पुनरभावा न हेतुसमानाधिकरणाः उक्तसमुदायाधिकरणवृत्तित्व-तदभाव-वृत्तिमत्त्वानि पुर्व्वोक्तरीत्या प्रत्येतव्यानीत्या-दिकमपास्तम् ।

गादाधरी विवृतिः ।

यद्यपि साधनवति सम्भवदैकाधिकरण्यककूटनिवेशे द्रव्यत्व-विशिष्टसत्ताभाव-द्रव्यान्यत्वविशिष्टसत्ताभावघटितकूटस्य सत्तावान् जातेरित्यादौ लक्षणघटकताप्रसक्तिस्तथापि साध्यतावच्छेदक-व्यापकप्रतियोगिताकाभावनिवेशे तादृशाभावेकतरव्यधिकरणध-र्म्मावच्छिन्नाभावघटितकूटस्य तथात्वादव्याप्तिरिति तदुपेक्ष्य उक्त-रीत्या सार्व्वभौमलक्षणपरिष्कारमपि हेतुतावच्छेदकसम्बन्धेन वृ-त्तिमद्यावदधिकरणमहाकालादिवृत्तिमात्रविपक्षकव्यभिचारिण्य-तिव्याप्त्यापत्त्या निराकुरुते, 'एतेनेति, प्रतियोगितायामवच्छिन्नान्त-विशेषणव्यावृत्तिरभाववान् मेयत्वादित्यत्रैव वह्निमान् धूमादित्या-

नीयतया 'एवमित्यादिपङ्क्तयसङ्गतेर्वक्ष्यमाणत्वात् । अन्योन्याभावघटितव्यापकतानिवेशाच्च व्याप्यवृत्तिपदसार्थक्यं, संयोगाभावसाध्यकस्थले संयोगघटितकूटाधिकरणताया द्रव्यमात्रे सत्त्वात् तद्वृत्तिहेतावव्याप्तिवारणरूपं तत्पदप्रयोजनमाह, 'केवलान्वयिन इति । एतेन तत्साध्यके द्रव्यवृत्तेः सद्धेतुत्वमक्षतमिति सूचितं, गुणवान् द्रव्यत्वादित्यादौ गुणादावनवच्छिन्नवृत्तिकगुणाद्यभाववति नित्यद्रव्यातिरिक्ते हेतोर्वृत्त्या अव्याप्तिवारणरूपमनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वविशिष्टाभावनिरूपिताधिकरणतानिवेशनप्रयोजनमाह, 'एवमिति । साध्याभावे उत्पत्तिकालावच्छेदेन द्रव्यवृत्तित्वकथनं द्रव्यत्वे तद्वृत्तित्वाभावासत्त्वेनाव्याप्तिप्रसङ्गसूचनाय, 'न व्याप्यवृत्तिरित्यत्र द्रव्यत्वाधिकरणे इत्यनुपज्यते इति व्याख्यानमसत् अनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वनिवेशे संयोगी घटादित्यत्रोक्तरीत्या अव्याप्तिवारणाय साधनवति व्याप्यवृत्तित्वस्यावश्यं निवेशनीयतया तत्राव्याप्त्यप्रसक्तेः, साधनवति व्याप्यवृत्तित्वपर्य्यन्तनिवेशनप्रयोजनप्रदर्शनपरतया एतत्पङ्क्तिव्याख्यापि न साधीयसी.व्याप्यवृत्तित्वविशिष्टाधिकरणत्वाप्रवेशे संयोगि सत्त्वादित्यत्र गुणादौ(१) व्याप्यवृत्तेः संयोगाभावस्येव द्रव्यत्वाद्यभावस्यापि लक्षणघटकतया जगतः साध्याभावकूटानधिकरणतया अतिव्याप्त्यनवकाशेऽपि धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकव्यापकतावच्छेदकावच्छिन्नाभावकूटाधिकरणताया विश्वस्मिन् सत्त्वादतिव्याप्तेर्दुर्वारतया तत्प्रवे-

(१) संयोगसाध्यकसत्त्वादिव्यभिचारिहेतौ हेत्वधिकरणे गुणादाविति पा० ।

वाच्यम्। तथा सति वह्न्यादावपि स्वावयवाद्यवच्छेदेन निर्धूमसंयुक्तत्वाद्यभावसत्त्वेन धूमवान् वह्नेरित्यादावप्यतिव्याप्तेरुक्तस्थलेऽतिव्याप्तिवारणस्य सुदूरपराहतत्वात्।

यत्तु हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणसामान्यावच्छेदेन (१) तद्वत्त्वस्य विवक्षितत्वान्नातिव्याप्तिः व्यभिचारनिरूपकाधिकरणावच्छेदेन हेतौ तद्वत्त्वविरहादिति, तन्न, एवं सति स्वावयवाद्यवच्छेदेन घटादिवृत्तेः समानाधिकरणधर्म्मावच्छिन्नजगत्संयुक्तत्वाद्यभावस्य पर्व्वताद्यवच्छेदेन धूमादावसत्त्वादसम्भवापत्ते वृत्तिमद्वृत्तिपदेन हेतुतावच्छेदकसम्बन्धेन यस्य यदधिकरणं तदवच्छेदेन तद्वृत्तित्वविवक्षायामपि व्याप्यवृत्तेरवच्छेदकानभ्युपगमे व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्य साध्याभावकूटाधिकरणवृत्तित्वाभावस्याधिकरणानवच्छिन्नतया असम्भवस्य दुर्व्वारत्वात्। यदि च वृत्तिमत्यनवच्छिन्नवृत्तयो यावन्तस्तादृशकूटाधिकरणवृत्तित्वाभावा अनवच्छिन्नतद्वत्त्वं व्याप्तिरित्युच्यते तदा सामानाधिकरण्यस्याव्याप्यवृत्तितापत्तेऽपि न दर्शितदोषनिरास. सम्भवति समानाधिकरणधर्म्मावच्छिन्नमहाकालवृत्तित्वाभावस्य वृत्तिमत्यनवच्छिन्नवृत्तित्वविरहेण लक्षणाघटकत्वात् हेतुतावच्छेदकसम्बन्धेन यस्य यदधिकरणं तदवच्छेदेन तदवृत्तित्व-किञ्चिदवच्छिन्नत्वोभयाभाववन्तो यावन्तस्तादृशाभावकूटवदवृत्तित्वाभावा अनवच्छिन्नतद्वत्त्वं व्याप्तिरित्युक्तौ च

---

(१) सामान्यपदप्रयोजनं तादृशातिव्याप्तिवारणम्।

न कश्चिद्दोषः, समानाधिकरणधर्म्मावच्छिन्नमहाकालान्यत्वा-भावे किञ्चिदवच्छिन्नत्वसत्त्वेऽपि कालिकसम्बन्धेन घटाद्यधि-करणखण्डकालाद्यवच्छेदेन घटाद्यवृत्तित्वासत्त्वेनोभयाभावव-त्ताया अक्षततया महाकालान्यत्वसाध्यके व्यभिचारिणि तादृशा-भावस्य लक्षणघटकत्वेनातिव्याप्तिविरहात् समानाधिकरणधर्म्मा-वच्छिन्नजगत्संयुक्तत्वाद्यभावस्य घटादौ कपालाद्यवच्छेदेन वृत्तेः संयोगादिना यद्घटाद्यधिकरणं तदवच्छेदेन घटादावहृत्तेश्च नि-रुक्तोभयाभाववत्त्वविरहाद्वह्निमान् धूमादित्यादौ न लक्षणघटकता अपि त्ववच्छिन्नत्वविरहेणोभयाभाववतो व्यधिकरणधर्म्मावच्छिन्न-तदभावस्यैवेत्यव्याप्त्यनवकाशादिति ध्येयम्। सामानाधिकरण्य-स्याव्याप्यवृत्तित्वे हेतुतावच्छेदकसम्बन्धेन किञ्चित्पदार्थाधिकरण-वृत्तयो यावन्तस्तादृशाभावकूटाधिकरणवृत्तित्वनिरूपकत्वाभावाः यदधिकरणावच्छेदेन वर्त्तन्ते तत्त्वमिति वक्तव्यं महाकालवृत्तित्व-निरूपकत्वस्य समानाधिकरणधर्म्मावच्छिन्नाभावः खण्डकाल-वृत्तिः साधनाधिकरणमहाकाले नास्तीति नातिव्याप्त्यवकाशः सद्धेतौ तादृशाभावकूटाधिकरणजगद्वृत्तित्वनिरूपकत्वस्य व्यधि-करणधर्म्मावच्छिन्नाभाव एव हेतुतावच्छेदकसम्बन्धेन किञ्चिद-धिकरणवृत्तिः स च हेत्वधिकरणसामान्य एव वर्त्तत इति लक्षणसमन्वयः। अथवा वृत्तिमद्वृत्तयो यावन्तस्तादृशसाध्याभाव-समुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वाधिकरणतासामान्यकधर्म्म-वत्त्वमेव विवक्षणीयं वृत्तिमत्त्वादिकञ्च दैशिकविशेषणतासम्बन्धे-नैव ग्राह्यम् इत्यञ्च कालिकसम्बन्धावच्छिन्नघटत्वावच्छिन्नाधिकर-

यताया सम्बन्धान्तरावच्छिन्नाधिकरणतावद्वृत्तेर्दैशिकसम्बन्धाव-च्छिन्नमहाकालवृत्तित्वाभावस्यासत्त्वादिति कृतं पल्लवितेन।

तत्त्वचिन्तामणिः।

प्रतियोग्यवृत्तिश्च धर्म्मो न प्रतियोगितावच्छेदकः तद्विशिष्टज्ञानस्याभावधीहेतुत्वात् अन्यथा निर्व्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तेः, गवि शशशृङ्गं नास्तीतिप्रतीतेरप्रसिद्धेः शशशृङ्गं नास्तीति च शशे शृङ्गाभाव इत्यर्थः।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते अनुमानचिन्तामणौ व्यधिकरणधर्म्मावच्छिन्नाभावघटित-लक्षणं सम्पूर्णम्।

तत्त्वचिन्तामणि-दीधितिः।

'तद्विशिष्टेति'। विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात् अभावप्रत्ययो हि घटत्वादिविशिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्यापि घटत्वादेरवच्छेदकत्वमवगाहत इति न तु स्वरूपेण घटो नास्तीत्येव प्रतीतिः तद्विशिष्टाभावप्रत्ययो यदि व्यधिकरणधर्म्मेण अवच्छिन्न प्रतियोगिक नाव-

नीयं समूहालम्बनानुमितिरुद्देश्या, तत्तदभावीयप्रतियोग्यवृत्तित्वावच्छिन्ने तत्तदभावप्रतियोगितानवच्छेदकत्वसाधनं न सम्यक् समनियताभावैक्यमते समवायित्वादिना वाच्यत्वाभावस्य घटत्वावच्छिन्नपटाद्यभावाभिन्नतया समवायिपटादीनामपि तथाविधवाच्यत्वाद्यभावप्रतियोगितया तद्वृत्तिसमवायित्वादेर्वाच्यत्वाद्यभावीयप्रतियोग्यवृत्तितया दुर्घटत्वात् प्रतियोगिता विशिष्योपादाय तत्तत्प्रतियोगितावदवृत्तित्वावच्छिन्ने तत्तत्प्रतियोगितानवच्छेदकत्वसाधनमपि हेय वाच्यत्वादिनिष्ठायाः प्रसिद्धसमानाधिकरणवृत्त्वाद्यवच्छिन्नप्रतियोगिताया उपादानेऽपि सिद्धसाधनात् सोन्दड़ोपाध्यायैरपि व्यधिकरणसमवायित्वादिधर्म्मस्य समानाधिकरणधर्म्मावच्छिन्नप्रतियोगितावच्छेदकत्वानङ्गीकारात् व्यधिकरणधर्म्मावच्छिन्नायाश्च प्रतियोगिताया उभयवाद्यसिद्धतया विशिष्योपादानासम्भवात् ।

परे तु विशिष्य समवायित्वादिकं पक्षतावच्छेदकीकृत्य वाच्यत्वादिनिष्ठप्रतियोगितानवच्छेदकत्वं साधनीय तादृश प्रतियोगितावदवृत्तित्वमेव हेतुः, यो यदवृत्ति, स तन्निष्ठप्रतियोगितानवच्छेदक इति सामान्यतोव्याप्तिप्रदर्शक, 'प्रतियोग्यवृत्तिश्चेति ग्रन्थ', वीप्साद्यभावेऽपि प्रायस्येन व्याप्तिलाभसम्भवात् वाच्यत्वाद्यवृत्तिधर्म्ममात्रस्यैव व्यधिकरणतया वाच्यत्वादिनिष्ठप्रतियोगिताया तन्मतेऽवच्छेदकतया यद्यप्यत्रान्वयदृष्टान्तदुर्भिक्षं तथापि व्यतिरेकेण वाच्यत्वादिनिष्ठमुभयत्वादिकमेव दृष्टान्तः सम्भवतीत्यदोषः। अथवा यो यदवृत्ति, स न तदवच्छेदकः

इति सामान्यव्याप्तौ कारणत्वादिव्यधिकरणकारणत्वाद्यनवच्छेदक धर्म्म एवान्वयदृष्टान्तः, प्रतियोगितावच्छेदकत्व-विषयतावच्छेदकत्वसाधारणावच्छेदकतात्वस्यैक्ये भ्रमविषयताव्यधिकरणतदवच्छेदकरजतत्वादावुक्तसामान्यव्याप्तिभङ्गवारणाय विषयतात्वं यत्पदार्थो विशेषणीय इत्याहुः।

अथ कालिकादिसम्बन्धेन घटादिवृत्तिपटत्वादेः समवायादिना घटादिनिष्ठप्रतियोगितावच्छेदकत्वखण्डनाय तत्तत्सम्बन्धेन प्रतियोग्यवृत्तित्वं तत्तत्सम्बन्धेन प्रतियोगितावच्छेदकत्वाभावसाधने पक्षतावच्छेदकतया हेतुतया वा विवक्षणीयं, तथाच समवायादिसम्बन्धेन वाच्यत्वादिवृत्तित्वाप्रसिद्धयोक्तरीत्या समवायादिसम्बन्धेन घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावखण्डनानुपपत्तिः। न च प्रतियोग्यवृत्तित्वमित्यनेन प्रतियोगिनिष्ठावच्छेदकताघटकसम्बन्धावच्छिन्नाभावप्रतियोगित्व विवक्षणीयं,तथाच घटत्वादेर्वाच्यत्वादिनिष्ठसमवायादिसम्बन्धावच्छिन्नभावप्रतियोगितया नाप्रसिद्धिरिति वाच्यम्। अव्याप्यवृत्तेः संयोगवदभावप्रतियोगितावच्छेदकस्य प्रतियोगिनिष्ठाभावप्रतियोगितया उक्तधर्म्मस्य पक्षतावच्छेदकत्वे साध्यस्य हेतुत्वे च व्यभिचारस्य दुर्वारत्वात् प्रतियोगिनिष्ठभेदप्रतियोगितायामवच्छेदकताघटकसम्बन्धेनावच्छेदकत्वस्य विवक्षणे व्यधिकरणसंयोगादिसम्बन्धेन घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावनिराकरणानुपपत्तिः, तेन सम्बन्धेन घटत्वादेर्भेदप्रतियोगितायाम् अवच्छेदकत्वस्य वादिनोऽप्यननुमतत्वात्। एवं घटत्वादौ समवायादिसम्बन्धेन वाच्यत्वादिनिष्ठप्रतियोगितायामवच्छेदकत्वाभाव

प्रतियोग्यप्रसिद्ध्या साधयितुमशक्यः। मैवम्। स्वप्रतियोगिकत्व-यदनुयोगिकत्वोभयाभाववद्यादृशसम्बन्धसामान्यको यः स स्वनिष्ठत्व–तत्सम्बन्धावच्छिन्नत्वोभयाभाववत्तन्निष्ठप्रतियोगितावच्छेदकतासामान्यक इत्यर्थविवक्षया सर्व्वसामञ्जस्यात् संयोगादिसम्बन्धसामान्ये घटत्वादिप्रतियोगिकत्व-वाच्यत्वाद्यनुयोगिकत्वोभयाभावसत्त्वात् प्रथमस्वपदेन घटत्वाद्युपादानस्य मतद्वय एव सम्भवात् तत्र स्वनिष्ठत्व-संयोगादिसम्बन्धावच्छिन्नत्वोभयाभाववद्वाच्यत्वादिवृत्तिप्रतियोगितावच्छेदकतासामान्यकत्वसाधने नोद्देश्यासिद्धिरिति (१)।

'प्रतियोग्यवृत्तिश्च धर्म्मो न प्रतियोगितावच्छेदक इति मूलग्रन्थस्य तथात्वे मानाभावादिति शेषः। ननु समवायितया वाच्यत्व नास्तीत्याद्याकारकः समवायित्वादिर्वाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकत्वावगाही प्रत्यय एव मानमित्युक्तरीत्या [illegible]-शङ्कयामाह, 'तद्विशिष्टज्ञानस्येति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावलौकिकप्रत्यक्षत्वावच्छिन्नहेतुत्वादित्यर्थः। यद्यपि अन्यथा घटनिर्व्विकल्पकानन्तरं घटाभावप्रत्यक्षापत्तेरिति मूलदर्शितयुक्त्या वाच्यत्व न समवायीति [illegible] वाच्यत्वत्वावच्छिन्नधर्म्मिकसमवायित्वप्रकारकज्ञान[illegible] समवायित्वावच्छिन्नवाच्यत्वाभावप्रत्यक्षे नाधिक[illegible] समवायित्व वह्नित्वादिप्रकारकज्ञानादपि[illegible] [illegible]

(१) [illegible]

नुदयात् महानसीयवह्निर्नास्तीत्याद्यभाववुद्धौ महानसीयवह्नि-त्वाद्यवच्छिन्नत्वेन वह्न्यादिनिष्ठप्रतियोगितावगाहिन्यां यथा महानसीयत्वादिप्रकारेण वह्नित्वाद्यवच्छिन्नविषयकज्ञानं हेतु-स्तथा समवायितया वाच्यत्वं नास्तीत्यादिवुद्धेर्वाच्यत्वादिनिष्ठ-प्रतियोगितायां समवायित्वाद्यवच्छिन्नत्वावगाहित्वे समवायित्वा-दिना वाच्यत्वत्वाद्यवच्छिन्नधर्म्मिकज्ञानं अपेक्षितं तथाच वाच्यत्व न समवायीति विशेषदर्शनदशायामप्यनुभूयमाना तथाकारा प्र-तीतिः कथमुपपद्यतां तत्र तस्या वाच्यत्वाद्यनुयोगिकसमवायित्वा-द्यभावावलम्बनत्वोपगमे सर्व्वत्रैव तथात्वमुपेयतामिति गतं व्यधिकरणधर्म्मस्य प्रतियोगितावच्छेदकत्वेनेत्यभिप्राय इति मि-श्राद्यनुसारिव्याख्यानं, तत्रेयमनुपपत्तिरवतरति, तद्धर्म्मावच्छिन्न-तन्निष्ठप्रतियोगिताकाभाववुद्धौ तद्धर्म्मप्रकारकतज्ज्ञानत्वेन न हेतुत्वसम्भवः घटत्वेन यत्किञ्चिद्घटज्ञानादपि यावद्घटप्रतियो-गिकसामान्याभाववुद्धेरुत्पत्त्या व्यभिचारात् सम्भवेऽपि वा दर्शित-विशेषदर्शनकाले निर्द्धर्म्मितावच्छेदकवाच्यत्वादिधर्म्मिकसमवायि-त्वादिभ्रमसम्भवेन व्यधिकरणधर्म्मावच्छिन्नाभावप्रतीतिनिर्व्वाहा-त्तादृशकारणताया अकिञ्चित्करत्वात्। न च वह्नित्वधर्म्मितावच्छेद-कक-महानसीयत्वप्रकारकवुद्धिं विना विशृङ्खलमहानसीयत्व-वह्नि-त्वप्रकारकज्ञानसत्त्वेऽपि महानसीयवह्नित्वाद्यवच्छिन्नाभावप्रत्यक्षा-नुत्पत्त्या तद्धर्म्मसमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभाव-वुद्धौ तद्धर्म्मावच्छिन्नधर्म्मिकतद्धर्म्मप्रकारकज्ञानत्वेन हेतुता वाच्ये-ति वाच्यत्वत्वावच्छिन्नधर्म्मिकसमवायित्वप्रकारकज्ञानं विना न

समवायित्वावच्छिन्नवाच्यत्वसमानाधिकरणप्रतियोगिताकाभावभानमन्येव इति वाच्यम् । महानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगिताया द्रव्यत्वादेरपि सामानाधिकरण्यादुक्तकार्य्य-कारणभावोपगमे द्रव्यत्वाद्यवच्छिन्नधर्म्मिकमहानसीयत्वादिप्रकारकज्ञानस्यापि तादृशप्रतियोगिताकाभावबुद्धावपेक्षणीयतापत्तेः । अथ तद्धर्म्मावच्छिन्नवृत्तित्वेन भासमानप्रतियोगित्वे तद्धर्म्मावच्छिन्नत्वावगाहिन्याभावबुद्धौ तद्धर्म्मावच्छिन्नधर्म्मिकतद्धर्म्मप्रकारकज्ञानत्वेन हेतुता महानसीयवह्निर्नास्तीत्यत्र च (१) वह्नित्वावच्छिन्ननिष्ठत्वेन संसर्गघटकतया भासमानप्रतियोगित्वे महानसीयत्वावच्छिन्नत्वं भासते त्वावच्छिन्नवह्निवृत्तिप्रतियोगिताकत्वस्याभावांशे प्रतियोगिविशेपरतापन्नमहानसीयत्वसम्बन्धत्वादिति तत्र वह्नित्वावच्छिन्नधर्म्मिकमहानसीयत्वप्रकारकज्ञानस्यापेक्षा न तु धर्म्मान्तरावच्छिन्नधर्म्मिकस्य धर्म्मान्तरविशेषितवह्निवृत्तित्वेन तत्र प्रतियोगितायाः अभानात् इति चेत् तर्हि प्रतियोगितावच्छेदकप्रकारकज्ञानमन्तरेणाप्यभावप्रत्यक्षसामान्यापत्तिः प्रत्यक्षविशेष एव तद्धेतुतायाः स्वीकृतत्वात् एवमप्यनतिप्रसक्तप्रतियोगिविशेषिताभावबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानहेतुत्वे प्रतियोगितावच्छेदकप्रकारकज्ञानस्य हेतुत्वादेव निर्व्वाहेण स्वतन्त्रहेतुतानिर्वीजत्वापाताच्च । तत् केनापि धर्मेणैव हेतु हेतुमद्भावस्यापि समवायितया वाच्यत्वमास्तामत्र वाच्यत्वसामानाधिकरण्यविशेषितत्वावच्छिन्नप्रतियोगिताया एव समवायित्वसंसर्गघटकतया भा-

(१ महानसीयवह्निर्नास्तीत्याकारकबुद्धौ ... इत्यर्थः ।

नोपगमसम्भवेन वाच्यत्वत्वावच्छिन्नधर्म्मिकसमवायित्वप्रकारक-ज्ञानस्य तत्रानपेक्षणीयत्वमुपपद्यत इति। अत्रेदं समाधानमव-धेयम्, तदुभयधर्म्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तदुभयैकतर-धर्म्मावच्छिन्नधर्म्मिकतदन्यतरप्रकारकज्ञानत्वेन हेतुता समवायि-तया वाच्यत्वाभावस्य च व्यधिकरण-समानाधिकरणयोः समवायि-त्व-वाच्यत्वत्वयोर्द्वयोरेव प्रतियोगितावच्छेदकत्वपर्य्याप्तिरवश्यमङ्गी-कार्य्या समवायित्वमात्रस्य प्रतियोगितावच्छेदकत्वे वाच्यत्वत्वप्रका-रकज्ञानमन्तरेणापि तादृशाभावप्रतीत्यापत्तेः। तत्र समवायितया वाच्यत्वं नास्तीति प्रतीत्या समवायित्व-वाच्यत्वत्वोभयपर्य्याप्तप्रति-योगितावच्छेदकत्वानवगाहने तस्याः समवायिवाच्यत्ववद्विदमिति भ्रमविरोधित्वानुपपत्तिश्च तं प्रति समवायितया प्रमेयत्व-वाच्यत्वोभयनास्तीत्यादिनिश्चयव्यावृत्तेन तदुभयांशे प्रतियोगि-तावच्छेदकत्वपर्य्याप्त्यवगाहिनिश्चयत्वेनैव प्रतिबन्धकत्वात्। न च विलक्षणवाच्यत्वप्रकारतानिवेशनादेव दर्शितनिश्चयव्यावृत्तिस-म्भवे तदुभयांशेऽवच्छेदकतापर्य्याप्त्यवगाहित्वमप्रयोजकमिति वा-च्यम्। यतस्तद्धर्म्मेऽभावप्रतियोगितावच्छेदकत्वपर्य्याप्तिस्तदवच्छि-न्नस्याभावविरोधित्वप्रयोजिका तदवगाहित्वमेवाभावबुद्धस्तदव-च्छिन्नविशिष्टज्ञानप्रतिबन्धकतायां तन्त्रं समवायितया वाच्यत्व-प्रमेयत्वोभयं नास्तीतिबुद्धेः समवायित्व-वाच्यत्वत्वोभयविशिष्टवत्ता-बुद्ध्यप्रतिबन्धकत्वे समवायित्व-वाच्यत्वत्वोभयांशे प्रतियोगिताव-च्छेदकत्वपर्य्याप्त्यनवगाहित्वमेव बीजं तस्य च समवायितया वाच्यत्वं नास्तीति धीसाधारण्ये तस्यास्तादृशधीप्रतिबन्धकत्वं नो-

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] वाच्य-
तावच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानत्वेन च प्रति-
योगिज्ञानस्याभावप्रत्यक्षहेतुता न सिध्यतीति विशिष्टवैशिष्ट्यबोधे
विशेषणतावच्छेदकप्रकारकज्ञानहेतुतामतमाश्रित्यैव उक्तरीत्या
अभावलौकिकत्वावच्छिन्नं प्रति प्रतियोगितावच्छेदकविशिष्ट-
प्रतियोगिज्ञानस्य कारणतया तादृशकारणाभावेन व्यधिकरणधर्मा-
वच्छिन्नाभावाप्रत्ययादिति मूलं व्याख्येयं, तच्चानुचितं, उक्त-
विशेषकारणताकल्पनोपजीव्यविशिष्टवैशिष्ट्यबोधसामान्यहेतुताश्र-
यविशेषणतावच्छेदकविशिष्टविशेषणज्ञानाभावस्यैव दर्शयितुमुचि-
तत्वात्, अतो मूले 'हेतुत्वादित्यस्यापेक्षणीयत्वादित्यर्थः, इत्या-

श्रयेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावधिया अपेक्षणे विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकविशिष्टविशेषणज्ञानकारणत्वमेव हेतुत्वेनाभिप्रेतमित्याह, तथाच जन्यतायामभावविषयकत्वावच्छिन्नत्वमविवक्ष्यमिति विशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्य विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नाभावधीनिष्ठजन्यताप्रतियोगीभूतस्याभावेन समवायितया वाच्यत्व नास्तीति प्रतीतेर्व्यधिकरणधर्म्मावच्छिन्नाभावावगाहित्वासम्भव इत्यर्थपरतया-व्याख्यानमेवोचितं न तु विशिष्टवैशिष्ट्यबोधहेतुतायामुपजीव्यकल्प्यहेतुत्वान्तरपरतयेत्याशयेनाह, दीधितौ 'विशेषणतावच्छेदकेति । अयम्भावः वाच्यत्व समवायीति ज्ञानमन्तरेण समवायिवाच्यत्ववानयमिति विशिष्टवैशिष्ट्यबोधानुत्पत्त्या वाच्यत्वत्वावच्छिन्ननिरूपितत्वेन भासमानवैशिष्ट्ये समवायित्वावच्छिन्[illegible]पितत्वावगाहिनि ज्ञाने वाच्यत्वत्वावच्छिन्नधर्म्मिकसमवा[illegible] प्रकारकज्ञानत्वेन हेतुताकल्पनमावश्यक समवायि[illegible] नास्तीति व्यधिकरणधर्म्मावच्छिन्नाभावबुद्धेरपि [illegible] च्छिन्नीयत्वेन भासमाने अनुयोगितारूपवैशि[illegible] च्छिन्नीयत्वावगाहितया तत्र तादृशज्ञान[illegible] ननु वैशिष्ट्यांशे वाच्यत्वत्वनिष्ठध[illegible] षणतापन्नसमवायित्वावच्छिन्नप्रति[illegible] वच्छिन्नधर्म्मिकसमवायित्वप्र[illegible] च्छिन्नाभावबुद्धौ च वाच्यत्व[illegible] नोपेयते अपि तु तद्वि[illegible]

योगिताकत्वसम्बन्धेनाभावांशे विशेषणत्वमुपेयते वाच्यत्वसंसर्गतावच्छेदकतयैव वा तथाविधतदवच्छिन्नत्वस्य प्रतियोगितांशे भानमुपेयते तथाच तत्र नोपदर्शितज्ञानापेक्षेत्याशङ्कां परिजिहीर्षुर्भावं व्याचष्टे, 'अभावप्रत्ययो हीति, 'विशेषणस्य' विशेषणप्रतियोगिघटादिनिरूपितविशेषणतापन्नस्य घटत्वादेः, 'प्रतियोगितावच्छेदकत्वमवगाहते,(१) प्रतियोगितया भासमानघटादिनिरूपितविशेषणतावच्छिन्ना या स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नघटत्वादिनिष्ठप्रकारता तच्छालीभवतीति यावत्। 'न तु स्वातन्त्र्येण' न प्रतियोग्यविशेषणत्वेन, घटत्वादेः प्रतियोगितावच्छेदकत्वमवगाहते इत्यनुषङ्गेनान्वयः, तादृशसम्बन्धावच्छिन्नघटत्वादिप्रकारता प्रतियोगिनिरूपितप्रकारतानवच्छिन्ना न भवतीत्यर्थः। 'घटो नास्तीत्येवेति अभावांशे स्वातन्त्र्येण घटत्वादिवैशिष्ट्योल्लेखरहिताया एव इत्यर्थः। 'प्रतीतेः,' अनुभवादिति शेषः, एतावता किमायातमित्यत आह, 'तदिहेति,'अवच्छिन्नं' विशेषितं,'तस्यापि प्रतियोगितावच्छेदकत्वं'तस्य प्रतियोगितावच्छेदकत्वमपि, तथाच मानाभावेन व्यधिकरणधर्म्मस्य प्रतियोगितावच्छेदकत्वासिद्धिरिति भावः। अथ व्यधिकरणधर्म्मस्य प्रतियोगिविशेषणतयैव व्यधिकरणधर्म्मावच्छिन्नाभावबुद्धौ भानमुपेयते। न चैवं सति तादृशबुद्धेः समवायित्वादिरूपविशेषणतावच्छेदकप्रकारकवाच्यत्वादिज्ञानजन्यतावच्छेदकाक्रान्ततया तादृशज्ञानं विना व्यधिकरणधर्म्मावच्छिन्नाभाव-

(१) एतेन 'तदवच्छेदकत्वमवगाहते' इत्यत्र 'प्रतियोगितावच्छेदकत्वमवगाहते' इति पाठः कुत्रचिदादर्शपुस्तके वर्त्तत इत्यनुमीयते।

बुद्ध्यानुपपत्तिरिति वाच्यम्। भ्रमात्मकतादृशज्ञानदशायामेव तद्बुद्ध्यपगमात् विशेषदर्शनदशायामपि आहार्य्यतत्प्रकारज्ञान-सम्भवात् अनाहार्य्यस्यैव विशेषणतावच्छेदकप्रकारकज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वे विशेषदर्शनकालीनायाः समवायितया वाच्यत्व नास्तीत्यादिबुद्धेरगत्या वाच्यत्वाद्यधिकरणकसमवायित्वाद्य-भावावगाहित्वमुपेयते, वाच्यत्वं समवायि इत्यादिभ्रमानन्तर सम-वायिवाच्यत्वं नास्तीत्याकारकप्रत्यय एव व्यधिकरणधर्म्मस्य प्रति-योगितावच्छेदकत्वे मानमास्तां तत्र तदवगाहितायाः सर्व्वानुभव-सिद्धत्वेनापह्नोतुमशक्यत्वात्, तादृशप्रतीतेर्व्वाच्यत्वे समवायित्वाभावा-वगाहित्वोपगमे तत्पूर्व्वं वाच्यत्व समवायीति भ्रमापेक्षानुपपत्तेरि-त्याशयेनाशङ्कते, 'अथावगाहत इति, समाधत्ते, 'तर्हि भ्रम एवेति व्यधिकरणधर्म्मस्य प्रतियोगितावच्छेदकत्वांशेऽपि भ्रम एव इत्यर्थः, वैशिष्ट्यभान एवावच्छेदकताया भानादवच्छेदकताया वैशिष्ट्य-नियततया तद्बाधे तस्या अपि बाधादिति भाव। न चैवं 'गवि शशशृङ्गं नास्तीति प्रतीतेरसिद्धेरिति मूलासङ्गतिस्तादृश-प्रतीतेः शृङ्गांशे शशीयत्वावगाहितानभ्युपगमे शशीयत्वे शृङ्ग-निष्ठप्रतियोगितावच्छेदकत्वावगाहनासम्भवात् तदवगाहित्वे भ्रम-त्वात् उभयथापि व्यधिकरणधर्म्मावच्छिन्नाभावासाधकत्वात्तादृश-प्रतीतिनिराकरणस्यानुपयुक्तत्वादिति वाच्यम्। अभ्रान्तानामपि गवि शशशृङ्ग नास्तीति व्यवहारमूलकप्रतीतिसत्त्वेनोक्तनियमस्यैवा-सिद्ध्या व्यधिकरणधर्म्मावच्छिन्नाभावसिद्धिर्निष्प्रत्यूहैव तादृशप्रतीति-र्गोशृङ्गाधिकरणकशशीयत्वाभावावगाहित्वोपगमे तस्या स्वाधिक-

यदि च यादृशप्रकारतावच्छिन्ने धर्मे स्वावच्छिन्नप्रतियोगिताकत्व-याभावच्छिन्नधर्मितान्तरनिरूपितप्रकारता–तदन्यप्रकारतानिरू-पितविशेषणविषयतानिरूपितसंसर्गतासम्बन्धेन ज्ञानं प्रति अभा-वीयप्रतियोगिताविशेषभेदस्य कारणतां कल्पयित्वा इष्टापत्तिः प्र-तियोगिप्रकारतानिरूपितधर्मितावच्छेदकतापन्नावृत्तिप्रकारतावि-शेषसम्बन्धेन लौकिकप्रत्यक्षं प्रत्यभावत्वभेदस्य कारणतां कल्पयित्वा च पूर्वापत्तिः (१) वार्य्यते तदा तावतैव सकलापत्तिवारणादलं प्रतियोगिज्ञानहेतुतया। न चैवमपि प्रतियोग्यविषयकस्याभाव-त्वप्रकारकप्रत्यक्षापत्तिर्विना प्रतियोगिज्ञानहेतुतां न शक्यते वारयितुं इति वाच्यम्। प्रतियोगिज्ञानं विना प्रतियोग्यविषयकस्य इदन्त्वादिना अभावप्रत्यक्षस्य इदन्त्वादिरूपतादृशविशेषणज्ञाना-धीने च तादृशस्य अभावनिर्विकल्पस्येष्टत्वात् अभावनिर्विकल्प-कारणतायां प्रतियोगिज्ञानहेतुतयापि तद्वारणासम्भवात् इदन्त्वा-दिना अभावप्रत्यक्षे व्यभिचारवारणाय अभावत्वप्रकारकाभावप्र-[illegible]वच्छिन्ने [illegible] प्रतियोगिज्ञानहेतुताया वाच्यत्वात्, विशेष-[illegible]निष्ठतासम्बन्धेन प्रत्यक्षं प्रति अभावभेदस्य हेतुता [illegible] तद्वारणे च ममापि तथैव तस्य वारणीयत्वात्। वस्तु-[illegible] तादृशफलापत्त्यनवकाशः प्रसिद्धाया घटो [illegible]विशिष्यावगाहितया तत्र प्रति-[illegible]प्रकारक [illegible] षणतावच्छेदकप्रा-

इति।

नविषया हेतुतायाः क्लृप्तत्वात् तादृशकारणविरहादेव न तच्छून्यकाले तदापत्तिः।

यत्तु अनाहार्य्यप्रतियोगितावच्छेदकविशिष्टप्रतियोगिप्रकारकोपलम्भविरहो विशेष्यीभूततत्तद्धर्म्मिप्रत्यासन्नोऽभावग्रहहेतुः तथाच यस्य पुंसः समवायित्वादिविशिष्टवाच्यत्वादिप्रकारकोऽनाहार्य्यभ्रमोऽप्रसिद्धः तदीयः समवायितया वाच्यत्वन्नास्तीकारकप्रत्ययो न व्यधिकरणधर्म्मावच्छिन्नाभावमवगाहितुमिष्टे तदीयतादृशप्रतियोग्युपलम्भविरहरूपतदीयाभावप्रत्यक्षकारणस्याप्रसिद्धेरिति तत्पुरुषीयतादृशप्रत्ययस्य वाच्यत्वाद्यनुयोगिकसमवायित्वाभावविषयकत्वस्यावश्यकत्वे सर्व्वेषैव तद्विषयकत्वमुचितं एकाकारप्रतीतेः पुरुषभेदेन विषयवैचित्र्यविरहादिति मिश्रोक्तव्यधिकरणधर्म्मावच्छिन्नाभावनिराकरणस्य पन्थाः सोऽपि न साधीयान्। अभावबुद्धौ स्वप्रतियोगितावच्छेदकविशिष्ट-स्वप्रतियोगिमत्त्वोपलम्भत्वेन एककारणतायाः स्वत्वाननुगमेन दुर्व्वचतया विशिष्य कारणताकल्पनस्यावश्यकत्वे यत्र तादृशोपलम्भप्रसिद्धिस्तत्रैव तादृशोपलम्भानन्तरमभावप्रत्ययवारणाय तदभावहेतुतोपगमाद्व्यधिकरणधर्म्मावच्छिन्नाभावबुद्धौ क्वचिदप्रसिद्ध्या तदभावहेतुत्वासम्भवेऽपि सन्निकर्षादिघटितसामग्रीतस्तदुत्पत्तौ वाधकादित्यत आह, 'यदि पुनरिति,'स्वरसवाही' विवादशून्यः, घटत्वेन घटो नास्तीति पाठः घटत्वेन पटो नास्तीति पाठो न साधुस्तादृशप्रतीतेः पटाद्यनुयोगिकघटत्वाद्यभावावगाहिताया एव व्यधिकरणधर्म्मावच्छिन्नाभावानभ्युपगन्तृभिरुपगमात् प्रतियोगिविशेषणतापन्न-

यदि च यादृशप्रकारतावच्छिन्ने धर्म्मे स्वावच्छिन्नप्रतियोगिताकत्व-सम्बन्धावच्छिन्नधर्म्मान्तरनिरूपितप्रकारता–तदन्यप्रकारतानिरूपितविशेषणविषयतानिरूपितसंसर्गतासम्बन्धेन ज्ञानं प्रति अभावीयानुयोगिताविशेषभेदस्य कारणतां कल्पयित्वा ईदृशापत्तिः प्रतियोगिप्रकारतानिरूपितधर्म्मितावच्छेदकतापन्नावृत्तिप्रकारताविशेषसम्बन्धेन लौकिकप्रत्यक्षं प्रत्यभावत्वभेदस्य कारणतां कल्पयित्वा च पूर्व्वापत्तिः (१) वार्य्यते तदा तावतैव सकलापत्तिवारणादलं प्रतियोगिज्ञानहेतुतया। न चैवमपि प्रतियोग्यविषयकस्याभावत्वाप्रकारकप्रत्ययस्यापत्तिर्विना प्रतियोगिज्ञानहेतुतां न शक्यते वारयितुं इति वाच्यम्। प्रतियोगिज्ञानं विना प्रतियोग्यविषयकस्य इदन्त्वादिना अभावप्रत्यक्षस्य इदन्त्वादिरूपतादृशविशेषणज्ञानासत्त्वे च तादृशस्य अभावनिर्व्विकल्पस्येष्टत्वात् अभावनिर्विकल्पकानुपगमे प्रतियोगिज्ञानहेतुतयापि तद्वारणासम्भवात् इदन्त्वादिना अभावप्रत्यक्षे व्यभिचारवारणाय अभावत्वप्रकारकाभावप्रत्यक्षत्वावच्छिन्नं प्रत्येव प्रतियोगिज्ञानहेतुताया वाच्यत्वात्, विशेषणानवच्छिन्नविषयतासम्बन्धेन प्रत्यक्षं प्रति अभावभेदस्य हेतुतां स्वीकृत्य तद्वारणे च मयापि तथैव तस्य वारणीयत्वात्। वस्तुतस्तु आपाद्याप्रसिद्धेरेव तादृशफलापत्त्यनवकाशः प्रसिद्धाया घटो नास्तीत्यादिबुद्धेर्घटत्वादिविशिष्टवैशिष्ट्यावगाहितया तत्र प्रतियोगितावच्छेदकघटत्वादिप्रकारकज्ञानस्य विशेषणतावच्छेदकप्रा-

---

(१) नास्ति घटीयत्वेनाकारकमग्रहानन्यनप्रत्यक्षापत्तिरित्यर्थः।

नविधया हेतुतायाः क्लृप्तत्वात् तादृशकारणविरहादेव न तच्छून्य-कालेे तदापत्तिः ।

यत्तु अनाहार्य्यप्रतियोगितावच्छेदकविशिष्टप्रतियोगिप्रकार-कोपलम्भविरहो विशेष्यीभूततत्तद्धर्म्मिप्रत्यासन्नोऽभावग्रहहेतुः त-थाच यस्य पुंसः समवायित्वादिविशिष्टवाच्यत्वादिप्रकारकोऽना-हार्य्यभ्रमोऽप्रसिद्धः तदीयः समवायितया वाच्यत्वन्नास्तीकारकप्र-त्ययो न व्यधिकरणधर्म्मावच्छिन्नाभावमवगाहितुमिष्टे तदीयतादृ-शप्रतियोग्युपलम्भविरहरूपतदीयाभावप्रत्यक्षकारणस्याप्रसिद्धेरिति तत्पुरुषीयतादृशप्रत्ययस्य वाच्यत्वाद्यनुयोगिकसमवायित्वाभाव-विषयकत्वस्यावश्यकत्वे सर्व्वत्रैव तद्विषयकत्वमुचितं एकाकार-प्रतीतेः पुरुषभेदेन विषयवैचित्र्यविरहादिति मिश्रोक्तव्यधिकरण-धर्म्मावच्छिन्नाभावनिराकरणस्य पन्थाः सोऽपि न साधीयान् । अभावबुद्धौ स्वप्रतियोगितावच्छेदकविशिष्ट-स्वप्रतियोगिसत्त्वोप-लम्भत्वेन एककारणतायाः स्वत्वाननुगमेन दुर्व्वचतया विशिष्य कारणताकल्पनस्यावश्यकत्वे यत्र तादृशोपलम्भप्रसिद्धिस्तत्रैव तादृ-शोपलम्भानन्तरमभावप्रत्ययवारणाय तदभावहेतुतोपगमाद्व्यधि-करणधर्म्मावच्छिन्नाभावबुद्धौ क्वचिदप्रसिद्धया तदभावहेतुत्वासम्भवे-ऽपि सन्निकर्षादिघटितसामग्रीतस्तदुत्पत्तौ बाधकादित्यत आह, 'यदि पुनरिति,'स्वरसवाही' विवादशून्यः, घटत्वेन घटो नास्तीति पाठः घटत्वेन पटो नास्तीति पाठो न साधुस्तादृशप्रतीतेः पटाद्यनुयोगिकघटत्वाद्यभावावगाहिताया एव व्यधिकरणधर्म्मा-वच्छिन्नाभावानभ्युपगन्तृभिरुपगमात् प्रतियोगिविशेषणतापन्न-

स्यैव प्रतियोगितावच्छेदकत्वं भासत इति निगमय्य तादृश-प्रतीतिवर्त्तिनामसाधारणात्, 'नानुभविक' इत्यस्य व्यधिकरणधर्म-स्यावच्छेदकत्वावगाहितया अनुभवसिद्ध प्रत्यक्षतया वा कस्य-चित् सङ्गमनीयः, 'गोत्वाश्वत्वाभ्यामपि न गवाश्वमित्यनेन प्रतीति-कारणत्वेन तादृशाभावनिराकरणवन्तीमित्याद्य प्राचीनाः। 'यदि तदा' इत्यनेन तादृशप्रतीतेरानुभविकत्वे विवादं प्रदर्शयता तादृशाभावस्यापारमार्थिकत्वं सूचितम्।

इति श्रीमन्महामहोपाध्याय-गदाधरभट्टाचार्य्यविरचितायां अनु-मानचिन्तामणिदीधितिविवृतौ व्यधिकरणधर्म्माव-च्छिन्नाभावघटितव्याप्तिलक्षणं सम्पूर्णम्।



अवृत्तौ साध्याधिकरणावृत्तित्वसत्त्वात् साध्यासामानाधिकरण्य-पदस्य साध्यानधिकरणाधिकरणकत्वाद्यर्थकतायामेव विशेषण-दलस्यावृत्तिसाधारण्यसम्भवात् तथाच सति एतादृशसाध्यासामा-नाधिकरण्याप्रसिद्ध्या केवलान्वयिन्यव्याप्तेः साध्यासामानाधि-करण्यं नोक्तरूपं किन्तु साध्याधिकरणानधिकरणत्वरूपं तदन-धिकरणत्वमप्यवृत्तिसाधारणम् अधिकरणाप्रसिद्ध्या अनधिकरणा-प्रसिद्धेरवृत्तौ तदसत्त्वात् इति चेदेवमपि 'केवलान्वयिनीत्यादि-ग्रन्थविरोधः, तेन गगनादौ साध्यासामानाधिकरण्यप्रसिद्धिदर्शनात् साध्यसमानाधिकरणे व्यभिचारिण्यतिव्याप्तिश्चेत्यालोच्य लक्षणम-न्यथा व्याख्यातुमुपक्रमते. 'साध्यस्येति, साध्यपदासामानाधिक-रण्यपदयोर्बहुव्रीहिबलात् साध्यासमानाधिकरणलाभः, तदनधि-करणत्वं यदि तदधिकरणत्वाभावस्तदा केवलान्वयिनि अवृत्तेरेव साध्यवदवृत्तितया तदनधिकरणत्वाप्रसिद्ध्या अव्याप्तिरतोऽनधि-करणपदं अभाववदर्थकतया व्याचष्टे, 'तदभाववत्त्वमिति, सति-सप्तम्याः सामानाधिकरण्यार्थकतया तदभाववत्त्वसमानाधि-करणसाधिकरणत्वस्य विवक्षितत्वे धूमादिहेतौ वह्न्याद्यसमाना-धिकरणधूमत्वादिमत्त्वादव्याप्तिरत आह, 'तदवच्छिन्नेति, अवच्छे-द्यावच्छेदकभावः कुतो लभ्यते इत्याशङ्कायामाह, 'सतिसप्तम्येति, 'अनधिकरणत्वे सतीत्यत्र या सप्तमी तत इत्यर्थः, 'अवच्छेदक-त्वलाभादिति तदभाववत्त्वरूपप्रकृत्यर्थे अधिकरणतानिरूपकत्व-रूपसमभिव्याहृतसाधिकरणत्वपदार्थैकदेशाधिकरणतानिरूपकता-वच्छेदकतालाभादित्यर्थः, अवच्छेदकत्वञ्चेदनतिरिक्तवृत्तित्वरूपं

विरच्यते तदा विषमव्याप्ते धूमादावव्याप्तिः वह्न्यसमानाधिकरणपदार्थाभावस्य हेतुशून्यसाध्याधिकरणसाधारणस्य हेत्वतिरिक्तवृत्तित्वात् साध्यव्यापके व्यभिचारिण्यतिव्याप्तिश्च तत्र साध्यसमनियतस्य साध्यासमानाधिकरणपदार्थाभाववत्त्वस्य हेत्वनतिरिक्तवृत्तित्वादत आह, 'तच्चेति, 'अन्यूनवृत्तित्वं' व्यापकत्वं, समुदितार्थमाह, 'साध्यवदवृत्तीति। साध्यानधिकरणाधिकरणकत्वरूपं साध्याधिकरणानधिकरणकत्वरूपञ्च साध्यासामानाधिकरण्यं केवलान्वयिसाध्यके न प्रसिद्धमतीति साध्यासामानाधिकरण्यपदस्य साध्यवदवृत्तित्वार्थकता स्फुटीकृता, धूमवदवृत्तिऋदत्वाद्यभावस्य वह्निव्यापकत्वादतिव्याप्तिरतः साध्यवदवृत्तयो ये ये पदार्थास्तदभावकूटलाभाय सकलेति, इत्यञ्च साकल्यावच्छिन्नतावत्पदार्थाभावस्य केवलान्वयित्वेऽपि न क्षतिः। साध्यवदवृत्तित्वावच्छिन्नप्रतियोगिकैकसामान्याभावञ्च निवेशयितुमशक्यः। येन येन सम्बन्धेन यस्य साध्यवदवृत्तित्वं तत्तत्सम्बन्धावच्छिन्नतदभावस्य निवेशनीयत्वात्, प्रतियोगितावच्छेदकसम्बन्धाद्यननुगमेनाभावैक्यासम्भवात्। विशेषणताविशेषसम्बन्धमात्रनिवेशपक्षे तत्तदननुगमविरहादेक एव सामान्याभावो निवेशनीयः। साध्यपद साध्यतावच्छेदकविशिष्टपरं अतो विशिष्टसत्तावान् जातेरित्यादौ गुणत्वादे (१) शुद्धसाध्यवदवृत्तित्वेऽपि न क्षतिः। तद्वत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यं, तेन समवायेन वह्नौ साध्ये पर्व्वतत्वादेर्वह्निसंयोगिवृत्तित्वेऽपि कथितेन हेतौ धूमे नाति-

(१) ज्ञानत्वादेरिति पा०।

अवृत्तौ साध्याधिकरणावृत्तित्वसत्त्वात् साध्यासामानाधिकरण्य-
पदस्य साध्यानधिकरणाधिकरणकत्वाद्यर्थकतायामेव विशेषण-
दलस्यावृत्तिसाधारण्यसम्भवात् तथाच सति एतादृशसाध्यासामा-
नाधिकरण्याप्रसिद्धया केवलान्वयिन्यव्याप्तेः साध्यासामानाधि-
करण्यं नोक्तरूपं किन्तु साध्याधिकरणानधिकरणत्वरूपं तदन-
धिकरणत्वमप्यवृत्तिसाधारणम् अधिकरणाप्रसिद्धया अनधिकरणा-
प्रसिद्धेरवृत्तौ तदसत्त्वात् इति चेदेवमपि 'केवलान्वयिनीत्यादि-
ग्रन्थविरोधः, तेन गगनादौ साध्यासामानाधिकरण्यप्रसिद्धिदर्शनात्
साध्यसमानाधिकरणे व्यभिचारिण्यतिव्याप्तिश्चेत्यालोच्य लक्षणम-
न्यथा व्याख्यातुमुपक्रमते, 'साध्यस्येति, साध्यपदासामानाधिक-
रण्यपदयोर्बहुव्रीहिबलात् साध्यासमानाधिकरणत्वलाभः, तदनधि-
करणत्वं यदि तदधिकरणत्वाभावस्तदा केवलान्वयिनि अवृत्तेरेव
साध्यवदवृत्तितया तदनधिकरणत्वाप्रसिद्धया अव्याप्तिरतोऽनधि-
करणपदं अभाववदर्थकतया व्याचष्टे, 'तदभाववत्त्वमिति, सति-
सप्तम्याः सामानाधिकरण्यार्थकतया तदभाववत्त्वसमानाधि-
करणसाधिकरणत्वस्य विवक्षितत्वे धूमादिहेतौ वह्न्याद्यसमाना-
धिकरणधूमत्वादिसत्त्वादव्याप्तिरत आह, 'तदवच्छिन्नेति, अवच्छे-
द्यावच्छेदकभावः कुतो लभ्यते इत्याशङ्कायामाह, 'सतिसप्तम्येति,
'अनधिकरणत्वे सतीत्यत्र या सप्तमी तत इत्यर्थः, 'अवच्छेदक-
त्वलाभादिति तदभाववत्त्वरूपप्रकृत्यर्थे अधिकरणतानिरूपकत्व-
रूपसमभिव्याहृतसाधिकरणत्वपदार्थैकदेशाधिकरणतानिरूपकता-
वच्छेदकतालाभादित्यर्थः, अवच्छेदकत्वञ्चेदमतिरिक्तवृत्तित्वरूपं

विवक्षते तदा विषमव्याप्ते धूमादावव्याप्तिः वह्निसमानाधि-करणपदार्थाभावस्य हेतुशून्यसाध्याधिकरणासाधारणस्य हेत्वति-रिक्तवृत्तित्वात् साध्यव्यापके व्यभिचारिण्यतिव्याप्तिश्च तत्र साध्य-समनियतस्य साध्यसमानाधिकरणपदार्थाभाववत्त्वस्य हेत्वनति-रिक्तवृत्तित्वादत आह, 'नन्वे'ति, 'अन्यूनवृत्तित्वं व्यापकत्वं, समु-दितार्थमाह, 'साध्यवद्वृत्तीति'। साध्यानधिकरणाधिकरणत्व-रूपं साध्याधिकरणानधिकरणत्वरूपञ्च साध्यासमानाधिकरणत्वं केवलान्वयिसाध्यके न प्रसिद्ध्यतीति साध्यासामानाधिकरण्य-पदस्य साध्यवद्वृत्तित्वार्थकता स्फुटीकृता, धूमवद्वृत्तिह्रदत्वाद्य-भावस्य वह्निव्यापकत्वादतिव्याप्तिरतः साध्यवद्वृत्तयो ये ये पदार्थास्तत्तदभावकूटाभाव मूलकेति, इत्थञ्च सामान्यावच्छि-न्नाभावत्वदार्थाभावस्य केवलान्वयित्वेऽपि न क्षतिः। साध्य-वद्वृत्तित्वावच्छिन्नप्रतियोगिकैकसामान्याभावस्य निवेशयितुमशक्यः। येन येन सम्बन्धेन यस्य साध्यवद्वृत्तित्वं तत्तत्सम्बन्धावच्छिन्न-तदभावस्य निवेशनीयत्वात्, प्रतियोगितावच्छेदकसम्बन्धादनु-गतेनाभावैक्यासम्भवात्। विशेषणताविशेषसम्बन्धमात्रनिवेशे तत्तदननुगमविरहादेक एव सामान्याभावो निवेशनीयः। साध्यवत् साध्यतावच्छेदकविशिष्टपरं अतो विशिष्टसत्तावान् जातिमत्त्वादौ गुणत्वादेः[१] सत्ताभाववद्वृत्तित्वेऽपि न क्षतिः। तद्वत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यं, तेन समवायेन वह्नौ साध्ये पर्वतादेर्वृत्तित्वेऽपि संयोगेन वह्नेर्धूमे नाति-

१ गुणत्वादेरिति ग०।

व्याप्तिः। यत्पदं हेतुतावच्छेदकविशिष्टपरं अतो द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः। तदधिकरणता हेतुतावच्छेदकसम्बन्धेन बोध्या तेन समवायादिना धूमाधिकरणताया निर्वह्निसाधारण्येऽपि न क्षतिः।

तत्त्वचिन्तामणि-दीधितिः।

यथासन्निवेशे अधिकरणत्वस्य न वैयर्थ्यं हेतुतावच्छेदकसम्बन्धलाभाय वा तत्। येन येन सम्बन्धेन योयः साध्यवदवृत्तिस्तेन तेन सम्बन्धेन तत्तदभावो बोध्यः, एतेन साध्यवदवृत्तित्वं यदि साध्यतावच्छेदकसम्बन्धेन विवक्षितं तदा समवायेन साध्यतायां साध्यवदसमवेतस्य सार्व्वत्रिकत्वात्सकलतच्छून्याप्रसिद्धिः। अथ तदभावोऽपि तादृशेनैव सम्बन्धेन वाच्यस्तदा जातिमान् प्रमेयत्वादित्यादावतिव्याप्तिः जातिमदसमवेतानां समवायेनाभावस्य केवलान्वयित्वादतएव न संयोगेन समवायेन वा, इदं न जातिमज्जातित्वादित्यादौ साध्यवत्समवेताद्यप्रसिद्धेश्च। नापि साधनतावच्छेदकेन, इदमेतद्रूपभिन्नं गुणत्वादित्यादावतिव्याप्तेः। नापि विषयतया, घटभिन्नं मेयत्वादित्यत्राप्यतिव्याप्तेः सविषयकमात्रस्यैव घटभिन्नविषयत्वात् घटनिर्विकल्प-

केऽपि घटत्वादिभानात् । नापि सम्बन्धसामान्येन, द्रव्यं सत्त्वादित्यादावतिव्याप्तेः वृत्तिमन्मात्रस्यैव स्वरूपसम्बन्धेन महाकाले वृत्तेर्वृत्तेरभावस्य च केवलान्वयित्वादिति प्रत्युक्तम् । विशेषणताविशेषेण वा साध्यवद्वृत्तित्वं वक्तव्यं सर्व्वत्रैव तत्तद्ज्ञानित्वे तत्तदन्यान्यत्वे तत्प्रकारकप्रमाविषयत्वे वा तत्त्वनियमम् । तेनैव सम्बन्धेन तदवच्छिन्नसामान्याभावो वाच्य इति ।

कत्वादतिव्याप्तिः । साध्यतावच्छेदकसम्बन्धेन साध्यवदवृत्तित्वादिविवक्षणे च वक्ष्यमाणदोषाणां दुर्वारत्वमालोच्य साध्यवदवृत्तितानिर्वाहकसम्बन्धाभावप्रतियोगितावच्छेदकसम्बन्धयोरैक्यं विवक्षति, 'येन येनेति, संयोगादिनायोगोलकत्वादेर्धूमादिमदवृत्तित्वात्तत्सम्बन्धावच्छिन्नतदभावस्य च वह्न्यादिव्यापकत्वादतिव्याप्तिरतः 'येन येनेति वीप्सा, 'तत्तदभाव इति, संयोगादिसम्बन्धावच्छिन्नसाध्यवदसंयुक्तत्वाद्यवच्छिन्नसामान्याभावा एव यथासम्भव लक्षणघटकाः, न तु तत्तत्पदार्थानां तत्तद्वृत्तित्वावच्छिन्नाभावाः, अनन्ताभावनिवेशप्रसङ्गादित्यवधेयम् । एतादृशविवक्षाप्रयोजनं दर्शयति, 'एतेनेत्यादिना, 'साध्यतावच्छेदकसम्बन्धेनेति अस्य चाभावप्रतियोगितया भासमानायां वृत्तावन्वयः, 'समवायेनेति, संयोगादीनामप्युपलक्षणं, 'साध्यवदसमवेतस्येति, मेयत्वादेरिति शेषः । असमवेतपदमप्यसंयुक्ताद्युपलक्षणपरं, 'सकलतच्छून्येति साध्यवदवृत्तिसकलपदार्थाभावाप्रसिद्धिरित्यर्थः, एकसम्बन्धेन व्यभिचारनिरूपकाधिकरणवृत्तेरपरसम्बन्धावच्छिन्नाभावस्य हेतुव्यापकतामादायातिव्याप्तिवारणाय साध्यवदवृत्तेः सम्बन्धसामान्येनाभावोऽवश्य विवक्षणीयः । संयोग-समवाय-स्वरूपादिनिष्ठसम्बन्धताविशेषाणां मिथो भिन्नत्वेऽपि सम्बन्धतात्वेनानुगताना तावन्निष्ठप्रतियोगितावच्छेदकसम्बन्धतावच्छेदकत्वे मानाभावात् । सामान्यविशेषभावेनावच्छेद्यावच्छेदकभूतसम्बन्धतयोर्भेदेनात्माश्रयविरहात्, प्रत्येकं सकलसम्बन्धावच्छिन्नाभावकूट एव वा निवेश्य इत्यभिप्रायेणेदं, अन्यथा मेयत्वादेरपि समवायादिना अभावप्रसिद्धा

असङ्गत्यापत्तेः । 'तादृशेनैवेति, एवकारेण सम्बन्धसामान्यव्यवच्छेदः, तावतैव धूमवान् वह्नेरित्यादावतिव्याप्तिवारणसम्भवादयोगोलकीय-वह्न्यादेः साध्यतावच्छेदकसम्बन्धेनाभावस्य हेत्वन्यूनवृत्तिता-विरहादिति भावः । 'जातिमानिति समवायेन जातित्वावच्छिन्न-साध्यके व्यभिचारिणीत्यर्थः, 'केवलान्वयित्वादिति व्यधिकरणसम्ब-न्धावच्छिन्नप्रतियोगिताकत्वेनेत्यादिः, केवलान्वयित्वे सुतरामेव हेत्वन्यूनवृत्तित्वमिति तदभिधानम् । विशिष्य समवायादिसम्बन्ध-निवेशनं निरस्यति, 'अतएवेति एतादृशातिव्याप्तेरेवेत्यर्थः, संयोगेन समवायेन वा साध्यवदवृत्तेस्तेनैव सम्बन्धेनाभावः शक्यनिवेश इति शेषः । जातिमदसंयुक्तस्य संयोगेनाभावस्यापि केवलान्वयित्वादिति भावः । एतत्पक्षद्वये अधिकामव्याप्तिमाह, 'इदमिति, 'समवेता-दीत्यादिना संयुक्तपरिग्रहः । 'साधनतावच्छेदकेनेति, सम्बन्धेनेति शेषः । साध्यवदवृत्तिरित्यादिकमपि पुरणीयं, एवमग्रेऽपि, जात्यादिसाध्यके व्यभिचारिणि स्वरूपसम्बन्धस्यैव साधनताव-च्छेदकतया तेन सम्बन्धेन साध्यवदवृत्तिजातित्वादेस्तादृशसम्बन्धा-वच्छिन्नाभावस्य हेत्वव्यापकत्वेन नैतत्कल्पेऽतिव्याप्तिरित्याशङ्काव-तारः । 'इदमिति पक्षनिर्देशः 'एतदित्यस्य पक्षनिर्देशताभ्रम-परीहाय, तथा सति रूपत्वावच्छिन्नभेदस्य साध्यतालाभेन तादृश-साध्यवदसमवेतस्य रूपत्वादेः प्रसिद्ध्या अतिव्याप्त्यनवकाशात् । 'अतिव्याप्तेरिति, एतद्रूपमात्रसमवेताप्रसिद्ध्या एतद्रूपभिन्नासम-वेतस्य समवायरूपसाधनतावच्छेदकसम्बन्धावच्छिन्नाभावस्य व्यधि-करणसम्बन्धावच्छिन्नाभावतया केवलान्वयित्वादिति भावः । तदृटा-

दिमात्रसमवेतस्य रूपादेः प्रसिद्धा गुणत्वरूपेकव्यक्तिकानुसरणम्। 'नापि विषयतयेति, व्यभिचारिणि साध्यवद्विषयकस्य व्यभिचारनिरूपकाधिकरणविषयकज्ञानादेर्विषयतासम्बन्धावच्छिन्नाभावमादायातिव्याप्तिनिराकरणासम्भवात् शङ्कावतारः। 'घटभिन्नमेयत्वादित्यत्रापीत्यपिना पूर्व्वोक्तस्थलपरिग्रहः, घटभेदसाध्यकस्य नानाव्यक्तिविपक्षकत्वं द्रव्यविपक्षकत्वञ्च पूर्व्वोक्तस्थलाद्विशेष इति पूर्व्वकल्पापेक्षया एतत्पक्षस्यातिहेयतासूचनायैतस्याधिकस्य प्रदर्शनम् अतिव्याप्तिवीजं, विषयतया साध्यवद्वृत्तेस्तत्सम्बन्धावच्छिन्नाभावस्य केवलान्वयित्वं दर्शयति, 'सविषयकेति, 'मात्रपदं कृत्स्नपरं, 'घटभिन्नविषयकत्वादिति, घट इत्याद्याकारकस्य घटादिविषकज्ञानादेरपि विशेषणीभूतघटत्व-तत्सम्बन्धविषयकत्वादिति भावः। ननु विशिष्टवुद्धेर्विशेषणादिविषयकत्वनियमेऽपि घटभिन्नाविषयकं घटनिर्विकल्पकमपि सम्भवतीत्यत आह, 'घटनिर्व्विकल्पकेऽपीति, 'घटत्वादीत्यादिना रूपादिपरिग्रहः, तद्भासकसन्निकर्षादिघटितसामग्र्या अपि तदानीं सत्त्वादिन्द्रियाणां स्वव्यवस्थापकगुणपुरस्कारेणैव प्रवृत्तेश्चाक्षुषादौ रूपादिभानस्यावश्यकत्वाच्चेति भावः। 'सम्बन्धमात्रेणेति, सम्बन्धमात्रेण साध्यवद्वृत्तित्वं साध्यवत्सम्बद्धत्वसामान्यं साध्यवदाधेयत्वसामान्यं वा, तादृशसम्बन्धेनाभावश्च सम्बन्धत्वावच्छिन्नप्रतियोगितावच्छेदकसम्बन्धताक एक एवाभावः प्रतियोगितावच्छेदकतया प्रसिद्धा ये सम्बन्धास्तदवच्छिन्नाभावकूटो वा, 'स्वरूपसम्बन्धेन' कालिकविलक्षणसम्बन्धेन, 'प्रत्युक्तमिति, यत्र साध्यवति साध्यतावच्छेदकसम्बन्धेनावर्त्तमानं

तेन सम्बन्धेन क्वचिदपि न वर्त्तते तत्रापि विशेषणताविशेषेण साध्यवदवृत्तेस्तेन सम्बन्धेन व्यभिचारनिरूपकाधिकरणवृत्तेर्वस्तुनः प्रसिद्धया तस्य तादृशसम्बन्धावच्छिन्नाभावमादायैवातिव्याप्तिनिराकरणसम्भवादिति भावः। एवं सति विशेषणताविशेषस्यैव विशिष्योपादानमुचितं सम्बन्धान्तरनिवेशे प्रयोजनाभावादित्याशयेनाह, 'विशेषणताविशेषेणेति दैशिकविशेषणतयेत्यर्थः, एवं सति दर्शितातिव्याप्तीना नावकाश इति सूचयितुं व्यभिचारनिरूपकाधिकरणे तेन सम्बन्धेन वृत्तिमति तेन सम्बन्धेन साध्यवदवृत्तित्वमौलक्ष्यमाह, 'सर्व्वैवेति, व्यभिचारिहेतुक इति शेषः। 'तत्तद्व्यक्तित्व इति यद्व्यक्तौ हेतौ साध्यव्यभिचार इत्यादिः, अयोगोलकादिनिष्ठतत्तद्व्यक्तित्वं तन्मात्रवृत्तिरूपादात्मकमेव न तु पदार्थान्तरं तस्य च न विशेषणताविशेषेण वृत्तिरिति केवलान्वयिनं तस्य तादृशसम्बन्धावच्छिन्नाभावमादाय नातिव्याप्तिनिराकरणसम्भव इति तत्र तत्वान्तरमनुपपन्नमित्याशङ्क्य 'तत्तद्व्यक्तित्व इति, तत्तद्व्यक्तित्वावच्छिन्नभेदोऽपि स्वप्रतियोगितावच्छेदकभेदप्रतियोगितावच्छेदकतद्व्यक्तित्वादनतिरिक्त एव तथाच वक्ष्यते 'न हि घटभिन्नभेदो घटत्वादतिरिच्यत इत्यादिग्रन्थे', 'तत्प्रकारकेति तद्व्यक्तित्वादिप्रकारकेत्यर्थः', तत्प्रकारकप्रमाविषयत्वस्य साध्यवत्यपि सम्भवात् 'प्रमेति, 'तत् तेन सम्बन्धेन साध्यवद्वृत्तित्व, विशिष्य समवायादिसम्बन्धनिवेशे ज्ञानाभावादिसम्बन्धेन तेन सम्बन्धेन साध्यवदवृत्तित्वाप्रसिद्धिरत [illegible] विशिष्य निवेशे तु न तदुपादानम् इति सूचयितुं [illegible]-

[illegible]

[illegible]

केचित्तु नञ्व्यत्यासेनासाध्यानि साध्यविरोधीनि साध्यासमानाधिकरणानीति यावत् तानि सामानाधिकरण्यानधिकरणानि यस्य तत्त्वम् साध्यसामानाधिकरण्याभावव्यापकाभावप्रतियोगिसामानाधिकरण्यसामान्यकत्वमिति फलितार्थः । अत्र च साध्यसामानाधिकरण्यं साध्यतावच्छेदकसम्बन्धेन साध्यवति हेतुतावच्छेदकसम्बन्धेन वृत्तिः । परञ्च सामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेतुमति तेनैव वृत्तिः तेन समवायेन पृथिवीत्वादेः साध्यतायां व्यभिचारिणि

कालिकसम्बन्धेन हेतौ घटादौ द्रव्यत्वादेश्च समवायेन साध्यतायां समवायेन हेतौ सत्त्व-गुणत्वादौ नातिप्रसङ्गः । न वा संयोगेन वह्न्यादौ साध्ये समवायेन तद्व्याप्यस्य रूपविशेषादेः कालिकसम्बन्धेनाधिकरणे काले स्पन्दे च कालपरिमाण-स्पन्दत्वादेः समवायेन तदधिकरणे घटादेः संयोगेन वृत्तावपि चाप्रसङ्गः, सम्बन्धविशेषेण व्याप्यत्वलाभाय साधिकरणत्वमित्याहुस्तच्चिन्त्यम् ।

गादाधरी विवृतिः ।

मिश्रव्याख्यानमुपन्यस्यति, 'केचित्त्विति, 'नञ्-व्यात्यासेन' साध्यपदानन्तरं श्रूयमाणस्य नञस्तत्पूर्व्वाभिसम्बन्धेन, तथाचासाध्यसामानाधिकरण्येति वक्तव्ये साध्यासामानाधिकरण्येत्यभिधान प्रमादेनेति भावः । असाध्यपदस्य साध्यभिन्नार्थकत्वे एतद्वृत्तिधर्म्मवानितत्त्वादित्याद्यतिरिक्ते सर्व्वत्र साध्यभिन्नस्य हेतुसमानाधिकरणतया क्वचिच्च साध्यभिन्नाप्रसिद्धा अव्याप्तिरतो नञ्पदस्य विरोधार्थकतामाह, 'साध्यविरोधीनीति, विरोधस्य तदभावव्याप्यतारूपत्वे केवलान्वयिनि साध्याभावाप्रसिद्धा अव्याप्तिरत. 'साध्यासमानाधिकरणानीति, केवलान्वयिन्यवृत्तावेव साध्यासामानाधिकरण्यप्रसिद्धिः, व्यभिचारिहेतुकेऽपि साध्यासामानाधिकरण्यस्यात्ततोऽवृत्तेरेव हेतुसमानाधिकरणतया अतिव्याप्तिरिति साध्यासामानाधिकरण्यरूपोहेत्वतावच्छेदकावच्छेदेन हेतुसामा-

[illegible]

योगितानवच्छेदकधर्मवत्त्वम् अभाववादिकमादायासिद्ध्यादौ वात्। साध्यादिनिष्ठहेतुसामानाधिकरण्यप्रतियोगिताभावश्च साध्यसामानाधिकरण्याभावव्यापकताभावः ... सामान्यवद्व्यापकताभावप्रतियोगितानवच्छेदकत्वविशिष्टसामानाधिकरण्यत्वकधर्मवत्त्वमिति तु निष्कर्षः। तेन वह्न्यादिहेतुसामानाधिकरण्यसामान्य-गगनाभयत्वाद्यवच्छिन्नाभावस्य साध्यसामानाधिकरण्यव्यापकत्वेऽपि न क्षतिः। व्यापक हेतुतावच्छेदकपदं, तद्वि- ... धकरणनिवेशात् द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः। 'परं सामानाधिकरण्यं' हेतुसामानाधिकरण्यं, साध्यतावच्छेदकसम्बन्धनियेशस्य व्यावृत्तिमाह, 'समवायेन पृथिवीत्वादेरिति 'व्यभिचारिणि हेतौ घटादौ नातिप्रसङ्गः', इत्यग्रिमेण सम्बन्धः, वृत्तिमन्मात्रस्यैव कालिकसम्बन्धेन पृथिवीत्वाधिकरणकालेताद्दशहेतुतावच्छेदकसम्बन्धेन वृत्तेरवृत्तिमात्रनिष्ठतदभावं प्रति हेतुसामानाधिकरण्याभावस्य व्यापकत्वेऽपि समवायरूपसाध्यतावच्छेदकसम्बन्धेन साध्याधिकरणपृथिव्यादिनिरूपितकालिकसम्बन्धावच्छिन्नवृत्त्यभावस्य महाकालादौ हेतुसमानाधिकरणे जन्यपृथिव्य-

समानकालीने चरमध्वंसादौ सत्त्वेन तं प्रत्यप्यव्यापकत्वादिति भावः । साध्यवद्वृत्तित्वे हेतुतावच्छेदकसम्बन्धनिवेशनप्रयोजनमाह, 'द्रव्यत्वादेश्चेत्यादि, समवायेन साध्याधिकरणमहाकाले वृत्तिमन्मात्रस्यैव कालिकसम्बन्धेन वृत्तेः साध्यवति सम्बन्धसामान्येन वृत्तेरभावं प्रति हेतुमद्वृत्तित्वाभावस्य व्यापकत्वेऽपि गुणत्वादिसाधारणं हेतुतावच्छेदकसमवायेन द्रव्यादिवृत्तित्वाभावं प्रति तस्याव्यापकत्वादिति भावः । हेतुमत्त्वे हेतुतावच्छेदकसम्बन्धनिवेशनप्रयोजनमाह, 'संयोगेन वह्न्यादौ साध्य इति वह्निमान् एतद्रूपादित्यादावित्यर्थः. 'समवायेनेति व्याप्यत्वान्वयि. कालपरिमाण-स्पन्दत्वादेर्वृत्तावपि नातिप्रसङ्गः इत्यन्वयः । काले कालपरिमाणादेर्वृत्तिकथनेन साध्यतावच्छेदकसम्बन्धेन साध्यवति हेतुतातावच्छेदकासम्बन्धेन वृत्तेरभाववति तत्र सम्बन्धसामान्येन हेतुमत्समवेतत्वाभावासत्त्वान्न तस्य तादृशाभावव्यापकत्वमित्यव्याप्तिप्रसक्तिबीजं दर्शितं महाकालादिनिष्ठो यो वह्न्यादिसंयोगसामान्यधारणरूपेण संयोगस्य साध्यतावच्छेदकसम्बन्धत्वे महाकालपरिमाणे साध्यसामानाधिकरण्याभावासम्भवात् स्पन्दत्वानुपादानम् । चतुर्थसम्बन्धप्रवेशप्रयोजनमाह, (१) 'समवायेनेति, 'तद्विशिष्टो' रूपविशिष्टाधिकरणे, 'घटादेः संयोगेन [illegible] [illegible] [illegible]वेतत्वाभाववति घटादौ हेतुसमवायित्वे सम्बन्धसामान्येन वृत्तेरभावसत्त्वात्तस्य तादृशाभावव्यापकत्वं दर्शितम् । [illegible] [illegible] [illegible] [illegible]

(१) चतुर्थसम्बन्ध[illegible]

सत्त्वादेरनैकान्तिकत्वाभावप्रसङ्गात्। न हि प्रतियोगिविरोधी संयोगादेरपरोऽत्यन्ताभावोऽस्ति अधिकरणभेदेनाभावभेदाभावात्। नापि साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं व्याप्तिः मूले वृक्षः कपिसंयोगवान्नित्यवाधितप्रतीतेः तदन्योन्याभावस्यापि तत्र सत्त्वात्। न चैवं भेदाभेदः, अवच्छेदकभेदेन तत्सत्त्वाभ्युपगमात्, साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवद्यस्येति षष्ठ्यर्थव्याप्य-व्यापकभावानिरूपणात् साध्य-साधनयोर्व्याप्तिनिरूप्यत्वात् वह्निमत्पर्व्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च विशेषाभावकूटादेवाभावव्यवहारोपपत्तौ सामान्याभावे मानाभावात्। नापि साधनसमानाधिकरणयावद्धर्म्मनिरूपितवैयधिकरण्यानधिकरणसाध्यसामानाधिकरण्यं साधनसमानाधिकरणस्य प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेः महानसादौ समवायितया वह्नि-वह्निमतोरत्यन्तान्योन्याभावयोः सत्त्वात् धूमादावप्युक्तलक्षणाभावाच्च।

चिन्तामणि-दीधितिः।

तथाश्रुतं यथासम्भवं विकल्प्य दूषयति नेत्यादि। नन्वप्रतियोगिपदेन प्रतियोगितानवच्छेदकावच्छिन्नं

वक्ष्यमत आह, 'द्रव्यत्वादे'रिति, 'प्रतियोगिविरोधित्वं' प्रतियोगि-तदधिकरणावृत्तित्वं, 'व्याप्यवृत्तित्वं' स्वसमा-नाधिकरणात्यन्ताभावाप्रतियोगित्वम्, 'अधिकरणे'ति, तयोरसत्वभाव एव न सिध्येदिति भावः। संयोगाद्य-भावस्य च द्रव्ये प्रतियोगिसामानाधिकरण्यसत्वात्त-दविरोधित्वञ्च प्रतियोग्यधिकरणीभूतद्रव्यवृत्तित्वं सा [illegible] करणीभूतद्रव्यनिष्ठात्यन्ताभावप्रतियोगित्वं गुणं प्र [illegible] सामानाधिकरण्यं व्याप्यवृत्तित्वञ्च प्रतियोगि [illegible]

[illegible]

व्याप्तिरित्यर्थः। न च धूमसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निः धूमवान् वह्निमानित्यप्रतीतेरत आह, 'विशेषेति। य एव प्रत्येकं वह्निमद्भेदाः धूमसमानाधिकरणास्त एव चैकाधिकरणवृत्तित्वावच्छिन्ना वह्निमत्सामान्यभेदबुद्धिं उपपादयन्ति(१) तत्प्रतियोगितावच्छेदकश्च वह्नित्वावच्छिन्नोवह्निरिति भवत्यव्याप्तिः।'साधनेति, वैयधिकरण्यं तदनधिकरणवृत्तित्वं तच्च केवलान्वयिनः साधनस्याप्रसिद्धम् अतिप्रसङ्गकञ्च पृथिवी द्रव्यत्वादित्यादौ, अतः समानाधिकरणोपादानं, धूमादेरपि न वह्न्यादिसमानाधिकरणद्रव्यत्वाद्यनधिकरणवृत्तित्वमतो यावदिति। यद्यपि पृथिवीत्वादिसमानाधिकरणघटत्व-पटत्वाद्यनधिकरणवृत्तित्वं द्रव्यत्वादेस्तदनधिकरणमात्रवृत्तित्वञ्च निखिलघट-पटादिरूपादीनां तथापि तादृशधर्म्मानधिकरणमात्रवृत्तित्वानवच्छेदकसाध्यतावच्छेदकवत्त्वं वोध्यं, न हि पृथिवीत्वसमानाधिकरणस्तादृशः कश्चिदेकोधर्म्मो यदनधिकरणमात्रवृत्तितावच्छेदकं रूपत्वादि, धूमत्वादिकन्तु वह्न्यादिसमानाधिकरणायोगोलकत्वा-

(१) इत्यदर्शितः पाठः।

दिशून्यानन्ताधिकरणव्यक्तीनां घटाद्यभावत्वं कल्पनीयमिति तदपेक्षया घटाद्यभावत्वस्य एकैकव्यक्तावेव कल्पनमुचितं लाघवादिति युक्त्या तत्सिद्धिः। यदि चाभावा अपि अधिकरणसमसंख्यास्तदा किमपराद्धमधिकरणानामभावत्वकल्पनमिति भावः। ननु द्रव्य-गुणादिवृत्तिसंयोगाद्यभावस्याभेदे संयोगाभावो द्रव्ये प्रतियोगिसामानाधिकरणो गुणे न तथा, गुणे व्याप्यवृत्तिः द्रव्ये न तथेति व्यपदेशो न स्यात्तस्य मिथो विरुद्धतत्तद्धर्म्मद्वयविषयकत्वादित्याशङ्का तादृशव्यवहारविषयाणामपि अविरोध व्युत्पादयितुं तन्निर्व्यक्ति, 'संयोगाद्यभावस्य चेति, 'द्रव्य इत्यस्याव्याप्यवृत्तित्वमित्यत्राप्यनुषञ्जनीयं, यथासंख्यमुद्देश्यद्वये विधेयद्वयान्वयः, एवमग्रेऽपि 'गुण इति 'व्याप्यवृत्तित्वमित्यत्रापि सम्बध्यते, 'न भेदकानि' सयोगाभावस्येत्यादिः, 'अविरोधादिति, प्रतियोग्यधिकरणवृत्तित्व-तदनधिकरणवृत्तित्वयोर्भावाभावरूपताविरहेण एकत्रापि सम्भवात्, द्रव्यनिष्ठाभावप्रतियोगित्व-गुणनिष्ठाभावाप्रतियोगित्वयोरपि नीलघट-पीतघटाभावसमशीलतया तथात्वादिति भावः। उक्तव्यवहाराश्च पारिभाषिका एव अवयवव्युत्पत्त्या तादृशतादृशार्थालाभादित्यवधेयम्। यादृशयोर्व्विरोधस्तादृशयोर्न व्यवहारविषयता इत्याह, 'सामान्यत इति 'तथात्वव्यतिरेक इत्यनेनास्य सम्बन्धः, 'अव्याप्यवृत्तौ प्रतियोगिसमानाधिकरणे चेति तथात्वेन च व्यवह्रियमाणे संयोगाभाव इत्यर्थः, 'सामान्यतो न तथात्वव्यतिरेकः' न स्वाधिकरणनिष्ठाभावप्रतियोगित्वसामान्याभाव', प्रतियोग्यधिकरणवृत्तित्वसामान्याभावश्च व्यपदिश्यत इति शेषः।

तादृशरूपावच्छिन्ननिरूपिता व्याप्तिरित्यर्थः, पर्व्वतादौ महानसी-यवह्न्यादिमदन्योन्याभावसत्त्वेऽपि शुद्धवह्नित्वाद्यवच्छेदेन महानसी-यवह्न्यादाविव तत्प्रतियोगितावच्छेदकत्वाभावः सुलभ इत्याह, 'न चेति न हीत्यर्थः, 'वह्नित्वावच्छिन्नः' शुद्धवह्नित्वावच्छिन्नः । न चावच्छेदकत्व-तदभावयोर्विरोधेनैकत्रावस्थानं दुर्घटमिति वाच्यम् । विभिन्नावच्छेदेन भावाभावयोरेकत्र वृत्तावविरोधेनावच्छेदकता-नवच्छेदकरूपेणावच्छेदकत्वाभाव इति वाच्यम् यादृशस्यावच्छे-दकतावच्छेदकत्वपर्य्याप्त्यनधिकरणत्वं तादृशधर्म्मावच्छेदेनावच्छेद-कत्वाभावोपगमाद्विशिष्टवह्नित्वस्यावच्छेदकत्वेऽपि केवलस्य तस्य तत्पर्य्याप्त्यनधिकरणत्वानुपपत्त्यभाव इति भाव । ननु सामान्याभा-वनिवारणमनुपयुक्तमेव तावतापि सामान्यधर्म्मस्य प्रतियोगितानव-च्छेदकतया उक्ताव्याप्तिपरीहारात् एवं विशेषाभावमात्रेण निर्व्वा-हेऽपि सामान्याभावानभ्युपगमे यत्किञ्चिद्विशेषाभाववति पर्व्वतादौ नाय वह्निमान् इत्याकारकप्रतीति-व्यवहारयो. प्रसङ्गादित्याशङ्कया ष्वतिरिक्तसामान्याभावासत्त्वपक्षे दर्शितातिप्रसङ्गं परिहरन्नेव लक्ष-णाव्याप्तिं दूटयति, 'य 'एवेति, 'वह्निमद्भेदाः' तत्तद्वह्न्यवच्छिन्न-भेदाः. 'एकाधिकरणवृत्तित्वावच्छिन्ना.' तादृग्भेदाधिकरणैकवह्-निवृत्तित्वावच्छिन्ना , 'वह्निमत्सामान्यभेदबुद्धि' इदो न वह्निमा-नित्याकारकबुद्धिम्, 'उपपादयन्ति' विषयीभूयोपपादयन्ति, तादृ-णाधिकरणवृत्तित्वावच्छेदेन तादृग्बुद्धिविषयतावच्छेदकत्वमित्यर्थः, एतावतातिप्रसङ्गो वारितः, प्रतियोगितावच्छेदकेति 'इत्यत्र' 'वह्नित्वावच्छिन्न' इत्यनन्तर देयम् , वह्नित्वावच्छिन्न.'

शुद्धवह्नित्वावच्छिन्नः, शुद्धवह्नित्वावच्छिन्नस्य तत्प्रतियोगितानवच्छेदकत्वे तेषां न वह्निमानित्याकारकप्रतीतौ तादृशसामान्यधर्म्मावच्छिन्नप्रतियोगिताकत्वेन विषयतां स्वीकृत्य उक्तातिप्रसङ्गवारणानुपपत्तेः तद्दोषतादवस्थ्यमिति भावः। न च विशेषाभावकूटस्य तादृशप्रतीतिविषयतया यत्किञ्चिद्विशेषाभाववति न तत्प्रसङ्गः इति वाच्यम्। तत्तद्वह्नित्वेन सकलवह्नीनां युगसहस्रेणापि ज्ञातुमशक्यतया तत्तद्वह्न्यवच्छिन्नभेदत्वेन भेदसमुदायस्य भानासम्भवात् वह्निप्रतियोगिकभेदत्वेन तावद्भेद भानोपगमे तेन रूपेण यत्किञ्चिद्भेदविषयकज्ञानस्यापि प्रकारगतविशेषाभावेन तदाकारतासम्भवात् पर्वतो न वह्निमानिति प्रतीतेर्दुर्वारत्वात्, न हि प्रकाराविशेषे विषयन्यूनाधिक्येन विचित्राकारतादीनां, घटत्वमात्रप्रकारेण शतसहस्त्रादिव्यक्तिविषयकप्रतीतौ घट इत्येवाकारदर्शनात् अभिकामणे वक्ष्यामः। साधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकरण्यघटितलक्षणे वैयधिकरण्यं यदि तदधिकरणावृत्तित्वरूपं तदा प्रमेयत्वादिवैयधिकरण्याप्रसिद्ध्यातो [illegible] 'प्रमेयत्वादेर्व्यधिकरणाप्रसिद्धेरिति मूलविरोधः इत्यतोऽन्यथा व्याचष्टे, 'वैयधिकरण्यमिति'। ननु [illegible] वृत्तौ न निवेश्यते इत्यत आह, 'न तु' इति [illegible], 'प्रसिद्धमिति'। यदि [illegible]

[illegible]

[illegible]

किमाधनकेऽपि तद्दोषाधिक्यं तथापि समानाधिकरणयावद्धर्म्मोपादाने व्यतिरेकित्वं धर्म्मे विशेषणमङ्गीकृत्य वक्ष्यमाणप्रकारान्तरेण च परिष्कारः सम्भवति नान्यथा इत्याशयेनेयं व्यावृत्तिर्दर्शिता। व्यावृत्त्यन्तरमप्याह, 'अतिप्रसङ्गकश्चेति, 'पृथिवी द्रव्यत्वादित्यादाविति, पृथिवीत्वादेर्द्रव्यत्वादिरूपसाधनानधिकरणवृत्तित्वानधिकरणत्वात् इति भावः। धूमवान् वह्नेरित्यादौ साधनस्य नानाव्यक्तितया अयोगोलकीयवह्निवैयधिकरण्यं धूमे सम्भवतीति तदुपेक्षितं, 'धूमादेरपीति, तथाच यावत्पदानुपादाने द्रव्यत्व-महानसत्वादिरूपयत्किञ्चिद्धर्म्मवैयधिकरण्यानधिकरणत्वमादाय व्यभिचारिण्यतिप्रसङ्गः स्यादिति भावः। 'यावत्पदोपादानमिति (१) यावतां धर्म्माणां प्रत्येकनिरूपितवैयधिकरण्यानधिकरणत्व निवेश्यम् अतो नानाधिकरणकसाधनके तादृशयावद्धर्म्माधिकरणाप्रसिद्धावपि न क्षतिः, द्रव्यत्ववैयधिकरण्यमादायातिव्याप्तिस्तु समवायेन साध्यतायां, न तु संयोगेन तथात्वे तेन सम्बन्धेन तद्वैयधिकरण्याप्रसिद्धेरित्यवधेयम्। 'पृथिवीत्वादीति, तथाच द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः द्रव्यत्वादौ पृथिवीत्वादिसमानाधिकरणयावद्धर्म्मवैयधिकरण्यानधिकरणत्वविरहादिति भावः। व्यधिकरणयोर्न व्याप्तिरिति मतान्तरे वह्निमान् धूमादित्यादौ महानसीयवह्न्यादौ पर्व्वतत्वादिवैयधिकरण्यसत्त्वेऽपि न दोष इत्येकव्यक्तिसाध्यकानुधावनम्। ननु तदनधिकरणमात्रवृत्तित्वमेव वैयधिकरण्यं घटत्वादेस्तादृशवैयधिकरण्यञ्च न तदधिकरणेऽपि वर्त्तमानस्य द्रव्यत्वादेरत आह, 'तदनधिकरण-

(१) एतेन क्वचित् दीधितिपुस्तके तथैव पाठ इत्यनुमीयते।

तावच्छेदकताघटकसम्बन्धेन धर्म्मवृत्तित्वं निवेशनीयमन्यथा धूमत्वादेरपि कालिकादिसम्बन्धेनायोगोलकत्वादिवैयधिकरण्यशून्यवह्न्यादिवृत्तित्वेनावच्छेदकत्वानुपपत्तिः तथाच द्रव्यवान् मेयत्वादित्यत्र गुणत्ववैयधिकरण्यशून्ये गुणादिवृत्तौ सत्त्व-गुणत्वादौ साध्यतावच्छेदकताघटकसम्बन्धेन वृत्तेरप्रसिद्धा द्रव्यत्वादेर्गुणत्वादिवैयधिकरण्यावच्छेदकत्वानुपपत्तिः तथाच साधनसमानाधिकरणघटत्वानधिकरणसंयुक्तवस्तुनि द्रव्यत्वस्य वृत्तेरतिव्याप्तिरिति भावः। न च समवायेन साध्यत्वे साधनसमानाधिकरणघटत्वादिवैयधिकरण्यावच्छेदकत्वं द्रव्यत्वस्य सुलभं तद्वैयधिकरण्यशून्ये घटरूपादौ समवायेन वृत्तेः प्रसिद्धेरिति नातिव्याप्तिरिति वाच्यम्। अतिव्याप्तिवारणसम्भवेऽपि धर्म्मपदानुपादाने गुणत्ववैयाधिकरण्यावच्छेदकत्वानुपपत्त्या अतिव्याप्तिप्रदर्शनात्। तत्पदे दत्तेऽपि तद्वैयधिकरण्यावच्छेदकत्वानुपपत्त्या सन्दर्भविरोधस्य दुर्व्वारत्वात्, द्रव्यवान् द्रव्यसमवायिगुणान्यतरत्वादित्यादावतिव्याप्तेरपि दुर्व्वारत्वाच्च तत्र गुणमात्रस्य व्यभिचारनिरूपकाधिकरणतया तद्वृत्तिधर्म्मवैयधिकरण्यावच्छेदकत्वासम्भवे साधनसमानाधिकरणधर्म्मवैयधिकरण्यावच्छेदकभेदकूटस्य चाव्याहतत्वात् इति चेन्न, 'तच्छून्यधर्म्मावृत्तित्वमित्यनेन स्वाधिकरणतच्छून्यधर्म्मसामान्यकत्वस्य (१) तदाश्रय(२)-स्वाश्रयधर्म्मसामान्यकत्वस्य (३) वा विवक्षितत्वात्।

---

(१) स्वपदं तदवच्छेदकत्वेनाभिमतपरं।

(२) तत्पदं साधनसमानाधिकरणधर्म्मानधिकरणकाधिकरणपरं।

(३) धर्म्मादि स्वपदं तदवच्छेदकत्वेनाभिमतपरं।

मात्रवृत्तित्वञ्चेति घटत्व-पटत्वाद्यनधिकरणमात्रवृत्तित्वमपीत्यर्थः, 'निखिलघट-पटादिरूपादीनामिति यथासंख्येनान्वयः, तथाच रूपवान् पृथिवीत्वादित्यादावव्याप्तिः कुत्रापि रूपे तादृशयावद्धर्मेष्वधिकरणानधिकरणत्वासत्त्वादिति भावः। एतादृशाव्याप्तिं परिजिहीर्षुर्यदधिकरणानधिकरणपदस्य तदनवच्छेदकावच्छिन्नाधारत्वमर्थनम्रात्, 'तथापीति, अव्याप्त्यभावं स्फुटयति, 'न हीति, 'कतिदेशां 'यत्किञ्चित्तादृश इत्यन्वयः', पृथिवीत्वादिसमानाधिकरणनिखिलधर्माणामेव। तदापि रूपादिसमानाधिकरणतया रूपत्वादे[illegible] तादृशधर्मानधिकरणमात्रवृत्तित्वाभावात् इति भावः। [illegible] धूमवान् वह्नित्वादौ तादृशधर्मानधि[illegible] [illegible] । इदानीन्तु न तादृशधर्माभाव[illegible]

[illegible]

तावच्छेदकताघटकसम्बन्धेन धर्म्मवृत्तित्वं निवेशनीयमन्यथा धूमत्वादेरपि कालिकादिसम्बन्धेनायोगोलकत्वादिवैयधिकरण्यशून्यवह्न्यादिवृत्तित्वेनावच्छेदकत्वानुपपत्तिः तथाच द्रव्यवान् मेयत्वादित्यत्र गुणत्ववैयधिकरण्यशून्ये गुणादिवृत्तौ सत्त्व-गुणत्वादौ साध्यतावच्छेदकताघटकसम्बन्धेन वृत्तेरप्रसिद्धा द्रव्यत्वादेर्गुणत्वादिवैयधिकरण्यावच्छेदकत्वानुपपत्तिः तथाच साधनसमानाधिकरणघटत्वानधिकरणसंयुक्तवस्तुनि द्रव्यत्वस्य वृत्तेरतिव्याप्तिरिति भावः। न च समवायेन साध्यत्वे साधनसमानाधिकरणघटत्वादिवैयधिकरण्यावच्छेदकत्व द्रव्यत्वस्य सुलभं तद्वैयधिकरण्यशून्ये घटरूपादौ समवायेन वृत्तेः प्रसिद्धेरिति नातिव्याप्तिरिति वाच्यम्। अतिव्याप्तिवारणसम्भवेऽपि धर्म्मपदानुपादाने गुणत्ववैयाधिकरण्यावच्छेदकत्वानुपपत्त्या अतिव्याप्तिप्रदर्शनात्। तत्पदे दत्तेऽपि तद्वैयधिकरण्यावच्छेदकत्वानुपपत्त्या सन्दर्भविरोधस्य दुर्व्वारत्वात्, द्रव्यवान् द्रव्यसमवायिगुणान्यतरत्वादित्यादावतिव्याप्तेरपि दुर्व्वारत्वाच्च तत्र गुणमात्रस्य व्यभिचारनिरूपकाधिकरणतया तद्वृत्तिधर्म्मवैयधिकरण्यावच्छेदकत्वासम्भवे साधनसमानाधिकरणधर्म्मवैयधिकरण्यावच्छेदकभेदकूटस्य चाव्यारतत्वात् इति चेन्न,'तच्छून्यधर्म्माहृत्तित्वमित्यनेन स्वाधिकरणतच्छून्यधर्म्मसामान्यकत्वस्य (१) तदाश्रय(२)-स्वाश्रयधर्म्मसामान्यकत्वस्य (३) वा विवक्षितत्वात्।

(१) स्वपदं अवच्छेदकत्वेनाभिमतपरं।

(२) तत्पदं साधनसमानाधिकरणधर्म्मानधिकरणमात्रवृत्तिपरं।

(३) अत्रापि स्वपदं अवच्छेदकत्वेनाभिमतपरं।

एतेन तदनधिकरणमात्रवृत्तित्वं साध्यतावच्छेदकसम्बन्धेन वाच्यम् अन्यथा धूमादेः कालिकादिसम्बन्धेनायोगोलकादिवृत्तितया धूमत्वाद्यवच्छिन्नस्यायोगोलकत्वाद्यनधिकरणमात्रवृत्तित्वानुपपत्तेः। तथाच समवायेन प्रमेयत्वाद्यवच्छिन्नसाध्यके वाच्यत्वादिहेतावति व्याप्तिः तत्र व्यभिचारनिरूपकवृत्तिजातित्वाद्यनधिकरणमात्र समवेतत्वशून्ये अभावादौ प्रमेयत्वादेर्वृत्त्या अवच्छेदकत्वानुपपत्तेः। साध्यतावच्छेदकसम्बन्धेन समवेतत्वरूपधर्मत्वनिवेशेऽपि तद्दोषता [illegible] दवस्थ्यः, जातित्वादौ समवायेन तदप्रसिद्ध्या जातित्वादिविशेषिका [illegible] जातित्वादि [illegible] करणावच्छेदकता [illegible] निरस्तम्। [illegible] जातित्वाद्यनधिकरणमात्रसमवेतत्व [illegible] जाति [illegible] निरासात्।

[illegible]

सम्बन्धेनोभयाभावस्य केवलान्वयितया तद्दोषतादवस्थ्यमिति वाच्यम् । स्वरूपाणामननुगमेऽपि अनतिप्रसक्तेन येन केनचिद्रूपेण तदनुगमसम्भवात् । अन्यथा विषयादिभेदेन विभिन्नस्य प्रमाविषयत्वादेः प्रमेयत्वादिनाऽपि केवलान्वयित्वानुपपत्तेः तद्घटकसम्बन्धाननुगमादित्याहुः ।

तत्त्वचिन्तामणि-दीधितिः ।

वस्तुतस्तु तादृशधर्म्मानधिकरणमात्रवृत्तित्वावच्छिन्नाधिकरणताकत्वं तदवच्छेदकत्वं वाच्यं तेन सत्ता-द्रव्यत्वोभयवान् गुणान्यत्वविशिष्टसत्तावान् वा जातिमत्त्वादित्यादौ नातिप्रसङ्गः सत्ताया गुणत्वाभाववन्मात्रवृत्तित्वविरहेऽपि उभयत्वाद्यवच्छिन्नाधिकरणतायाः गुणत्वाभाववन्मात्रवृत्तित्वात्, 'प्रमेयत्वादेरिति । ननु व्यतिरेकित्वेन धर्म्मोविशेषणीयः, वस्तुतस्तु यावत्पदं तादृशस्य कस्यापि न वैयधिकरण्यावच्छेदकमेतावन्मात्रस्फोरणाय तथाच साधनसमानाधिकरणधर्म्मनिरूपितवैयधिकरण्यावच्छेदकं यद्यत्तद्भिन्नधर्म्मवता यावत्तादृशावच्छेदकत्वशून्यधर्म्मवता वा समं सामानाधिकरण्यमिति पर्य्यवसितं अतोदोषान्तरमाह. 'महानसादाविति, तथाच तदनधिकरणत्वं तदभावा-

धिकरणत्वं तद्वद्भिन्नत्वं वा द्वयमपि दुष्टमित्यर्थः। एतेन तदधिकरणावृत्तित्वमत्र वैयधिकरण्यमिति निरस्तं, समवायितया महानसवृत्तित्वं वह्नौ नास्तीतिप्रतीतेर्वह्न्यादेरपि तादृशवैयधिकरण्याधिकरणत्वात्सम्बन्धविशेषेण वैयधिकरण्यविवक्षायान्तु नोक्तदोष इति ध्येयम्।

गादाधरी विवृतिः।

अथ तदनधिकरणमात्रवृत्तित्वं तदधिकरणावृत्तित्वे सति तदनधिकरणवृत्तित्व तत्र सत्यन्तनिवेशादेव सामञ्जस्येन विशेष्यदलवैयर्थ्यं, तत्परित्यागे च सत्यन्तदलस्यावृत्तिसाधारणतया तच्छून्यत्वमात्रस्यैवावृत्तिव्यावृत्ततया धर्मत्वोपादानविरोधः। न च तदधिकरणावृत्तित्वमात्रनिवेशे 'प्रमेयत्वादेरित्यादिमूलासङ्गतिरिति विशेष्यदलनिवेशनामार्थक्यं तदधिकरणावृत्तित्वशून्यत्वात् अन्यस्य अवृत्तिसाधारणस्य विशिष्टशून्यत्वस्याभावान्तरतया चावैयर्थ्यमिति वाच्यम्। वृत्त्यंशमात्रस्य विशेष्यविधया निवेशेनैवाखण्डाभावान्तरस्य घटकत्वात्तदधिकरणांशस्याव्यावर्त्तकस्य निवेशे व्यर्थविशेषणतायाः दुर्वारत्वात्, वैयर्थ्यभिया तदंशस्यैव परित्यागे प्रमेयत्वाद्यधिकरणावृत्तिवृत्तिमतोऽप्रसिद्ध्या 'प्रमेयत्वादेरिति मूलमङ्गतावपि 'महानसादावितिमूलस्य वह्नित्वादौ सम्बन्धान्तरावच्छिन्नात्यन्ताभावादिघटितवह्न्यादिरूपसाधनसमानाधिकरणधर्मवैयधिकरण्यावच्छेदकत्वोपादानपरतया दीधितिकारव्याख्यानामङ्गतेर्दुर्वारत्वात्। एतेनावशिष्यावृत्तादधिकरण-

तद्व्यापकभेदप्रतियोगितावच्छेदकत्वमेव तद्वैयधिकरण्यमित्यपि निरस्तम् । तत्रापि साधनसमानाधिकरणधर्म्मानधिकरणत्वाप्रवेशे दीधितिकृता तन्मूलव्याख्यानासङ्गतेः इति चेन्न, 'तदनधिकरणमात्रवृत्तित्वमित्यनेन स्ववृत्तिव्यापकतदनधिकरणत्वकत्वस्य विवक्षिततया तन्मूलसङ्गतेः धर्म्मपदसार्थक्योपपत्तेः । न च तादृशमूलसङ्गमनस्य तदनधिकरणेतरावृत्तित्वनिवेशेनापि सम्भवात् निरुक्तवैयधिकरण्ये निवेश्य धर्म्मपदोपादानमयुक्तमिति वाच्यम् । तदनधिकरणेतरावृत्तित्वमित्यस्य तदनधिकरणेतरवृत्तिप्रतियोगिकाभावात्मकत्वे तादृशव्यक्तिविशेषाद्यभावस्य समानाधिकरणसाधारणतया तच्छून्याप्रसिद्धेः, तादृशवृत्तित्वाद्यवच्छिन्नाभावार्थकत्वे तादृशवृत्तित्वस्य स्वसमानाधिकरण-तदधिकरणवृत्तित्वापेक्षया गुरुशरीरत्वेनाभावप्रतियोगितानवच्छेदकत्वात् तादृशाभावाप्रसिद्ध्या तस्य तदर्थकत्वानुपपत्तेः इति तच्छून्यधर्म्मावृत्तित्वरूपावच्छेदकत्वप्रवेशे एकतराव्यभिचारिण्युभयसाध्यके विशेष्याव्यभिचारिणि विशिष्टसाध्यकव्यभिचारिण्यतिप्रसङ्गस्याग्रे दर्शनीयतया कल्पान्तरमाह, 'वस्तुतस्त्विति । यद्यपि अत्रापि तदनधिकरणमात्रवृत्तित्व स्वव्यापकतदनधिकरणताकत्वमेव न तु तदधिकरणावृत्तित्वे सति तदनधिकरणवृत्तित्वं वृत्तिमत्त्वं वा तदभावप्रवेशेन उक्तरीत्या विशेष्यसार्थक्यस्योपपादयितुमशक्यत्वात् । न च तदधिकरणावृत्तित्वमात्रं प्रवेश्य तथा सति गगनादौ प्रमेयत्वादेस्तादृशवैयधिकरण्यसत्त्वेऽपि गगनत्वावच्छिन्नाधिकरणत्वाप्रसिद्ध्या गगनत्वादौ निरुच्यमानवैयधिकरण्यावच्छेदकत्वा-

जातिमान् मेयत्वादित्यादौ जातित्वाद्यधिकरणे समवायेन वृत्तेर-प्रसिद्धा जातित्वादौ जातित्वादिवैयधिकरण्यावच्छेदकत्वस्य दुरुप-पादता बोध्या, अधिकरणतापदमधिकरणतासामान्यपरम् अन्यथा द्रव्य-गुणत्वादिवृत्तित्वविशिष्टसत्तादिनिरूपिताधिकरणताविशेषे शुद्धसत्तात्वाद्यवच्छिन्नवत्तावुद्ध्यपपत्तेः। एवञ्च धूमादेः कालिकादि-सम्बन्धावच्छिन्नाधिकरणताया अयोगोलकादौ वैयधिकरण्याव-च्छेदकत्वानुपपत्तिः इति साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेना-धिकरणता विशेषणीया। न च तादात्म्यादिवृत्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः, सम्बन्धिताया एव निवेश्यत्वात्। न च सम्बन्धि-तायाः सम्बन्धरूपतया संयोगेन दण्डादेः साध्यत्वे दण्डसमवेत-संयोगादिहेतावतिव्याप्तिः स्वसमानाधिकरणस्वसंयोगाधिकरण-ताया दण्डत्वाद्यवच्छिन्नसंयोगस्य साधनसमानाधिकरणतत्तद्दण्ड-त्वाद्यधिकरणवृत्तित्वेन तद्वैयधिकरण्यावच्छेदकत्वानुपपत्तेः, सम-वायैक्यमते समवायेन साध्यताया सद्धेतौ साधनाधिकरणे सर्व्वत्र समवेतमात्रत्वस्यैव समवायसत्त्वावच्छेदकाप्रसिद्धा अव्याप्ति-श्चेति वाच्यम्। सम्बन्धानुयोगिताया एव सम्बन्धितारूपत्वात् सम्बन्धावच्छिन्नप्रतियोगिताकत्वविशिष्टसाध्यतावच्छेदकसम्बन्धानु-योगितायास्तदनधिकरणमात्रवृत्तित्वं तत्त्वमित्यर्थपर्य्यवसानेन सर्व्वत्र सामञ्जस्यात् समवायैक्यमते समवायानुयोगिताभेदस्याति-प्रसङ्गभङ्गायावश्यकतया अनुपपत्त्यभावात्। अथैवमपि महाकालो घटवान् कालपरिमाणात् इत्यादौ साधनाधिकरणमहाकाल-वृत्तिधर्म्मवैयधिकरण्यावच्छेदकाप्रसिद्धा अव्याप्तिः अवृत्तिगगन-

अन्येन 'प्रमेयत्वादित्यादिमूलस्य वैयधिकरण्यावच्छेदकावधि-
ज्ञातृकतया सङ्गमयितुं शक्यत्वेऽपि दीधितिकारीयमूलव्याख्या-
नानुगतेः । तदनधिकरणमात्रवृत्तिमात्रान्वयकत्वनिवेशनेऽप-
रतो ऽधिकरणतायाः विशेषणविधया निवेशनवैयर्थ्यम् । तदन-
धिकरणमात्रवृत्तिमात्रान्वयकत्वस्य स्वविशिष्टव्यापकतदनधिकरण-
ताकत्वरूपतया गुणत्वाद्यनधिकरणसत्ताद्रव्यत्वोभयत्वविशिष्टसत्ता-
[illegible]सत्तायाः सत्त्वेऽपि गुणत्वाद्यनधिकरणत्वेऽपि तादृशोभय-
[illegible]विशिष्टसत्तात्वान्वयव्यापकताया अनपायेन तादृशोभय-
[illegible] तदनधिकरणमात्रवृत्तित्वान्वयकत्वरूपेणाधिकरणता-
[illegible] निवेशनम् । तथापि विशिष्टाधिकरणताप्रसिद्धि-
[illegible] अधिकरणतापदम् । [illegible]
[illegible]

च्छिन्नसामानाधिकरण्यं व्याप्तिरिति विवक्षया सर्व्वानुपपत्ति-परीहारसम्भवात् मुद्रवह्नित्वाद्यवच्छिन्नाधिकरणतात्वे प्रत्येकं महानसीयत्व-पर्व्वतीयत्वादिविशिष्टवह्नित्वाद्यवच्छिन्ननिरूपिताधि-करणतात्वाद्यवच्छिन्नभेदकूटसमानाधिकरणत्वात् व्यभिचारिणि साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरण-तात्वस्यापि व्यभिचारनिरूपकाधिकरणवृत्तितानवच्छेदकतया तद-वच्छिन्नभेदस्य निरुक्तभेदकूटान्तर्गततया तादृशकूटाधिकरणतात्वे च तद्भेदसामानाधिकरण्यविरहेणातिव्याप्त्यनवकाशात् इत्यलं पल्लवितेन। पूर्व्वकल्पपरित्यागवीजं दर्शयति (१) 'तेनेति, तदनधि-करणमात्रवृत्तिताशून्यधर्म्मावृत्तित्वस्थले तादृशधर्म्मापर्य्याप्तत्वनिवेशे सत्ता-द्रव्यत्वोभयत्वादेस्तथाविधसत्तामात्रपर्य्याप्तत्वविरहेणावच्छेद-कत्वमुपपद्यते इत्याशयेन विशिष्टसाध्यकानुसरणं, 'सत्ताया गुणत्वा-भाववन्मात्रवृत्तित्वविरहेऽपीत्यनेन तद्वृत्तितया उभयत्वादेः पूर्व्व-कल्पेऽवच्छेदकत्वासम्भवः सूचितः, 'महानसादावित्यादिमूलं साध-नाधिकरणे तत्तद्वह्नित्व-तद्वदत्यन्ताभावान्योन्याभावप्रदर्शक सिंह-गुहावलोकनन्यायेन पूर्व्वलक्षणद्वयदूषणपरतया साम्प्रदायिका-व्याचक्षते, स्वयञ्च तेषामसामर्थ्यसूचनाय प्रकृतलक्षणदूषणपरतया तल्लङ्गयिष्यन् तदाकाङ्क्षामुत्थापयति 'प्रमेयत्वादेरित्यादिदूषणमु-द्धरति, 'नन्विति, 'व्यतिरेकित्वेन' साध्यतावच्छेदकसम्बन्धेन किञ्चिदधिकरणे वर्त्तमानो यो व्यतिरेकस्तत्प्रतियोगित्वेन, तेन समवायेन साध्यताया साधनसमानाधिकरणस्य ज्ञात्यादिनिष्ठ-

(१) पूर्व्वकल्पपरित्यागवीजमित्यादिरेति पा०।

धिकरणस्य, 'कस्यापि न वैयधिकरण्यावच्छेदकं' साध्यतावच्छेदकमिति शेषः। एतावता लक्षणं कीदृशमित्याकाङ्क्षायामाह, 'तथा चेति, 'साधनसमानाधिकरणेति तादृशयत्किञ्चिदेकधर्म्मवैयधिकरण्यावच्छेदकं यद्रूपमित्यर्थः, तेन साधनसमानाधिकरणधर्म्मत्वावच्छिन्नानधिकरणाप्रसिद्धावपि न क्षतिः। विशिष्टवह्नित्वादिरूपवैयधिकरण्यावच्छेदकधर्म्मभेदस्य शुद्धवह्नित्वादावसत्त्वादव्याप्तिरतोऽवच्छेदकानां तत्तद्व्यक्तित्वावच्छिन्नभेदकूटनिवेशनपक्षं परित्यज्यावच्छेदकताव्यक्तीनां तत्तद्व्यक्तित्वनाभावकूटं निवेशयति, 'यावत्तादृशावच्छेदकत्वशून्येति तादृशावच्छेदकत्वं यद्यत्तच्छून्येत्यर्थः। विशेषण-विशेष्यान्तर्भावेन वह्नित्वादौ पर्य्याप्तं यदवच्छेदकत्व तदभावः केवलविशेष्ये अक्षत एवेति। न च यद्धर्म्मावच्छिन्नानधिकरणता तादृशधर्म्मानधिकरणमात्रवृत्तिस्तद्धर्मरूपमवच्छेदकत्वं विशिष्टवह्नित्वादौ विशिष्टवह्नित्वत्वादिरूपेणैव यद्रूपपदेन अतस्तद्रूपपदेन तद्रूपस्योपादानात् तथाव्याप्यवृत्त्यैवेति क्व तदभावः शुद्धवह्नित्वादाविति वाच्यम्। यादृशधर्म्मावच्छिन्नपर्य्याप्तावच्छेदकतानिरूपकाधिकरणतासामान्य तादृशधर्म्मानधिकरणमात्रवृत्ति तादृशधर्म्मरूपवैयधिकरण्यावच्छेदकतानिवेशात् महानसीयवह्नित्वाद्यवच्छिन्नाधिकरणतानिरूपितावच्छेदकत्वस्य महानसीयत्वादिसमुदाये व्याप्यवृत्तितया तत्पर्य्याप्त्यवच्छेदकधर्म्मस्यापि तथात्वेनानुपपत्त्यभावात्, तत्तदवच्छेदकताव्यक्तित्वाभावादिकदा तत्तदवच्छेदकत्वावच्छिन्नभेदस्य धर्म्मिनिवेशाधिक्येन गुरुतया न तन्निवेशः, तत्र विशिष्टस्यावच्छेदकत्वे शुद्धस्यानवच्छेदकत्वानुपपत्ति-

व्यतिरेकप्रतियोगिसत्त्वादेरनधिकरणमात्रे साध्यतावच्छेदकसम्ब-
न्धेनाधिकरणत्वाप्रसिद्धावपि नाव्याप्तिः । एतेनाकाशादिरूपव्यति-
रेकप्रतियोग्याकाशाभावाद्यनधिकरणाप्रसिद्धिभयेनान्योन्याभावप्र-
तियोगितावच्छेदकपरतया केषाञ्चिद्व्यतिरेकपदव्याख्यानमपास्तम्।
यद्यपि प्रमेयत्वादेरपि किञ्चित्सम्बन्धावच्छिन्नव्यतिरेकप्रतियोगि-
त्वमक्षतमेव तथापि येन येन सम्बन्धेन यद्यत्साधनसमानाधि-
करणं तेन तेन सम्बन्धेन तदनधिकरणमात्रवृत्तितानवच्छेद-
कत्वे विवक्षणीये स्वनिष्ठव्यतिरेकप्रतियोगितावच्छेदकत्वस्य येन
सम्बन्धेन इत्यत्र सम्बन्धविशेषणत्वोपगमान्न दोषः । अत्र चाम-
निरुक्तस्यावच्छेदकत्वस्य स्वत्वघटिततया तत्तद्व्यक्तिविश्रामात्
व्यभिचारिण्येकधर्मवैयधिकरण्यानवच्छेदकस्यापि साध्यतावच्छेद-
कस्य धर्मान्तरवैयधिकरण्यावच्छेदकत्वेन तत्तद्धर्मवैयधिकरण्या-
वच्छेदकानामेकभेदनिवेशासम्भव इति यावन्तो वैयधिकरण्याव-
च्छेदकधर्माः प्रातिस्विकरूपेण तावद्भेदकूटवत्त्वनिवेशनमाव-
श्यकत्वे साधनसमानाधिकरणधर्मे यावत्त्वं विशेषणम् अनर्थं
व्यभिचारिणि एकधर्मवैयधिकरण्यानवच्छेदकस्यापि साध्यताव-
च्छेदकस्य धर्मान्तरवैयधिकरण्यावच्छेदकयावद्धर्मान्तर्गततया
तद्भेदस्य च तत्रासत्त्वेनातिप्रसङ्गविरहादिति व्यतिरेकित्वस्य धर्म-
विशेषणत्वमन्तरेणैव सामञ्जस्यं प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धावपि
येषां वैयधिकरण्यं प्रसिद्धं तदवच्छेदकभेदकूटमादाय सद्धेतौ लक्षण-
गमनसम्भवात् इत्याशयेन धर्मं यावत्त्वोक्त्यानं यावदवच्छेदकभेद-
न ज्ञानसत्या व्याचष्टे, 'यत्किञ्चिदिति, 'साध्यता' साधनसमाना-

धिकरणस्य, 'कस्यापि न वैयधिकरण्यावच्छेदकं' साध्यतावच्छेदकमिति शेषः। एतावता लक्षणं कीदृशमित्याकाङ्क्षायामाह, 'तथा-चेति, 'साधनसमानाधिकरणेति तादृशयत्किञ्चिद्घटकधर्म्मवैयधिकरण्यावच्छेदकं यद्यदित्यर्थः, तेन साधनसमानाधिकरणधर्म्मत्वावच्छिन्नानधिकरणाप्रसिद्धावपि न क्षतिः। विशिष्टवह्नित्वादिरूपवैयधिकरण्यावच्छेदकधर्म्मभेदस्य शुद्धवह्नित्वादावसत्त्वादव्याप्तिरतोऽवच्छेदकानां तत्तद्वह्नित्वावच्छिन्नभेदकूटनिवेशनपक्षं परित्यज्यावच्छेदकताव्यक्तीनां तत्तद्वह्नित्वनाभावकूटं निवेशयति, 'यावत्तादृशावच्छेदकत्वशून्येति तादृशावच्छेदकत्वं यद्यत्तच्छून्येत्यर्थः। विशेषण-विशेष्यान्तर्भावेन वह्नित्वादौ पर्य्याप्तं यदवच्छेदकत्व तदभावः केवलविशेष्ये अक्षत एवेति। न च यद्धर्म्मावच्छिन्नानधिकरणता तादृशधर्म्मानधिकरणमात्रवृत्तिस्तद्धत्त्वरूपमवच्छेदकत्वं विशिष्टवह्नित्वादौ विशिष्टवह्नित्वत्वादिरूपमेव यद्रूपपदेन अतस्तद्रूपपदेन तद्रूपस्योपादानात् तच्चाव्यासज्यवृत्त्येवेति कथं तदभावः शुद्धवह्नित्वादाविति वाच्यम्। यादृशधर्म्मावच्छिन्नपर्य्याप्तावच्छेदकतानिरूपकाधिकरणतासामान्यं तादृशधर्म्मानधिकरणमात्रवृत्ति तादृशधर्म्मरूपवैयधिकरण्यावच्छेदकतानिवेशात् महानसीयवह्नित्वाद्यवच्छिन्नाधिकरणतानिरूपितावच्छेदकत्वस्य महानसीयत्वादिसमुदाये व्यासज्यवृत्तितया तत्पर्य्याप्त्यवच्छेदकधर्म्मस्यापि तथात्वेनानुपपत्त्यभावात्, तत्तदवच्छेदकताकात्यन्ताभावापेक्षया तत्तदवच्छेदकत्वावच्छिन्नभेदस्य धर्म्मिनिवेशाधिक्येन गुरुत्वान्न निवेशः, तत्र विशिष्टस्यावच्छेदकत्वे शुद्धस्यानवच्छेदकत्वानुपपत्ति-

भयेन व्यासज्यवृत्तिधर्म्मात्यन्ताभावस्येव तादृशधर्म्मावच्छिन्नभेदस्यापि एकोन द्वावित्यादिप्रतीतिबलेन तद्धर्म्मवति स्वीकारात् विशिष्टपर्य्याप्त्यवच्छेदकत्वावच्छिन्नभेदस्य शुद्धविशेष्येऽसत्त्वात् महानसादौ वह्नि तद्वतोरत्यन्तान्योन्याभावसत्त्वेन प्रकृतलक्षणगतिमाविष्करोति, 'तथाचेति, 'तदनधिकरणत्वं' वैयधिकरण्यघटकम्। 'इयमपि दुष्टमिति, साधनसमानाधिकरणस्य वह्नेरिव तादृशोभयविधतदनधिकरणत्वघटितवैयधिकरण्यावच्छेदकत्वस्य वह्नित्वावच्छिन्ने सत्त्वादिति भावः। न चैवं सर्व्वस्यैव वस्तुनो वह्न्यनधिकरणतया मात्रपदव्यवच्छेद्याप्रसिद्ध्या वह्नित्वावच्छिन्ने वैयधिकरण्य दुरुपपादमिति वाच्यम्। स्वव्यापकतदनधिकरणताकत्वरूप तदनधिकरणमात्रवृत्तित्वस्य सूपपादत्वात् तदधिकरणावृत्तित्व रूपवैयधिकरण्यस्य निवेशे 'प्रमेयत्वादेरित्यादिदूषणानवकाशात्। न्यूनताभङ्गाय तत्पक्षेऽपि दूषणमाह, 'एतेनेति सम्बन्धभेदेन वह्न्यादिवैयधिकरण्यस्य वह्नेः सत्त्वेनेत्यर्थः, तदेव स्फुटीकरोति, 'समवायितयेति, एतच्च वृत्तित्वविशेषणं, 'तादृशेति यत्किञ्चित्सम्बन्धावच्छिन्नवह्न्यधिकरणावृत्तित्वाभावरूपेत्यर्थः। एतादृशधर्म्मवत्सम्बन्धत्वसामान्याभावनिवेशे च क्वचिद्व्यभिचारिण्यतिव्याप्तिरवच्छेदकाप्रसिद्ध्या क्वचित्सद्धेतावव्याप्तिरपि द्रष्टव्या, 'सम्बन्धविशेषेणेति साधनवति येन सम्बन्धेन यद्वर्त्तते तेन सम्बन्धेन तदधिकरणत्वगर्भस्य उभयत्र विशेषणताविशेषणगर्भस्य वा वैयधिकरण्यस्य विवक्षायामित्यर्थः, 'भोक्तदोष' नोक्तोऽपि दोषः।

किञ्च 'इत्तीतिविशेषणात् सत्ताकाशौ घटवान् कालवृत्ति

मागादित्यादावव्च्छेदकाप्रसिद्धिरूपदोषो दुर्व्वार एवेति 'एतेन' इत्यादिना सूचितमित्याहुः । तन्न, तद्दोषस्यापि पूर्व्वमुद्धृतत्वात् ।

तत्त्वचिन्तामणि. ।

अथानौपाधिकः सम्बन्धोव्याप्तिः, उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः, व्यापकत्वन्तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं, व्यभिचारे चावश्यमुपाधिः, प्रतियोगित्वं न विरोधित्वं सहानवस्थाननियमलक्षणं, गोत्वाश्वत्वयोरतथात्वात् अन्योन्याभावप्रतियोगिन्यसत्त्वाच्च । किन्तु यथाधिकरणाभावयोः स्वरूपविशेषः सम्बन्धः तथा प्रतियोगित्वमनुयोगित्वमपि, अभावविरहात्मत्वं वेति चेत्, यत्किञ्चित्साध्यव्यापक-साधनाव्यापकधर्म्मनिषेधो न, धूमादौ प्रकृतसाध्यव्यापक-साधनाव्यापकधर्म्मस्य सिद्ध्यसिद्धिभ्यां न, निषेद्धुं शक्यः, यावत्साध्यव्यापके प्रमेयत्वादौ साधनाव्यापकत्वं यावत्साधनाव्यापके च घटत्वादौ साध्यव्यापकत्वं निषिध्यत इति चेन्न, व्यधिकरणत्वात् ।

चिन्तामणि-दीधितिः ।

उपाधिपदस्य साध्यसमव्याप्तवचनतया आत्माश्रयप्रसङ्गादाह, 'साध्यव्यापकेति । व्यापकत्वं व्याप्ति-

निरूपकत्वमात्माश्रयादिग्रस्तमतआह, 'तद्वन्निष्ठेति। यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिकोवा तत्रापि व्याप्य-वृत्तिरखण्डश्चान्ततस्तद्वन्निष्ठत्वप्रकारकप्रमाविषयत्वाभा-वादिरेवास्ति, यदि च तस्यापि विशेषणान्तरविशिष्ट-त्वादवच्छिन्नस्य वा तत्राभावसम्भवस्तदा साध्यस-मानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकीभूत-साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदक-धर्मान्तरं लक्षणार्थो बोध्यः। अनवस्थाद्विरतिमाह, 'प्रतियोगितावेति, 'यद्वेति, एकदेश-कालावच्छि-न्नेति पर्यन्तं, तेन साध्यावृत्तेरभावस्य प्रतियोगिताव-च्छेदकतासामान्याभिः। 'पक्षीयेति, यत्र समानाधि-

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

च व्यभिचारणसम्बन्धावच्छिन्नाभावप्रतियोगितायामव्याप्तिः, सिद्धान्तलक्षणवक्ष्यमाणरीत्या च खण्डशः प्रसिद्धा तत्परिहारोऽपीति ध्येयम् । 'अभावविरहात्मत्वमिति, नचान्योन्याभावप्रतियोगि-तत्त्वावच्छेदकयोरप्रसक्त्यातिप्रसक्ती प्रकृतोपयोगिप्रतियोगिताभावस्य लक्ष्यत्वे तु लक्षणेऽत्यन्तपदवैयर्थ्यं सर्वत्र नित्यस्य नित्यसाधारणरूपावच्छिन्नस्य वा उपाधितासत्त्वात् इतरथा तु भेदप्रतियोगितावारणाय संसर्गाभावपरतया तस्य सार्थकत्वादिति वाच्यम् । विरहपदस्य तज्ज्ञानप्रतिबन्धकज्ञानविषयार्थकत्वात् । प्रतिबध्नाति हि तादात्म्येन प्रतियोगिज्ञानमन्योन्याभावबुद्धिं, प्रतिबन्धकत्वञ्चैककालावच्छेदेन एकदावर्त्तमानत्वं अभावपदस्य च स्वाभावपरत्वात् । वस्तुतस्त्वेकसम्बन्धावच्छिन्नायास्तत्समानाधिकरणाभावप्रतियोगिताया अवच्छेदकमपि भवत्येव सम्बन्धान्तरावच्छिन्नायाः तस्या अवच्छेदकम् अतो यत्सम्बन्धावच्छिन्नाया साध्यसमानाधिकरणाभावप्रतियोगिताया अवच्छेदकं तत्सम्बन्धावच्छिन्नाया एव साध्यसमानाधिकरणाभावप्रतियोगिताया अवच्छेदकं तद्वाच्यम्, तथा च संसर्गाभावत्व-

निरूपकत्वमात्माश्रयादिग्रस्तमतआह, 'तद्वन्निष्ठेति। यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिकोवा तत्रापि व्याप्यवृत्तिरखण्डश्चान्ततस्तद्वद्भिन्नत्वप्रकारकप्रमाविषयत्वाभावादिरेवास्ति, यदि च तस्यापि विशेषणान्तरविशिष्टस्य हित्वाद्यवच्छिन्नस्य वा तत्राभावसम्भवस्तदा साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकीभूतसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकधर्म्मवत्त्वं दलद्वयार्थी बोध्यः। अनवस्थान्निरसितुमाह, 'प्रतियोगित्वमिति, 'सहेति, एकदेश-कालावच्छेदेनेति पूरणीयं, तेन नाव्याप्यवृत्तेरभावस्य प्रागभावादेश्च प्रतियोगितायामव्याप्तिः। 'अन्योन्येति, अत्र समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकाभाववति महानसादौ संयोगादिना वह्न्यादिवृत्तेर्येन सम्बन्धेनाभावः तद्वति तेनावृत्तिर्वक्तव्या इत्यञ्च तेन सम्बन्धेनासम्बद्धत्वोक्तौ नायं दोषः, अन्योन्याभावस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकतया तद्वति तेन सम्बन्धेन प्रतियोगिनोऽसम्बद्धत्वात् परन्तु समवायेन सत्ताया अभावस्य प्रतियोगितायामव्याप्तिः तद्वति समवायेन तस्याप्रसिद्धेः, तादृशस्वसम्बन्धाधिकरणावृत्तित्वकत्वाभिधाने

च व्यधिकरणसम्बन्धावच्छिन्नाभावप्रतियोगितायामव्याप्तिः, सिद्धान्तलक्षणवक्ष्यमाणरीत्या च खण्डशः प्रसिद्ध्या तत्परिहारोऽपीति ध्येयम्। 'अभावविरहात्मत्वमिति, नचान्योन्याभावप्रतियोगि-तत्त्वावच्छेदकयोरप्रसक्त्यातिप्रसक्ती प्रकृतोपयोगिप्रतियोगितामात्रस्य लक्ष्यत्वे तु लक्षणेऽत्यन्तपदवैयर्थ्यं सर्वत्र नित्यस्य नित्यसाधारणरूपावच्छिन्नस्य वा उपाधितासम्भवात् इतरथा तु भेदप्रतियोगितावारणाय संसर्गाभावपरतया तस्य सार्थकत्वादिति वाच्यम्। विरहपदस्य तज्ज्ञानप्रतिबन्धकज्ञानविषयार्थकत्वात्। प्रतिबध्नाति हि तादात्म्येन प्रतियोगिज्ञानमन्योन्याभावबुद्धिं. प्रतिबन्धकत्वस्यान्योन्याभावत्वावच्छेदेन एवाभ्युपगमात्. अभावपदस्य च स्वाभावपरत्वात्। वस्तुतस्तु सम्बन्धावच्छिन्नायास्तत्समानाधिकरणाभावप्रतियोगिताया अवच्छेदकत्वमपि सम्भवत्येव सम्बन्धान्तरावच्छिन्नाया अवच्छेदकताया अतो यत्सम्बन्धावच्छिन्ना साध्यसमानाधिकरणाभावप्रतियोगिताया अवच्छेदकं तत्सम्बन्धावच्छिन्ना एव साधनसमानाधिकरणाभावप्रतियोगिताया अवच्छेदकं वाच्यम्, तेन न कालिकसम्ब-

मनुपादेयमेव, 'वाशब्दोऽवास्वरससूचनाय, स च व्यधिकरणसम्बन्धेन सर्व्वस्य प्रतियोगिनस्तादृशभ्रमे मानाभावात् स्वाभावसम्बन्धित्वस्य स्वाभावज्ञानविषयत्वस्य वा लघोः सर्व्वत्र सम्भवित्वात् स्वाभावेत्यादौ षष्ठार्थप्रतियोगितायाः प्रवेशात् तत्र स्वरूपसम्बन्धस्यैव शरणीकरणीयतया तस्यैवावश्यकत्वेन तथात्वौचित्याच्च। अभावत्व-प्रतिबन्धकत्वयोः प्रतियोगिताघटितत्वात् तथाविधव्यवहारगोचरस्यापि विना प्रतियोगितां निर्व्वक्तुमशक्यत्वाच्च।

गादाधरी विवृतिः।

'आत्माश्रयेति, साध्यसमव्याप्तत्वघटकसाध्यनिरूपितोपाधिनिष्ठव्याप्तेरप्यनौपाधिकत्वरूपतया अनौपाधिकत्वशरीरे अनौपाधिकत्वनिवेशादिति भावः। यद्यप्यनौपाधिकत्वरूपव्याप्तिः प्रकृतसाधनघटिततया साधनभेदेन भेद आवश्यकः तथाच साध्यसमव्याप्तोपाधिनिष्ठव्याप्तिः प्रकृतसाधननिष्ठव्याप्तिभिन्नत्वात् नात्माश्रयावकाशः। तथापि सिद्धान्तिव्याघातपरिहाराय साध्यसमव्याप्तत्वघटकव्याप्तिर्व्यभिचारित्वसम्बन्धावच्छिन्नाभाव एव विवक्षणीयः तथाच प्रकृतसाधनाप्रवेशात् साधनभेदेन न व्याप्तिभेद इत्यभिप्रायेणेदम्। 'आत्माश्रयादीति, यावत्साध्यव्यापकव्यापकत्वरूपानौपाधिकत्वे यत्साध्यव्यापकान्तर्गतं साध्यसमत्वेन व्याप्तिनिरूपकत्वं यदि

व्यापकत्वं तदा स्वनिष्ठव्याप्तिनिरूपकप्रकृतसाध्यकत्वघटितं तादृ-
ग्ज्ञानौपाधिकत्व प्रकृतव्याप्तिघटितमित्यात्माश्रयः, यदि च याव-
त्साधनाव्यापकाव्यापकसाध्यसामानाधिकरण्यमनौपाधिकत्वं तदा
प्रकृतसाध्यातिरिक्ते साधनाव्यापकत्व गृहीत्वापि घटादौ तदव्याप-
कत्वग्रहसम्भवेन प्रकृतसाधननिष्ठप्रकृतसाध्यव्याप्तिग्रहस्यानौपाधि-
कत्वग्रहे नापेक्षेति नात्माश्रयः अपि तु अनवस्थैवेत्यभिप्रायेणादि-
पदम् । ननु साध्यवन्निष्ठाभावाप्रतियोगित्वघटितोपाधिलक्षणस्य
एतद्रूपवान् सत्त्वादित्यादिस्थलीये तत्संयोगाद्युपाधावव्याप्तिः तेषा-
मव्याप्यवृत्तितया साध्यवति तदभावसत्त्वात् एव नानाव्यक्तिका[illegible]
न्धनाद्युपाधावपि तत्तद्व्यक्तित्वाद्यवच्छिन्नाभावप्रतियोगित्वमादाय-
व्याप्तिरित्याशङ्क्य व्याप्तिलक्षणघटकनिरुक्तोपाधित्वस्य सक[illegible]-
धिसाधारण्यविरहेऽपि सर्व्वत्र व्यभिचारिणि किञ्चिदुपा[illegible]
रणेनैव व्याप्तिलक्षणे नातिप्रसङ्ग इति तदव्याप्तिं [illegible]
परिहरति, 'यत्नोपाधिरिति, 'तद्वद्भिन्नेति अव्याप्य[illegible]
कतत्तदुपाधिमद्भिन्नेत्यर्थः, तद्वत्त्वप्रकारकप्रमा[illegible]
देन भिन्नतया नाखण्डत्वसम्भवः इति तदुपे[illegible]
भावप्रमाविषयत्वं केवलान्वयीति तदभावा[illegible]
वमुपेत्य तद्वद्भेदानुसरणं,तद्वद्भेदाभावस्य [illegible]
तया स एव दोष इति प्रमाविषयता[illegible]
भ्रमविषयतासम्भवात् ज्ञानमात्र[illegible]
पदाद्व्यभिचारनिरूपकाधिक[illegible]
पाधित्वाश्रय इति शेषः, तदा [illegible]

[illegible] । [illegible] [illegible] [illegible]- [illegible] [illegible] [illegible]- [illegible] । [illegible] [illegible]- [illegible] । [illegible] [illegible] [illegible] [illegible] विशि- [illegible] विशिष्टस्यानतिरेकेण च विशिष्टा- भावाधिकरणानधिकरणत्वं दुर्वचत्वात् इति यदभाववच्छिन्नाधि- करणतासामान्यं यत्सम्बन्धावच्छिन्ननिरूपितत्वाभावस्तत्त्वमेव विव- क्षितं घटाभावादिमद्वृत्तित्वाद्यधिकरणतासामान्य घटादि- निरूपितत्वाभावसत्त्वादतिप्रसङ्गस्य वारणाय सामान्यपदम् । तदर्थं व्याप्तिरेवेत्यभिप्रायेण इदं, तादृशाधिकरणतायां प्रतियोगि- तावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशस्यावश्यकतया यदि [illegible]- प्रदर्शनमात्रं ति कपिसंयोगादेस्तदभावाधिकरणं भिन्नदेशावच्छेदेन घटादेश्च स्वप्रागभावाधिकरणे भिन्नकालावच्छेदेन वृत्त्या व्याप्तिरसाधारण्यात् पूरयति, 'एवेति तथाच एकदेशावच्छिन्न सदैक- कालावच्छिन्न यद्देशाधिकरणावस्थान तदभाव इत्यर्थः । देश-काला- वच्छिन्नत्वयोरनुगतरूपेण निवेशस्तु न युक्तः कपिसंयोगादि-तद- त्यन्ताभावयोरेककालावच्छेदेन संयोग तत्प्रागभावायोरेकदेशाद्यव- च्छेदेन एकाधिकरणवृत्तितया तद्दोषतादवस्थ्यात् (१) । यद्यप्येक- देश-कालावच्छिन्नमित्यादेरभावावच्छेदकदेशावच्छिन्न तदवच्छेद- ककालावच्छिन्नं यत्तदधिकरणनिष्ठमधिकरणत्वं तदनिरूपकत्वं तत्सामान्ये यन्निरूपितत्वाभावस्तत्त्व वा अर्थो न सम्भवति वृत्त-

(१) व्याप्तितादवस्थ्यादिति पा० ।

[illegible]

[illegible] विवक्षणीयत्वात् व्याप्यत्वाभावप्रति-
योगिनोऽपि तथात्वात्। तथाहि घटादौ घटत्वाद्यभावाधिक-
रणता यत्तत्त्वानवच्छिन्ना तदनवच्छिन्ना व्याप्यत्वघट-
त्वाद्यधिकरणताप्रसिद्धा तन्निरूपकत्वादनवच्छिन्नाधिकरण-
तावद्घटादिनिष्ठा घटत्वाभावाधिकरणत्वनिरूपकघटत्वाद्यभाव-
वत्ताच घटादेः स्वाभावप्रतियोगित्वनिर्वाहः, घटत्वादेर्व्याप्यवृत्ति-
त्वसमानाधिकरणसंयोगादिप्रतियोगितावारणाय सत्यन्त, संयोगा-
देर्गगनाद्यभावप्रतियोगित्ववारणाय विशेष्यदल, विभिन्नक्षणाव-
च्छिन्नस्य संयोगादिविशेषावच्छेदकाकाशादेस्तदभावाधिकरणताव-
च्छेदकत्वाद्वृक्षादिनिष्ठतदभावाधिकरणताया न अग्राद्यनवच्छेद्यत्व
किन्तु प्रतियोग्यनधिकरणघटाद्यवयवानवच्छेद्यत्वमेव तदनव-
च्छिन्ना च वृक्षनिष्ठसंयोगविशेषाधिकरणतापीति तद्व्याप्तिरतः
क्षणत्वनिवेशः, तन्निवेशे च यत्क्षणावच्छिन्नस्य मूलादेः प्रतियोग्य-

(१) तद्विशिष्टाधिकरणतायामिति पा०।

निष्ठकपिसंयोगावच्छेदकशाखायामपि तादृशसंयोगानुत्पाददशायां तत्र तदभावावच्छेदकत्वात् तादृशसंयोगावच्छेदककालस्यापि मूलावच्छेदेन तदभाववृत्तौ तथात्वादव्याप्तेर्दुर्वारत्वात्, तथापि शाखावच्छेदेन कपिसंयोगादिसत्त्वदशायामपि इदानीं शाखाया वृक्षो न कपिसयोगीति प्रतीत्यापत्तिवारणाय (१) तादृशप्रतीत्या कालविशेषावच्छिन्नस्यैव देशस्यावच्छेदकत्वमवगाह्यते इति स्वीकरणीयं तादृशदेश-कालयोर्वृक्षेऽभाववृत्तौ पृथगवच्छेदकत्व-सम्भवेऽपि तत्कालावच्छिन्नतद्देशस्यानवच्छेदकत्वान्नातिप्रसङ्गः। तथाच यत्कालावच्छिन्नयद्देशस्याभाववृत्तावच्छेदकत्वं तत्काला-वच्छिन्न-तद्देशावच्छिन्नत्वमेकदेश-कालावच्छेदेनेत्यर्थं इति न दोषः, कालपदं क्षणपरं, तेन दिवसाद्यात्मकस्थूलकालावच्छिन्न शाखादेः संयोग तदभावावच्छेदकत्वेऽपि न क्षतिः। देशपदमव-च्छेदकदेशान्तरानवच्छिन्नदेशपरं तेन विभिन्नभागावच्छिन्नस्थूला-वयवस्य प्रतियोगि-तदभावोभयावच्छेदकत्वसम्भवेऽपि न क्षतिः। अथैवमपि व्याप्यवृत्तेरवच्छेदकानभ्युपगमाद्घटत्वाद्यभावप्रतियोगि-त्वासंग्रहः तदवच्छेदकस्यैवाप्रसिद्धेः। न चैकदेश-कालावच्छेदेनेत्य-स्यानवच्छिन्नत्वविशेषणतात्पर्यान्न दोष इति वाच्यम्। संयोगा-द्यभावस्यानवच्छिन्नाधिकरणतावति गुणादौ संयोगादेरवृत्त्या संयोगाद्यभावस्य प्रतियोगित्वसंग्रहेऽपि संयोगादेरनवच्छिन्नाधिक-रणत्वाप्रसिद्ध्या तत्प्रतियोगित्वासंग्रहात्। न चाभावाधिकरणतायां

---

(१) अग्रावच्छेदेन संयोगसत्त्वदशायाम् इदानी अग्रे वृक्षो न कपिसंयोगीति प्रतीत्यापत्तिवारणायेति पा०।

न तद्विशेषणत्वम् अपि तु यद्वन्निष्ठाधिकरणतायामेवेति (१) नायं दोष इति वाच्यम् । एवमपि संयोगादेः स्वसमानाधिकरणगगना-द्यभावप्रतियोगित्वापत्तेर्दुर्व्वारत्वात् ।

यत्तु व्याप्यवृत्तिरवच्छेदकानभ्युपगमे यदधिकरणनिष्ठाभावा-धिकरणतायां यत्तत्क्षणावच्छिन्नयद्देशानवच्छेदत्वं तत्क्षणाव-च्छिन्नतद्देशानवच्छिन्नतदधिकरणनिष्ठाधिकरणत्वानिरूपकत्वे सति यदधिकरणनिष्ठाधिकरणतायां यद्यत्क्षणावच्छिन्नयद्यद्देशानव-च्छिन्नत्वं तत्क्षणावच्छिन्नतद्देशानवच्छिन्नतदधिकरणनिष्ठाधिकर-णत्वानिरूपकतदभाववत्त्वस्य विवक्षणीयत्वात् व्याप्यवृत्त्यभावप्रति-योगित्वमपि तस्याक्षतत्वात् । तथाहि घटादौ घटत्वाद्यभावाधिक-रणता यद्देश-कालानवच्छिन्ना तदनवच्छिन्ना व्याप्यवृत्तिघट-त्वाद्यधिकरणताप्रसिद्धा तदनिरूपकत्वादनवच्छिन्नत्वाधिकरण-तावद्घटादिनिष्ठतादृशघटत्वाभावाधिकरणत्वनिरूपकघटत्वाद्यभाव-वत्त्वाच्च घटादेः स्वाभावप्रतियोगित्वनिर्व्वाहः, घटत्वादेर्व्याप्यवृत्ति-स्वसमानाधिकरणसंयोगादिप्रतियोगित्ववारणाय सत्यन्तं, संयोगा-देर्गगनाद्यभावप्रतियोगित्ववारणाय विशेष्यदलं, विभिन्नक्षणाव-च्छिन्नस्य संयोगादिविशेषावच्छेदकाग्रादेस्तदभावाधिकरणताव-च्छेदकत्वाद्वृक्षादिनिष्ठतदभावाधिकरणताया न अग्राद्यनवच्छेदत्वं

न्यादाविति शेषः। 'समवायेन वृत्तेः' प्रतियोगितावच्छेदकीभूतसमवायेन स्वसम्बद्धत्वस्य, 'तादृशेति तादृशेन प्रतियोगितावच्छेदकसम्बन्धेन स्वसम्बद्धं यदधिकरणं तदवृत्तितदभावकत्वाभिधाने चेत्यर्थः, तथा सति सत्तासमवाय्यवृत्तित्वस्य तदभावे सत्त्वेन उक्ताव्याप्तिपरीहारासम्भवादिति भावः। 'व्यधिकरणसम्बन्धेति व्यधिकरणसम्बन्धेन संयोगादिना गुणाद्यभावप्रतियोगितायां तेन सम्बन्धेन गुणादिसम्बद्धाधिकरणाप्रसिद्धा अव्याप्तिरित्यर्थः। इदमुपलक्षणं, प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिमत्यपि काले कालिकादिसम्बन्धेनाभावस्य वृत्त्या अनुयोगिताविशेषरूपाभावत्वावच्छेदकसम्बन्धेनावृत्तिरवश्यं वाच्या तथाच स्वरूपविशेषसम्बन्धेन सत्ताद्यभावस्य यः सत्तादिरूपोऽभावस्तत्प्रतियोगित्वासग्रहोऽपि द्रष्टव्यः सत्ताद्यभावसम्बन्धाधिकरणसामान्यादौ समवायादिरूपतादृशसम्बन्धेन वृत्तेरप्रसिद्धेः। 'वक्ष्यमाणरीत्येति यादृशसम्बन्धसामान्ये एकदेश-कालावच्छिन्नयदभावाधिकरणानुयोगिकत्वस्य यद्रूपविशिष्टप्रतियोगिकत्वस्य च द्वयोर्व्यतिरेकस्तद्रूपवत्त्वं तादृशसम्बन्धेन तदभावप्रतियोगित्वमितिरीत्येत्यर्थः। न च व्याप्यवृत्तेरवच्छेदकानुपगमे देश-कालावच्छिन्नाभावाधिकरणत्वाप्रसिद्धा तद्घटितोभयाभावस्याप्रसिद्धेरिति वाच्यम्। एकदेश-कालावच्छिन्नाभावाधिकरणानुयोगिकत्वस्थले यद्यदधिकरणनिष्ठाभावाधिकरणताया यद्यद्देश-कालानवच्छिन्नत्वावच्छिन्नत्वोभयाभावस्तत्र तत्तद्देश-कालानवच्छिन्नत्वावच्छिन्नत्वोभयाभावस्तत्तदधिकरणानुयोगिकत्वद्वयं निवेश्य तद्द्वयप्रतियोगि-

माणमत इव स्वाभावेऽत्र षष्ठ्यर्थप्रतियोगितानिवेशेनात्मान्वय एव विरोधिताघटकोभयाभावादावपि प्रतियोगित्वान्तरप्रवेशादनवस्था चेत्यपि बोध्यम्। 'तत्तावच्छेदकेति प्रतियोगितावच्छेदकेत्यर्थः, 'अप्रसक्त्यतिप्रसक्ती इति, घटाद्यन्योन्याभावाभावस्य तत्प्रतियोगितावच्छेदकघटत्वादिमात्ररूपत्वात् इति भावः। ननु नेदं प्रतियोगितापदमुख्यार्थनिर्वचनं किन्तु व्याप्तिलक्षणप्रविष्टोपाधित्वघटकव्यापकतानिविष्टप्रतियोगितास्वरूपनिरूपणमेव तादृशप्रतियोगिताया. भेदप्रतियोगिसाधारण्यविरहेऽपि न क्षतिः तावतापि व्याप्तिलक्षणस्य निर्दोषत्वादित्यत आह, 'प्रकृतोपयोगीति. 'अत्यन्तपदवैयर्थ्यमिति. धूमवान् वह्नेरित्यादौ अयोगोलकान्यत्वादिरूपस्य उपाधेः साध्यवन्निष्ठभेदप्रतियोगितया व्यापकत्वानुपपत्तिरिति तद्वारणायैवात्यन्तपदोपादानं, यदि चाभावाभावत्वरूपमन्योन्याभावप्रतियोगिव्यावृत्तं प्रतियोगित्वमुपाधित्वघटकव्यापकताशरीरे निविश्यते तदा साध्यवन्निष्ठोपाधिभेदमादाय दोषस्यासम्भवात् तद्वैयर्थ्यमिति भावः। ननु साध्यवन्निष्ठध्वंस प्रागभावप्रतियोगि[illegible] आर्द्रेन्धनादेरुपाधितानिर्वाहायात्यन्ताभावपदोपादानं [illegible] तद्ध्वंस-प्रागभावरूपत्वादित्यत आह 'सर्वेति [illegible] शेष'। 'नित्यस्य व्यभिचारनिरूपकाधिकरण[illegible], हि-त्वावच्छिन्नाभावप्रतियोगिता[illegible] तानद[illegible] [illegible] [illegible] नादेरपि ध्वंस[illegible]प्रतियोगिता[illegible] [illegible] आर्द्रेन्धनादेरुपाधित्व[illegible] [illegible]

माणमत इव स्वाभावेत्यत्र षष्ठार्थप्रतियोगितानिवेशेनात्माश्रय एव विरोधिताघटकोभयाभावादावपि प्रतियोगित्वान्तरप्रवेशादनवस्था चेत्यपि बोध्यम्। 'तत्तावच्छेदकेति प्रतियोगितावच्छेदकेत्यर्थः, 'अप्रसक्त्यतिप्रसक्ती इति, घटाद्यन्योन्याभावाभावस्य तत्प्रतियोगितावच्छेदकघटत्वादिमात्ररूपत्वात् इति भावः। ननु नेदं प्रतियोगितापदमुख्यार्थनिर्वचनं किन्तु व्याप्तिलक्षणप्रविष्टोपाधित्वघटकव्यापकतानिविष्टप्रतियोगितास्वरूपनिरूपणमेव तादृशप्रतियोगितायाः भेदप्रतियोगिसाधारण्यविरहेऽपि न क्षतिः तावतापि व्याप्तिलक्षणस्य निर्दोषत्वादित्यत आह, 'प्रकृतोपयोगीति, 'अत्यन्तपदवैयर्थ्यमिति, धूमवान् वह्नेरित्यादौ अयोगोलकान्यत्वादिरूपस्य उपाधेः साध्यवन्निष्ठभेदप्रतियोगितया व्यापकत्वानुपपत्तिरिति तद्वारणायैवात्यन्तपदोपादानं, यदि चाभावाभावत्वरूपमन्योन्याभावप्रतियोगिव्यावृत्तं प्रतियोगित्वमुपाधित्वघटकव्यापकताशरीरे निवेश्यते तदा साध्यवन्निष्ठोपाधिभेदमादाय दोषस्यानवकाशात्तद्वैयर्थ्यमिति भावः। ननु साध्यवन्निष्ठध्वंस-प्रागभावप्रतियोगिनआर्द्रेन्धनादेरुपाधितानिर्व्वाहायात्यन्ताभावपदोपादानं तस्यापि तद्ध्वंस-प्रागभावरूपत्वादित्यत आह, 'सर्व्वत्रेति, व्यभिचारिणीति शेषः। 'नित्यस्य' व्यभिचारनिरूपकाधिकरणभेदादे, द्वित्वावच्छिन्नाभावप्रतियोगिनामादायासम्भववारणार्थं प्रतियोगितानवच्छेदकरूपावच्छिन्नत्वविवक्षाया आवश्यकत्वेन आर्द्रेन्धनादेरपि ध्वंसादिप्रतियोगितानवच्छेदकार्द्रेन्धनायोगोलकभेदान्यतरत्वादिना आर्द्रेन्धनादेरप्युपाधित्वसम्भव इत्याशयेनाह, 'नित्य-

साधारणेति, न च ध्वंस-प्रागभावादीनां सामान्यधर्मो न प्रतियोगितावच्छेदक इति साध्यवन्निष्ठध्वंस प्रागभावादिरूपाभावप्रतियोगितावच्छेदकं नार्द्रेन्धनत्वमिति नित्यसाधारणरूपपर्य्यन्तानुसरणफलमिति वाच्यम्। स्वसमानाधिकरणार्द्रेन्धनासमानकालीनतत्प्रागभावानां तादृशतत्प्रागभावासमानकालीनतद्ध्वंसानामार्द्रेन्धनत्वस्यैव प्रतियोगितावच्छेदकत्वात् अन्यथा ध्वंस-प्रागभावयोरत्यन्ताभावविरोधित्वमते तादृशध्वंस प्रागभावाधिकरणे अवेदानीमार्द्रेन्धनं नास्तीत्यादिप्रतीत्यनुपपत्तेः। वस्तुतस्तु एतद्धूमवान् वह्नेरित्यादौ इन्धनादिव्यक्तीनां नोपाधिता सम्भवति एतदार्द्रेन्धनत्वादेः साध्यवन्निष्ठध्वंसादिप्रतियोगितावच्छेदकत्वादित्याशङ्कायां 'नित्यस्येत्यनेन तद्व्यक्तीनां व्याप्तिलक्षणाप्रवेशेऽपि न क्षतिरित्युक्ता तादृशोपाधीनामपि व्यापकरूपेणोपाधितया व्याप्तिलक्षणप्रवेश एवेति 'नित्यसाधारणरूपावच्छिन्नस्य चेत्यनेनाभिहितं, नित्यसाधारण्यञ्चात्र तद्देशनिष्ठध्वंसाद्यप्रतियोगिसाधारण्यार्थकं, तेनार्द्रेन्धनत्वादेरपि सुग्रहात्र न्यूनतेति ध्येयम्। 'उपाधित्वसम्भवादिति, तथा चार्द्रेन्धनत्वाद्यवच्छिन्नस्य प्रकृतोपाधित्वानुपपत्तावपि न व्याप्तिलक्षणातिप्रसङ्ग इति भावः। 'इतरथा' भेदप्रतियोगितासाधारणरूपावच्छिन्नप्रतियोगिताया लक्षणघटकत्वे, 'भेदप्रतियोगितेति अयोगोलकभेदादिभेदप्रतियोगितेत्यर्थः। अथायोगोलकभेदादेः साध्यवन्निष्ठभेदप्रतियोगितया अनुपाधित्वेऽपि अयोगोलकभेद-धूमवदन्यतरत्वाद्यवच्छिन्नस्य उपाधितासम्भवाद्व्याप्तिलक्षणानतिप्रसङ्गो निर्व्वाहइति, नहि तादृशान्यतरत्वावच्छिन्ने

धूमादिमति तदवच्छिन्नभेदो वर्त्तते येन भेदप्रतियोगितामादाय तदवच्छिन्नस्योपाधित्वं व्याहन्येत। न च इदं जन्यं पृथिवीत्वादित्यादौ परमाणुभेदादेर्जन्यनिष्ठभेदप्रतियोगित्वेन साध्याव्यापकतया जन्य-परमाणुभेदान्यतरत्वावच्छिन्नस्य परमाणुसाधारणत्वेन (१) साधनव्यापकतयोपाधित्वं न सम्भवतीति तत्रानौपाधिकत्ववारकतया अत्यन्तपदसार्थक्यमिति वाच्यम्। साधनाव्यापकतायामप्यत्यन्ताभावनिवेशस्य निष्प्रयोजनकतया तादृशान्यतरत्वावच्छिन्नस्य परमाणुभिन्नत्वाद्यवच्छिन्नस्य च साधनवत्परमाणुनिष्ठभेदप्रतियोगितया साधनाव्यापकतयोपाधित्वसम्भवात्।

यत्तु घटाभावभिन्नं मेयत्वादित्यादौ घटाभावभिन्नत्वाद्यवच्छिन्नस्यापि साध्यवन्निष्ठघटाद्यभावस्वरूपघटाद्यभावनिष्ठस्वभेदप्रतियोगितया साध्यव्यापकत्वासम्भवेनानौपाधिकत्वापत्त्या तद्वारकतया अत्यन्तपदसार्थक्यं तत्पददाने घटाभावभिन्नादेः अत्यन्ताभावत्वनिरूपकप्रतियोगित्वघटितसाधनाव्यापकत्वविरहेण अनुपाधित्वेऽपि घटाभावभेदादेरेवोपाधित्वसम्भवादिति तन्न। घटाभावभेदात्यन्ताभावस्यापि घटाभावमात्रवृत्तित्वेन तुल्ययुक्त्या घटाभावरूपतया अत्यन्तपददानेऽपि तत्रोपाधिमौलभ्याभावात्। न चात्यन्तपदोपादानादत्यन्ताभावत्वनिरूपकप्रतियोगित्वलाभादुक्तस्थले घटाभावभिन्नस्य घटाभावात्मकस्वभेदीयभेदत्वनिरूपकप्रतियोगित्वसत्त्वेऽपि अत्यन्ताभावत्वनिरूपकप्रतियोगित्ववि-

---

(१) जन्यस्य घटादिभिन्नस्य परमाणो इत्याद एतदन्यतरत्वावच्छिन्नस्य परमाणुसाधारण्यम्।

रत्वादुपाधित्वं सम्भवतीति वाच्यम्। घटाभावभिन्न घटत्वा दित्वादावुक्तरीत्या साध्यव्यापकत्वं घटाभावभिन्नस्य साध्य समानाधिकरणघटाभावरूपस्वभेदप्रतियोगितया उपाधितापत्त्या साधनाव्यापकत्वदलेऽपि अत्यन्ताभावत्वनिरूपकप्रतियोगित्वनि वेशनस्यावश्यकत्वेन प्रमेयत्वादिसाधनाव्यापकतया तस्योपाधित्व सम्भवात्, विवक्षान्तरेण घटाभावभिन्नभेदस्य घटाभावत्वस्वरूपतया तस्य साध्यसमानाधिकरणत्वान्नोपाधित्वहानिरिति भावः। घटा- भावभेदस्य उपाधित्वोपपादाने घटाभावभिन्नस्यापि तदुपपादान- सम्भवेनात्यन्तपदवैयर्थ्यस्यावश्यकत्वादिति चेन्न। अखण्डनित्यायोगो- लकभेदादिरूपोपाधेः साध्यवति कथञ्चिदपि नात्यन्ताभावः विशि ष्टाभावस्य विशेष्य-विशेषणसम्बन्धप्रतियोगिताकत्वमतावलम्बनात् द्वौ नस्त इत्यादिप्रतीतेश्च परम्परासम्बन्धेन द्वित्वाद्यभाव एव विषय इति मताश्रयणाच्च। व्यासज्यवृत्तिधर्म्मानवच्छिन्नत्वं वा प्रतियोगि- तायां विशेषणं देयं, तथाचाप्रतियोगित्वगर्भमेव व्यापकत्वं वाच्यम् न तु प्रतियोगितानवच्छेदकावच्छिन्नत्वरूपं,ग्रन्थकृतापि 'यदि चै- त्यनेनानवच्छेदकावच्छिन्नत्वनिवेशे प्रागनिर्भरो दर्शितः। एवञ्चा- योगोलकभेद-साध्यवदन्यतरत्वावच्छिन्नस्योपाधित्वं(१) दुरुपपादमेव साध्यवतः साध्यवन्निष्ठात्यन्ताभावप्रतियोगित्वात्, अयोगोलक- भेदादेश्च तादृशभेदप्रतियोगित्वादत्यन्तपदसार्थक्यात्। नन्वेवमपि नित्यसंसर्गाभावत्वरूपात्यन्ताभावत्वघटकध्वंसादिबाधकनित्यत्वांश- स्यानतिप्रयोजनकत्वमेवेत्याशङ्कायां नित्यत्वांशो न निवेश्यत एव

(१) अयोगोलकभिन्नत्वावच्छिन्नस्योपाधित्वमिति पा०।

BIBLIOTHECA INDICA

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES No 1338

तत्त्वचिन्तामणि-दीधिति-विवृतिः



TATTVACINTĀMANI DIDHITI-VIVRITI

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY

MAHĀMAHOPĀDHYĀYA KAMAKHYANATHA TARKAVAGISA,

[illegible] Professor, Sanskrit College

VOLUME I FASCICULUS VII

Calcutta,

PRINTED BY UPENDRANATHA CHAKRAVARTTI AT THE SANSKRIT PRESS
5 Nandakumar Chawdhury's 2nd Lane

AND [illegible] BY [illegible]

ASIATIC SOCIETY OF BENGAL, 1 PARK STREET

1912

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR BERNARD QUARITCH, 11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied —some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA

Sanskrit Series

Advaitachintā Kaustubha, Fasc 1 3 @ /10/ each .	Rs	1
Aitarēya Brāhmaṇa, Vol I, Fasc 1-5, Vol II, Fasc 1-5; Vol III, Fasc 1-5, Vol IV, Fasc 1-8 @ /10/ each ..		14
Aitereya Lochana ...		2
Amarkosha, Fasc 1		2
*Aṇu Bhāshya, Fasc 2-5 @ /10/ each		2
Anumāna Didhiti Prasarini, Fasc 1 @ /10/		1
Aṣṭasāhasrikā Prajñāpāramitā, Fasc 1-6 @ /10/ each .		3
Atmatattwaviveka, Fasc I		0
Açvavaidyaka, Fasc 1-5 @ /10/ each		3
Avadāna Kalpalatā, (Sans and Tibetan) Vol I, Fasc 1-10, Vol II Fasc 1-10 @ 1/ each		20
Bālam Bhaṭṭi, Vol I, Fasc 1-2, Vol II, Fasc 1 @ /10/ each .		1
Baudhāyana S'rauta Sūtra, Fasc 1 3 Vol II, Fasc 1-5 @ /10/ each		5
Bhāsāvritti		0
Bhaṭṭa Dīpikā Vol I, Fasc 1-6, Vol 2, Fasc 1, @ /10 each -		4
Buddhastotrasangraha		2
Bṛhaddēvatā Fasc 1-4 @ /10/ each		2
Bṛhaddharma Purāna Fasc 1-6 @ /10/ each		3
Bodhicaryāvatāra of Çāntideva, Fasc 1 6 @ /10/ each .		3
Çri Cantinātha Charita, Fasc 1-3 .		[illegible]
Çatadūṣaṇī, Fasc 1 2 @ /10/ each		1
Catalogue of Sanskrit Books and MSS, Fasc 1-4 @ 2/ each		8
Çatapatha Brāhmaṇa, Vol I, Fasc 1-7, Vol II, Fasc 1-5, Vol III, Fasc 1-7 Vol V, Fasc 1 4 @ /10/ each		14
Ditto Vol VI, Fasc 1-3 @ 1/4/ each .		3
Ditto Vol VII, Fasc 1-5 @ /10/ .		3
Ditto Vol IX, Fasc 1-2 .		1
Çatasāhasrikā Prajñāpāramitā Part, I Fasc 1-17 @ /10/ each		10
*Caturvarga Chintāmaṇi, Vol II, Fasc 1-25, Vol III Part I, Fasc 1-18 Part II, Fasc 1-10 Vol IV Fasc 1-6 @ /10/ each		30
Ditto Vol IV, Fasc 7 8, @ 1/4/ each .		2
Ditto Vol IV, Fasc 9 10 @ /10/ -		1
Çlokavartika, (English) Fasc 1-7 @ 1/4/ each		8
*Çrauta Sūtra of Çāṅkhāyana, Vol I, Fasc 1-7, Vol II, Fasc 1-4, Vol III, Fasc 1-4, Vol 4, Fasc 1 @ /10/ each		10
Çri Bhāshyam, Fasc 1-3 @ /10/ each		1
Dāna Kriyā Kaumudī, Fasc 1 2 @ /10/ each .		1
Gadadhara Paddhati Kālasāra Vol I, Fasc 1-7 @ /10/ each		4
Ditto Āchārasāra Vol. II, Fasc 1-4 @ /10/ each		3
[illegible]hya Grihya Sutra, Vol 1 @ /10/ each		3
[illegible]to Vol II Fasc -2 @ 1/4/ each		2
[illegible]to (Appendix) Gobhila Parisista .. .		2
Ditto Grihya Sangraha		0
[illegible]alata		1
[illegible]rmapradiph, Fasc I .		1
[illegible]la Viveka, Fasc 1-7 @ /10/ each .		4
[illegible] Fasc 1-6 @ /12/ each .		4
[illegible]a Purāna, Fasc 3-9 @ /10/ each		[illegible]

केवलसंसर्गाभावलाभायैवात्यन्तपदमिति दर्शयति,'संसर्गाभावेति, 'तस्य' अत्यन्तपदस्य, अन्योन्याभावप्रतियोगिन्यव्याप्तिं परिहर्त्तुमाह, 'विरहपदस्येति, 'तज्ज्ञानेति तदन्वितं अभावान्वितं यज्ज्ञानं तत्प्रतिबन्धकज्ञानविषयार्थकत्वात् इत्यर्थः, अभावान्वये उपलक्षणज्ञानप्रभृतीनामेव विरहपदार्थघटकत्वं बोध्यम्, तेन नाभावपदवैयर्थ्यम्। एवञ्च तदभावग्रहप्रतिबन्धकग्रहविषयत्वमेव तदभावप्रतियोगित्वमिति फलितं एतच्चान्योन्याभावप्रतियोगित्वसाधारणमेवेत्याह, 'प्रतिबध्नाति हीति, प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिप्रकारकनिश्चयस्याभावधीप्रतिबन्धकत्वादिति भावः। प्रतिबन्धकत्व यदि कारणीभूताभावप्रतियोगित्वं तदा प्रतियोगित्वान्तरप्रवेशादनवस्था इत्यतस्तदन्यथा निर्व्वक्ति, 'प्रतिबन्धकत्वञ्चेति, 'अत्र प्रतियोगितालक्षणे, अभाव-प्रतियोगिमत्ताज्ञानयोरपि भिन्नकालावच्छेदेन एकात्मनि एकक्षणावच्छेदेन च विभिन्नात्मनिवर्त्तमानत्वात् 'एककालावच्छेदेन एकत्रेति, कालपदं क्षणपरं, तेन स्थूलकालावच्छेदेन तयोरेकाधिकरणवृत्तित्वेऽपि न क्षतिः। अत एकत्रेत्यनतिप्रयोजनक, अभावज्ञानाधिकरणक्षणावच्छेदेन तच्छून्यात्मनिष्ठप्रतियोगिज्ञानस्यासग्रहेऽपि तज्ज्ञानाधिकरणक्षणावृत्तियत्किञ्चित्प्रतियोगिज्ञानव्यक्तिमादाय लक्षणगमनसम्भवात्। न च कालमात्रस्यैव परमेश्वरीयाभावज्ञानाधिकरणतया अभावज्ञानाधिकरणक्षणावृत्तिज्ञानाप्रसिद्धिरिति वाच्यम्। अभावज्ञानावच्छेदकक्षणावच्छिन्नवृत्तिकान्यत्वरूपस्य एककालावच्छेदेनावर्त्तमानत्वस्य निवेशे नित्यस्य भगवज्ज्ञानस्य कालविशेषानवच्छिन्नतया सर्व्वत्र

स्वभानस्यावश्यकतया तदधिकरणवृत्तित्वावच्छिन्नाभावस्यैव प्रतिबन्धकतारूपतया एकलक्षणावच्छिन्नत्वानिवेशे उक्तानुपपत्तेरनुद्धारादित्यवधेयम् (१)। अन्योन्याभावप्रतियोगितावच्छेदकातिप्रसक्तिं निराकर्त्तुमाह, 'अभावपदस्य चेति, 'स्वाभावपरत्वादिति, तथाच स्वीयोयोऽभाव' स्वनिष्ठं तद्विरहत्वमेव स्वस्य तदभावप्रतियोगित्वं घटान्योन्याभावश्च न घटत्वाभाव इति घटत्वादिनिष्ठं तद्विरहत्वं न तत्प्रतियोगित्वमिति भावः। घट एव तदभावप्रतियोगीत्यादौ अभावपदं लक्षणया घटादिरूपसमभिव्याहृतपदार्थविशेषिताभावपरं, प्रतियोगिपदं ज्ञानप्रतिबन्धकज्ञानविषयत्वावच्छिन्नार्थकं, तदेकदेशज्ञाने वाभावविषयकत्वान्वयः, स्वत्वाननुगमेऽपि न प्रतियोगिपदशक्यानन्त्यप्रसङ्गः, न वा अभावपदार्थान्वयानुपपत्तिः इति ध्येयम्। सम्बन्धविशेषणावच्छिन्नत्वस्य व्यापकताघटकप्रतियोगितायां अवश्यनिवेशनीयतया भेदप्रतियोगितामादायोक्तदोषासम्भवेन संसर्गाभावनिवेशवैयर्थ्यमित्यत्यन्तपदं सम्बन्धविशेषावच्छिन्नत्वलाभार्थकतया एव व्याख्येयं तथाच प्रकृतोपयोगिप्रतियोगितामात्रस्य लक्षणत्वेऽपि न क्षतिरित्याह, 'वस्तुतस्त्वित्यादिना, 'एकसम्बन्धावच्छिन्नाया इति, तथाच साध्यवन्निष्ठाभावप्रतियोगितासामान्यानवच्छेदकत्वनिवेशे प्रतियोगितावच्छेदकमात्रस्यैव साध्यवन्निष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकतया तादृशप्रतियोगितासामान्यानवच्छेदकसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकाप्रसिद्धिः। न चायोगो-

(१) न चैवमित्यादि इत्यवधेयमित्यन्तः पाठः क्वचिदादर्शपुस्तके नास्ति।

लकभेदत्वादिकमेव तथा धूमादिमति संयोगादिव्यधिकरणसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावसत्त्वेऽपि तत्प्रतियोगितायां लाघवेन शुद्धभेदत्वादेरवच्छेदकत्वोपगमात् इति वाच्यम्। विषयितासम्बन्धेन कालिकसम्बन्धेन वा अयोगोलकभेदाभावस्य प्रतियोगितायामेवायोगोलकभेदत्वादेरवच्छेदकतया तस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वासम्भवात् अयोगोलकभेदाविषयकभेदान्तरविषयकज्ञाने विषयितासम्बन्धेन भेदत्वरूपसामान्यधर्मावच्छिन्नाभावासम्भवेन तत्साधारणताद्दृशसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावस्य भेदसामान्यानधिकरणदेशाप्रसिद्ध्या कालिकसम्बन्धावच्छिन्नभेदत्वावच्छिन्नाभावासम्भवेन अयोगोलकावच्छेदेन कालवृत्तेः कालिकसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावस्य च शुद्धभेदत्वादेरवच्छेदकत्वायोगात्। यदि च यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं निवेश्य अयोगोलकभेदत्वादेस्तथात्वमुपपद्यते, तदा वह्निमान् धूमादित्यादौ वह्न्यादिमन्निष्ठसंयोगसमवाय-दैशिकसम्बन्धावच्छिन्नाभावप्रतियोगिता(१)नवच्छेदकधूमादिमन्निष्ठसमवाय--संयोग--दैशिकविशेषणतासम्बन्धावच्छिन्नाभावप्रतियोगिता(२)वच्छेदक-वह्नित्व द्रव्यत्वत्व ऋदभेदत्वाद्यवच्छिन्नस्योपाधितापत्तिरिति भावः। 'यत्सम्बन्धावच्छिन्नाया इति, तथाच संयोगादिसम्बन्धावच्छिन्नवह्न्यादिमन्निष्ठाभावप्रतियोगितानवच्छेदकवह्नित्वादेः साधनवन्निष्ठतत्सम्बन्धावच्छिन्नाभावप्रतियोगिता

---

(१) संयोग-समवायादि-कालिकसम्बन्धावच्छिन्नाभावप्रतियोगितेति पा०।

(२) संयोग समवाय-कालिकादिसम्बन्धावच्छिन्नाभावप्रतियोगितेति पा०।

नवच्छेदकत्वसम्भवात् धूमादिमन्निष्ठविशेषणताविशेषादिसम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकायोगोलकभेदत्वादेर्वह्न्यादिमन्निष्ठतादृशसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वाच्च न कश्चिद्दोष इति भावः। 'समर्गाभावत्वमनुपादेयमेवेति अयोगोलभेदत्वादेर्धूमादिमन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि विशेषणताविशेषादिसम्बन्धघटितनिरुक्तोपाधितावच्छेदकत्वस्य तत्राक्षतत्वात् इति भावः। 'स च' अस्तरम', 'व्यधिकरणसम्बन्धेनेति, तथाच तादृशव्यधिकरणसम्बन्धेन संयोगादिना यस्य रूपविशेषादेः क्वचिदपि कस्यचिद्भ्रमो न जातस्तस्य तादृशसम्बन्धावच्छिन्नाभावप्रतियोगित्वानुपपत्तिः। प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिप्रकारकज्ञानस्याभावधीविरोधित्वात् तादृशाभावधीप्रतिबन्धकज्ञानस्यैवाप्रसिद्धेः। यद्यपि समानधर्म्मिकयोरेवाभाव-प्रतियोगिमत्ताज्ञानयोः प्रतिबध्य-प्रतिबन्धकभाव इति समानाधिकरणसम्बन्धावच्छिन्नाभावस्थलेऽपि विरोधिनोरभाव प्रतियोगिज्ञानयोरेकतरस्य भ्रमत्वनियम इति यादृशाभावस्य तत्प्रतियोगिनो वा भ्रमो न कदाचिदपि प्रसिद्धः तदभावप्रतियोगित्वाव्याप्तिः सम्भवति तथापि समानविशेष्यताप्रत्यासत्त्या प्रतिबध्य प्रतिबन्धकभावोपगमे भिन्नधर्म्मिकज्ञानस्यापि प्रतिबन्धकतावच्छेदकाक्रान्ततया तादृशभ्रमात्मकज्ञानमादाय लक्षणसमन्वय सम्भवति इति व्यधिकरणसम्बन्धावच्छिन्नाभावानुधावनम्। ननु प्रतिबन्धकत्वं न कार्य्याभूताभावप्रतियोगित्वमपि त्वेककालावच्छेदेनैकत्राधिकरणावृत्तित्वमिति प्राचीनोक्तम् एवञ्च यादृशव्यधिकरणसम्बन्धेन यस्य प्रतियोगिनो-

लकभेदत्वादिकमेव तथा धूमादिमति संयोगादिव्यधिकरणसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावसत्त्वेऽपि तत्प्रतियोगितायां स्व-वेन शुद्धभेदत्वादेरवच्छेदकत्वोपगमात् इति वाच्यम्। विषयितासम्बन्धेन कालिकसम्बन्धेन वा अयोगोलकभेदाभावस्य प्रतियोगितायामेवायोगोलकभेदत्वादेरवच्छेदकतया तस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वासम्भवात्, अयोगोलकभेदाविषयकभेदान्तरविषयकज्ञाने विषयितासम्बन्धेन भेदत्वरूपसामान्यधर्मावच्छिन्नाभावासम्भवेन तत्साधारणतादृशसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावस्य भेदसामान्यानधिकरणदेशाप्रसिद्ध्या कालिकसम्बन्धावच्छिन्नभेदत्वावच्छिन्नाभावासम्भवेन अयोगोलकावच्छेदेन का-वृत्तेः कालिकसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावस्य च शुद्धभेदत्वादेरवच्छेदकत्वायोगात्। यदि च यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं निवेश्य अयोगोलकभेदत्वादेस्तथात्वमुपपद्यते, तदा वह्निमान् धूमादित्यादौ वह्न्यादिमन्निष्ठसंयोगसमवाय-दैशिकसम्बन्धावच्छिन्नाभावप्रतियोगिता(१)नवच्छेदकधूमादिमन्निष्ठसमवाय-संयोग-दैशिकविशेषणतासम्बन्धावच्छिन्नाभावप्रतियोगिता(२)वच्छेदक-वह्नित्व द्रव्यत्वत्व-कूटभेदत्वाद्यवच्छिन्नस्योपाधितापत्तिरिति भावः। 'यत्सम्बन्धावच्छिन्नाया इति, तथा च संयोगादिसम्बन्धावच्छिन्नवह्न्यादिमन्निष्ठाभावप्रतियोगितानवच्छेदकवह्नित्वादेः साधनवन्निष्ठतत्सम्बन्धावच्छिन्नाभावप्रतियोगिता-

---

(१) संयोग-समवायादि-कालिकसम्बन्धावच्छिन्नाभावप्रतियोगितेति पा०।

(२) संयोग समवाय-कालिकादिसम्बन्धावच्छिन्नाभावप्रतियोगितेति पा०।

योगितायाः स्वरूपसम्बन्धात्मकत्वे निरुक्तापेक्षया लघीयस्तन्निरू-
पकत्वस्यैव प्रतियोगितात्वौचित्यात्। प्रकारान्तरेण प्रतियोगि-
ताप्रवेशमाह, 'अभावत्वेति, अभावत्वं, द्रव्यादिप्रतियोगिकभेदवत्त्वं,
'प्रतिबन्धकत्वम्' एकत्र वर्त्तमानत्वप्रतियोगिकाभाव इति भावः।
नन्वभावादिव्यवहारगोचरत्वमेवाभावत्वं न तु प्रतियोगिताघटित-
निरुक्तरूपमित्यत आह, 'तथाविधेति, 'विना प्रतियोगितामिति
प्रतियोगितान्तर्भावमन्तरेणेत्यर्थः, तथाविधव्यवहारगोचरत्वम् अ-
भावपदप्रतिपाद्यत्वं तत्पदशक्तिविषयत्वरूपं वा उभयथापि जन्य-
ताघटित प्रतिपाद्यत्वस्य जन्यप्रतिपत्तिविषयत्वरूपत्वात्, तत्पद-
शक्तेश्च पदजन्यबोधविषयत्वप्रकारकभगवदिच्छारूपत्वात्, जन्यता
च व्याप्तिघटिता, तस्याश्च प्रतियोगिताघटितत्वादिति भाव।
एतच्च प्रतियोगिता स्वरूपसम्बन्धविशेष इति पूर्वमत एव ग्रन्थ-
कारस्य निर्भर इति सूचितम्। इदमवधेयं घटो नास्तीत्या-
दिबुद्धावभावांशे प्रतियोगिनः प्रकारतया भानाद्घटाभावादि-
कारणत्वे प्रतियोगिनोऽवच्छेदकत्वाद्याभावनिष्ठप्रतियोगित्वनिरूपि-
तानुयोगित्वाख्यस्वरूपसम्बन्धोऽवश्यमङ्गीकार्यः प्रतियोगिन्यभाव-
विशिष्टबुद्ध्यात्मकोऽभावीयो घटइत्यादिप्रत्ययस्तु नानुभवसिद्ध
इत्यभावीयप्रतियोगित्वाख्यस्वरूपसम्बन्धे मानाभाव, प्रतियोगि
व्यवहारस्तु अनुयोगितानिरूपकत्वमेवावलम्बते घटस्य च प्रति-
योगिनिष्ठप्रत्यासत्त्या प्रतियोगितावच्छेदकत्वानुरोधेन तस्य प्रति-
योगिनिष्ठसम्बन्धोपगम आवश्यक इति चेन्न, तदवच्छेदका-
कारस्य तादृशसम्बन्धो नियामक एव। न च घटत्वस्य

यत्र कार्य्यतावच्छेदकता तत्र प्रागभावनिष्ठानुयोगितानिरूपकत्वापेक्षया प्रतियोगितासम्बन्धेन प्रागभावे तस्य तस्य तथात्वे लाघवात् प्रागभावस्यापि तादृशसम्बन्धः सिद्ध इति वाच्यम्। तत्र निरूपकतासम्बन्धेनानुयोगिताविशेषरूपप्रागभावत्वस्यैवावच्छेदकत्वोपगमात्। अन्यथा प्रागभावनिष्ठात्यन्ताभावादिभेदस्याधिकरणस्वरूपतामते जन्यत्वस्यात्यन्ताभावादिसाधारण्यापत्तेः गौरवाच्चेति।

तत्त्वचिन्तामणिः।

यावत्साधनाव्यापकमव्यापकं यत्साध्यस्य यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वं तदिति चेन्न, सोपाधेरपि तथात्वात्, तथाहि साधनस्य वह्नेरव्यापकं यत्तदार्द्रेन्धनन्तत् प्रत्येकमव्यापकं साध्यधूमस्य द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं तद्व्यापकं महानसीयवह्नेः। नापि साध्यं यावद्व्यभिचारि तदव्यभिचारित्वमनौपाधिकत्वं, साध्याव्यभिचारित्वस्यैव गमकत्वसम्भवात्, तच्च दूषितम्। नापि कार्त्स्न्येन सम्बन्धो व्याप्तिः एकव्यक्तिके तदभावात् नानाव्यक्तिकेऽपि सकलधूमस्वन्धस्य प्रत्येकवह्नावभावात्। अतएव न कार्त्स्न्येन सम्बन्धो व्याप्तिः विषमव्याप्ते तदभावाच्च। न च यावत्साधनाश्रयाश्रितसाध्यसम्बन्धः, साधनाश्रये

महानसादौ सकले प्रत्येकं वह्नेराश्रितत्वाभावात्। नापि साधनसमानाधिकरणयावद्धर्म्मसमानाधिकरण-साध्यसामानाधिकरण्यं, यावद्धर्म्मसामानाधिकरण्यं हि यावत्तद्धर्म्माधिकरणाधिकरणत्वं तच्चाप्रसिद्धं साधन-समानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः । नापि स्वाभाविकः सम्बन्धो व्याप्तिः, स्वभावजन्यत्वे तदा-श्रितत्वादौ वा अव्याप्त्यतिव्याप्तिः । नाप्यविनाभावः, केवलान्वयिन्यभावात् । अथ सम्बन्धमात्रं व्याप्तिः व्यभिचारिसम्बन्धस्यापि केनचित् सह व्याप्तित्वात् धूमादिव्याप्तिस्तु विशिष्यैव निर्व्वक्तव्येति तन्न, लिङ्ग-परामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे लक्षणाभि-धानस्यार्थान्तरत्वात् । न च सम्बन्धमात्रं तथा, तद्-बोधादनुमित्यनुत्पत्तेः ।

दीधितिः ।

यत्साध्यस्य यत्समानाधिकरणसाध्यस्य । 'तथाही-त्यादि, यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छे-दकं यावत् साध्यसमानाधिकरणात्यन्ताभावप्रतियोगि-तावच्छेदकम् साध्यसमानाधिकरणात्यन्ताभावप्रतियो-गितानवच्छेदकं यावत् यत्समानाधिकरणात्यन्ताभाव-

यत्र कार्य्यतावच्छेदकता तत्र प्रागभावनिष्ठानुयोगितानिरू पकत्वापेक्षया प्रतियोगितासम्बन्धेन प्रागभावे तस्य तस्य तयात्वे लाघवात् प्रागभावस्यापि तादृशसम्बन्धः सिद्ध इति वाच्यम्। तत्र निरूपकतासम्बन्धेनानुयोगिताविशेषरूपप्रागभावत्वस्यैवावच्छेदकत्वोपगमात्। अन्यथा प्रागभावनिष्ठात्यन्ताभावादिभेदस्याधिकरणस्वरूपतामते जन्यत्वस्यात्यन्ताभावादिसाधारण्यापत्तेः गौरवाच्चेति।

तत्त्वचिन्तामणिः।

यावत्साधनाव्यापकमव्यापकं यत्साध्यस्य यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वं तदिति चेन्न, सोपाधेरपि तथात्वात्, तथाहि साधनस्य वह्नेरव्यापकं यत्प्रत्येकमार्द्रेन्धनन्तत् प्रत्येकमव्यापकं साध्यधूमस्य द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं तद्व्यापकं महानसीयवह्नेः। नापि साध्यं यावद्व्यभिचारि तदव्यभिचारित्वमनौपाधिकत्वं, साध्याव्यभिचारित्वस्यैव गमकत्वसम्भवात्, तच्च दूषितम्। नापि कार्त्स्न्येन सम्बन्धो व्याप्तिः एकव्यक्तिके तदभावात् नानाव्यक्तिकेऽपि सकलधूमसम्बन्धस्य प्रत्येकवह्नावभावात्। अतएव न कार्त्स्न्येन साध्येन सम्बन्धो व्याप्तिः विषमव्याप्ते तदभावाच्च। न च यावत्साधनाश्रयाश्रितसाध्यसम्बन्धः, साधनाश्रयी

महानसादौ सकले प्रत्येकं वह्नेराश्रितत्वाभावात्। नापि साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यं, यावद्धर्मसामानाधिकरण्यं हि यावत्तद्धर्माधिकरणाधिकरणत्वं तच्चाप्रसिद्धं साधनसमानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः। नापि स्वाभाविकः सम्बन्धो व्याप्तिः, स्वभावजन्यत्वे तदाश्रितत्वादौ वा अव्याप्त्यतिव्याप्तेः। नाप्यविनाभावः, केवलान्वयिन्यभावात्। अथ सम्बन्धमात्रं व्याप्तिः व्यभिचारिसम्बन्धस्यापि केनचित् सह व्याप्तित्वात् धूमादिव्याप्तिस्तु विशिष्यैव निर्वक्तव्येति तन्न, लिङ्गपरामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे लक्षणाभिधानस्यार्थान्तरत्वात्। न च सम्बन्धमात्रं तथा, तद्बोधादनुमित्यनुत्पत्तेः।

दीधितिः।

यत्साध्यस्य दत्समानाधिकरणसाध्यस्य। 'तथाही'त्यादि, यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं यावत् साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकास् साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं यावत् यत्समानाधिकरणात्यन्ताभाव-

प्रतियोगितानवच्छेदकं तत्त्वमित्यर्थे तु नोक्तदोषइति ध्येयम् । प्रतियोगितयोश्चैकसम्बन्धावच्छिन्नत्वं वा वक्तव्यम् तेन प्रतियोगितावच्छेदकमात्रस्यैव यत्किञ्चित्सम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेऽपि एकसम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकस्य सम्बन्धान्तरावच्छिन्नसाधनसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि च न क्षतिः । व्यभिचारिणि तु यत्ताधिकरणे व्यभिचारो विशेषणताविशेषावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकं साध्यवत्त्वप्रकारकप्रमाविषयत्वत्वम् विशेषणताविशेषावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति नातिप्रसङ्गः। वस्तुतो हेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यावद्यद्धर्मावच्छिन्नसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यम् साध्यसमानाधिकरणान्योन्याभावप्रतियो-

। … २९ । यावत्स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदक' तत्त्वं वा व्याप्तिरिति ध्येयम् ।

[.] यावतां तेषामित्यर्थः । 'दूषितं' केवलान्व-

यिन्यव्याप्त्या, सा च यथोक्तलक्षणेऽपि गौरवं परमति-रिच्यत इति । कार्त्स्न्यं साधनस्य, साध्यस्य, साध्याश्रयस्य, साध्यसमानाधिकरणस्य, साधनाश्रयस्य, साधनसमाना-धिकरणस्य वा, आद्ये कृत्स्नसाधनसामानाधिकरण्यं साध्ये, कृत्स्नेषु साधनेषु साध्यसामानाधिकरण्यं वार्थः, प्रथमे 'एकेति, 'नानेति च, व्याप्तेश्चाहेतुवृत्तित्वम् पृथिवी पृथिवीत्वव्यापकजातेरित्यादावतिव्याप्तिश्च । अतएव ने-तरः । अर्थाभिधानपूर्व्वकं द्वितीयं निरस्यति, 'अतएवेति, 'अतएव' एकव्यक्तिसाध्यकाव्याप्तेरेव, विषमव्याप्ते सम-व्याप्तेऽपि च संख्यापरिमाणादावेकत्र साधने सकल-साध्यसम्बन्धस्याभावात् भावाच्च शब्दवान् द्रव्यत्वादि-त्यादौ । तृतीये च साध्याश्रययावद्वृत्तित्वं, चतुर्थे साध्य-समानाधिकरणयावत्सामानाधिकरण्यमर्थः, तत्र च यथासम्भवमेकमात्रवृत्तिसाध्यके वह्न्यादौ साध्ये धूमा-दावव्याप्तिरतिव्याप्तिश्च सत्त्वादौ । अर्थपरिष्कारपूर्व्वकं पञ्चमं निरस्यति, 'नचेति । एकमात्रवृत्तिसाधने चा-व्याप्तिश्च, तथैव षष्ठं निरस्यति, 'नापीति, तादृशानां सर्व्वेषां महानसत्वादीनां प्रत्येकनिरूपितान्यपि समाना-नाधिकरण्यानि न पुनरपि वह्नौ । इद दहर्कार्यच्छिन्न-

प्रतियोगितानवच्छेदकं तत्त्वमित्यर्थे तु नोक्तदोषइति ध्येयम् । प्रतियोगितयोश्चैकसम्बन्धावच्छिन्नत्वं वा वक्तव्यम् तेन प्रतियोगितावच्छेदकमात्रस्यैव यत्किञ्चित्सम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेऽपि एकसम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकस्य सम्बन्धान्तरावच्छिन्नसाधनसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि च न क्षतिः । व्यभिचारिणि तु यत्राधिकरणे व्यभिचारो विशेषणताविशेषावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकं साध्यवत्त्वप्रकारकप्रमाविषयत्वम् विशेषणताविशेषावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति नातिप्रसङ्गः । वस्तुतो हेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यावद्यद्धर्मावच्छिन्नसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यम् साध्यसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं यावत्साध्यसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं तत्त्वं वा व्याप्तिरिति ध्येयम् । 'कश्चिदपीति' यावतां तेषामित्यर्थः । 'दूषितं' कस्मात्

त्वनिश्चयदशायामेवाविरोधितया भ्रमत्वेनानिश्चीयमा-
नस्य विरोधित्वं वाच्यम् अव्यभिचारनिश्चयस्य च भ्रम-
त्वशङ्कायामप्यनुमित्यजनकतया भ्रमत्वेनागृह्यमाण-
स्यैव हेतुत्वमिति तवैव गौरवात् नानाविधव्यभिचार-
ज्ञानाभावानां नियतपूर्व्ववर्त्तित्वेन क्लृप्तानामपि हेतु-
त्वमपेक्ष्य वक्ष्यमाणैकविधाव्यभिचारज्ञानस्यैव हेतुत्वं
युक्तमित्यप्याहुः ।

गादाधरी विवृतिः ।

'यत्साध्यस्येत्यत्र कर्म्मधारयसमासे व्याप्तेर्नुनिरूपणानुपपत्तिः' इति प्रतीतत्पुरुषसमवलम्ब्य व्याचष्टे, 'यत्समानाधिकरणेति' 'तद-हीत्यादिना दर्शितमुभयविधानौपाधिकत्वस्य सोपानो [illegible] मुद्धरति, 'यत्समानाधिकरणात्यन्ताभावेत्यादिना [illegible] तत्पदमस्तीत्युपात्तानि न तु विवक्षितार्थकानि [illegible] च्छिन्नत्वेन प्रतियोगिताया अपि [illegible] । 'नोक्तदोष इति, आर्द्रेन्धनाद्योगोलकान्तर्भावेन [illegible] [illegible] साध्यवद्भिन्नाभावप्रतियोगितावच्छेदकत्वात् [illegible] [illegible] [illegible] [illegible] भाव । '[illegible]

नसमानाधिकरणाभावीययद्यत्सम्बन्धावच्छिन्नप्रतियोगितावच्छे-
दकत्वं यस्य तस्य साध्यवन्निष्ठाभावीयतत्तत्सम्बन्धावच्छिन्नप्रतियोगि-
तावच्छेदकत्वं साध्यवन्निष्ठाभावीययद्यत्सम्बन्धावच्छिन्नप्रतियोगि-
तानवच्छेदकत्वं यस्य तस्य साधनवन्निष्ठाभावीयतत्तत्सम्बन्धावच्छिन्न-
प्रतियोगितानवच्छेदकत्वमित्येवं विवक्षणीयमित्यर्थः। विशेषणता-
विशेषसम्बन्धमात्रनिवेशेनैव सामञ्जस्ये सम्बन्धान्तरनिवेशनमफल-
मित्याशयेनाह, 'विशेषणतेति। प्रथमलक्षणे सम्बन्धविवक्षाया
फलमाह, 'प्रतियोगितावच्छेदकमात्रस्यैवेति, मात्रपदं कार्त्स्न्यार्थकं,
तथाच सुतरां साधनसमानाधिकरणाभावप्रतियोगितावच्छेद-
कसामान्यस्य साध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्व-
मिति सम्बन्धाविवक्षणे अतिव्याप्तिः स्यादिति भावः। लघुधर्म-
समनियतगुरुधर्मस्य साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वा-
सम्भवात् धर्ममात्रमुपेक्ष्य प्रतियोगितावच्छेदकधर्मानुधावनम्।
यद्यपि कम्बुग्रीवादिमत्त्वादेरपि विषयितासम्बन्धावच्छिन्नतद्वि-
शिष्टाभावप्रतियोगितावच्छेदकत्वं सम्भवति घटत्वादिविशिष्ट-
विषयकेऽपि कम्बुग्रीवादिमत्त्वाद्यप्रकारकज्ञानादौ तद्विशिष्ट-
विषयितासम्बन्धावच्छिन्नाभावसत्त्वेन लघुघटत्वादेस्तत्प्रतियोगि-
तावच्छेदकत्वसम्भवात् तथापि विषयिताया वृत्त्यनियामकत्वेना-
भावप्रतियोगितावच्छेदकसम्बन्धत्वं नास्तीत्यभिप्रायेणेदम्। द्वितीय-
लक्षणे सम्बन्धविवक्षाफलं दर्शयति, 'एकसम्बन्धेति, तथाच यदि
यत्किञ्चित्सम्बन्धावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितान-
वच्छेदकं यत् तत्र साधनसमानाधिकरणाभावप्रतियोगिता-

सामान्यावच्छेदकत्वाभावो विवक्ष्यते तदा असम्भवः स्यादिति भावः । यदि साधनसमानाधिकरणाभावीययत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वाभावो निवेश्यते तत्र उभयदल एव प्रतियोगितासामान्य वा तदा पुनरतिव्याप्तिरेवेति हृदयम् । उभयलक्षण एव सम्बन्धविवक्षणे व्यभिचारिण्यतिव्याप्तिवारणप्रकारं दर्शयति, 'व्यभिचारिणि त्विति,' तन्निष्ठाभावप्रतियोगितावच्छेदकमिति, तथाच साधनवन्निष्ठाभावप्रतियोगितावच्छेदकेषु साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकेषु यावत्सु साध्यवत्त्वप्रकारकप्रमाविषयत्वत्वान्तर्भावात् तत्र साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्व-साधनवन्निष्ठाभाप्रतियोगितानवच्छेदकत्वयोरभावाल्लक्षणे नातिव्याप्तिरिति भावः । अत्यन्ताभावघटितयावत्साधनाव्यापकाव्यापकसाध्यसमानाधिकरण्य-यावत्साध्यव्यापकव्यापकत्वयोरभावप्रतियोगितावच्छेदसम्बन्धविशेषघटितत्वेन गुरुतया तदघटितमन्योन्याभावगर्भलक्षणद्वयमाह, 'वस्तुत इति, यद्यप्यन्योन्यभावगर्भलक्षणेऽपि प्रतियोगितावच्छेदकयोरेकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा निवेशनमावश्यकमन्यथा अयोगोलोकान्यत्वादेरपि धूमायात्मकसाध्यवन्निष्ठस्य विषयितादिसम्बन्धेन स्वावच्छिन्नभेदस्य प्रतियोगितावच्छेदकतया अतिप्रसङ्गात् अत्यन्ताभावघटितलक्षणे च तादृशसम्बन्धेन चायोगोलकभेदत्वावच्छिन्नज्ञानादेर्योऽत्यन्ताभावस्तत्प्रतियोगितावच्छेदकतामादायातिप्रसङ्गो न सम्भवति विशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताकस्य तादृशाभावस्य प्रतियोगितायां स्वरू-

भेदत्वादेरवच्छेदकत्वमसम्भवेन गुरोरयोगोलकभेदत्वादेरव[illegible]
त्वादिति तत्र प्रतियोगितावच्छेदकतावच्छेदकसम्बन्ध[illegible]
नास्ति तथाचान्योन्याभावगर्भव्याप्तौ लाघवानवकाशः तत्र
गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमते अत्यन्ताभावगर्भलक्षणे
प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धनिवेशनमावश्यकम् एवं
भेदत्वादेर्विषयितासम्बन्धेन प्रतियोगितावच्छेदकत्वे प्रयोगा[illegible]
भेदत्वादेः प्रतियोगितावच्छेदकत्वनिर्व्वाहः विशेषणता[illegible]
विशिष्टानुयोगिकाभावानभ्युपगमादिति तादृशधर्मस्य साध्य
पकतावच्छेदकत्वनिर्व्वाहाद्द्वितीये अत्यन्ताभावघटितलक्षणे तत्
[illegible] सर्व्वथैवेत्यभिप्रायेणेदम्। 'तस्मात्[illegible]
[illegible] पाठ इत्यपि वदन्ति। 'याव[illegible]

[illegible]

अतो न्यूनताभङ्गाय स्वमतौ दूषयितुं तावदन्तर्भाव्य वितर्कयति, 'कार्त्स्न्यमित्यादिना,'साधनसमानाधिकरणस्य वा', विवक्षितमिति शेषः। सकलधूमसम्बन्धस्य प्रत्येकं वह्नावभावात् इत्यभिधानेन साध्यानुयोगिककृत्स्नसाधनसम्बन्धस्य व्याप्तितापक्षस्य दूषणे मूलस्य तात्पर्य्यं प्रतीयते तथाच कृत्स्नसाधनानुयोगिकसाध्यसम्बन्धस्यादूषणेन न्यूनतां परिहर्त्तुं तत्पक्षं दूषयिष्यन् साधनस्य कार्त्स्न्यमन्तर्भाव्य वितर्कयति, 'आद्य इति, प्रथमपक्षे मूलोक्तदूषणद्वयं सङ्गमय्याधिकदूषणद्वयमाह, 'व्याप्तेश्चेति, 'पृथिवीति, पृथिवीवृत्तिघटत्व-पटत्वादिसकलधर्म्माधिकरणाप्रसिद्धा सकलतत्सामानाधिकरण्याप्रसिद्धिरतः पृथिवीवृत्तित्वमुपेक्ष्य तत्र व्यापकतानुधावनं, पृथिवीत्वव्यापकत्वं पृथिवीनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वस्वहत्तिसाधारणमिति तेन रूपेण हेतुत्वे अवृत्तेरपि सकलसाधनान्तर्गततया तदधिकरणाप्रसिद्धा नातिव्याप्तिप्रसक्तिरतो जातिपदं समवेतार्थकं, 'अतएव' एकव्यक्तिसाधनाव्याप्तिसहितदर्शितातिव्याप्तेरेव, 'इतरः' कृत्स्नः साधने साध्यसम्बन्धो व्याप्तिरितिपक्षः। 'द्वितीयं' साध्ये कार्त्स्न्यविशेषणपक्षं, 'एकव्यक्तिके तदभावादित्यत्र एकव्यक्तिपदं तादृशसाधनपरं, तस्य साधने कार्त्स्न्यविशेषणपक्षदूषणपरत्वात्। तथाचातएवेत्यस्य तादृशदूषणपरत्वासम्भवात् एकव्यक्तिसाध्यकाव्याप्तिपरतया व्याचष्टे, 'अतएवेति. न्यूनताभङ्गाय पूरयति. 'समव्याप्तेऽपि चेति, 'संख्यापरिमाणादौ' संख्यादिसाध्यकपरिमाणादौ,'शब्दवानिति, रूपादेः साध्यत्वे सकलतदधिकरणाप्रसिद्धा नातिव्याप्तिरतः शब्दसाध्यकानुसरणं, तत्र गगन-

स्यैव सकलगन्धाधिकरणत्वात्। तृतीय-चतुर्थयोरव्यभिचारप्रवेशे दूषणमाह, 'तृतीये चेत्यादिना, एकमात्रवृत्तिसाधने यावत्साध्या-न्वयाप्रसिद्धा दोषस्तृतीय एव न चतुर्थे वह्निमान् सत्त्वादित्यादौ अतिव्याप्तिरपि तत्रैव, चतुर्थे यावत्साध्यसमानाधिकरणपर्व्वततत्-सद्दानसत्त्वाद्यधिकरणाप्रसिद्धा तदनवकाशात् अतः 'यथा-सम्भवमिति, 'धूमादावव्याप्तिरिति, सकलवह्निमति प्रत्येकधूमस्या-वृत्तेः वह्निसमानाधिकरणयावद्धर्म्माधिकरणाप्रसिद्धेश्चेति भावः। 'सत्त्वादावित्यत्र वह्न्यादिसाध्य इत्यनुषज्यते। पञ्चमे यथाश्रुते यावत्साधनान्वयसम्बन्धः साध्ये लभ्यते तावता व्याप्तेः साधननिष्ठ-त्वानिर्व्वाह इति तन्निर्व्वाहाय तादृशसाध्यसामानाधिकरण्यस्या-धिकस्य निवेशनमेव 'अर्थपरिस्कारः', स्वयमधिकदूषणमाह, 'एक-मात्रवृत्तिसाधन इति, यावत्साधनान्वयाप्रसिद्धेरिति भावः। 'तथैव' अर्थपरिष्कारपूर्व्वकमेव, अत्रापि यथाश्रुते कृत्स्नसाधन-सामानाधिकरण्यं साध्ये लभ्यते व्याप्तेर्हेतुनिष्ठतासम्पादनाय तत्-सामानाधिकरण्यस्याधिकस्य निवेशेनैव परिष्कार इति बोध्यम्। ननु साधनसमानाधिकरणानां मिथो विरुद्धानां एकाधिकरणा-प्रसिद्धावपि तेषां प्रत्येकसामानाधिकरण्येनैव साध्ये निवेश्यमिति न मूलोक्तदोषावसर इत्यत आह, 'तादृशानामिति साधनसमाना-धिकरणानामित्यर्थः, 'न कुत्रापि वह्नाविति, साध्यतावच्छेदके तद्धर्म्मसमानाधिकरणवृत्तित्वं निवेश्य तद्दोषोद्धारेऽपि नानाधर्म्माव-च्छिन्नसाध्यके दण्डिमान् दण्डिसंयोगादित्यादौ कुत्रापि दण्डा-दिव्यक्तौ साध्यसमानाधिकरणानां सर्व्वेषां प्रत्येकसमानाधिक-

रवृत्तित्वासम्भवेनैवाव्याप्तिर्बोध्या । साधनसमानाधिकरणाः सर्वे यादृशसाध्यसमानाधिकरणास्तादृशसाध्यसमानाधिकरणमित्यर्थे न कोऽपि दोषः इत्याशङ्कते, 'अथेति, तत्तद्व्यक्तित्वादिना साध्यं चेद् व्यापकतावच्छेदककोटौ निवेश्यते तदा नानाव्यक्तिसाध्यकेऽव्याप्तिरतो यदवच्छिन्नपदं प्रकृतसाध्यतावच्छेदकपरं, विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिवारणाय विशिष्टाधिकरणतागर्भसामानाधिकरण्यं प्रवेश्यमित्येतल्लाभाय आश्रयपदमुपेक्ष्य अवच्छिन्नपदं, धूमादिसामानाधिकरण्यस्यापि प्रमेयत्वादिना वह्न्यादिसामानाधिकरण्यव्यापकतया अतिप्रसङ्ग इति तादृशसामानाधिकरण्यत्वे व्यापकतावच्छेदकत्वपर्यन्तानुसरणं, साधनसामानाधिकरण्यव्यापकत्वं साधनतावच्छेदकविशिष्टसामानाधिकरण्यत्वावच्छिन्नं प्रति व्यापकत्वं, तेन धूमादिसामानाधिकरण्यत्वेन तद्वह्न्यादिसामानाधिकरण्यत्वावच्छिन्नं प्रति व्यापकत्वेऽपि गुरुत्वादिसाधारणं विशिष्टसत्तात्वाश्रयसमानाधिकरण्यत्वावच्छिन्नं प्रति द्रव्यत्वादिसामानाधिकरण्यत्वेनाव्यापकत्वेऽपि न क्षतिः । परिष्कारस्यावश्यापेक्षणीयत्वे एतदपेक्षया लघौ. हेतुसाधना-न्वयान्वितसाध्यसम्बन्धस्य व्यापकत्वरूपहेतुपदार्थकन्तर्भाव्य परिष्कार एवोचितः, स च सिद्धान्तग्रन्थ एव करिष्यते इत्याह, 'इतोऽपीति', तथाच इदानीं यथाश्रुतार्थकूपस्य एव मूलग्रन्थ इति नास्त्यतिरिति भावः । मूलेऽत्र सिद्धान्तलक्षणलक्ष्येष्वात्माद्यस्याप्यवृत्तितामते द्रव्यत्वादिसंयोगाभावेऽपि प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तिरिति संयोगिद्रव्यत्वादित्यादावव्याप्ति

दूषयित्वा साधनसमानाधिकरणधर्म्मे कार्त्स्न्यविशेषणपक्ष एव दीधितिकारेणाग्रे अवलम्बनीयः अभाववदर्थकं विनापदमत्र सम्भन्तमित्याशयेन व्याचष्टे, 'साध्याभाववतीति, साध्याभाववदवृत्तित्वमिति प्रथमलक्षणे साध्याभाववद्वृत्तिभेदो विवक्षितः अत्र तत्त्वात्यन्ताभाव इति भेद इति भावः। सत्तावान् जातिरित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या अव्याप्तिरित्यतोऽविनाभावमन्यथा व्याचष्टे, 'साध्यं विना अभाव इति, तथाच नञः व्यत्यासः कार्य्य इति भावः। विनाशब्दार्थोऽभाव एव न तु तद्वान् तस्य च निपातार्थतया प्रयुक्तत्वसम्बन्धेनाभावे साक्षादेवान्वयः, प्रयुक्तत्वञ्च व्यापकत्वमित्याशयेनाह, 'साध्याभावव्यापकेति, मानस्य संयोगादिसम्बन्धो न तदीयव्याप्तिरतो व्याचष्टे, 'सामानाधिकरण्यमिति, मूले 'व्यभिचारिसम्बन्धस्येति तद्व्यभिचारिनिष्ठतदीयसम्बन्धस्येत्यर्थः, 'केनचित् सहव्याप्तित्वादित्यत्र न्तदीयव्याप्तित्वं प्रतीयते तच्च न सम्भवतीति व्याचष्टे, 'कञ्चिद्रूपेति, तथाच रूपान्तरावच्छिन्नतद्व्याप्तित्वादित्यर्थः, तदेव दर्शयति, 'धूमादेरपीति, 'व्यापकत्वात्' व्याप्तिनिरूपकत्वात्, तथाच वह्न्यादौ धूमादिव्याप्तिरिष्टैवेति भावः। मूले 'तद्बोधादिति [illegible]सामानाधिकरण्यप्रकारकहेतुमत्ताज्ञानादित्यर्थः, 'अनुमित्यनुदयादिति अनुमित्युदयोपगमासम्भवात्, तथा सति दण्डादिहेतुना [illegible] वह्न्याद्यनुमानोपगमे [illegible] [illegible]पदप्रयोगापत्तेः व्यभिचारस्य [illegible] [illegible] [illegible] [illegible]धूमादिना [illegible]

भावः। ननु व्यभिचारज्ञानाभावः साक्षादेवानुमितिहेतुर्व्वाच्यः तथाच साध्याभावव्यभिचारिमेयत्वादेर्न सत्प्रतिपक्षोन्नायकत्वप्रसङ्गः (१) न व्यभिचारस्य हेत्वाभासतानुपपत्तिः व्यभिचारशङ्कानिवर्त्तनेनैव उदाहरणे वीप्सापदप्रयोग इत्याशङ्कते, 'न चेति, 'तद्बोधः' साध्यसामानाधिकरण्यप्रकारकहेतुमत्तावोधः, 'सर्व्वानुभवसिद्धत्वादिति, तथाच तत्रानुमित्यापत्तिरिति भावः। एवञ्चैतन्मते कोटिद्वयसहचरितधर्म्मद्वयदर्शनात् उभयत्र व्यभिचाराग्रहे संशयानुमितिप्रसङ्गोऽपि दुर्व्वारः विपरीतकोटिसमानाधिकरणधर्म्मवत्ताज्ञानस्य विशिष्टबुद्धविरोधित्वात् अन्यथा साधारणधर्म्मदर्शनाधीनप्रत्यक्षसंशयस्याप्युच्छेदप्रसङ्गात्। व्यभिचारज्ञानाभावहेतुत्वं सम्भवदुक्तिकमपि नेत्याह, 'हेत्वन्तर इति द्रव्यत्वादौ वह्न्यादिव्यभिरग्रहदशायां धूमादिलिङ्गकवह्न्याद्यनुमितेरुत्पादादित्यर्थः, तथाच तत्साध्यकानुमितेस्तत्साध्यनिरूपितव्यभिचाराग्रहव्यभिचारित्वान्न तत्र हेतुतासम्भव इति भावः। ननु तल्लिङ्गक-तत्साध्यकानुमितित्वस्य तल्लिङ्गधर्म्मिकव्यभिचारज्ञानाभावजन्यतावच्छेदकत्वोपगमे नायं व्यभिचार इत्यत आह, 'तत्रैवेति, हेताविति शेषः, 'रूपान्तरेणेति द्रव्यत्वादिप्रकारेण व्यभिचारग्रहे धूमत्वाद्यवच्छिन्नतल्लिङ्गकानुमित्युत्पत्तेरित्यर्थः। ननु तद्धर्म्मावच्छिन्नलिङ्गकाऽनुमितित्वमेव तद्धर्म्मावच्छिन्नधर्म्मिकव्यभिचारज्ञानप्रतिबध्यतावच्छेदकं वाच्यं तथा सति नोक्तदोषावसर इत्यत आह, 'हेतुतावच्छेदकाग्रह इति धूमत्वादिप्रकारेण पक्षधर्म्म-

(१) सत्प्रतिपक्षोपधायकत्वप्रसङ्ग इति पा०।

त्ताज्ञानं विनापि अयमालोको धूमो वा इत्यादिसन्देहदशायां वह्नि-व्याप्यवान् अयमिति व्याप्तिप्रकारेण पक्षधर्म्मताज्ञानादनुमित्युत्-पत्तेरित्यर्थः, तथाच तादृशानुमितौ व्यभिचारग्रहप्रतिबध्यता-वच्छेदकनिरुक्तधर्म्मानाक्रान्तायाम् अव्यभिचारग्रहस्य हेतुताया-श्चावश्यकत्वेन व्यभिचाराग्रहहेतुत्वं न कुत्रापि कल्पयितुमुचितम्। न चाव्यभिचारस्य केवलान्वयिस्थलेऽप्रसिद्धा व्यतिरेकिस्थले-ऽपि केवलान्वयित्वभ्रमदशायां दुर्ग्रहतया तत्र व्यभिचारग्र-हाभावसहकृतसामानाधिकरण्यज्ञानादेवानुमितिरुपगन्तव्या इति वाच्यम्। स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतारूपस्य सिद्धान्तग्रन्थनिर्व्वाच्यस्याव्यभिचारस्य सर्व्वत्रैव सुग्रहत्वात्। साध्यस्य केवलान्वयित्वग्रहदशायाम् अनुमितिमनङ्गीकुर्व्वाणैः साध्याभाव-वदवृत्तित्वरूपाव्यभिचारज्ञानस्यानुमितिसामान्यहेतुतास्वीकारेऽपि बाधकाभावादिति भावः। ननु हेतुतावच्छेदकाग्रहस्थले साध्य-सामानाधिकरण्यप्रकारकव्यभिचारग्रहाभावसहकृतसाध्यसामाना-धिकरण्यप्रकारकपक्षधर्म्मताज्ञानादेवानुमितिः सम्भवति इति तत्राप्यव्यभिचारज्ञानहेतुत्वम् असिद्धम् एवं 'स्वसमानाधिकरणे-त्यादिसिद्धान्तग्रन्थनिर्व्वाच्यव्याप्तिज्ञानस्य हेतुतायां रासभादि-व्यावर्त्तकतत्तद्धेतुतावच्छेदकस्य साध्यसामानाधिकरण्यधर्म्मिता-वच्छेदकविधया विषयितायाः अवश्यं निवेशनीयतया हेतु-तावच्छेदकधर्म्मप्रकारकज्ञानं विना अनुमितिर्न भवत्येवेत्यत आह, 'विवदन्ते चेति, केवलान्वय्यनुमानानभ्युपगन्तारोनव्या-

ऽ ग्रेपः, तथाच सामानाधिकरण्यज्ञानस्यापि हेतुता नाव्य-

भिचारज्ञानहेतुतावादिभिरुपगम्यते तन्मतापेक्षया अव्यभिचार-ज्ञानस्थाने व्यभिचाराग्रहहेतुत्वं कल्पयतः सामानाधिकरण्य-मात्रस्य व्याप्तित्वं मन्यमानस्य मते गौरवाभावेऽपि साध्याभा-ववदवृत्तित्वरूपाव्यभिचारज्ञानहेतुतावादिनवीनमतापेक्षया कार-णताद्वयकल्पनेन गौरवं दुर्व्वारमेवेति भावः। हेतुव्यापकसाध्यसा-मानाधिकरण्यरूपव्याप्तिज्ञानहेतुतावादिनां सिद्धान्तिनां मतेऽपि-तन्मतापेक्षया लाघवमाह, 'व्यभिचारज्ञानेति, सिद्धान्तिमतेऽप्य-व्यभिचारसामानाधिकरण्यज्ञानयोर्न कारणताद्वयम् अपि तु स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपाव्यभिचारवि-षयतानिरूपितत्वं साध्यसामानाधिकरण्यज्ञानहेतुतावच्छेदक-कोटिप्रविष्टसाध्यतावच्छेदकविषयितायां निवेश्यते तथाच कारण-ताया ऐक्याल्लाघवमक्षुण्णमेवेति भावः। इदन्त्ववधेयं पक्षभेदेन साध्यसमानाधिकरणहेतुमत्ताज्ञानहेतुतानामानन्त्यात्तत्राव्यभिचार-विषयतानिवेशेऽनन्तस्थलेऽवच्छेदकगौरवं निरुक्तसाध्यतावच्छेदक-विषयतायां निरुक्ताव्यभिचारविषयतानिरूपितत्वं निरुक्ताव्यभि-चारविषयतायां वा साध्यतावच्छेदकविषयतानिरूपितत्वं निवे-श्यते इत्यत्र विनिगमनाविरहेणानन्तपक्षभेदेनानन्तकारणताधिक्य-ञ्चेति पक्षविशेषमनन्तर्भाव्य सामान्यतस्तल्लिङ्गक तत्साध्यकानुमितौ तल्लिङ्गधर्म्मिकतत्साध्यव्यभिचारज्ञानाभावत्वेन एकैककारणताक-ल्पनमेव सम्यक्।

अत्र केचित् व्यभिचारग्रहस्य शरीरनिष्ठप्रत्यासत्त्या आत्मनिष्ठ-प्रत्यासत्त्या वा प्रतिबन्धकत्वं न सम्भवति परपुरप्रवेशस्थले तच्छ-

रीरे अभिभाव्यव्यभिचारज्ञानसत्त्वेऽप्यभिभावकभूतादेरप्यनुमित्युद-यात् कायव्यूहस्थले एकशरीरे आत्मनि व्यभिचारज्ञानसत्त्वेऽपि शरीरान्तरावच्छिन्ने तत्रानुमित्युदयादिति शरीरविशेषावच्छिन्नत्वं निवेश्यात्मनिष्ठप्रत्यासत्त्या व्यभिचारग्रहस्य प्रतिबन्धकता वाच्या तथाच चैत्र-मैत्रादिशरीरभेदेन तदभावस्यानन्तहेतुतापेक्षया सामानाधिकरण्य-समानावच्छेदकत्वोभयप्रत्यासत्त्या अवश्यकल्प-सामानाधिकरण्यज्ञानहेतुतायामव्यभिचारविषयकत्वनिवेश एव लघीयान्। न च समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्य व्यभिचारग्रहविरहस्य सामानाधिकरण्य-समानावच्छेदकत्वप्रत्या-सत्तिभ्यां कारणताकल्पनेनैव सामञ्जस्यात् तद्धेतुतामतेऽपि शरीर-भेदनिवेशनं नास्तीति वाच्यम्। तथा सति तच्छरीरावच्छेदेन तदात्मनि व्यभिचारधीसत्त्वेऽपि तदात्मनि तदभावस्यान्यावच्छे-देनान्यात्मनि तदभावस्य च तच्छरीरावच्छेदेन वृत्तेः तदात्मनि अनुमित्यापत्तेर्दुर्व्वारत्वात् उभयप्रत्यासत्त्यवच्छिन्नैकहेतुतास्थले एककारणप्रत्यासत्तेः उभयाधिकरणप्रत्यासन्नकार्य्योत्पत्तिप्रयोजक-तया अव्यभिचारविषयकसामानाधिकरण्यज्ञानं यत्र कायव्यूह-वत्येव तदात्मनि शरीरान्तरावच्छेदेन एतच्छरीरावच्छेदेन परपुरप्रवेशकर्त्तर्य्यात्मान्तरे तत्रैतच्छरीरावच्छेदेन एतदात्मन्य-नुमित्यापत्त्यनवकाशः आत्मभेदेन ज्ञानव्यक्तिभेदादिति ज्ञान-हेतुताया शरीरभेदनिवेशमन्तरेणैवोपपत्तेः अधिकरणभेदेऽप्यभाव-व्यक्तिभेदाभावेन व्यभिचारज्ञानाभावहेतुतामते शरीरभेदनिवेशनं विना अतिप्रसङ्गवारणोपपत्तेरयोगात्। न च यद्देशावच्छेदेन यदा

[illegible] ।
तद्विशिष्टे [illegible] तदवच्छेदेन [illegible]
[illegible]
व्यभिचारांशे [illegible]
तद्विशिष्टस्य [illegible]
विति तच्छरीरावच्छेदेन [illegible] तद-
वच्छेदेन तदात्मनि तदात्मनि व्यभिचारग्रहणाभावा-
त्वात् । एवमपि एक शरीरनाशे तद्ग्रहस्य दुर्बलतया नोत्पत्तिप्रसङ्ग इति
दशायां व्यभिचारग्रहस्यैव शरीरान्तरोत्पाद-
[illegible]व्यापकं व्यभिचारग्रहप्रतिबन्धकाभावनियतत्वे तदव-
च्छेदस्य व्यभिचारग्रहप्रतिबन्धकाभावेन दुर्वारत्वात्
[illegible] तदवच्छेदेन तदग्रहस्यात्मनि सत्त्वात् । व्यभिचारग्रहानन्त-
व्यभिचारग्रह एव न सम्भवति शरीरप्रकारकत्वविरहादिति
[illegible], शरीरावयवसाधारणपृष्ठावयवसाधारणेव ज्ञानजननोपयिक-
तया शरीरासत्त्वेऽपि तदवयवावच्छेदेनैव तज्ज्ञानोत्पत्तेः सम्भवात्
इत्याहुः ।

व्यभिचाराग्रहस्यानुमितिहेतुतामते अनुमितिसामग्र्या अधिक-
[illegible]रणताघटिततया भिन्नविषयकप्रत्यक्षादौ तत्प्रतिबन्धकताया
[illegible]रवमित्यन्ये । अव्यभिचारग्रहहेतुतामते तत्र संसर्गान्यत्वप्रवे-
[illegible]युक्तगौरवमाशङ्क्य, 'अव्यभिचारनिश्चयत्वेनेति व्यभिचारा-
[illegible]रकाव्यभिचारप्रकारकज्ञानत्वेनेत्यर्थः, 'गौरवमिति, व्यभि-
[illegible]ग्रहहेतुतामते व्यभिचारसंशयस्यापि प्रतिबन्धकत्वेन सत्ता-
[illegible]यभिचारग्रहत्वावच्छिन्नाभावस्यैव हेतुतया व्यभिचारग्रहे

विधव्यभिचारग्रहदशायामेवानुमित्यनुत्पादस्यानुभविकतया सर्व्व-
विधव्यभिचारज्ञानस्यैव पृथक् पृथक् प्रतिबन्धकताया आवश्यक-
त्वादिति भावः। 'नियतपूर्व्ववर्त्तित्वेन क्लृप्तानामपीति, अव्यभि-
चारज्ञानहेतुतामतेऽपि तद्धेतुभूतयावद्व्यभिचारज्ञानाभावानाम-
नुमितौ नियतपूर्व्ववर्त्तित्वादिति भावः। एतेन बहुष्वनन्यथा-
सिद्धिकल्पनमपेक्ष्य एकधर्म्मावच्छिन्ने नियतपूर्व्ववर्त्तितासहिततत्क-
ल्पने लाघवमिति ध्वनितम्।'वक्ष्यमाणैकविधेति केवलान्वयिखण्ड-
नावसरे साध्याभाववदवृत्तित्वरूपलघुशरीराव्यभिचारेत्यर्थः, तादृ-
शाव्यभिचारज्ञानस्यापि सर्व्वविधव्यभिचारग्रहप्रतिबध्यतया तद्धे-
तयैव सकलव्यभिचारज्ञानदशायामनुमितिवारणसम्भवात् अव्यभि
चारान्तरापेक्षया तच्छरीरलाघवस्यैव विनिगमकतया विनिगम-
नाविरहेण नानाविधाव्यभिचारधियामेव कारणत्वमित्यस्यापि
वक्तुमशक्यत्वादिति भावः। 'आहुरित्यस्वरसोद्भावनं, तद्बीजन्तु
असमानप्रकारतया व्यभिचारान्तरग्रहस्य साक्षादुक्ताव्यभिचार-
ग्रहाविरोधितया व्यभिचारान्तरधीदशायां उक्ताव्यभिचारज्ञानसत्त्वे
अनुमितिस्वीकारे गुरुशरीरव्यभिचारान्तरग्रहस्यानुमितिविरोधि-
तया तावत्तेवोपेक्षितत्वात्, अस्माकमपि लघुशरीरसाध्याभाववद-
वृत्तित्वरूपव्यभिचारग्रहाभाव एव हेतुरिति वक्तुं शक्यतया उक्त-
लाघवानवकाशः व्यभिचारान्तरग्रहदशायाम् उक्ताव्यभिचारग्रह-
सत्त्वेऽनुमित्यनुत्पादोऽनुभवसिद्ध इति चेत्तर्हि अव्यभिचारग्रहासत्त्वे
तदनुत्पादोऽनुभवसिद्ध इत्युक्तास्मदीययुक्तिरेव जागर्त्ति किमि-
त्यावर्त्तते।

तत्त्वचिन्तामणिः ।

नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदं, सम्बन्धज्ञानेऽपि व्याप्तिपदाप्रयोगात् । केवलान्वयिनि केवलान्वयिधर्मसम्बन्धो व्यतिरेकिणि साध्यवदन्यावृत्तित्वं व्याप्तिः एतयोरनुमितिविशेषजनकत्वम् अनुमितिमात्रे पक्षधर्मतैव प्रयोजिका । न चातिप्रसङ्गः, विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्वनियमादिति केचित्, तदपि न, साध्यवदन्यावृत्तित्वस्य धूमेऽभावात् वह्निमत्पर्वतान्यस्मिन् धूमसत्त्वात् । न च सकलसाध्यवदन्यावृत्तित्वं, वह्निमतां प्रत्येकं तथात्वात् सर्वत्र लघुनि साध्यत्व-साधनत्व-तद्भिन्नत्वानां व्याप्तिनिरूपकत्वेनाभिधेयः, साध्यत्वं हि न सिद्धिकर्मत्वं, सिषाधयिषाविषयत्वं वा, महानसीयवह्नौ तदभावात् । न च सामान्यतो ज्ञातविषयोऽस्त्येव पक्षे कथमन्यथा दूषणानामावकता साध्यतेति वाच्यं, स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना व्याघातप्रवेशादिति ।

श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

पूर्वपक्षः सम्पूर्णः ।

तत्त्वचिन्तामणि-दीधितिः ।

सामानाधिकरण्यविशिष्टपक्षधर्म्मत्वं तु पक्षे साध्यग्रहं विना दुर्ग्रहमिति केवलान्वयित्वस्याग्रहे सामानाधिकरण्यमात्रग्रहादनुमित्यनुत्पत्तेस्तद्ग्रहोऽपि वाच्यः तच्च वृत्तिमदत्यन्ताभावाप्रतियोगित्वादिकमन्योन्याभावप्रतियोगितानवच्छेदकत्वं वा तथाच सर्व्वसाधारण्याय लाघवात्साधनवतस्तद्वृत्तित्वस्य वा वृत्तेरन्योन्याभावस्य वा विशेषणत्वमुचितमिति सिद्धान्तरहस्यं, शेषं केवलान्वयिखण्डने वक्ष्यामः ।

इति श्रीमन्महामहोपाध्याय-रघुनाथशिरोमणि-भट्टाचार्य्यविरचितायां तत्त्वचिन्तामणिदीधितौ पूर्व्वपक्षदीधितिः सम्पूर्णा ।

गादाधरी विवृतिः ।

ननु केवलसामानाधिकरण्यस्य व्याप्तित्वे द्रव्यत्वादिना ह्रदादौ वह्न्याद्यनुमानापत्तिरेव बाधिका तद्वारणाय वरं साध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानस्यैवानुमितिहेतुत्वमुपेयतां किमव्यभिचारज्ञानहेतुतया ह्रदादौ वह्निशून्ये वह्निसामानाधिकरण्यविशिष्टवैशिष्ट्यासत्त्वात् व्यभिचारिणोऽपि साध्यसामानाधिकरण्यविशिष्टस्य साध्यवत्येव सत्त्वात् पक्षे विशिष्टवैशिष्ट्यग्रहे सति व्यभि

चारग्रहेऽप्यनुमितिरिष्टैव सामानाधिकरण्यविशिष्टवैशिष्ट्यस्याव्यभिचारविशिष्टवैशिष्ट्यतुल्यत्वात् इत्याशङ्कां परिहरति, 'सामानाधिकरण्यविशिष्टपक्षधर्म्मत्वन्त्विति पक्षे साध्यसामानाधिकरण्यविशिष्टवैशिष्ट्यन्त्वित्यर्थः, 'पक्षे साध्यग्रहं विना' साध्यनिश्चयं विना, 'दुर्ग्रह' दुर्निश्चय, पक्षे साध्यसन्देहदशायां साध्यसामानाधिकरण्यविशिष्टस्यापि सन्देह औत्सर्गिकः स साध्यनिश्चयेनैव व्यावर्त्तकधर्म्मदर्शनविधया व्यावर्त्तनीय इति भावः। तथा चान्योन्याश्रयात् तत्सामानाधिकरण्यविशिष्टवैशिष्ट्यनिश्चयस्य हेतुता न सम्भवतीत्याशयः। अथ पर्व्वते वह्निसन्देहदशाया निश्चितसाध्यकमहानसादिवृत्तितया अगृह्यमाणायां पर्व्वतीयधूमव्यक्तौ वह्निसामानाधिकरण्यसन्देह औत्सर्गिक इति न तत्सामानाधिकरण्योपलक्षितधूमवत्तानिश्चयोऽपि सुघट इति कथमव्यभिचरितसामानाधिकरण्यप्रकारकज्ञानहेतुतापक्ष एव प्रतीकार इति चेत्, महानसीयधूमादौ प्रत्यक्षतो वह्निसामानाधिकरण्ये निश्चीयमाने लाघवज्ञानाधीनाद्धूमत्वावच्छेदेन वह्निजन्यत्वनिश्चयरूपविशेषदर्शनत. (१) तदवच्छेदेनैव तन्निर्णयात् धूमत्वदर्शनविषयपक्षीयधूमेऽपि साध्यसामानाधिकरण्यसंशयायोगात् धूमत्वव्यापकसाध्यसमानाधिकरणवृत्तित्वोपलक्षितव्याप्तित्वपक्षे तत्प्रकारकहेतुमत्त्वस्य पक्षे साध्यस्य सन्देहदशायामपि निश्चयस्य निष्प्रत्यूहतया अनुपपत्त्यनवकाशाच्च साध्यस्य केवलान्वयित्वस्थानकालीनायामनुमितौ केवलान्वयिसाध्यसामानाधिकरण्यज्ञानम् अनाहार्य्यञ्च

(१) वह्निसामानाधिकरण्यनिश्चयरूपविशेषदर्शनेन इति पा° ।

साध्यवदन्यावृत्तित्वज्ञानं हेतुरिति मते साध्यवद्व्यक्तिस्वेतराभिन्न-वृत्तौ नानाधिकरणकसाध्यके हेतावव्याप्तिर्मूलोक्ता साध्यवदन्यत्वस्य साध्यतावच्छेदकावच्छिन्नवद्भेदरूपत्वे तस्या अनवकाशात् स्वयं सिद्धान्तमतापेक्षया गौरवेण तन्निराकरोति, 'केवलान्वयित्वेति साध्य-इत्यादिः, 'अनुमित्यनुत्पत्तेरिति, साध्यसामानाधिकरण्यमात्रग्रहस्य व्यभिचारग्रहाविरोधित्वादिति भावः। 'तद्ग्रहोऽपि' साध्ये केवलान्व-यित्वग्रहोऽपि, हेतुर्वाच्यः। यद्यपि स्वमते अवृत्तिगगनादेः स्वाभावा-भावत्वविरहादत्यन्ताभावे वृत्तिमत्त्वमनिवेश्यैव तदभावसाधारण-केवलान्वयित्वं सुवचं तथापि साम्प्रदायिकानुमततद्घटितसामानाधि-करण्यशरीरे वृत्तौ साधनवन्मात्रस्य विशेषणत्वोपगमेनैव व्यापक-तापर्यवसानं भवति स्वमते च पुनरत्यन्ताभावांशे साधनवद्वृत्ति-त्वविशेषणप्रक्षेपेणैव इति साम्प्रदायिकानुमतमेव केवलान्वयित्वं दर्शयति, 'यद्वेति, 'वृत्तिमदत्यन्ताभावाप्रतियोगित्वादिकमिति आदिपदादनिरूढतादृशाभावप्रतियोगितानवच्छेदकत्वपरिग्रहः। अन्यान्याभावघटितव्यापकतापर्यवसानाय तद्घटितमपि केवला-न्वयित्वमाह, 'अन्योन्याभावेति, गगनादेरत्यन्ताभावप्रतियोगित्वात् [illegible] तदभावत्वस्वीकारेऽपि तदन्योन्याभावत्वमप्रामाणिकमिति [illegible] अतिप्रसक्ततया नोपात्तं, 'सर्वभाव' [illegible] [illegible] [illegible] [illegible],

तथाचोच्यते इत्यादिवक्ष्यमाणसिद्धान्त एव पर्य्यवसानं अन्यथा कार्य्य-कारणभावद्वयकल्पनागौरवप्रसङ्गात् इत्यर्थः । 'शेषमिति, साध्ये केवलान्वयित्वग्रहदशायां तस्य पक्षे अननुमितावपि न क्षतिः । तदानीं केवलान्वयित्वेन हेतुना साध्य-पक्षवृत्तित्वानुमित्यैव पक्षे साध्यवत्तानिश्चयकार्य्यसम्भवात् । तथाच साध्यवदन्यावृत्तित्वमे-वानुमित्यौपयिकं लघुशरीरत्वादित्यादिकमर्थः ।

इति श्रीमन्महामहोपाध्यायगदाधरभट्टाचार्य्यविरचिता पूर्व्वपक्षस्य टिप्पनी समाप्ता ॥ ०॥

तत्त्वचिन्तामणौ

व्याप्तिवादे सिद्धान्तलक्षणम् ।

अत्रोच्यते । प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः ।

सिद्धान्तलक्षणस्य दीधितिः ।

प्रतियोग्यसमानाधिकरणेति, प्रतियोग्यसमानाधि[illegible] समानाधिकरणात्यन्ताभावप्रतियोगि[illegible] [illegible]

[illegible]

तावच्छेदका ये ये धर्म्माः प्रत्येकं तदवच्छिन्नान्यत्वमित्यर्थे साध्यतावच्छेदकस्य तत्तत्प्रतियोगितावच्छेदकधर्म्मावच्छिन्नभेदकूटेन प्रत्येकं सामानाधिकरण्यपर्य्यवसिते वह्न्यादिसाध्यकहेतौ वह्नित्वादेर्विभिन्नवह्न्यादिव्यक्त्यन्तर्भावेन महानसीयवह्नित्वाद्यवच्छिन्नभेदैः प्रत्येकं सामानाधिकरण्यसत्त्वेऽप्येकव्यक्तिसत्तादिसाध्यके सत्तात्वादौ हेतुसमनिष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नभेदसामानाधिकरण्यासत्त्वादव्याप्तिः। यद्रूपावच्छिन्नं प्रतियोगितावच्छेदकावच्छिन्नाविषयकप्रतीतिविषय इत्यर्थे उक्तदोषोद्धारेऽपि यद्रूपं प्रतियोगितावच्छेदकभिन्नं प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयो वा (१) इत्यत एव सामञ्जस्ये प्रतियोगिताव-

---

(१) यद्रूपं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकमित्यपेक्षया यद्रूपं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकाविषयकप्रतीतिविषय इत्यर्थे लाघवमिति। अथ गुण-कर्म्मान्यत्वविशिष्ट सत्तावान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकगुणत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं न गुणत्वस्य तत्कर्म्मत्ववदन्यत्वविशिष्टसत्तात्वस्य इत्यव्याप्तिसम्भवे गौरवप्रदर्शनमनुचितं, न च गुणत्वत्वेन गुणत्वं न भेदप्रतियोगितावच्छेदकं गौरवात् अतो गुणत्व°द्विष्टाप्रसिद्ध्या साध्याप्रसिद्धिः स्यादतो गुणत्वनिष्ठावच्छेदकताकभेदस्य साध्यघटकत्वे गुणत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं तादृशसाध्यतावच्छेदकस्य इति नाव्याप्तिरिति वाच्यम्। तथापि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यत् तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं न साध्यतावच्छेदकस्य इत्यव्याप्तिरवस्यात् घटकालीनवह्निसाध्यकेऽव्याप्तेः तत्र तद्घटत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य घटकालीनवह्नित्वेऽसत्त्वादिति चेन्न हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकभेदविशिष्टत्वस्यैव प्रतीतिविषयतावच्छेदकत्वस्य विवक्षितत्वात्। हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नाविषयकप्रति-

च्छेदकविशिष्टविषयकप्रतीतिविषयत्वस्य साध्यतावच्छेदकविशिष्टे
निविष्टत्वमनुचितं, एवं तत्तत्सम्बन्धावच्छिन्नत्वविवक्षया यद्रूपा-
वच्छिन्नं प्रतियोगित्वं तत्ताभावप्रतियोगितावच्छेदकानवच्छिन्न-
त्यर्थः. [illegible]साध्यतावच्छेदकावच्छिन्नप्रतियोगिते
महानसीयत्वादिविशिष्टवह्नित्वादेरवच्छेदकत्वं तत्रतत्रैव यद्रूपा-
वच्छिन्नं प्रतियोगित्वं तादृशप्रतियोगितानिरूपितत्वोक्तौ समवाया-
दिना घटादौ साध्ये संयोगादिना घटादिहेतावतिव्याप्तिः संयोगा-
दिसम्बन्धावच्छिन्नघटत्वाद्यवच्छिन्नप्रतियोगितायां हेतुमन्निष्ठा-
भावप्रतियोगितानिरूपितत्वात् इदं वाच्यं [illegible]दित्यादावव्याप्ति-
वारणाय हेतुमन्निष्ठाभावप्रतियोगितायां साध्यतावच्छेदकसम्बन्धा-
वच्छिन्नत्वस्य निवेशे तथा व्यभिचारिभाव एव सम्बन्धान्तराव-
च्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायां साध्यतावच्छेदक-
सम्बन्धावच्छिन्नप्रतियोगितानिरूपितत्वेनातिव्याप्तिः स्यात् यद्रूपाव-
च्छिन्नप्रतियोगितात्वावच्छेदेन हेतुमन्निष्ठाभावावच्छेदकसम्बन्धा-
वच्छिन्नप्रतियोगितानिरूपितत्वेऽपि च व्यापकत्वघटकतया महानसीयव-
ह्निनि प्रतियोगितानिरूपितत्वेन प्रतियोगितावच्छेदकावच्छिन्नत्वो-
पादनं. साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं हेतुयोगिसाध्यता-
वच्छेदकावच्छिन्नप्रतियोगितायां निरुक्ताव्याप्तिवारणेऽपि नि-

[illegible]

[illegible] [illegible] प्रकृतानुमिति-
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] व्याप्तिघटकत्वो-
[illegible] [illegible] १ [illegible] मितिविधेयतावच्छेदकता-

न च [illegible] धूमादित्यादौ [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] तदवच्छि-
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] । न च साध्यता
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] साध्यतावच्छेदकतावत्
[illegible] हेतुमन्निष्ठाभावीयप्रतियोगितावच्छेदकताया
च तदवच्छिन्नत्वेन वह्नित्वादौ तदवच्छिन्नभेदस्य वह्निमान् धूमादित्यादा-
[illegible] इति चेत् न साध्यतावच्छेदकतावत्सम्बन्धावच्छिन्ना या
हेतुमन्निष्ठाभावीयप्रतियोगितावच्छेदकता तदवच्छिन्ना या प्रतियोगिता तद-
वच्छेदकतावदवच्छिन्नभेदस्य विवक्षितत्वात् तथा च वह्निमान् धूमादित्यादि-
त्यादौ [illegible] [illegible] [illegible]
न वा वह्निमान् धूमादित्यादौ तादृशसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकतानिरूपक-
प्रतियोगितावच्छेदकत्वस्य व्याप्यत्वाभिमतेन तदवच्छिन्नभेदस्य वह्नित्वादौ
सत्त्वाद्व्याप्तिरिति वाच्यम्। न चैवमनुमितिविधेयतावच्छेदकतापर्याप्त्यवच्छेदकी-
भूतदण्डत्वाद्यवच्छेदेन दण्डादेर्हेतुमत्त्वाभावीयतादृशप्रतियोगितावच्छेदकतानि-
रूपकप्रतियोगितावच्छेदकत्वाद्घटकस्य दण्डत्वादिमद्धेत्वव्याप्तितानापत्तिरिति
वाच्यम्। हेतुमत्त्वाभावीयतादृशप्रतियोगितावच्छेदकताया व्याप्यवृत्तितया दण्ड-
त्वावच्छेदेन तदवच्छिन्नभेदस्याभावात्। न च यो यदवच्छेदेन यदभावावच्छे-
दक इति नियमबलादेव दण्डत्वावच्छेदेन तादृशावच्छेदकतावद्भेदस्याव्याप्ति-
रिति वाच्यम्। तादृशनियमस्याप्रामाणिकत्वात् द्रव्यत्वावच्छेदेन दण्डे घटजनकता-
भाववत्त्ववद्धटादिति। दण्डत्वावच्छेदेन तत्तद्दण्डाभावप्रतियोगितावच्छेदकतावद्भेद

वह्निप्रतियोगिकधूमनिष्ठसामानाधिकरण्यव्यक्तीनामनुगमात् सामा-
न्यप्रत्यासत्त्या पक्षीयहेतुनिष्ठव्याप्तेरपि प्रथमं अनुगतसामाना-
धिकरण्यत्वरूपव्याप्तित्वेन ग्रहसम्भवेनानुमित्युपपत्तेः तत्तद्व्यक्ति-
त्वेन हेतुनिवेशेऽननुगमात् सामान्यप्रत्यासत्त्यापि पक्षीयहेतुनिष्ठ-
व्याप्तेर्व्याप्तित्वेन दुर्ग्रहतया अनुमित्यनुपपत्तेः, हेतुतावच्छेद-
काश्रयाधिकरणत्वमुपेक्ष्य तद्विशिष्टनिरूपिताधिकरणत्वप्रवेशप्रयो-
जनमग्रे वक्ष्यते प्रतियोगितानवच्छेदकत्वमात्रेण साध्यताव-
च्छेदकनिवेशे वह्नित्वत्वादिना वह्नित्वादिकमनवगाहमानात् प्रति-
योगितानवच्छेदकवत्समानाधिकरणधूमवानित्यादिज्ञानाद्वह्निमा-
नित्याद्यनुमित्यापत्तिः स्यात् । न चेष्टापत्तिसम्भवः, कदाचिद्वह्नि-
त्वेन कदाचिद्द्रव्यत्वादिना वह्न्यनुमितिरिति नियमानुपपत्तेः ।
न चानवच्छेदकत्वेन तत्तद्धर्मावगाहित्वमेव व्याप्तिग्रहस्यानु-
मितौ विधेयतावच्छेदकतया तत्तद्धर्मभाननियामकमिति वाच्यम् ।
अनवच्छेदकत्वेन वह्नित्वादिभाने द्रव्यत्वादिभानस्यापि प्रसङ्ग-
सम्भवात् एवं तत्तत्साध्यतावच्छेदकावच्छिन्नव्यभिचारितया हेतु-
भानस्य हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वेनापि
तत्तत्साध्यतावच्छेदकावगाहिव्याप्तिज्ञानाविरोधितया विशिष्टसाध्य-
तावच्छेदकानवगाहिव्याप्तिज्ञानस्य हेतुत्वे व्यभिचारस्य हेत्वा-
भासतानुपपत्तिरेवेति विशिष्य साध्यतावच्छेदकस्य व्याप्ति-
घटकतानाभाव प्रतियोगितानवच्छेदकावच्छिन्नत्वरूपा प्रति-
योगितानवच्छेदको यो धर्मस्तदवच्छिन्नत्वेनेत्यर्थः। तत्र वह्नित्वा-
दिविशिष्टाभावीयप्रतियोगितास्य साध्यतावच्छेदकता तत्र तेन रूपेण तद-

वह्निप्रतियोगिकधूमनिष्ठसामानाधिकरण्यव्यक्तीनामननुगमात् सामान्यप्रत्यासत्त्या पक्षीयहेतुनिष्ठव्याप्तेरपि प्रथमं अनुगतसामानाधिकरण्यत्वरूपव्याप्तित्वेन ग्रहसम्भवेनानुमित्युपपत्तेः तत्तद्वह्नित्वेन हेतुनिवेशेऽननुगमात् सामान्यप्रत्यासत्त्यापि पक्षीयहेतुनिष्ठव्याप्तेर्व्याप्तित्वेन दुर्ग्रहतया अनुमित्यनुपपत्तेः, हेतुतावच्छेदकाश्रयाधिकरणत्वमुपेक्ष्य तद्विशिष्टनिरूपिताधिकरणत्वप्रवेशप्रयोजनमग्रे वक्ष्यते प्रतियोगितानवच्छेदकत्वमात्रेण साध्यतावच्छेदकनिवेशे वह्नित्वत्वादिना वह्नित्वादिकमनवगाहमानात् प्रतियोगितानवच्छेदकवत्समानाधिकरणधूमवानित्यादिज्ञानाद्वह्निमानित्याद्यनुमित्यापत्तिः स्यात् । न चेष्टापत्तिसम्भवः, कदाचिद्वह्नित्वेन कदाचिद्द्रव्यत्वादिना वह्न्यनुमितिरिति नियमानुपपत्तेः । न चानवच्छेदकत्वेन तत्तद्धर्मावगाहित्वमेव व्याप्तिग्रहस्यानुमितौ विधेयतावच्छेदकतया तत्तद्धर्मभाननियामकमिति वाच्यम् । अनवच्छेदकत्वेन वह्नित्वादिभाने द्रव्यत्वादिभानस्यापि प्रसङ्ग-सम्भवात् एवं तत्तत्साध्यतावच्छेदकावच्छिन्नव्याप्तिघटितत्वेन हेतुभानस्य हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपेण तत्तत्साध्यतावच्छेदकावगाहिव्याप्तिज्ञानाविरोधितया [illegible] तावच्छेदकानवगाहिव्याप्तिज्ञानस्य हेतुत्वे [illegible] भासतानुपपत्तिरेवेति विशिष्य साध्यतावच्छेदकस्य [illegible] घटकत्वाभाव प्रतियोगितानवच्छेदकावच्छिन्नत्वेन [illegible] योगितानवच्छेदको यो धर्मस्तदवच्छिन्नेन [illegible] [illegible] साध्यतावच्छेदकस्य [illegible]

र्म्माणां व्याप्तिघटकता यद्य च स्वरूपत एव वह्नित्वादिरूप-
धर्म्माणां साध्यतावच्छेदकत्वं तत्रापि विशेषणावच्छिन्नत्वं-
घटिततद्धर्मघटितनिरवच्छिन्नवृत्तित्वरूपवह्नित्वादिना नावच्छिन्नो न तु
स्वरूपत एव, अनवच्छेदकत्वरूपविशेषणदुष्कारेण सति निर्वह्नि-
प्रवृत्तमानात्मनश्च स्वरूपतो साध्यतासम्भवात्, वह्न्यादीनप्रवृत्ति-
त्वस्य वह्न्यादिनानावृत्तिधर्म्मान्तराभावरूपेऽपि तद्भावदुष्कारे
व्यापकतावच्छेदकत्वघटकस्यापि वह्नित्वाद्यवच्छिन्नविधेयकानुमिति-
हेतुत्वमुपेयते सकलवह्न्यादिवृत्तित्वविषयतानिवेशे तत्तद्-
सकलवह्न्यादिवृत्तित्वस्य वह्न्यादीनवृत्तित्वाभावरूपतया तद्दु-
दुष्कारेण व्यापकतावच्छेदकत्वघटकस्य न हेतुतासम्भवः तदा तदि-
न्धनादिहेतुनापि वह्नित्वाद्यवच्छिन्नानुमितिप्रसङ्गात् तत्त-
द्वह्न्यादिवृत्तिद्रव्यत्वादाविन्धनादिव्यापकतावच्छेदकत्वसत्त्वाद् द्र-
व्यत्वादिनिष्ठतद्धर्मत्व- धूमजनकतावच्छेदकजातित्वादेर्वह्नित्वादि-
नावृत्तित्वेऽपि तेन रूपेण व्यापकतावच्छेदकत्वघटकाद्वह्नित्वावच्छिन्ना-
नुमितिरनुभवविरुद्धा येन रूपेणोपस्थिते वह्न्यादौ तदभावा-
संशयो न जायते तत्पुरस्कारेण व्यापकतावच्छेदकत्वघटकादेर्हेता-
द्रूपस्यत्वादानुभवात् अत एव ज्ञानत्वानुमितित्वयोरनुगत-
व्याप्यज्ञानित्वयोरविशेषेण (१) ज्ञानत्वरूपेण व्यापकतावच्छेदक-
त्वग्रहाज्ज्ञानवानयमित्यनुमितिर्भवितुमर्हतीति दीधितिव्या-
ख्यानावसरे प्रपञ्चितम्, अधिकमग्रे वक्ष्यामः। तत्तद्धर्म्मिता-
विशेष्यं न तत्तद्धर्म्मिसकलाश्रयोक्तं पक्षतावृत्ति तथा-

(१) [illegible]

वह्निसामानाधिकरण्याग्रहेऽपि ततः पर्व्वते लाघवज्ञानादिवशा-त्तद्वानीयवह्न्यनुमितिरिति दर्शयति, 'येन केनापीति 'यावन्निरू-पितेत्यस्यार्थं, 'तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्ति-रिति तद्रूपावच्छिन्ननिष्ठा तद्रूपावच्छिन्नयावद्व्यक्तिगतसकलप्रतियो-गिका व्याप्तिरित्यर्थः, यथाश्रुते एकसाध्यस्य निखिलसामानाधिकरण्य-स्यापरव्याप्तिप्रतियोगिकत्वासम्भवेनासङ्गतेः ।

अनुमानदीधितिः ।

दण्डादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकमसतो नाव्याप्तिः ।

गादाधरी विवृतिः ।

यद्वैकैकसाध्यतावच्छेदकव्यक्तिनं सकलहेतुवृत्तितावच्छे-दिका तदननुगतरूपावच्छिन्नेनापि तेन रूपेण न तादृशहेतु-व्यापकतासम्भवः सकलसाध्यतावच्छेदकव्यक्तीनामेव चालनी-न्यायेन हेतुसमानाधिकरणाभावत्वावच्छिन्नाभावप्रतियोगिता-वच्छेदकत्वादित्याशङ्कामिष्टापत्त्या परिहरति, 'दण्डादाविति, 'परम्परासम्बद्धमिति स्वसमवायिसंयोगादिसम्बन्धेन साध्यसम्बद्ध-मित्यर्थः, एतच्च साध्यवृत्तितया दण्डत्वादेर्व्यापकतावच्छेदकत्व-सम्भव इत्याशङ्कानिराकरणाय, 'साध्यतावच्छेदकं दण्डिसंयोगत्वा-दिरूपसामानाधिकरण्यवृत्तितावच्छेदकावच्छिन्नहेतुव्यापकतावच्छेद-कमित्यर्थः १ । एवकारेण दण्डादिरूपसकलधर्मस्यावच्छेदः,

---

१ दण्डिसंयोगे दण्डत्वावच्छिन्नहेतुत्वावच्छेदकावच्छिन्नहेतुव्यापक-

नसीयत्वादेरवच्छेदकान्तर्भाव आवश्यक इति शुद्धवह्नित्वादेस्तादृश-प्रतियोगितानवच्छेदकत्वं सुघटमिति वाच्यम्। स्वरूपतो भास-मानस्यैव स्वरूपतोऽवच्छेदकतायाः सिद्धान्तसिद्धतया सखण्ड-पदार्थस्य दण्डादेः स्वरूपतोऽभानात्तस्य स्वरूपतोऽवच्छेदकत्वा-सम्भवेन दण्डत्वादिविशिष्टस्य चातिप्रसक्तत्वेन तत्तादिरूपविशेषण-मनन्तर्भाव्य तन्नावच्छेदकत्वपर्य्याप्तेरयोगात्। अभावप्रतियोगि-तावच्छेदकतया भासमाने उपलक्षणीभूतधर्म्मान्तरभानोपगमे उपलक्षणतया दण्डत्वमात्रं तत्तद्दण्डावच्छिन्नाभावप्रतियोगिताव-च्छेदकतया भासमानतत्तद्दण्डांशे विषयीकृत्य दण्डिमति दण्डी-नास्तीति प्रत्ययस्य दुर्व्वारत्वाच्च। अत्र केचित् उक्ताशयेनैव 'दण्डा-दावित्यादिपदद्वयोपादानं तेन च (१) पृथिवीत्वव्याप्यजातित्वा-दिना अनुगतीकृत्य घटत्व-पटत्व-मृत्तिकात्व-पाषाणत्वादिमतः सम-वायादिना पृथिव्यादिहेतुकसाध्यस्य तादृशजातित्वादेश्च परिग्रहः। समवायादिना हेतुभूतपृथिव्यादिमति तन्तु-कपालादौ विशेषणा-नवच्छिन्न-घटत्व-पटत्वाद्यवच्छिन्नाभावस्य सत्त्वात्। सर्व्वास्वेव साध्यतावच्छेदकतादृशजातिषु तथाविधाभावप्रतियोगितावच्छेद-कत्वपर्य्याप्तेस्तासां व्यापकतावच्छेदकत्वासम्भवेन तदनुगमकीकृत-धर्म्मस्यैव परम्परासम्बन्धेन तथात्वोपगमस्यावश्यकत्वादित्याहुः।

अन्ये तु तद्दण्डवान्नास्तीत्यादौ प्रतियोगिविशेषणतया भासमान-दण्डादिष्वेव प्रतियोगितावच्छेदकत्वपर्य्याप्तिर्भासते तद्विशेषण-तत्तादौ तत्तदवच्छेदकतावच्छेदकत्वमेव प्रतियोगिताव्यधिकरणस्य

(१) ज्यादिपदाभ्यामिति पा०।

तावच्छेदकता तत्स्थलीये व्यभिचारिणि धूमादिहेतावति-व्याप्तिरिति स्वविशिष्टसम्बन्धिनिष्ठेत्यादिना निर्व्वाच्यम् पारि-भाषिकमेवावच्छेदकत्वं निवेशनीयं तच्च तल्लक्षणे यादृशस्य स्वपदार्थस्य प्रवेशस्तादृशत्व. एवञ्च महानसीयत्वादिविशिष्टस्य वह्नित्वादेस्तत्र स्वपदेनोपादानसम्भवात् विशिष्टवह्नित्वत्वादिक-मेव पारिभाषिकमवच्छेदकत्व तदवच्छिन्नभेदश्च शुद्धवह्नित्वादावपि दुर्घटः, तथाचावच्छेदकं यादृशं स्व तादृशविशिष्टाविषयकप्रतीति-विषयत्वमेवानवच्छेदकत्वपदेन विवक्षणीयं तथाच सति सखण्डस्य दण्डादेः स्वरूपतोऽभानात्तत्तादिविशेषणविशिष्टस्यैवावच्छेदक-लक्षणस्थस्वपदेनोपादेयतया तद्विशिष्टाविषयकप्रतीतिविषयत्वस्य दण्डत्वादिविशिष्टे सुघटत्वात् व्यापकतावच्छेदकत्वमव्याहतमेवेति चेन्न, पारिभाषिकस्यावच्छेदकत्वस्य स्वत्वघटितत्वेनाननुगतस्या-भावकूटज्ञानासम्भवेन प्रतियोगितायाः स्वरूपसम्बन्धरूपावच्छेद-कत्वस्यागत्या गुरुधर्म्मसाधारण्यमुरीकृत्य व्याप्तिलक्षणे तदेव हि निवेशनीयम्, एवञ्च (१) सामानाधिकरण्यसम्बन्धेन महानसीय-त्वादिविशेषणावच्छिन्नस्य वह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगिता-वच्छेदकत्वेऽपि(२)महानसीयत्वादिविशिष्टनिरूपितसमवायादेरेव-प्रतियोगितावच्छेदकताघटकसम्बन्धत्व तत्रापि शुद्धसमवायादिना

(१) गुरुधर्म्मस्याभावप्रतियोगितावच्छेदकत्वे चेत्यर्थः ।

(२) सामानाधिकरण्यसम्बन्धेन महानसीयत्वादिविशिष्टवह्नित्वावच्छिन्न वह्न्यादिसाध्यकव्यभिचारिण्यधिकरणाप्रसिद्धेरभावात् वह्निविशिष्टस्य प्रतियोगिताव-च्छेदकत्वमसम्भवदोषस्त्वर्थमिति भावः ।

दण्डत्वादिसामान्याभावप्रतियोगितायामेव तद्धर्म्मविशिष्टनिरूपित-विलक्षणावच्छेद्यतासत्त्वादिति ध्येयम् ।

अनुमानदीधितिः ।

इत्यञ्च इदन्द्रव्यं गुण-कर्म्मान्यत्वे सति सत्त्वादित्यादौ सत्त्वाद्यधिकरणगुणादिनिष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्रव्यत्वादेः नाव्याप्तिः साधनस्य विशिष्टसत्त्वादेर्गुणादावव्वत्तेः, सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्याधिकरणतावच्छेदकस्य चैक्याद्व्याप्तेरैक्यं, वस्तुतस्तु धूमत्वादिविशिष्टव्यापकवह्निसामानाधिकरण्यस्य रासभादिसाधारणत्वाद्धूमत्वादिमति तादृशसामानाधिकरण्यं तद्वति धूमत्वादिकं वा व्याप्तिः, आद्या भिन्ना द्वितीया त्वभिन्नैवेति ध्येयम् । अयं कपिसंयोगी एतद्वृक्षत्वादित्यादिसंग्रहायासमानाधिकरणान्तम् ।

गादाधरी विवृतिः ।

'इत्यञ्चेति हेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यसाधारणरूपमुपेक्ष्य विशिष्टसामानाधिकरण्यत्वेन सामानाधिकरण्यविशेषनिवेशनेन चेत्यर्थ', 'नाव्याप्तिरिति न विशिष्टसत्तात्वरूपहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानजन्यानुमि-

सम्भवादसमञ्जसम् (१)। अथैव विशिष्टवैशिष्ट्यावगाहिज्ञाने विशिष्ट-निरूपितसमवायस्य सम्बन्धतया तेन सम्बन्धेन व्याप्तिर्हेतुतावच्छे-दकसम्बन्धेन हेतुमत्त्वस्याग्रे विवक्षयैव निर्व्वहतीति कथमत्र विशिष्ट-पदोपादानम्। न च विशिष्टवैशिष्ट्यबोधे विशिष्टनिरूपितसमवाय-त्वादिना न विशेषणसम्बन्धता अपि तु शुद्ध एव समवायादिर्विशे-षणसम्बन्धः स्वविशिष्टनिरूपितसमवायादिस्तु विशेषणतावच्छेदक-सम्बन्धः इति मताभिप्रायेणेदं तथाचोक्तस्थले हेतुतावच्छेदक-सम्बन्धः शुद्धसमवाय एवेति हेतुतावच्छेदकसम्बन्धमात्रविवक्षया न प्रतीकार इति वाच्यम्। हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहि-ज्ञाने हेतुतावच्छेदकस्य पक्षे परम्परासम्बन्धभाननियमे व्यापकता-शरीरघटकाभावाधिकरणेऽपि तदीयतादृशसम्बन्धस्य निवेशित-त्वात् तत एव हेतुतः पक्षे साध्यानुमितिनिर्व्वाहे विशिष्टत्वेन सत्त्वादेर्द्रव्यत्वादिव्याप्तिस्वीकारस्य निरर्थकताप्रसङ्गात्। न च दर्शितरीत्या विशिष्टव्यापकताग्रहस्य विशेषणव्यापकतावगाहि-त्वेऽपि विशिष्टे पक्षधर्म्मताग्रहस्य विशेषणे तदवगाहित्वेऽपि च विशिष्टहेतुकपरामर्शस्य विशेषणे साध्यसामानाधिकरण्यावगाहित्वा-नियमात् न विशेषणहेतुकानुमितिसामग्र्या विशिष्टहेतुकानुमिति-पूर्व्वमावश्यकता इति वाच्यम्। साध्ये विशिष्टहेतोर्व्यापकताग्रहे-ऽपि विशिष्टहेतौ साध्यविरोधग्रहसत्त्वेऽनुमित्यनुत्पत्त्या विशिष्ट-हेतुकस्थले विशिष्टाधिकरणत्वघटितहेतु-साध्यसामानाधिकरण्य-

(१) 'एवं व्यतिरेकव्याप्तिरपीत्यादि' 'असमञ्जसमित्यन्तः पाठः' बहुषु आदर्श-पुस्तकेषु नास्ति।

चेन्न, एवं सति दण्डाद्युपलक्षितधर्म्मिहेतुकानुमितेर्व्विलयप्रसङ्गात्, तद्धेतुकव्याप्तिग्रहस्थले परम्परासम्बन्धेनोपस्थितदण्डादौ व्याप्ति-ग्रहस्य कल्पनसम्भवात् । स्वातन्त्र्येण सकलपरम्परासम्बन्धघटित-सकलविशेषणवत्त्वग्रहस्याप्रामाणिकतया विशेषणहेतुकपरामर्शस्य कारणतायाः क्लृप्तत्वानियमाच्च । ननु वह्निसंयोगिसंयोगाद्यात्मक-साध्यसामानाधिकरण्यस्य व्याप्तित्वे 'एकैव हि सा व्याप्तिरिति मूलग्रन्थविरोधः, महानस-पर्व्वतादिनिष्ठधूमादिगतवह्निसंयोगि-संयोगादेरैक्यासम्भवादित्यत आह, 'सामानाधिकरण्यव्यक्तीना-मिति, 'भेदेऽपीति, अधिकरणभेदेन धूमादिभेदेन चेत्यादिः, निरूपकतावच्छेदकं वह्नित्वादिरूपसाध्यतावच्छेदकं धूमत्वादिरूप-हेतुतावच्छेदकं, 'ऐक्यात्' साध्य-हेतुभेदेऽप्यभेदात्, तदभेदतात्पर्य्येण एकत्वव्यवहार इत्यर्थः । ननु लक्षणया तद्व्यवहारसमर्थनमसङ्गतं सामान्यप्रत्यासत्त्यभावपक्षे विशिष्टपरामर्शनिर्व्वाहार्थं व्याप्तेरैक्यक-नात्, तन्निर्व्वाहस्य (१) सामानाधिकरण्यस्य व्याप्तित्वे धूमत्वादे-रैक्येऽपि पक्षीयधूमादिनिष्ठसामानाधिकरण्यस्य सामान्यप्रत्यासत्तिं विना पूर्व्वं ग्रहासम्भवेन तत्स्मरणासम्भवात् पक्षीयधूमे तदुपस्था-सम्भवेनायोगादतिप्रसङ्गेन (२) धूमादिव्यापकवह्न्यादिसामानाधि-करण्यमात्रस्य व्याप्तित्वासम्भवात् धूमत्वादिरूपहेतुतावच्छेदकस्य द्विधा व्याप्तिशरीरप्रवेशस्यावश्यकत्वं दर्शयन् व्याप्तेर्भेदमभेदञ्च दर्श-यति, 'वस्तुतस्त्वित्यादिना, प्रथमपक्षप्रदर्शनं तत्पक्षे धूमत्वत्वादिभे-

(१) पर्वतादिवृत्तित्वांशे च ग्रहाभावे ।

(२) धूमं विना वह्न्यादिनिष्ठसामानाधिकरण्यस्य चेदर्थः ।

सामानाधिकरण्यमिति तथाच एकधर्म्मिविशेषणतापन्नं धूमत्वादिरूपहेतुतावच्छेदक-साध्यसामानाधिकरण्योभयं व्याप्तिरिति पर्य्यवसितं, कारणञ्च धूमव्यापकवह्निसमानाधिकरणधूमवान् पर्व्वत इत्यादिरेव परामर्शः तावतैव च उक्तोभयस्य हेतुविशेषणतया अनुमितिजनकज्ञानविषयत्वरूपव्याप्तित्वनिर्व्वाहः। द्वितीयपक्षे च धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्ववद्धूमवान् पक्ष इति ज्ञानं हेतुर्न तु स्वरूपतो धूमत्वाप्रकारकं तादृशधूमत्ववत्त्वान् पक्ष इत्याकारकं तादृशज्ञानस्य धूमाभाववान् पक्ष इत्याकारकधूमत्वत्वाद्यप्रकारकासिद्धिज्ञानाप्रतिबध्यत्वात्। एतन्मते च हेतुतावच्छेदकवृत्त्यसाधारणधर्म्मावच्छिन्ने साध्यसमानाधिकरणावृत्तित्वमेव विरोधः न तु हेतुतावच्छेदकावच्छिन्ने साध्यासामानाधिकरण्यं, उपदर्शितज्ञानस्य हेतुतावच्छेदकं धर्म्मितावच्छेदकीकृत्य साध्यसामानाधिकरण्यानवगाहितया तथाविधज्ञानाप्रतिबध्यत्वात्। यदि च विरोधस्यानुमितिं प्रति साक्षाद्विरोधितया हेत्वाभासत्वमुपपादयितुं शक्यते तदा समानाधिकरणवृत्तित्वांशे निधर्म्मितावच्छेदक समानाधिकरणवृत्तिमद्धूमवान् पर्व्वत इत्येतादृशमपि ज्ञानं हेतुरुपेयते अन्यथा धूमत्वत्वादिविषयतायाः कारणतावच्छेदककुक्षिप्रवेशे गौरवात्, सामानाधिकरण्यप्रकारकत्वापेक्षया समानाधिकरणवृत्तिप्रकारकत्वस्य गुरुत्वेऽपि मानान्तरस्याप्रत्यासत्तित्वे विशिष्टपरामर्शनिर्व्वाहानुरोधेन तेन रूपेण हेतुताया-आवश्यकत्वोपगमात्। 'आद्या' हेतुतावच्छेदकधर्म्मसहितसाध्यसामानाधिकरण्यरूपा, 'भिन्नेति, प्रतिधूमादिकमित्यादिः। 'द्वितीया'

साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकरूपा, 'अभिन्ना' सर्व्वधूम-साधारणी, अनुगतरूपावच्छिन्ननानाव्यक्तिदण्डादिविशिष्टहेतुक-स्थलेऽपि परम्परासम्बद्धदण्डत्वाद्यखण्डधर्म्म एव हेतुतावच्छेदक उपगन्तव्य इति भावः। यद्यपि साध्यसामानाधिकरण्यावच्छेदक-रूपवक्ष्यमाणव्याप्त्यभिप्रायेणापि 'एकैव हीत्यादिग्रन्थः सङ्गच्छते, तथापि स्वयं तत्र स्वरूपसम्बन्धरूपावच्छेदकत्वप्रवेशस्य खण्डनीय-तया स्वविशिष्टाधिकरणावृत्तियावत्साध्यासमानाधिकरणकत्व-रूपपारिभाषिकावच्छेदकत्वस्यैव च विवक्षणीयतया एतदपेक्षया तादृशी व्याप्तिर्गुरुशरीरेति कथञ्चिदीदृशव्याप्तेरैक्योपपत्तिसम्भवेन तज्ज्ञानमनुमितिहेतुरित्येतादृशव्याप्तेरैक्यमुपपादितम्।

मिश्रादिमतमालम्ब्य प्रतियोग्यसमानाधिकरणपदप्रयोजन-माह, 'अयं कपिसंयोगीति। अथैतद्वृक्षत्वादेरव्याप्यवृत्तिकपि-संयोगादिव्याप्यतोपगमे कपिसंयोगाद्यनवच्छेदकमूलादेः पक्षता-वच्छेदकत्वे तदवच्छेदेनापि एतद्वृक्षादौ कपिसंयोगादिमिति प्रसङ्गः। न चेष्टापत्तिः, सल्लिङ्गकपरामर्शस्य भ्रमानुमित्य-जनकत्वनियमात्। न च तदवच्छेदेन हेतुमत्ताज्ञानस्य तद-वच्छेदेन साध्यानुमितिहेतुत्वात् एतद्वृक्षत्वादिरूपव्याप्यवृत्तिहेतोश्च किञ्चिदवच्छेदेनाप्युक्तेर्नातिप्रसङ्ग इति वाच्यम्। यदि स्वरूपसम्ब-न्धरूपावच्छेदकत्वावगाहिन्यामनुमितावपि तादृशहेतुमत्ताज्ञान-त्वेन हेतुत्वमुपेयते तदापि तुल्ययुक्त्या एतद्वृक्षत्वादेरिव मूलाद्यव-च्छिन्नसंयोगाधिकरणस्यापि कपिसंयोगादिव्याप्यतया तेन हेतुमत्ता-ज्ञानावच्छेदेन कपिसंयोगाद्यनुमितेर्निष्प्रत्यूहत्वादिति चेदत्रो

पाध्यायाः, साध्यस्य पक्षतावच्छेदकसामानाधिकरण्यं विना व्याप्यस्य पक्षधर्म्मत्वमनुपपन्नमिति पक्षधर्म्मताबलात् पक्षतावच्छेदकसामानाधिकरण्यमेव साध्ये सिध्यति न तु तदवच्छेद्यत्वमपि प्रमाणाभावादिति तादृशानुमितेरप्रामाणिकतया तत्र परामर्शहेतुताकल्पनमेव नास्ति इति न तदापत्तिरिति समादधिरे ।

मिश्रादयस्तु बाधानवतारे मूलाद्यवच्छेदेन कपिसंयोगादिसिद्धिरिष्टैव इति वदन्ति । एतत्तत्त्व ग्रन्थकृता हेत्वाभासे वक्ष्यते ।

अनुमानदीधितिः ।

यत्तु इदं संयोगि द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत् संयोगस्य शाखाद्यवच्छेदेन वृत्तेर्वृक्षत्वावच्छेदेन तत्सामान्याभाववत्तावविरोधात् तत्र चातीन्द्रियस्य संयोगस्य सत्त्वात्परितः प्रतियोग्युपलब्धेर्दोषाद्वा वृक्षे न संयोग इत्यादि नाध्यक्षमिति तन्न, द्रव्ये संयोगसामान्याभावे मानाभावात् । न च यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानिति व्याप्तेर्यावत्संयोगाभावा एव मानम् ।

गादाधरीविवृतिः ।

प्राचीनसिद्धव्यावृत्तिस्थलं दूषयितुमुपन्यस्यति, 'यत्त्विति, 'तत्' असमानाधिकरणान्तम् । ननु द्रव्ये संयोगत्वाद्यवच्छिन्ना-

न्धकत्वकल्पनमेवाशक्यमिति चेन्न, द्रव्यादौ संयोगसामान्याभावलौकिकप्रत्यक्षस्याप्रसिद्धत्वेऽपि गुणादौ तत्प्रसिद्धा अधिकरणीयविषयतासम्बन्धेन संयोगाभावलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति स्वविषयसंयोगवत्त्वसम्बन्धेन ज्ञानत्वेनैव प्रतिबन्धकत्वकल्पनात्, सर्वत्र द्रव्येऽन्तत ईश्वरीयप्रत्यक्षस्यैव सर्वदा तादृशसम्बन्धेन सत्त्वेनातिप्रसङ्गविरहात्। इदमापाततः द्रव्यरूपाधिकरणविषयकसंयोगाभावविषयकप्रत्यक्षस्य कदाचिदप्यनुदयेन तादृशप्रत्यक्षसामग्र्या एवाकल्पनेनापादकाभावादेवातिप्रसङ्गवारणसम्भवेन तादृशप्रतिबन्धकताकल्पनस्याप्ययुक्तत्वात्। कथञ्चिदापत्तिसम्भवेऽपि तादात्म्यसम्बन्धेन द्रव्यत्वेनैव तादृशसम्बन्धेन (१) संयोगाभावलौकिकं प्रति प्रतिबन्धकत्वौचित्यात्। 'मानाभावादिति लौकिकप्रत्यक्षस्य योग्यानुपलब्धिविरहेणासम्भवात्, उपनीतभानस्य च संयोगाभावो द्रव्यावृत्तिरित्याकारकस्य विपरीतविषयकस्याप्युपनयवशेन सम्भवात्, विनिगमनाविरहेण एकतमस्य प्रामाण्यासिद्धिः, शब्दस्य चाप्तोक्तत्वासिद्धा तदव्यवस्थापकत्वात् अनुमानस्य च लिङ्गाभावेनासम्भवादिति भावः। ननु द्रव्यादौ यावत्संयोगविशेषाभावानामुभयवादिसिद्धतया तत एव हेतोस्तत्राप्रत्यक्षस्यापि तत्सामान्याभावस्य सिद्धिर्निष्प्रत्यूहैवेति शङ्कां निरस्यति, 'न चेत्यादिना. यः संयोगीययावद्विशेषाभाववान् स संयोगसामान्याभाववान् इति व्याप्तेरग्रे व्यर्थविशेषणत्वाप्रयोजकत्वादिदोषेण निराकरणीयतया प्रथमतः सामान्यमुखीं व्याप्तिमनुमानोपष्टम्भकतया दर्शयति,

(१) अधिकरणीयविषयतासम्बन्धेनेत्यर्थः।

वृत्तित्वविशेषणस्यासिद्धिवारकत्वेऽपि व्यभिचारावारकतया वैयर्थ्यं यावत्त्वविशेषणस्य धीविशेषविषयत्वरूपस्य परिचायकमेव तादृश-धर्म्मावच्छिन्नप्रतियोगिताकत्व न तु हेतुप्रविष्ट इति न सत् तथा सति यत्तत्पदार्थस्य हेतु-साध्यशरीराप्रवेशेन सामान्यमुखव्याप्तित्वा-नुपपत्तिरिति वाच्यम्। यावत्पदस्य व्यापकतार्थकतया तत्तद्धर्म्म-समानाधिकरणोभयावृत्तिधर्म्मावच्छिन्नाभावत्वनिरूपिताया आधे-यत्वसम्बन्धावच्छिन्नव्यापकताया एव हेतुतया विशेषधर्म्मव्यापक-त्वाघटकाभावान्तरस्यैव सामान्यधर्म्मव्यापकताघटकतया वैय-र्थ्यानवकाशात्। न च तादृशाभावत्वव्यापकत्वं तादृशाभाव-निष्ठभेदप्रतियोगितायामाधेयतासम्बन्धेनानवच्छेदकत्वम् एवञ्च संयोगविशेषाभावाना सर्व्वेषामेव सर्व्वाधिकरणवृत्तितया तन्नि-ष्ठभेदप्रतियोगितायामाधेयतासम्बन्धेनावच्छेदकमधिकरणमप्रसिद्धं इति तदनवच्छेदकत्वरूपहेत्वप्रसिद्धिरिति वाच्यम्। आधेयत्व-सम्बन्धावच्छिन्नावच्छेदकतासम्बन्धेन प्रतियोगिताया अभावस्यैव प्रतियोगितानवच्छेदकत्वस्थले निवेशनीयत्वात्, उक्तस्थले च व्यधिकरणतादृशसम्बन्धावच्छिन्नाभावप्रसिद्धिर्मौलस्यात्। यद्धर्म्म-समानाधिकरणेत्यत्र प्रतियोगितावच्छेदकत्वेन धर्म्मो विशेषणीयः, तेन कम्बुग्रीवादिमत्त्वादिव्याप्यधर्म्मावच्छिन्नप्रतियोगिताकयावद-भाववतस्तद्धर्म्मावच्छिन्नाभावाप्रसिद्धया तादृशाभाववत्त्वानभ्युपेऽपि न क्षतिः। न च भेदप्रतियोगितावच्छेदकचाघत्व-घटान्यतर-त्वादिव्याप्यधर्म्मावच्छिन्नसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताक-यावदभाववतस्तद्रूपावच्छिन्नसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिता-

साध्य-हेतूनामननुगमेन नैका व्याप्तिरिति संयोगसामान्याभाव-तदीयविशेषाभावकूटयोर्व्याप्तौ यावत्त्वादिविशेषणवैयर्थ्यमेव तथाप्येतद्दोषस्य स्वयमग्रे वाच्यतया यथाकथञ्चिच्छङ्कासङ्गतिः। अथ वृक्षादौ यावत्संयोगाभाववत्त्वमुभयवाद्यसिद्धं तत्र विभुसंयोगाभावावच्छेदकस्यावयवविशेषस्य दिग्विशेषस्य वा दुर्वचत्वात् ध्वंस प्रागभावयोरत्यन्ताभावविरोधित्वे कालविशेषावच्छेदेनापि तत्र तदभावासम्भवात् तयोस्तदविरोधितामते द्रव्ये संयोगादि-सामान्याभावस्याप्युत्पत्तिकालावच्छेदेन वृत्तावविरोधात्। न च मूलाग्राद्यवच्छिन्नविभुसंयोगव्यक्तीनां भेदादग्र-मूलाद्यवच्छेदेनाभाव. सुलभ इति वाच्यम्। तासां भेदस्याप्रामाणिकत्वात्। न च नानावयवावच्छिन्नसंयोगव्यक्तीनामभेदे तत्संयोगव्यक्तौ तत्तदवच्छेदकव्यक्तीनां तादात्म्यसम्बन्धेन कारणतायां व्यभिचार इत्यवच्छेदकभेदेन संयोगभेद आवश्यकः आवश्यकत्वावच्छेदकव्यक्तीनां विशिष्य स्वावच्छिन्नसंयोगव्यक्तिषु हेतुताभ्युपगमः, अन्यथा मूलादिमात्रावच्छिन्नमूर्त्तान्तरसंयोगानां अग्राद्यवच्छेदेन तद्वृक्षादिवृत्तिविभुसंयोगानाञ्च वृक्षान्तरावयवावच्छेदेनानुत्पत्तिप्रयोजकस्य दुर्लभतापत्तेरिति वाच्यम् (१)। व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन

---

(१) इति वाच्यम् इति सन्दर्भानन्तरं 'न च मूलाद्यवच्छिन्नेति सन्दर्भात् पूर्वं 'व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन विभुसंयोगस्य व्याप्यवृत्तितया मूलाद्यवच्छिन्नत्वविरहेण तत्र मूलादीनां हेतुत्वविरहात् व्याप्यवृत्तेरवच्छेदकोपगमे तत्तदवच्छेदकस्वरूपतत्तद्विशेषावच्छेदकताव्यक्तीनामेव तत्तदवच्छेदकत्वन्तावच्छेदकसम्बन्धतया मूलाद्यवच्छिन्नविभुसंयोगादीनामभेदेऽपि व्यभिचारानवकाशात् अन्यथा मूलाद्यवच्छिन्नसंयोगस्य दिग्विशेषैरप्यवच्छिन्नतया तत्रावच्छेदकतासम्बन्धेन

वच्छिन्नत्वेऽपि तदवच्छिन्नत्वविशिष्टस्य नान्यत्रोत्पत्तिरिति न व्यभिचारशङ्का इति वदन्ति ।

यत्तु संयोगमात्रस्याव्याप्यवृत्तितासिद्धान्तानुरोधेन मूलाग्रावच्छिन्नतरु-विभुसंयोगादीनां भेदस्वीकार आवश्यक इति, तदपि न सम्यक्, तादृशसंयोगव्यक्तीनां गगनादौ दिग्देशविशेषरूपावच्छेदकनियमेनैव तादृशसिद्धान्तसङ्गतेः ।

अत्र वदन्ति द्रव्यमात्र एव संयोगसामान्याभावस्याप्रामाणिकतायाः 'तन्नेत्यादिनोक्तेः 'न चेत्यादिना गगनादाविव संयोगसामान्याभावसाधकमनुमानमाशङ्कितं, विभुद्वयसंयोगानभ्युपगमेन तत्र यावत्संयोगव्यक्तीनामेव प्रतिनियतदिग्देशावच्छिन्नतया तत्तद्दशक्तित्वेन तत्र तदभावसत्त्वेऽविवाद एव इति नासिद्धावकाशः, विभुमात्रे संयोगसामान्याभावसिद्धावपि संयोगि द्रव्यत्वादित्यत्र व्यावृत्तिसङ्गतेर्वृक्षादावेतद्व्याप्तिबलात् संयोगसामान्याभावासिद्धावपि न क्षतिः । प्रतियोग्यनवच्छेदकस्य तदवच्छेदकत्वनियमसत्त्वे च वृक्षत्वाद्यवच्छेदेन वृक्षादावपि संयोगसामान्याभावसिद्धिसम्भवेन तत्रापि तदभावं साधयतां तादृगनियमवादिनामाशङ्का 'न च प्रतियोग्यनवच्छेदकवृक्षत्वादेरभावावच्छेदकत्वमित्यादिना निराकरिष्यते पूर्व्वमपि वृक्षत्वादवच्छेदेन संयोगसामान्याभाववृत्तेरविरोधमात्रेण प्रतियोग्यनवच्छेदकस्याभावावच्छेदकत्वनियमेन वा सेद्धुमर्हतीत्याशयेनैव वृक्षादौ संयोग-तत्सामान्याभावयोर्वृत्तावच्छेदकभेद उपपादितः वृक्षे न संयोग इति प्रत्ययश्च वारित न तु यो यदोदेत्यादिनियमस्य तत्रा-

धकत्वाशयेनेति न सन्दर्भविरोधः। यत्किञ्चिदवयवनाशाक्र
द्व्यणुकनाशानन्तरं खण्डद्व्यणुकोत्पत्तिक्षणे पूर्व्वोत्पन्नक्रियातो व
तयावत्तदवयवैर्गगनादिसंयोगानां (१) विनाशः द्वितीयक्ष
खण्डद्व्यणुकस्यापरावयवनाशस्तृतीयक्षणे च तन्नाशस्तत्र तद्दृत्ते
संयोगानुत्पत्त्या यावद्विशेषाभावसौलभ्यम्। न चैवं तादृशद्व्यणुके मूर्त्ता
न्तरेणापि संयोगस्तदवयवसंयोगैस्तत्कर्म्मणा वा न सम्भवति त
वयव-गगनादिसंयोगनाशककर्म्मणा मूर्त्तान्तर-तदवयवसंयोगा
मपि तदुत्पत्तिकाले विनाशात्, अवयवावयविनोः संयोगान
गमेन अवयवेषु आरम्भकसंयोगसत्त्वेन तन्निष्ठसंयोगजननासम्भवा
उत्पत्तिकाले च द्रव्ये गुणवत्कर्म्मसत्त्वानुपपत्तेरिति संयोगसाध्य
द्रव्यत्वस्य सद्धेतुतैव न निर्व्वहतीति वाच्यम्। तादृशखण्डद्व्य
तदवयवसंयोगजन्यस्य तत्कर्म्मजन्यस्य च संयोगस्यासम्भवेऽपि तद
लैव सदागतिशीलपवनादिपरमाणूनां कर्म्मभिस्तत्संयोगानामुत्पत्ते
बाधकविरहेण द्रव्यस्य संयुक्तत्वनियमादित्यपि केचित्। 'याव
संयोगाभावा एव मानमिति ज्ञायमानलिङ्गस्यानुमितिकरणत
मताभिप्रायेण, 'यत्तदर्थयोरिति साध्य-हेतुघटकयत्तच्छब्दार्थयो
संयोगत्व घटत्वाद्योरित्यर्थः, 'अननुगमादिति एकरूपेण निवेशा
सम्भवादित्यर्थः, एकव्याप्तेर्निर्व्वाहयितुमशक्यत्वादिति शेषः, तथा
घटत्वाद्यवच्छिन्नाभाव घटादिविशेषाभावकूटयोर्व्याप्तेः संयोगसामा
न्याभावसिद्धावनुपयोगित्वात् यावत्संयोगविशेषाभावे संयोगसामा-

(१) तदवयवावच्छिन्नगगनादिसंयोगानामित्यर्थः, आरम्भकावयवे गगनादि
संयोगाना इति पा०।

न्याभावीयविशेषव्याप्तेश्चाग्रे निराकर्त्तव्यत्वान्नोक्तानुमानसम्भव इति भावः। ननु प्रकृतहेतौ प्रकृतसाध्यव्याप्तेरग्रहेऽपि यथा यो यत्र प्रवर्त्तते स कार्य्यतया तज्जानातीत्याकारात् स्तनपानादिप्रवृत्ति-तद्विषयककार्य्यताज्ञानयोर्व्याप्तिग्रहाद्गवानयनादिप्रवृत्तिरूपलिङ्गेन गवानयनादिकार्य्यताज्ञानसिद्धिः तथा प्रकृते संयोगीययावद्विशेषा-भावे तत्सामान्याभावस्य व्यर्थविशेषणत्वादिना व्याप्त्यग्रहेऽपि घटादिविशेषाभावकूटे तत्सामान्याभावव्याप्तिग्रहादेव संयोगीय-यावद्विशेषाभावे पक्षधर्म्मताज्ञानाद्गगनादौ (१) संयोगसामान्या-भावसिद्धिर्दुर्व्वारैव व्यतिरेकिहेतुकानुमिताविव सामान्यव्याप्त्यधीन-विशेषसिद्धौ व्याप्तिविशिष्टपक्षधर्म्मताज्ञानस्य हेतुत्वानुपगमात् (२)। न च विशेषभावान्तरे सामान्याभावान्तरव्याप्तिग्रहात् संयोग-विशेषाभावेन तत्सामान्याभावसिद्ध्युपगमे यावत्त्वाद्यविशेषितकपि-संयोगादिप्रतियोगिकाभावे(३) कपिसंयोगादिसामान्याभावव्याप्ति-ग्रहादेव संयोगप्रतियोगिकाभावेन तत्सामान्याभावसिद्धिसम्भ-वात् यावत्त्वादिविशेषणमनर्थकं प्रकृतहेतुत्वन्निर्वि[illegible] तत्प्रविष्टतत्तत्पदार्थघटितप्रकृतसाध्यतुल्यसाध्यव्याप्ति[illegible]: स्वीकर्त्तुमशक्यत्वात् तादृशसकलहेतु-साध्ययोः [illegible]

(१) गगनादाविति पा०।

(२) [illegible]

(३) [illegible]

न्तत्वमावश्यकम् अन्यथा अधिकरणतावच्छेदकप्रकारकज्ञानासम्भवेन (१) गुणादौ तदभावग्रहासम्भवादिति वाच्यम्। द्रव्यनिष्ठयावत्संयोगाभावाधिकरणताया अपि द्रव्यत्वादिरूपैकावच्छेदकावच्छिन्नतया उपाधेः साधनाव्यापकतानिर्वाहाय समभिव्याहृतं यदव्याप्यवृत्तितानिर्वाहकं विलक्षणमवच्छेद्यत्वं तस्यैव विवक्षणीयतया गुणानिष्ठसंयोगाभावाद्यधिकरणतायां तादृशावच्छेद्यत्वविरहेण साध्यव्यापकताया यथाश्रुते दुरुपपादत्वात्। अथैवं कपिसंयोगादिसामान्यस्य मूलाद्यवच्छेदेनाभाववति कपिसंयोगादिमद्वृक्षादौ अनवच्छिन्नतदीययावद्विशेषाभाववत्त्वविरहेण साध्योपाध्योर्न सामान्यव्याप्तिनिर्वाहः (२)। अत केचित् अवच्छिन्नत्वैकावच्छेदकानवच्छिन्नत्वोभयाभाववद्यावद्विशेषाभाववत्त्वम् इष्टोपाधित्वेनाभिमतं गुणे यावद्विशेषाभाववत्त्वम् अवच्छिन्नत्वाभावेनोक्तोभयाभाववत्, कपिसंयोगवति वृक्षे कपिसंयोगीययावद्विशेषाभाववत्त्व मूलाद्यैकावच्छेदकावच्छिन्नमिति तदनवच्छिन्नत्वाभावादुभयाभाववदिति(३) नोपाधि-साध्ययोः सामान्यव्याप्तिभङ्गः।

---

(१) अभावलौकिकप्रत्यक्षे अधिकरणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वादिति भावः।

(२) तथाच [illegible]

(३) [illegible]

अथ वृक्षादिनिष्ठानां यावत्कपिसंयोगविशेषाभावाधिकरणतानां नैकावच्छेदकावच्छिन्नत्वं सम्भवति वृक्षाद्यवृत्तिकपिसंयोगादिव्यक्तीनां येऽभावास्तेषां वृक्षादौ व्याप्यवृत्तितया तन्निष्ठतदधिकरणतानामनवच्छिन्नत्वात्। न च व्याप्यवृत्त्यधिकरणतानामनवच्छिन्नतया अन्यासाञ्चैकावच्छेदकावच्छिन्नतया सर्वास्वधिकरणतासूभयाभावोऽक्षत एवेति वाच्यम्। एवं सति पक्षनिष्ठसंयोगव्यक्तीनां दिग्देशविशेषाद्यवच्छिन्नानां यावन्तोऽभावाः पक्षनिष्ठतावन्निरूपिताधिकरणतानां सर्वासामेकावच्छेदकविरहेऽपि द्वित्वादीनामवच्छेदकैक्यसम्भवेन सर्वास्वेव तासु तादृश-तादृशावच्छेदकमादाय एकावच्छेदकावच्छिन्नत्वमस्तीत्युभयाभावसत्त्वात् तदवृत्तिसंयोगव्यक्तीनाञ्च येऽभावास्तेषां तन्निष्ठाधिकरणताकूटानामनवच्छिन्नतया उभयाभावसत्त्वात् उक्तोपाधेर्यावत्संयोगाभावरूपसाधनव्यापकत्वापत्तेः, स्वसमानाधिकरणयावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वस्य एकावच्छेदकावच्छिन्नत्वरूपत्वे च (१)वृक्षादिनिष्ठमूलाद्यवच्छिन्नकपिसंयोगाद्यभावाधिकरणतास्वपि न तथात्वसम्भवः तत्समानाधिकरणाव्याप्यवृत्तिकपिसंयोगाद्यभावाधिकरणतानामपि तादृग-यावदधिकरणतान्तर्गतत्वात् तदवच्छेदकस्य चाप्रसिद्धत्वात् इति चेन्न, एकावच्छेदकावच्छिन्नत्वस्य स(२)-समानाधिकरणकिञ्चिदवच्छिन्नयावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वरूपस्य विवक्षितत्वेन अनवच्छिन्नाधिकरणताभिः

१) उभयाभावघटकाभूतैकावच्छेदकावच्छिन्नत्वे चेति पा०।

२) स्वपद प्रतियोगिपरं न तु तदभावाधिकरणतापरम्।

सहावच्छिन्नाधिकरणतानामेकावच्छेदकावच्छिन्नत्वासम्भवेऽपि क्षतिविरहात्। अथवा यावद्विशेषाभाववत्त्वमित्यनेन यावत्तदीयविशेषाभावत्वावच्छिन्ननिरूपितमेकाधिकरणत्वं विवक्षितं न तु तत्समुदायः (१) एकावच्छेदकावच्छिन्नत्वञ्च एकमात्रवृत्तिधर्म्मावच्छिन्नावच्छेदकावच्छिन्नत्वं न त्वभिन्नावच्छेदककत्वं, वृक्षावृत्तिकपिसंयोगाना वृक्षनिष्ठा अभावा यद्यपि व्याप्यवृत्तयः तथाप्यव्याप्यवृत्तिसाधारणयावत्त्वेन तेषामव्याप्यवृत्तित्वात् तत्साधारणयावत्त्वावच्छिन्ननिरूपिताधिकरणता एकमात्रवृत्तितत्तन्मूलत्वाद्यवच्छिन्नतत्तन्मूलादिरूपावयवावच्छिन्नेति तन्नोभयाभावोऽक्षत इति न साध्योपाध्योः सामान्यव्याप्तिभङ्गः, पक्षनिष्ठसंयोगसामान्यीययावद्विशेषाभावाधिकरणता च न प्रत्येकावच्छेदकावच्छिन्ना अस्यां दिशि अत्र देशे वा गगने न संयोगइत्यादिप्रतीतिविरहात् अपि तु यत्किञ्चिदनुगतधर्म्मावच्छिन्नावच्छेदकावच्छिन्ना यावत्संयोगाभाववद्गगनमित्यादिप्रत्ययात्, एकरूपावच्छिन्नस्य प्रतियोग्यभावाधिकरणतावच्छेदकत्वे विरोधात् एकस्यापि विशेषरूप-सामान्यरूपाभ्यामुभयावच्छेदकत्वोपगमात् तथाच पक्षनिष्ठसंयोगविशेषाभावानां यावत्त्वावच्छिन्ननिरूपिताधिकरणता न निरुक्तैकावच्छेदकावच्छिन्नत्ववतीति तस्या उक्तोभयवत्त्वादुपाधेः साधनाव्यापकत्वमिति वदन्ति।

वस्तुतस्तु अनवच्छिन्नयावद्विशेषाभाववत्त्वमेवोपाधिः तादृशोपाधिना साध्यस्य सामान्यव्याप्तिविरहेऽपि संयोगसामान्या-

(१) यावद्विशेषाभावाधिकरणतासमुदाय।

भावरूपपक्षधर्मितसाध्यव्यापकतया तादृशोपाधेः सत्प्रतिपक्षे व्यापकत्वमव्याहतं तादात्म्येन साध्यवतोऽप्युपाधिव्याप्यतया तादृशोपाध्यभावेन संयोगसामान्याभावरूपसाध्यवद्भेदोऽन्यत्राप्रसिद्धोऽपि (१) साधयितुं शक्यत एव अभावसाध्यकव्यतिरेकिणि प्रतियोगिमात्रप्रसिद्धेरपेक्षितत्वात् उपाध्यभावेन साध्याभावसाधनन्तु न सम्यक्संयोगरूपस्य तस्य साधने सिद्धसाधनात् सत्प्रतिपक्षानिर्वाहात् सिद्धसाधनादितः साध्याभावादिसाधनासम्भवेऽपि प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकतया गृह्यमाणोपाधितावच्छेदकावच्छिन्नाभाववत्ताज्ञानात् पक्षे साध्यानुमितिप्रतिरोधः (२) एवेति सारम् । अथवा प्रतियोग्यधिकरणत्वरूपपक्षधर्मावच्छिन्नसामान्याभावरूपसाध्यव्यापकतया एकावच्छेदेनेत्यादेर्यथाश्रुतस्यैवोपाधितानिर्वाहः, यत्र प्रतियोगिमति यस्य सामान्याभावस्तत्रैकावच्छेदेन तस्य यावद्विशेषाभाववत्त्वमिति सामान्यव्याप्तेः कपिसंयोगादिमतः कपिसंयोगादिसामान्याभावाधिकरणवृक्षादेरेकावच्छेदेन कपिसंयोगादिविशेषाभावकूटवत्त्वनियमेन सुग्रहत्वात्, गुणादावेकावच्छेदेन यावद्विशेषाभावासत्त्वेऽपि तत्र तत्प्रतियोग्यसत्त्वेनावच्छिन्नसाध्यव्यापकत्वाक्षतेः द्रव्ये च प्रतियोगिसत्त्वविशिष्टयावत्संयोगविशेषाभावाधिकरणे एकावच्छेदेन तदीययावद्विशेषाभावासत्त्वात् साधनाव्याप

(१) पक्षे धर्मिण्यपीत्यर्थः ।

(२) तद्धर्मावच्छिन्नं प्रति तद्धर्मे तद्व्यापकतावच्छेदकत्वप्रकारकमहितत्द्धर्मावच्छिन्नाभावव्याप्यवत्त्वेन प्रतिबन्धकत्वादिति भावः ।

कत्वं तस्य, वृक्षादिवृत्तिकपिसंयोगादिविशेषाभावाधिकरणता-कूटान्तर्गतकतिपयाभावाधिकरणतानामनवच्छिन्नत्वेऽपि तत्कूटस्य एकावच्छेदकावच्छिन्नत्वं पूर्व्ववदुपपादनीयम् । अथैतादृशोपाधेर्व्यभिचारोन्नायकत्वं सत्प्रतिपक्षोत्थापकत्वं वा न सम्भवति प्रकृतसाध्य-व्यापकस्य एकावच्छेदकावच्छिन्नसंयोगीययावद्विशेषाभाववत्त्वस्या-सिद्धेः द्रव्ये तदीययावद्विशेषाभाववत्त्वस्यावच्छिन्नत्वेऽपि एकाव-च्छेदकावच्छिन्नत्वाभावात् गुणे च तस्यावच्छिन्नताया एवाभावात् प्रतियोगिमत्त्वविशिष्टकपिसंयोगीयसामान्याभावव्यापकस्य तदीयै-कावच्छेदकावच्छिन्नयावद्विशेषभाववत्त्वस्य प्रसिद्धत्वेऽपि तदभावेन प्रकृतसाध्यवद्भेदसाधनं न सम्भवति तस्य प्रकृतसाध्याव्यापकत्वात् प्रतियोगिमत्त्वविशिष्टकपिसंयोगादिसामान्याभाववद्भेदस्य कपि-संयोगादिरूपप्रतियोगिशून्ये हेतुमति साध्यमानो न कपिसंयोगा-दिसामान्याभाववद्भेदपर्य्यवसायी प्रतियोगिमद्भेदस्याबाधात् प्रति-योगिमति चैकावच्छेदकावच्छिन्नतदीययावद्विशेषाभावसत्त्वेन तद्-वत्ताभावादिरूपहेतोरसिद्धिरिति (१) न व्यभिचारोन्नयनसम्भव-इति (२) मैवं, क्वचिद्द्रव्ये जलादिसंयोगवति तत्सामान्याभावस्य सत्त्वे एकावच्छेदकावच्छिन्नतदीययावद्विशेषाभावसत्त्वात् तदीय-प्रतियोगिमत्त्वविशिष्टतत्सामान्याभावव्यापकं एकावच्छेदकाव-च्छिन्नतदीययावद्विशेषाभाववत्त्वं यावद्द्रव्ये सर्व्वावयवावच्छेदेन विभिन्ना जलादिसंयोगव्यक्तय वर्त्तन्ते यावद्विशेषाभावरूप-

(१) तादृशाभावादिरूपहेतोरसिद्धिरिति पा० ।

(२) न व्यभिचारोद्भावननिर्व्वाह इतीति पा० ।

हेतुमति एकावच्छेदकावच्छिन्नयावद्विशेषाभावरूपोपाध्यभावेन प्रतियोगिमत्त्वविशिष्टसामान्याभाववद्भेदस्य सिद्धौ बाधकाभावात्, प्रतियोगिमति तत्र विशेष्यवद्भेदपर्य्यवसानेन व्यभिचारसिद्धा सामान्यव्याप्तिभङ्गात्। संयोगत्वे गगनादिनिष्ठाभावप्रतियोगितावच्छेदकत्वसाधकानुमानौपयिकदर्शितव्याप्तावपि एकावच्छेदकावच्छेद्य-स्व(१)समानाधिकरणोभयावृत्तिधर्म्मावच्छिन्नप्रतियोगिताकयावदभावाधिकरणताशून्यगगनादिकं यद्यत् तदन्यत्वस्योपाधित्वं बोध्यम्।

अनुमानदीधितिः।

यत्तदर्थयोरननुगमात् एकावच्छेदेन यावद्विशेषाभाववत्त्वस्योपाधित्वाच्च। एतेन अयं संयोगसामान्याभाववान् संयोगयावद्विशेषाभाववत्त्वादिति परास्तं व्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेरुपाधित्वाच्च। न च प्रतियोग्यनवच्छेदकतयैव द्रव्यत्वादेरभावावच्छेदकत्वं, गुणादानवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसङ्गात्। यथा च घटपूर्व्ववर्त्तित्वस्य प्रतिदण्डं वह्निसामानाधिकरण्यस्य वा प्रतिधूमं भिन्नत्वेऽपि दण्डत्वं धूमत्वं वा तत्सामान्यस्यावच्छेदकं तथैव संयोगसामान्यस्यावच्छेदकं द्रव्यत्वादिकमित्यस्यापि सुवचत्वाच्चेति सम्प्रदायविदः।

---

१ स्वपद संयोगादिपरम।

गादाधरी विवृतिः ।

'एतेनेति अनवच्छिन्नयावत्संयोगविशेषाभाववत्त्वस्योपाधित्वेनेत्यर्थः, 'इति' विशेषव्याप्त्युपष्टम्भमनुमानं, 'परास्तं', दूषणान्तरमाह, 'व्यर्थेति तन्मते संयोगसामान्याभावस्य केवलान्वयितया अभाववत्त्वस्यैव तद्व्याप्यतावच्छेदकत्वेन इतरांशस्य व्यर्थत्वादित्यर्थः। नन्वभावादित्येव हेतुरस्तु इत्यत आह, 'अप्रयोजकत्वादिति व्याप्तिग्राहकतर्कशून्यत्वादित्यर्थः, विशेषव्याप्तावुपाध्यन्तरमपि सुलभमित्याह, 'निर्गुणत्वादेरिति, आदिना निष्परिमाणत्वादेरपि परिग्रहः। यत् यद्धर्माश्रयानवच्छेदकं तत्तद्धर्मावच्छिन्नाभावावच्छेदकमिति व्याप्त्युपष्टम्भं वृक्षत्वादेः संयोगसामान्याभावावच्छेदकत्वसाधकमनुमानमाशङ्क्य निराकुरुते, 'न चेति, 'गुणाद्यनवच्छेदकेति गुणत्वस्याश्रयानवच्छेदकेत्यर्थः, 'तदभावेति गुणत्वावच्छिन्नाभावेत्यर्थः, तथाच गुणत्वावच्छिन्नाभावस्यापि अव्याप्यवृत्तिताप्रसङ्ग इति भावः। घटादौ द्रव्यत्वाद्यवच्छेदेन घटत्वाभावप्रसङ्गः घटत्वादेर्व्याप्यवृत्तितया तदवच्छेदकाप्रसिद्ध्या तदनवच्छेदकत्वरूपापादकाप्रसिद्धेर्न सम्भवतीति नाभिहितम्। गुणत्वाद्याश्रयस्य संयोगादेरवच्छेदकत्वप्रसिद्ध्या न गुणत्वाद्यवच्छिन्नाभावावच्छेदकत्वापादकाप्रसिद्धिरिति भावः। ननु यद्धर्माश्रयानवच्छेदकमित्यत्र यत्पदेन व्याप्यवृत्त्यवृत्तिधर्म एव विवक्षणीयः गुणत्वादेश्च व्याप्यवृत्तिरूपादिवृत्तितया तदाश्रयानवच्छेदकत्वस्य न तदवच्छिन्नाभावावच्छेदकतापादकता इत्याशङ्क्य वृक्षत्वादौ संयोगत्वाश्रयानवच्छेदकत्वरूपसंयोगत्वावच्छिन्नाभावावच्छेदकत्वसाधक-

हेतोरसिद्धिमाह, 'यथा चेति, 'घटपूर्व्ववर्त्तित्वस्येति दण्डगत घटकारणताघटकतदव्यवहितपूर्व्वकालसम्बन्धस्येत्यर्थः, 'प्रतिदण्डं भिन्नत्वेऽपि' 'दण्डत्वं तत्सामान्यावच्छेदकमित्यग्रिमेनान्वयः, 'प्रतिदण्डं भिन्नत्वेऽपि' इत्यनेन च दण्डत्वं तत्प्रत्येकातिप्रसक्तमिति सूचितं, एवमग्रेऽपि, 'तत्सामान्येति घटपूर्व्ववर्त्तितात्वावच्छिन्नेत्यर्थः, प्रत्येकातिप्रसक्तत्वेऽपि अवच्छेद्यतावच्छेदकानुगतरूपावच्छिन्नानतिप्रसक्ततया तस्यावच्छेदकत्वं, अन्यथा घटकारणतावच्छेदकत्वमेव तस्य भज्येतेति भावः। ननु दण्डत्वस्य घटनियतपूर्व्ववर्त्तितावच्छेदकत्वं न घटनियतपूर्व्ववर्त्तितायाः स्वरूपसम्बन्धरूपमवच्छेदकत्वं अपितु तदव्यवहितपूर्व्वकालनिष्ठाभावप्रतियोगितानवच्छेदकत्वरूपं पारिभाषिकमेव तच्च(१) अतिप्रसक्तेऽनतिप्रसक्ते च निराबाधमेव(२) स्वरूपसम्बन्धरूपावच्छेदकताया एवावच्छेद्यानतिप्रसक्तत्वनियतत्वादिति (३) प्रत्येकातिप्रसक्तस्य सामान्यानतिप्रसक्तत्वेन सामान्यरूपावच्छिन्नावच्छेदकत्वे दृष्टान्तान्तरमाह, 'वह्निसामानाधिकरण्यस्येति, 'प्रतिधूमं भिन्नत्वेऽपि' 'धूमत्वं तत्सामान्यावच्छेदकमित्यन्वयः, 'तत्पदेनात्र वह्निसामानाधिकरण्यपरामर्शः, धूमत्वस्य तदनवच्छेदकत्वे तस्य वह्निव्याप्यतावच्छेदकत्वं नोपपद्यते। न च

(१) तथाचातिप्रसक्तस्य तादृशावच्छेदकत्वं स्वीक्रियते न तु स्वरूपसम्बन्धरूपावच्छेदकत्वम् अतिप्रसक्तत्वादिति भावः।

(२) अतिप्रसक्तेऽपि वर्त्तत इति पा०।

(३) तथाच घटपूर्व्ववर्त्तिताया अतिप्रसक्तत्वेन दण्डत्वस्य कारणतावच्छेदकत्वं न तु दण्डत्वस्य कारणतानतिप्रसक्तमिति अतिप्रसक्तस्यावच्छेदकत्वं [illegible] इति भावः।

व्याप्यतावच्छेदकत्वमपि स्वविशिष्टव्यापकसाध्यकत्वरूपं पारिभाषिकमेव तच्चातिप्रसक्तसाधारणमिति न दृष्टान्तसङ्गतिरिति वाच्यम् । साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वं व्याप्तिस्तत्तावच्छेदकत्व स्वरूपसम्बन्धविशेषः, अतएव यत्र व्यर्थविशेषणघटितनीलधूमत्वादिना हेतुता तत्र व्याप्यत्वासिद्धिरिति प्राचीनमतानुसारेणैतदभिधानात्, अन्यथा पुनः स्वरूपसम्बन्धरूपकारणत्वप्रतियोगित्वादिनिरूपितमनुगतधर्म्मनिष्ठं स्वरूपसम्बन्धरूपमवच्छेदकत्वं दृष्टान्ततया बोध्यं, संयोगसामान्यस्य संयोगत्वरूपावच्छेद्यतावच्छेदकरूपावच्छिन्नस्य सुवचत्वाच्चेति प्रत्येकं संयोगादिव्यक्त्यतिप्रसक्तस्यापि द्रव्यत्वादेस्तद्रूपावच्छिन्नानतिप्रसक्तत्वादिति भावः । यद्यप्येवमपि प्रमेयत्वादेः संयोगसामान्यातिप्रसक्तत्वेन तत्सामान्यावच्छेदकत्वासिद्धा उक्तव्याप्तिबलात् तदवच्छेदेन संयोगसामान्याभावसिद्धिर्न शक्यते निराकर्त्तुं, तथापि प्रतियोगिमत्त्वबद्देश-कालयोरेव प्रतियोग्यनवच्छेदकयोरभावावच्छेदकत्वनियमः तयोरेव (१) तदनुभवात् न तु प्रतियोग्यनवच्छेदकमात्रस्य मानाभावादित्यत्र तात्पर्य्यम् । द्रव्ये संयोगसामान्याभावस्य कालभेदावच्छेदेन स्वयमनुपदं व्यवस्थापनीयतया 'सम्प्रदायविदः' इत्यनेनास्वरसोदर्शितः (२) ।

---

(१) प्रतियोग्यनवच्छेदकयोर्देश-कालयोरेव तदभावावच्छेदकत्वनियम, न तु देशकालभिन्नस्य प्रतियोग्यनवच्छेदकधर्म्मस्यापि तदभावावच्छेदकत्वनियम इत्यर्थः ।

(२) 'सम्प्रदायविद' इत्यनेनास्वरसोद्भावनं कृतमिति पा० ।

हेतोरसिद्धिमाह, 'यथा चेति, 'घटपूर्व्ववर्त्तित्वस्येति दण्डत्व घटकारणताघटकतदव्यवहितपूर्व्वकालसम्बन्धस्येत्यर्थः, 'प्रति भिन्नत्वेऽपि' 'दण्डत्वं तत्सामान्यावच्छेदकमित्यग्रिमेनान्वयः, 'प्र दण्डं भिन्नत्वेऽपि' इत्यनेन च दण्डत्वं तत्प्रत्येकातिप्रसक्तमिति सूचि एवमग्रेऽपि, 'तत्सामान्येति घटपूर्व्ववर्त्तितात्वावच्छिन्नेत्यर्थः, प्र कातिप्रसक्तत्वेऽपि अवच्छेद्यतावच्छेदकानुगतरूपावच्छिन्नान प्रसक्ततया तस्यावच्छेदकत्वं, अन्यथा घटकारणतावच्छेदकत्व तस्य भज्येतेति भावः। ननु दण्डत्वस्य घटनियतपूर्व्ववर्त्तितावच्छे दकत्वं न घटनियतपूर्व्ववर्त्तितायाः स्वरूपसम्बन्धरूपमवच्छेदक अपितु तदव्यवहितपूर्व्वकालनिष्ठाभावप्रतियोगितानवच्छेदकत्व पारिभाषिकमेव तच्च(१) अतिप्रसक्तेऽनतिप्रसक्ते च निराबाधमेव स्वरूपसम्बन्धरूपावच्छेदकताया एवावच्छेद्यानतिप्रसक्तत्वनियत दिति (२) प्रत्येकातिप्रसक्तस्य सामान्यानतिप्रसक्तत्वेन सामान्य रूपावच्छिन्नावच्छेदकत्वे दृष्टान्तान्तरमाह, 'वह्निसामानाधिक रण्यस्येति, 'प्रतिधूमं भिन्नत्वेऽपि' 'धूमत्वं तत्सामान्यावच्छेदकमि त्यन्वयः, 'तत्पदेनात्र वह्निसामानाधिकरण्यपरामर्शः, धूमत्व तदनवच्छेदकत्वे तस्य वह्निव्याप्यतावच्छेदकत्वं नोपपद्यते। न च

---

(१) तथाचातिप्रसक्तस्य तादृशावच्छेदकत्वं स्वीक्रियते न तु स्वरूपसम्बन्धरूपावच्छेदकत्वं अतिप्रसक्तस्येति भावः ।

(२) अतिप्रसक्तेऽपि वर्त्तते इति पा० ।

(३) तथाच घटपूर्व्ववर्त्तितायाः अतिप्रसक्तत्वेन दण्डत्वस्य कारणतावच्छेदकत्वं स्वीक्रियते न तु दण्डत्वं कारणतानतिप्रसक्तमिति अतिप्रसक्तस्यावच्छेदकत्वं दृष्टान्तासम्भव इति भावः ।

व्याप्यतावच्छेदकत्वमपि स्वविशिष्टव्यापकसाध्यकत्वरूपं पारिभाषिकमेव तच्चातिप्रसक्तसाधारणमिति न दृष्टान्तसङ्गतिरिति वाच्यम्। साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वं व्याप्तिस्तत्तावच्छेदकत्वं स्वरूपसम्बन्धविशेषः, अतएव यत्र व्यर्थविशेषणघटितनीलधूमत्वादिना हेतुना तत्र व्याप्यत्वासिद्धिरिति प्राचीनमतानुसारेणैतदभिधानात्, अन्यथा पुनः स्वरूपसम्बन्धरूपकारणत्वप्रतियोगित्वादिनिरूपितमनुगतधर्म्मनिष्ठं स्वरूपसम्बन्धरूपमवच्छेदकत्वं दृष्टान्ततया बोध्यं, संयोगसामान्यस्य संयोगत्वरूपावच्छेद्यतावच्छेदकरूपेणावच्छिन्नस्य सुवचत्वाच्चेति प्रत्येकं संयोगादिव्यक्त्यतिप्रसक्तस्यापि द्रव्यत्वादेस्तद्रूपावच्छिन्नानतिप्रसक्तत्वादिति भावः। यद्यप्येवमपि प्रमेयत्वादेः संयोगसामान्यातिप्रसक्तत्वेन तत्सामान्यावच्छेदकत्वासिद्धा एतद्व्याप्तिग्रन्थात् तदवच्छेदेन संयोगसामान्याभावसिद्धिर्न भवतीति निरावर्त्तुं, तथापि प्रतियोगिसमानदेश-कालयोरिव प्रतियोग्यसमान [illegible] त्वनियमः तयोरेव (१) तदनुभवात् न तु [illegible] वसाधस्य सामाभावादित्वत [illegible]। [illegible] भावस्य कालविशेषावच्छेदेन [illegible] दादिद, [illegible]।

(१) [illegible]

(२) [illegible]

अनुमानदीधितिः ।

नवीनास्तूत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रलयावच्छेदेन गगनादौ संयोगस्य सामान्याभावोवर्त्तते तथा धूमवत्यपि विरहो दहनस्य इह पर्व्वते नितम्बे हुताशनो न शिखरे इति प्रतीतेः संयोगेन द्रव्यस्याप्य-व्याप्यवृत्तित्वात् वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतो व्याप्य-वृत्तित्वस्यात्यन्तमसम्भावितत्वाच्च । एवं प्रतियोगिमतो-रपि काल-देशयोर्देश-कालभेदावच्छेदेन तदभावः । तथाच तत्तत्साध्यकाव्याप्तिवारणाय तत्, नोपादेयञ्च सर्व्वथैव व्याप्यवृत्तिसाध्यके साध्यादिभेदेन (१) व्याप्ति-भेदादिति वदन्ति ।

गादाधरी विवृतिः ।

'गुणस्य सामान्याभावोवर्त्तत इत्यन्वयः, ध्वंस-प्रागभावयोर-त्यन्ताभावविरोधिताया निराकृतत्वादिति भावः । एतेन तदव-च्छेदेन संयोगसामान्याभावोऽपि सुतरां वर्त्तते व्यापकधर्म्मावच्छि-न्नाभाववति व्याप्यधर्म्मावच्छिन्नाभाववत्त्वनियमादिति सूचितम् । न चोत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रागभाव एव न तु तत्सामान्यात्यन्ताभावोऽपि मानाभावात् इति वाच्यम् । तदा

---

(१) साध्य-साधनभेदेनेति पाठ कुत्रचित् पुस्तके वर्त्तते परन्तु स पाठो न भट्टाचार्य्यैर्धृत. ।

मुक्तं, व्याप्यवृत्तेरपि साध्यस्याऽव्याप्यवृत्तित्वभ्रमदशायां प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादेवानुमित्युपगमात्, व्याप्यवृत्तेरपि साध्यस्याव्याप्यवृत्तित्वभ्रमदशायां प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादेवानुमित्युपगमेऽपि व्याप्यवृत्तिसाध्यके सर्व्वत्र तादृशविशेषणोपादानानियमः तदघटिताया अपि व्याप्तेः सर्व्वत्रानुमित्यौपयिकत्वात् अव्याप्यवृत्तिसाध्यके तु सर्व्वत्र तदुपादाननियम एव तदघटितव्याप्तेरप्रसिद्धेरिति वार्थः । व्याप्यवृत्तिसाध्यकत्वञ्च स्वसमानाधिकरणाभावाप्रतियोगिसाध्यकत्वं, सत्तावान् द्रव्यत्वात् कालिकसम्बन्धावच्छिन्नाकाशाभावाभाववान् आत्मत्वादित्यादिकञ्च न तथा,(१) साध्यवति(२) कालात्मादौ कालिक-दैशिकविशेषणताभ्यां साध्याभावसत्त्वात्, अतस्तत्र प्रतियोगिवैयधिकरण्याविशेषितहेतुमन्निष्ठाभावाप्रतियोगित्वस्य साध्येऽसत्त्वेन व्याप्तेः प्रतियोगिवैयधिकरण्यघटितत्वनियमेऽपि न दोष (३) ।

केचित्तु व्याप्यवृत्तिसाध्यकत्वं यथाश्रुतमेव हेतुमत्त्वभावस्य दैशिकविशेषणतया वृत्तिर्व्विवक्षणीया अतो न हेतुमति कालादौ कालिकविशेषणतादिना साध्याभावसत्त्वेऽप्यव्याप्तिः भावस्याप्यभावत्वेन दैशिकविशेषणतया वृत्तिः प्रामाणिकी अतो नाभावसाध्यकव्यभिचारिण्यतिव्याप्तिः (४) यादृशप्रतियोगितानिरूपकाभावत्व-

---

(१) न व्याप्यवृत्तिसाध्यकमित्यर्थः ।

(२) एतत् द्रव्यादिकङ्गायामाह, साध्यवतीति ।

(३) प्रतियोगिवैयधिकरण्यघटितैव व्याप्तिरित्येवमपि न दोष इति भा० ।

(४) दैशिकविशेषणतया सत्ताद्यसाध्याभावाभावस्य वृत्तेरिति भावः ।

यत्तु प्रतियोग्यसमानाधिकरणेत्यत्र प्रतियोगिपदं स्वप्रतियोगिपरमवश्यं वाच्यम्, अन्यथा प्रतियोगित्वस्य सामान्यरूपेण केवलान्वयितया प्रतियोग्यसमानाधिकरणाभावस्यैव दुर्लभत्वापत्तेः । तथाच स्वपदस्य तत्तदभावपरतया तत्तदभावप्रतियोग्यसमानाधिकरणत्वविशिष्टत्वेन हेतुमद्वृत्तीनां तत्तदभावव्यक्तीनां प्रतियोगितावच्छेदकत्वाभावकूटज्ञानमनुमितिकारणं वाच्यम् तादृशञ्च ज्ञानमसर्व्वज्ञस्य दुर्घटं अतः प्रतियोगिपदस्य प्रकृतसाध्यार्थकतया साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टः सन् हेतुमद्वृत्तिरभाव एवानुगतरूपेण निवेश्यः, सद्धेतौ सर्व्वेषामेव हेतुसमानाधिकरणाभावाना सर्व्वत्र हेत्वधिकरणे साध्यसमानाधिकरणतया साध्यसामानाधिकरण्याभावविशिष्टस्य हेतुमद्वृत्तित्वं न प्रसिध्यतीति साध्याभावनिष्ठं साध्यसामानाधिकरण्यविशेषणं (१) तथा सति सद्धेतौ साध्याभावातिरिक्ताभावे तत्प्रसिद्धिसम्भवात् । व्यभिचारिणि च (२) व्यभिचारनिरूपकाधिकरण एव साध्याभावे साध्यसामानाधिकरण्याभावविशिष्टतया हेतुमद्वृत्तित्वमिति साध्याभावस्यापि लक्षणघटकतया नातिव्याप्ति, संयोगेन प्रमेयसामान्यसाध्यकसद्धेतौ साध्याभावातिरिक्ताभावाप्रसिद्ध्या हेतुमति साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टाभावाप्रसिद्धि--

---

वृत्तित्वस्यैवानुमानाङ्गत्वे तु व्यापकसामानाधिकरण्यस्य [illegible] स्वसाध्यके तादृशव्याप्तिपक्षधर्मताशालित्वेन [illegible] तद्धेतोरनुमितिकरणत्वं [illegible] सद्धेतौ [illegible] पा० ।

(१) साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावे निवेश्य इति पा० ।

(२) [illegible] ।

यत्तु प्रतियोग्यसमानाधिकरणेत्यत्र प्रतियोगिपदं स्वप्रतियोगिपरमवश्यं वाच्यम्, अन्यथा प्रतियोगित्वस्य सामान्यरूपेण केवलान्वयितया प्रतियोग्यसमानाधिकरणाभावस्यैव दुर्लभत्वापत्तेः। तथाच स्वपदस्य तत्तदभावपरतया तत्तदभावप्रतियोग्यसामानाधिकरण्यविशिष्टत्वेन हेतुमद्वृत्तीनां तत्तदभावव्यक्तीनां प्रतियोगितावच्छेदकत्वाभावकूटज्ञानमनुमितिकारणं वाच्यम् तादृशञ्च ज्ञानमसर्व्वज्ञस्य दुर्घटं अतः प्रतियोगिपदस्य प्रकृतसाध्यार्थकतया साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टः सन् हेतुमद्वृत्तिरभाव एवानुगतरूपेण निवेश्यः, सद्धेतौ सर्व्वेषामेव हेतुसमानाधिकरणाभावानां सर्व्वत्र हेत्वधिकरणे साध्यसमानाधिकरणतया साध्यसामानाधिकरण्याभावविशिष्टस्य हेतुमद्वृत्तित्वं न प्रसिध्यतीति साध्याभावनिष्ठं साध्यसामानाधिकरण्यविशेषणं (१) तथा सति सद्धेतौ साध्याभावातिरिक्ताभावे तत्प्रसिद्धिसम्भवात्। व्यभिचारिणि च (२) व्यभिचारनिरूपकाधिकरण एव साध्याभावे साध्यसामानाधिकरण्याभावविशिष्टतया हेतुमद्वृत्तित्वमिति साध्याभावस्यापि लक्षणघटकतया नातिव्याप्तिः, संयोगेन प्रमेयसामान्यसाध्यकसद्धेतौ साध्याभावातिरिक्ताभावाप्रसिद्धया हेतुमति साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टाभावाप्रसिद्धि—

वृत्तित्वस्यैवानुमानाङ्गता न तु व्यापकसामानाधिकरण्यस्य गुरुशरीरत्वेऽपि स्यात्, एकसाध्यके तादृशव्याप्तिपक्षादनुमितिरन्यत्रापि तज्ज्ञानादनुमितेरानुभविकत्वात् नापक्षस्यार्हतीति चेत्, तुल्यं प्रकृतेऽपीति मा०।

(१) साध्याभावनिष्ठसाध्यसामानाधिकरण्यस्याभावो निवेश्य इति मा०।

(२) संयोगी द्रव्यत्वादित्यादौ द्रष्टव्यम्।

विशिष्टस्य दैशिकविशेषणतया हेतुमति वृत्तिस्तादृशप्रतियोगितानवच्छेदकत्वविवक्षया कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् इत्यादावव्याप्तेर्निरासः तत्र आकाशाभावस्याकाशाभावत्वेनैव दैशिकविशेषणतया आत्मनि वृत्तिर्न तूक्तसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन, आत्मनि तादृशाभावाभावो नास्तीत्यप्रतीतेः, अव्याप्यवृत्तिसाध्यकेऽपि संयोगाभाववान्द्रव्यगुणत्वादित्यादौ(१) अनुमित्यौपयिकद्विविधव्याप्तेः सम्भवेन सर्व्वत्रैवेत्युक्तं तावता अव्याप्यवृत्तिसाध्यकेऽपि क्वचित्तद्घटितव्याप्तिसम्भव इति सूचितमित्याहुः ।

यत्तु 'व्याप्यवृत्तिसाध्यके' अव्याप्यवृत्तित्वग्रहाविषयसाध्यके, सर्व्वथैवासमानाधिकरणान्तस्यानुपादेयतया तत्र लाघवेन प्रतियोग्यसामानाधिकरण्याघटितव्याप्तेरेवानुमानाङ्गतास्वीकारादिति व्याख्यानं, तदसत्, तत्रापि शब्दादिना प्रतियोग्यसामानाधिकरण्यघटितव्याप्तेर्यदा ग्रहस्तदा अनुमितेरुत्पादाय तादृशव्याप्तेरनुमानाङ्गत्वस्योपगन्तव्यत्वात्, अन्यथा यादृशव्यतिरेकिसाध्ये न केवलान्वयित्वभ्रमस्तादृशसाध्यके लाघवेन साध्याभाववदवृत्तित्वस्यैव व्याप्तित्वोपगमप्रसङ्गात् । केवलान्वयिनो यस्य साध्यस्य न व्यतिरेकित्वभ्रमविषयता तत्साध्यके हेतुसामानाधिकरण्यविशेषणपरित्यागस्यापि प्रसङ्गाच्च (२) ।

---

(१) संयोगाभाववान् द्रव्यत्वादित्यादौ प्रतियोगिवैयधिकरण्याघटितव्याप्तिविरहात् तत्तद्घटितव्याप्तेरपि हेतुरिति भावः ।

(२) अन्यथा यादृशव्यतिरेकिसाध्ये न केवलान्वयित्वभ्रमस्तत्र साध्याभाववद्

रिति साध्यतावच्छेदकावच्छिन्नाभावनिष्ठसाध्यसामानाधिकरण्यस्याभावो निवेश्यः। एवञ्च व्याप्यवृत्तिसाध्यके साध्यतावच्छेदकावच्छिन्नसाध्याभावनिष्ठसाध्यसामानाधिकरण्याप्रसिद्धा तादृशव्याप्तिर्न प्रसिद्ध्यतीति तत्साध्यके प्रतियोग्यसामानाधिकरण्यादिनैव व्याप्तिरित्युक्तं 'नोपादेयञ्चेत्यादिना, तदपि न, साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यविशिष्टीभूतसाध्याभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वनिवेशनप्रयोजनाभावात् व्याप्यवृत्तिसाध्यकेऽपि सम्बन्धान्तरावच्छिन्नसाध्याभावे साध्यसामानाधिकरण्यप्रसिद्धा तत्राप्युक्तव्याप्तिप्रसिद्धेः (१)।

व्याप्यवृत्तिसाध्यकस्थले व्याप्तिर्द्विविधा न त्वव्याप्यवृत्तिसाध्यके इति साध्यादिभेदेन व्याप्तिभेदाभावे न सम्भवतीत्यत आह 'साध्यादिभेदेनेति साध्यतावच्छेदकादिविशिष्य व्याप्तिघटकतद्भेदेन तद्भेदस्यावश्यकत्वादित्यर्थः।

अनुमानदीधितिः।

प्रतियोग्यसामानाधिकरण्यञ्च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यं तेन अयं गुण-कर्मान्यत्वविशिष्टसत्तावान् जातेः भूतत्व-मूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ नातिप्रसङ्गः। न चोभयत्वमेकविशिष्टापरत्वं विशिष्टञ्च केवलादन्यदिति तदभावो सत्यपि

---

१ तत्राप्युक्तव्याप्तेरपि बोधेरिति पा०।

सहजत एव प्रतियोगिव्यधिकरण इति वाच्यम्, उभयत्वं हि न विशिष्टत्वादनतिरिक्तं न वा तदवच्छिन्नाभावस्तदवच्छिन्नाभावात् वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वस्योभयत्वेन तदभावस्य च प्रत्यक्षसिद्धत्वात् । न च तत्र व्याप्तिरेवोभयत्वाधिकरणस्य मूर्त्तत्वस्य मनसि सत्त्वादिति वाच्यम् । तथात्वेऽप्युभयत्वेन रूपेण तत्रासत्त्वात् नात्रोभयमिति प्रतीतेर्दुर्वारत्वात् ।

गादाधरी विवृतिः ।

यद्यपि जात्यादौ गुणकर्मान्यत्वसामानाधिकरण्योपलक्षितस्य सत्तादेर्व्याप्तिरस्त्येव गुणादौ तदुपलक्षितसत्ताद्यनुमितेः प्रमात्वात्, तथापि गुणादौ विशिष्टसत्तादिप्रतियोगिकवैशिष्ट्यावगाहनुमितेर्भ्रमत्वात्(१) तत्र तादृशानुमित्यौपयिकव्याप्तिर्नास्ति [illegible] मर्शादपि भ्रमः स्यादिति तादृशानुमित्यौपयिकव्याप्ति[illegible] [illegible]ते न स्वीकर्त्तुं शक्यते अत साध्यतावच्छेदक[illegible] वानुमित्यौपयिकव्याप्तिशरीरे प्रतियोगितावच्छेदक[illegible] करणपर्यन्तं निवेश्य तत्र तादृशव्याप्ति[illegible] नाधिकरणत्वमिति । न च तथापि [illegible]

गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादौ बाधेनैव हेतोर्दुष्टत्वोपग-
द्रव्यपक्षक-तादृशसाध्यक-जात्यादिहेतोश्च समीचीनतया एवोप-
मात् बाधानतारदशायां गुणादौ जात्यादिलिङ्गकविशिष्टसत्ता-
शिष्ट्यानुमितिर्भ्रमरूपा प्रमात्मकपरामर्शादपि (१) स्वीक्रियत ए-
गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ बाध-
नंतारदशायां प्रमात्मकपरामर्शात् विशिष्टानुयोगिकवैशिष्ट्यावग-
हिन्या भ्रमानुमितेर्मणिकारानुमतत्वमिति वाच्यम्। भ्रमानुमि-
तिजनकपरामर्शस्य भ्रमत्वसम्भवे तदुपादानमावश्यकमित्याशया
गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ परा-
मर्शस्य कथञ्चिदपि भ्रमत्वासम्भवेनागत्या प्रमापरामर्शाद्भ्रमानु-
मितिस्वीकारात् गुणो विशिष्टसत्तावान् जातिमत्त्वादित्यादिवि-
शिष्टप्रतियोगिकवैशिष्ट्यविषयकानुमितिस्थलमुपेक्ष्य गन्धप्रागभाव-
वान् घटो गन्धवान् पृथिवीत्वादित्यादिविशिष्टानुयोगिकवैशिष्ट्य-
विषयकानुमितिस्थलमसिद्धि-व्यभिचारासङ्कीर्णबाधोदाहरणतेना-
भिहितवतो मणिकृतोऽप्युक्तस्थले व्याप्तिर्नास्तीत्याशय उन्नीयते। [illegible]
विशिष्टनिरूपित एव समवायादिविशेष्याविरोधिनो विशिष्टा-
भावस्य प्रतियोगितावच्छेदकसम्बन्धः शुद्धसमवायादेस्तथात्वे
दण्डाद्युपलक्षितरूपादिसत्त्वविरोधितादृशरूपाद्यभावात् तद्-
विरोधिविशिष्टरूपाद्यभावेऽव्याप्त्यनिस्तारात्। न च तद्-
र्शिनत्तरूपाद्यभावस्य स एव न प्रतियोगितावच्छेदकः कथं न
प्रतियोगितावच्छेदकत्वेन तत्र प्रतियोगितावच्छेदकतया प्रति

(१) भ्रमात्मकपरामर्शादपीति पा।

योगिनि विशेषणत्वात् अताद्दशस्यैव चोपलक्षणत्वात् इति ताद्दशा-
भावयोर्विशेष इति वाच्यम् । उपलक्षणेन दण्डादिना व्यावृत्त-
प्रतियोगिनिष्ठप्रतियोगितायां पुरुषत्वादेरतिप्रसक्ततया तन्मात्रे
तदवच्छेदकतायाः पर्य्याप्त्यसम्भवेन दण्डादेरपि तदवच्छेदक-
कोटाववश्यमन्तर्भावात् । अतएव पुरुषादिमात्रेण न दण्डाद्युप-
लक्षितपुरुषाद्यभावस्य विरोधः तदवच्छिन्नाभावस्यैव तद्विशिष्टा-
भावत्वे सत्तान्यपृथिवीसमवेतशून्य वायुत्वादित्यादौ ग्रन्थकृतां कूट-
घटितलक्षणातिव्याप्तिदानमपि विरुध्येत पृथिवीसमवेतत्वविशिष्टा-
भावस्य वाय्वादौ सत्त्वेन वायुत्वादेस्तत्र साध्ये सद्धेतुत्वादिति चेन्न,
विशिष्टनिरूपितसम्बन्धस्य विशिष्टाभावप्रतियोगितावच्छेदकत्व
सर्व्वत्र न सम्भवतीति प्रागुक्तत्वात्, अगत्या विशिष्टाभावप्रतियोगिता
विशेषणान्तर्भावेन पर्य्याप्ता उपलक्षिताभावप्रतियोगिता तु दण्डादि-
रूपावच्छेदकोपलक्षितविशेष्य एव पर्य्याप्ता इत्युपगम्य तयोर्विशेषस्य
उपपादनीयत्वात् । विशिष्टस्यातिरिक्ततामते विशिष्टसत्ताभावः
सद्धेतव एव प्रतियोग्यसमानाधिकरण इत्युभयसाध्यकानुसरण,
'नातिप्रसङ्ग इति हेतुमति विशिष्टाभावादेः शुद्धप्रतियोगिसामा-
नाधिकरण्यसत्त्वेऽपि विशिष्टप्रतियोगिसामानाधिकरण्यविरहात्
न भ्रमानुमितिजनकपरामर्शस्य प्रमात्वप्रसङ्ग इत्यद्धे.। व्याप्य-
वृत्तिसाध्यकेऽपि प्रतियोगिवैयधिकरण्यावगाहिपरामर्शस्यानुमिति-
हेतुतया एतत्साध्यस्य व्याप्यवृत्तित्वेऽपि नातिप्रसङ्गाप्रसक्तिः ।
ननु मूर्त्त्वादिहेतौ मूर्त्त्वादिविशिष्टमूर्त्तत्वत्वादिरूपतदुभयवत्त्वाव-
च्छिन्नस्यैव न व्याप्तिः, न तु तदुभयवृत्तिहेतोर्विशिष्टविषयत्वप-

गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादौ बाधेनैव हेतोर्दुष्टत्वोपपत्तेः द्रव्यपञ्चक-तादृशसाध्यक-जात्यादिहेतोश्च समीचीनताया एवोपपत्तेः मात् बाधानतारदशाया गुणादौ जात्यादिलिङ्गकविशिष्टसत्तावैशिष्ट्यानुमितिर्भ्रमरूपा प्रमात्मकपरामर्शादपि (१) स्वीक्रियत एव। गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ बाधानतारदशायां प्रमात्मकपरामर्शात् विशिष्टानुयोगिकवैशिष्ट्यावगाहिन्या भ्रमानुमितेर्मणिकारानुमतत्वमिति वाच्यम्। भ्रमानुमितिजनकपरामर्शस्य भ्रमत्वसम्भवे तदुपादानमावश्यकमित्याशयात्। गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ परामर्शस्य कथञ्चिदपि भ्रमत्वासम्भवेनागत्या प्रमापरामर्शाद्भ्रमानुमितिस्वीकारात् गुणो विशिष्टसत्तावान् जातिमत्त्वादित्यादिविशिष्टप्रतियोगिकवैशिष्ट्यविषयकानुमितिस्थलमुपेक्ष्य गन्धप्रागभाववान् घटो गन्धवान् पृथिवीत्वादित्यादिविशिष्टानुयोगिकवैशिष्ट्यविषयकानुमितिस्थलमसिद्धि-व्यभिचारासङ्कीर्णबाधोदाहरणत्वेनाभिहितवतो मणिकृतोप्युक्तस्थले व्याप्तिर्नास्तीत्याशय उन्नीयते। यत विशिष्टनिरूपित एव समवायादिर्विशेष्याविरोधिनो विशिष्टाभावस्य प्रतियोगितावच्छेदकसम्बन्धः शुद्धसमवायादेस्तथात्वे दण्डाद्युपलक्षितपुरुषादिसत्त्वविरोधितादृशपुरुषाद्यभावात् तदविरोधिविशिष्टपुरुषाद्यभाववैलक्षण्यानिर्वाहात्। न च तदुपलक्षितपुरुषाद्यभावस्य स धर्मो न प्रतियोगितावच्छेदकः अपि तु प्रतियोगितासमानाधिकरण एव प्रतियोगितावच्छेदकत्वेन प्रति

(१) सविकल्पपरामर्शादपीति पा०।

योगिनि विशेषणत्वात् अतादृशस्यैव चोपलक्षणत्वात् इति तादृशा-
भावयोर्विशेष इति वाच्यम्। उपलक्षणेन दण्डादिना व्यावृत्त-
प्रतियोगिनिष्ठप्रतियोगितायाः पुरुषत्वादेरतिप्रसक्ततया तन्मात्रे
तदवच्छेदकतायाः पर्य्याप्तिसम्भवेन दण्डादेरपि तदवच्छेदक-
कोटावनन्तर्भावात्। अतएव पुरुषादिमात्रेण न दण्डाद्युप-
लक्षितपुरुषाद्यभावस्य विशेषः तदवच्छिन्नाभावस्यैव तद्विशिष्टा-
भावत्वे सत्तान्यवृत्तिपृथिवीसमवेतत्वशून्य वायुत्वादिमत्यादौ [illegible] कूट-
घटितलक्षणातिव्याप्तिवारणमपि विरुद्धेन पृथिवीसमवेतत्वविशिष्टा-
भावस्य वाय्वादौ सत्त्वेन वायुत्वादिमति साध्ये सद्धेतुत्वादिति चेत्,
विशिष्टनिरूपितसम्बन्धस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वं
सर्व्वत्र न सम्भवतीति प्रागुक्तत्वात् अगत्या विशिष्टाभावप्रतियोगिता
विशेषणान्तर्भावेन पर्य्याप्ता उपलक्षिताभावप्रतियोगिता तु दण्डादि-
रूपावच्छेदकोपलक्षितविशेष्य एव पर्य्याप्ता इत्युभयस्य [illegible]
उपपादनीयत्वात्। विशिष्टस्यातिरिक्तत्वमते विशिष्टस्याभाव-
सम्बन्ध एव प्रतियोग्यसमानाधिकरण इत्युभयसाध्यसाधनत्वम्,
'नातिप्रसङ्ग' इति हेतुमति विशिष्टाभावादेः प्रतियोगितया
नाधिकरणत्वेऽपि विशिष्टप्रतियोगिताविशेषस्य [illegible]
न प्रमाणतिसिद्धतव्यवहारस्य [illegible] इत्यादि। [illegible]
[illegible]
[illegible]
ननु [illegible]
[illegible] न व्याप्ति न तु [illegible]

योगिनि विशेषणत्वात् अतादृशस्यैव चोपलक्षणत्वात् इति तादृशा-भावयोर्विशेष इति वाच्यम्। उपलक्षणेन दण्डादिना व्यावृत्त-प्रतियोगिनिष्ठप्रतियोगिताया पुरुषत्वादेरतिप्रसक्ततया तन्मात्रे तदवच्छेदकताया, पर्य्याप्तिसम्बन्धेन दण्डादेरपि तदवच्छेदक-कोटाववश्यमन्तर्भावात्। अतएव पुरुषादिमात्रेण न दण्डाद्युप-लक्षितपुरुषाद्यभावस्य विरोधः तदवच्छिन्नाभावस्यैव तद्विशिष्टा-भावत्वे सत्तान्यपृथिवीत्वसमवेतशून्य वायुत्वादिव्याप्तौ प्रदत्ता कूट-घटितलक्षणातिव्याप्तिदानमपि विरुद्धेत पृथिवीत्वसमवेतत्वविशिष्टा-भावस्य वाय्वादौ सत्त्वेन वायुत्वादिमति साध्ये सद्धेतुत्वादिति चेन्न, विशिष्टनिरूपितसम्बन्धेन विशिष्टाभावप्रतियोगितावच्छेदकत्वं सर्व्वत्र न सम्भवतीति प्रागुक्तत्वात्, अगत्या विशिष्टाभावप्रतियोगिता विशेषणान्तर्भावेन पर्य्याप्ता उपलक्षिताभावप्रतियोगिता तु दण्डादि-रूपावच्छेदकोपलक्षितविशेष्य एव पर्य्याप्ता इत्युपगम्य तयोर्विशेषस्य उपपादनीयत्वात्। विशिष्टस्यातिरिक्ततामते विशिष्टस्याभाव-सहकृत एव प्रतियोग्यसमानाधिकरण इत्युभयमतसाधारणम्, 'नातिप्रसङ्ग' इति हेतुमति विशिष्टाभावादेः स्वप्रतियोगिसामा-नाधिकरण्यसत्त्वेऽपि विशिष्टप्रतियोगिकासामानाधिकरण्यविरहात् न भ्रमानुमितिजनकपरामर्शस्य प्रमात्वप्रसङ्ग इत्यादि। [illegible] वृत्तिसाध्यकेऽपि प्रतियोगिवैयधिकरण्य[illegible] हेतुतया उक्तसाध्यस्य व्याप्यहेतुत्वेऽपि नातिप्रसक्तमिति। ननु कूटत्वादि[illegible] व्याप्तित्वस्यैव न व्याप्तिः, न तु [illegible]

तदुभयत्वावच्छिन्नस्य तथाच विशिष्टसत्तादिसाध्यकजात्यादिहेता-विव उक्तोभयसाध्यकमूर्त्तत्वादिहेतावपि यथाश्रुतप्रतियोग्यसामा-नाधिकरण्यनिवेशपक्षेऽपि नातिप्रसक्तिरित्यभिमानं 'न चेत्यादिना निराकरोति, 'सहजत एव' प्रतियोगिपदस्य तत्त्वावच्छेदकविशिष्ट-परतां विनैव, 'उभयत्व' उभयव्यवहारविषयतावच्छेदकं, 'न विशि-ष्टत्वात्' एकविशिष्टापरत्वात्, 'अनतिरिक्तं' अभिन्नं, अतिरिक्तमिति-मुक्त्वा 'नानतिरिक्तमित्यभिधानं उभयपदार्थतावच्छेदकावच्छे-नातिरिक्तत्वलाभाय, नञ्पदस्यानुयोगितावच्छेदकावच्छेदेन अभाव-बोधकत्वव्युत्पत्तेः, तावता एकविशिष्टापरत्वमुभयनिष्ठव्यासज्य-वृत्तिधर्म्मस्य उभयपदार्थतावच्छेदकमस्तु (१) प्रकृते चोभयत्वमेक-विशिष्टापरत्वमेवेतिशङ्काव्युदासः। अत्र हेतुः 'वैशिष्ट्यविरहेऽपि घटत्व पटत्वयोरुभयत्वस्य प्रत्यक्षसिद्धत्वादिति घटत्व-पटत्वयोः सामानाधिकरण्यविरहेऽपि तत्र उभयव्यवहारविषयतावच्छेदकस्य प्रत्यक्षसिद्धत्वादित्यर्थः, अन्यथा तत्रोभयव्यवहारानुपपत्तेरिति भावः। यद्यपि घटत्व-पटत्वोभयमितिप्रतीतौ कालिकसम्बन्ध-घटितसामानाधिकरण्यरूपवैशिष्ट्यस्य विषयतासम्भवः तथापि वाच्यत्व-घटत्वोभयं समवेतमित्यादिप्रतीतिव्यवहारविरहेण उभयं समवेतमिति प्रतीतिव्यवहारयोः समवायिसमवेतत्वरूपवैशि-ष्ट्यविषयताया अभ्युपगन्तव्यतया घटत्व पटत्वोभयं समवेत-मित्यादौ तादृशवैशिष्ट्यासिद्धा व्यासज्यवृत्तिधर्म्म एव विषय

(१) अभिन्नत्वमत्र न तु तन्मात्रं पक्षमात्रानुपपत्तेः' इत्यधिकः पाठः 'ख'पुस्तकपुस्तके वर्त्तते।

नाधिकरण्यस्य अत्यन्ताभावत्वनिरूपकप्रतियोगितायाश्च लाभाय अन्यथा सर्व्वस्यैवाभावस्य स्वसमानाधिकरणाभावान्तरभिन्नत्वात्तद्भेदस्य स्वरूपानतिरिक्तत्वात् प्रतियोग्यसामानाधिकरण्यस्यैव दुर्लभत्वापत्तेः सर्व्वेषामेवाभावानां हेतुसमानाधिकरणात्यन्ताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणाभावान्तरात्मकस्य स्वभेदस्य प्रतियोगित्वादभावसाध्यकाव्याप्तेश्चेति सम्प्रदायविदः ।

गादाधरी विवृतिः ।

ननु प्रतियोग्यसमानाधिकरण्यस्याभावविशेषणत्वे लक्षणेऽत्यन्तपदवैयर्थ्यं धूमाद्यधिकरणनिष्ठवह्न्यादिभेदस्य प्रतियोगिसमानाधिकरणत्वेनैव साध्यतावच्छेदकस्य तत्प्रतियोगितावच्छेदकताया अकिञ्चित्करत्वादित्याशङ्कया साम्प्रदायिकोपदर्शितमत्यन्तपदप्रयोजनमाह, 'अत्यन्तपदस्येति, 'अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्येति, 'लाभायेत्यग्रिमेण सम्बन्धः, एवं यस्य प्रतियोगिनोऽत्यन्ताभावस्तादृशप्रतियोग्यसामानाधिकरण्यपर्य्यन्तस्याभावविशेषणत्वलाभायेत्यर्थः 'अत्यन्ताभावत्वनिरूपकप्रतियोगितायाः इति प्रतियोगितानवच्छेदकेत्यत्र या प्रतियोगिता निविष्टा तदात्यन्ताभावत्वरूपानुयोगितानिरूपकत्वविशेषणस्य च लाभायेत्यर्थः । एतेन व्यावृत्तिमाह, 'अन्यथेति,

'सर्व्वस्यैभावस्येति हेतुसमानाधिकरणाभावत्वेनोपादेयस्य सर्व्वस्य गोत्वाद्यभावस्येत्यर्थः, 'स्वसमानाधिकरणाभावान्तरभिन्नत्वात्' स्वं यस्य समानाधिकरणं तादृशघटत्वाद्यभावभेदवत्त्वादित्यर्थः, 'स्वरूपानतिरिक्तत्वात्' गोत्वाद्यभावरूपाधिकरणस्वरूपत्वात्, अभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणभूताभावरूपतेति सिद्धान्तादितिभावः। 'प्रतियोग्यसमानाधिकरणाभावस्य दुर्लभत्वापत्तेरिति गोत्वाद्यभावानामत्यन्ताभावत्वनिरूपकगोत्वादिरूपप्रतियोग्यसमानाधिकरणत्वेऽपि स्वनिष्ठभेदत्वनिरूपकघटत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वनियमादिति भावः। न च भावस्वरूपस्यैवाभावस्य तादृशत्वं सुलभमितिवाच्यम्। तस्यापि स्वसमानाधिकरणभेदभिन्नत्वेन तद्दोषतादवस्थ्यात्, भेदभेदस्यानवस्थाभयेनाधिकरणस्वरूपताङ्गीकारात् (१)। प्रतियोग्यसामानाधिकरण्ये सम्बन्धविशेषानिवेशे सर्व्वत्रैव तादृशाभावाप्रसिद्धेः प्रतियोगितावच्छेदकसम्बन्धस्य साध्यतावच्छेदकसम्बन्धस्य वा तत्र निवेशे विशेषणताविशेषसम्बन्धेन यत्र साध्यता तत्र तदप्रसिद्धिर्द्रष्टव्या (२)

---

(१) 'न चेत्यादिरङ्गीकारादित्यन्त पाठोबहुषु आदर्शपुस्तकेषु नास्ति।

(२) प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यनिवेशे सर्व्वत्र न तादृशाभावाप्रसिद्धिः किन्तु विशेषणताविशेषेण साध्यकस्थले, तन्मते अभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वात् साध्यतावच्छेदकसम्बन्धस्य तत्र निवेशे विशेषणताविशेषसम्बन्धेन यत्र साध्यता तत्र तदप्रसिद्धिर्द्रष्टव्येति पा०। तदप्रसिद्धिर्द्रष्टव्या इत्यनन्तरम् अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्य निवेशेऽपि इति सन्दर्भात् पूर्व्वं 'प्रतियोगितानवच्छेदकेत्यत्र प्रतियोगितायाम् अत्यन्ताभावत्वनिरूपकत्वविवक्षाप्रयोजनमाह, 'हेतुसमानाधिकरणेति, तथाच

अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यनिवेशेऽपि सर्व्वेषामेवाभावानाम् किञ्चिद्विशिष्ट(१)त्वाभावादिरूपप्रतियोगिसामानाधिकरण्यनियमात्तदसमानाधिकरणाप्रसिद्धिः यादृशप्रतियोगितेत्यादिना वक्ष्यमाणरीतेरनुसरणे तु प्रतियोगिन्यत्यन्ताभावत्वनिवेशवैयर्थ्यमतास्तरमबीजमेव । 'हेतुसमानाधिकरणेति हेतुसमानाधिकरणे योऽत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यवान् गोत्वाभावादिर्घटत्वाभावादिरूपसाध्यस्य तन्निष्ठघटत्वाभावभेदात्मकस्य तस्य प्रतियोगित्वादित्यर्थः, 'अभावसाध्यकेति घटत्वाभावादिसाध्यकघटत्वादिसाधनेत्यर्थः । अत्यन्ताभावत्वनिरूपकप्रतियोगितानिवेशेऽपि सम्बन्धान्तरावच्छिन्नसाध्यात्यन्ताभावप्रतियोगितावारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वादिप्रक्षेपे एतद्विशेषणमनर्थकं साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्य निवेश्य सम्बन्धान्तरावच्छिन्नाभाववारणेऽपि सर्व्वेष्वेवाभावेषु उक्तरीत्या अत्यन्ताभावत्वनिरूपकप्रतियोगिसामानाधिकरण्यस्यापि सत्त्वेन साध्यतावच्छेदकसम्बन्धेन प्रति-प्रतियोगितावदसामानाधिकरण्यस्यैवाभावे [illegible] निष्ठप्रतियोगिताद्यसामानाधिकरण्य [illegible] [illegible] ।

'सर्व्वस्यैभावस्येति हेतुसमानाधिकरणाभावत्वेनोपादेयस्य सर्व्वस्य गोत्वाद्यभावस्येत्यर्थः, 'स्वसमानाधिकरणाभावान्तरभिन्नत्वात्' स्वं यस्य समानाधिकरणं तादृशघटत्वाद्यभावभेदवत्त्वादित्यर्थः, 'स्वरूपानतिरिक्तत्वात्' गोत्वाद्यभावरूपाधिकरणस्वरूपत्वात्, अभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणभूताभावरूपतेति सिद्धान्तादितिभावः। 'प्रतियोग्यसमानाधिकरणाभावस्य दुर्लभत्वापत्तेरिति गोत्वाद्यभावानामत्यन्ताभावत्वनिरूपकगोत्वादिरूपप्रतियोग्यसमानाधिकरणत्वेऽपि स्वनिष्ठभेदत्वनिरूपकघटत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वनियमादिति भावः। न च भावस्वरूपस्यैवाभावस्य तादृशत्वं सुलभमितिवाच्यम्। तस्यापि स्वसमानाधिकरणभेदभिन्नत्वेन तद्दोषतादवस्थ्यात्, भेदभेदस्यानवस्थाभयेनाधिकरणस्वरूपताङ्गीकारात् (१)। प्रतियोग्यसामानाधिकरण्ये सम्बन्धविशेषानिवेशे सर्व्वत्रैव तादृशाभावाप्रसिद्धेः प्रतियोगितावच्छेदकसम्बन्धस्य साध्यतावच्छेदकसम्बन्धस्य वा तत्र निवेशे विशेषणताविशेषसम्बन्धेन यत्र साध्यता तत्र तदप्रसिद्धिर्द्रष्टव्या (२)

---

(१) 'न चेत्यादिरङ्गीकारादित्यन्त पाठोयद्रूप् आदर्शपुस्तकेषु नास्ति।

(२) प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यनिवेशे सर्व्वत्र न तादृशाभावाप्रसिद्धिः किन्तु विशेषणताविशेषेण साध्यकस्थले, तन्मते अभाव साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वात् साध्यतावच्छेदकसम्बन्धस्य तत्र निवेशे विशेषणताविशेषसम्बन्धेन यत्र साध्यता तत्र तदप्रसिद्धिर्द्रष्टव्येति पा०। तदप्रसिद्धिर्द्रष्टव्या इत्यनन्तरम् अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्य निवेशेऽपि इति सन्दर्भात् पूर्व्वं 'प्रतियोगितावच्छेदकेत्यत्र प्रतियोगिताया अत्यन्ताभावत्वनिरूपकत्वविवक्षाप्रयोजनमाह, 'हेतुसमानाधिकरणेति तत्र

अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यनिवेशेऽपि सर्व्वेषामेवाभावानाम् किञ्चिद्विशिष्ट(१)स्वाभावादिरूपप्रतियोगिसामानाधिकरण्यनियमात्तदसमानाधिकरणाप्रसिद्धिः यादृशप्रतियोगितेत्यादिना वक्ष्यमाणरीतेरनुसरणे तु प्रतियोगिन्यत्यन्ताभावत्वनिवेशवैयर्थ्यमतोऽस्वरसबीजमेव । 'हेतुसमानाधिकरणेति हेतुसमानाधिकरणो योऽत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यवान् गोत्वाभावादिर्घटत्वाभावादिरूपसाध्यस्य तन्निष्ठघटत्वाभावभेदात्मकस्य तस्य प्रतियोगित्वादित्यर्थः, 'अभावसाध्यकेति घटत्वाभावादिसाध्यकपटत्वादिसाधनेत्यर्थः । अत्यन्ताभावत्वनिरूपकप्रतियोगितानिवेशेऽपि सम्बन्धान्तरावच्छिन्नसाध्यात्यन्ताभावप्रतियोगितावारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषणध्रौव्ये एतद्विशेषणमनर्थकं साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यं निवेश्य सम्बन्धान्तरावच्छिन्नाभाववारणेऽपि सर्व्वेष्वेवाभावेषु उक्तरीत्या अत्यन्ताभावत्वनिरूपकप्रतियोगिसामानाधिकरण्यस्यापि सत्त्वेन साध्यतावच्छेदकसम्बन्धेन प्रकृतप्रतियोगितावदसामानाधिकरण्यस्यैवाभावे निवेशनीयतया साध्यनिष्ठप्रतियोगिताश्रयासामानाधिकरण्यस्य सहेत्वधिकरणवृत्तित्वविशिष्टाभावेऽसत्त्वेनाव्याप्त्यप्रसक्तिरित्यस्वरसबीजम् ।

घटभिन्न पटत्वादिसाध्यके अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यवत्त्वा-द्यभावादौ घटभेदभेदस्य [illegible] सामानाधिकरण्यसम्बन्धेन [illegible] साध्यतावच्छेदकत्वं तादृशभेदभेदस्यैवोक्तत्वादिति [illegible] ।

(१ [illegible] पा. ।

अनुमानदीधितिः ।

(१) विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावो[illegible]

विशिष्टसत्तेति प्रतीतिवत् मनसि गुणे च न किञ्चित् समवैतीति भ्रमदशायामपि तादृशप्रतीतेरानुभविकतया मणोगुणादिसमवेतत्वाभावस्य तद्विषयत्वासम्भवेन मनोगुणाद्यधिकरणकाभावस्य तद्विषयताया आवश्यकत्वात् तादृशभ्रमाभावकालीनतथाकारप्रतीतावपि तस्यैव विषयत्वौचित्यात् अन्यथा कल्पनागौरवापातात्, भूतत्व-मूर्त्तत्वोभयं न मनोवृत्ति गुणान्यत्वविशिष्टसत्ता न गुणवृत्तिरित्यादिप्रत्ययाश्च तादृशोभयत्वविशिष्टसत्तात्वादौ मनोगुणादिवृत्तितावच्छेदकत्वाभावं मनोगुणादिवृत्तित्वे तादृशोभयत्वविशिष्टसत्तात्वावच्छेद्यत्वाभावं वा अवगाहन्ते तत्र तादृशाभावस्य क्लृप्तत्वात्। न च यत्किञ्चिद्वृत्त्यधिकरणवृत्तितानवच्छेदकस्य प्रतियोगितावच्छेदकत्वमेव विवक्षणीयम् उभयत्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकोभयत्वादेश्च मनोवृत्तितानवच्छेदकत्वात्तादृशाभावसंग्रहेण नातिव्याप्तिरिति वाच्यम्। गुणान्यत्वविशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकस्य वैशिष्ट्यसहितसत्तात्वस्य गुणादिवृत्तितावच्छेदकशुद्धसत्तात्वाद्यनतिरिक्ततया तदनवच्छेदकत्वासम्भवेन उक्तविवक्षयापि तादृशाभावसंग्रहासम्भवात्। यदभावीयप्रतियोगितावच्छेदकतायां यत्किञ्चिद्वृत्त्यधिकरणवृत्तितावच्छेदकत्वपर्य्याप्त्यवच्छेदकावच्छिन्नपर्य्याप्तताविरहस्तादृशाभावनिवेशे दर्शितातिव्याप्तिपरीहारस्य सम्भवतीत्याशङ्का दूषणान्तरमाह, 'समवायेनेति, 'जातिमन्निष्ठतादृशाभावेति, जातिमन्निष्ठो यो घटत्वाद्यभावस्तस्यैव पटाद्यसमवेतप्रतियोगिकत्वेन तादृशत्वात् तत्प्रतियोगितायां जातित्वस्यानवच्छेदकत्वादिति भावः। जाति-

मदवृत्तेर्जातित्वावच्छिन्नाभावस्य ताद्दशत्वं न सम्भवति इति स्फुटयति, 'जातिशून्ये चेति, 'ताद्दशसम्बन्धेन' समवायेन. 'अप्रसिद्धेरिति, तथाच जातिमदवृत्तिर्योऽभावस्तत्प्रतियोगिसामान्ये हेतुमद्व्यक्तिच्छित्वघटेन जातिशून्यमेवोपादायावृत्तित्वान्तं घटनीयं तच्च न सम्भवति प्रतियोग्यप्रसिद्धा तदप्रसिद्धेरिति नासौ लक्षणघटकइति भावः। जातेर्व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्यविशेषणस्य प्रयोजनविरहेणानिवेशेन नोक्तदोषावकाश इत्यव्याप्यवृत्तिसाध्यक एवातिव्याप्तिमाह, 'संयोगादीति, 'अतिव्याप्तिरिति, संयोगत्वावच्छिन्नाभावस्य हेत्वधिकरणव्यक्तिद्वयतत्समवेतप्रतियोगिसामान्यकत्वासम्भवेन लक्षणाघटकत्वादिति भावः। तदसम्भवमेव स्फुटयति, 'अद्रव्य इति सामान्यादावित्यर्थः, 'अप्रसिद्धेरिति, तथाच यत्किञ्चिद्वृत्तीत्यन्तेन न सामान्याद्युपादानसम्भव इति भावः। 'द्रव्य इति, तथाच द्रव्यमपि यत्किञ्चिद्वृत्तिपदेनोपादाय न ताद्दशाभावस्य तथात्वं शक्योपपादनमिति भावः।

दीधितिः।

नैवं साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्व-हेत्वधिकरणीभूतयत्किञ्चिद्वृत्त्यनुयोगिकत्वसामान्योभयाभावस्य विवक्षितत्वात्। धूमसंयोगे वह्न्यधिकरणायोगोलकानुयोगिकत्वस्य चैतान्यत्वविशिष्टैतद्दण्डसंयोगे एतद्दण्डाधिकरणैतानुयोगिक-

त्वस्य गुणकर्मान्यत्वविशिष्टसत्तासमवाये च जात्यधि-
करणगुणानुयोगिकत्वस्य विरहान्नातिप्रसङ्गः ।

गादाधरी विवृति ।

'साध्यतावच्छेदकसम्बन्धसामान्ये उभयाभावस्य विवक्षितत्वात्' इति योजना । तथाच स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्व-हेत्वधिकरणीभूतयत्किञ्चिदन्यतमानुयोगिकत्वसामान्योभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वमभावे, स्वप्रतियोगितावच्छेदकेत्यत्र स्वावच्छेदकत्व प्रक्षिप्य तादृशाभाववत्सम्बन्धसामान्यकत्वं प्रतियोगितायां वा विशेषणं देयमिति भावः । जलादिसंयोगे वह्निप्रतियोगिकत्व-धूमवदनुयोगिकत्वोभयाभावसत्त्वेऽपि साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गततत्तद्धूमाधिकरणानुयोगिकवह्निसंयोगे वह्निप्रतियोगिकत्व-तत्तदधिकरणानुयोगिकत्वोभयाभावासत्त्वान्न वह्न्यभावस्य लक्षणघटकत्वमिति घटाद्यभावमादाय वह्निमान् धूमादित्यत्र लक्षणसमन्वयः । घटवान् महाकालत्वादित्यादौ पुनरवृत्तिगगनादेरभाव एव लक्षणघटकः कालिकसम्बन्धसामान्ये तत्प्रतियोगिगगनादिप्रतियोगिकत्वाभावेनोभयाभावसौलभ्यात् हेत्वधिकरणानुयोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वाभावनिवेशे जातिमान् मेयत्वादित्यादावुक्तातिव्याप्तिवारणमशक्यं सामान्याद्यनुयोगिकसमवायाप्रसिद्धेः जात्यादिमदनुयोगिकसमवाये च जात्यादिप्रतियोगिकत्वसत्त्वेन जातित्वाद्यवच्छिन्नाभावस्य प्रति-

योगिव्यधिकरणत्वानुपपत्तेः, निरुक्तप्रतियोगिप्रतियोगिकसाध्यताध्यतावच्छेदकसम्बन्धसामान्ये हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वाभावनिवेशे घटवान् महाकालत्वादित्यादावव्याप्तिवारणमशक्यं गगनत्वादिविशिष्टप्रतियोगिककालिकसम्बन्धाप्रसिद्धा गगनाभावस्यापि प्रतियोगिव्यधिकरणत्वानुपपत्तेरित्युभयाभावानुधावनम्। यत्किञ्चित्पदप्रयोजनमाह, 'धूमसयोग-इति, 'अयोगोलकानुयोगिकत्वस्येति, 'विरहान्नातिप्रसङ्ग इत्यन्तेनेतनान्वयः, साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गतधूमसयोगे धूमप्रतियोगिकत्व-वह्निमदनुयोगिकत्वयोरुभयोरेव सत्त्वेन तत्सामान्योभयाभावस्य तत्र सत्त्वात् यत्किञ्चित्पदानुपादाने धूमवान् वह्नेरित्यत्रातिव्याप्तिः स्यात्। हेत्वधिकरणस्य च हेतुमत्त्वेन न निवेशः किन्तु तद्व्यक्तित्वेन यत्किञ्चिदेकहेतुमद्व्यक्तेर्निवेश-इत्येतल्लाभार्थकतदुपादाने पुनर्हेत्वधिकरणायोगोलकानुयोगिकत्वस्य धूमसयोगे अभावादन्यसयोगे च धूमप्रतियोगिकत्वस्याभावात् संयोगसामान्यस्यैवोभयाभाववत्त्वात् धूमत्वावच्छिन्नाभावोऽपि लक्षणघटक इति नातिप्रसङ्ग इत्यर्थः। प्रतियोगितावच्छेदकविशिष्टार्थकनिरुक्तपदोपादानप्रयोजनं संयोगेन चैत्रान्यत्वविशिष्टैतद्दण्डत्वेन चैत्रनिष्ठदण्डसाध्यके एतद्दण्डहेतौ समवायेन विशिष्टसत्तादिसाध्यके जातिरूपहेतौ चातिव्याप्तिवारणरूपं दर्शयति, 'चैत्रान्यत्वेति, निरुक्तपदानुपादाने संयोगसामान्यान्तर्गतचैत्रनिष्ठैतद्दण्डसयोगे हेत्वधिकरणचैत्रानुयोगिकत्व-चैत्रान्यत्वविशिष्टैतद्दण्डाभावप्रतियोग्येतद्दण्डप्रतियोगिकत्वयोः समवाय-

त्वस्य गुणकर्म्मान्यत्वविशिष्टसत्तासमवाये च जात्यधि-
करणगुणानुयोगिकत्वस्य विरहान्नातिप्रसङ्गः।

गादाधरी विवृतिः।

'साध्यतावच्छेदकसम्बन्धसामान्ये उभयाभावस्य विवक्षितत्वात्' इति योजना। तथाच स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्व-हेत्वधिकरणीभूतयत्किञ्चिदरत्यनुयोगिकत्वसामान्योभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वमभावे. स्वप्रतियोगितावच्छेदकेत्यत्र स्वावच्छेदकत्वं प्रक्षिप्य तादृगभाववत्सम्बन्धसामान्यकत्वं प्रतियोगितायां वा विशेषणं देयमिति भावः। जलादिसंयोगे वह्निप्रतियोगिकत्व धूमवदनुयोगिकत्वोभयाभावसत्त्वेऽपि साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गततत्तद्धूमाधिकरणानुयोगिकवह्निसंयोगे वह्निप्रतियोगिकत्व-तत्तदधिकरणानुयोगिकत्वोभयाभावासत्त्वान्न वह्न्यभावस्य लक्षणघटकत्वमिति घटाद्यभावमादाय वह्निमान् धूमादित्यत्र लक्षणसमन्वयः। घटवान् महाकालत्वादित्यादौ पुनरवृत्तिगगनादेरभाव एव लक्षणघटकः कालिकसम्बन्धसामान्ये तत्प्रतियोगिगगनादिप्रतियोगिकत्वाभाविनोभयाभावसौलभ्यात् हेत्वधिकरणानुयोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वाभावनिवेशे जातिमान् मेयत्वादित्यादावुक्तातिव्याप्तिवारणमशक्यं सामान्याद्यनुयोगिकसमवायाप्रसिद्धेः जात्यादिमदनुयोगिकसमवाये च जात्यादिप्रतियोगिकत्वसत्त्वेन जातित्वाद्यवच्छिन्नाभावस्य प्रति-

योगिव्यधिकरणत्वानुपपत्तेः, निरुक्तप्रतियोगिप्रतियोगिकसाध्यताध्यतावच्छेदकसम्बन्धसामान्ये हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वाभावनिवेशे घटवान् महाकालत्वादित्यादावव्याप्तिवारणमशक्यं गगनत्वादिविशिष्टप्रतियोगिककालिकसम्बन्धाप्रसिद्ध्या गगनाभावस्यापि प्रतियोगिव्यधिकरणत्वानुपपत्तेरित्युभयाभावानुधावनम्। यत्किञ्चित्पदप्रयोजनमाह, 'धूमसंयोग इति, 'अयोगोलकानुयोगिकत्वस्येति, 'विरहान्नातिप्रसङ्ग इत्यग्रेतनेनान्वय', साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गतधूमसंयोगे धूमप्रतियोगिकत्व-वह्निमदनुयोगिकत्वयोरुभयोरेव सत्त्वेन तत्सामान्योभयाभावस्य तत्र सत्त्वात् यत्किञ्चित्पदानुपादाने धूमवान् वह्नेरित्यत्रातिव्याप्तिः स्यात्। हेत्वधिकरणस्य च हेतुमत्त्वेन न निवेशः किन्तु तद्व्यक्तित्वेन यत्किञ्चिदेकहेतुमद्व्यक्तेर्निवेश इत्येतल्लाभार्थकतदुपादाने पुनर्हेत्वधिकरणायोगोलकानुयोगिकत्वस्य धूमसंयोगे अभावादन्यसंयोगे च धूमप्रतियोगिकत्वस्याभावात् संयोगसामान्यस्यैवोभयाभाववत्त्वात् धूमत्वावच्छिन्नाभावोऽपि लक्षणघटक इति नातिप्रसङ्ग इत्यर्थः। प्रतियोगितावच्छेदकविशिष्टार्थकनिरुक्तपदोपादानप्रयोजनं संयोगेन चैत्रान्यत्वविशिष्टैतद्दण्डत्वेन चैत्रनिष्ठदण्डसाध्यके एतद्दण्डहेतौ समवायेन विशिष्टसत्तादिसाध्यके जातिरूपहेतौ चातिव्याप्तिवारणरूपं दर्शयति, 'चैत्रान्यत्वेति, निरुक्तपदानुपादाने संयोगसामान्यान्तर्गतचैत्रनिष्ठैतद्दण्डसंयोगे हेत्वधिकरणचैत्रानुयोगिकत्व-चैत्रान्यत्वविशिष्टैतद्दण्डाभावप्रतियोग्येतद्दण्डप्रतियोगिकत्वयोः समवाय-

सामान्यान्तर्गतगुणाद्यनुयोगिकसत्तासमवाये च हेत्वधिकरणगुणा-नुयोगिकत्व-विशिष्टसत्ताभावप्रतियोगिसत्ताप्रतियोगिकत्वयोर्द्वयो-रेव सत्त्वेन तादृशाभावस्य लक्षणघटकता न स्यादिति प्रसक्ताति-प्रसक्तेस्तदुपादानान्नावकाशः चैत्रे गुणादौ च संयोगेन समवायेन च विशिष्टदण्ड-विशिष्टसत्तावैशिष्ट्याप्रत्ययात्तदनुयोगिकसंयोग-सम-वाययोर्विशिष्टदण्ड-सत्तात्वावच्छिन्नप्रतियोगिताकत्वानभ्युपगमेना-न्यानुयोगिकयोश्च तयोश्चैत्र-गुणाद्यनुयोगिकत्वाभावेनोभयाभावस्या-क्षततया विशिष्टसाध्याभावस्यापि लक्षणघटकत्वादित्यर्थः। अथात्र संयोगेन घटादौ साध्ये घटत्वादिहेतावतिव्याप्तिः संयोगसामान्या-न्तर्गतघट-पटादिसंयोगे घटाद्यनुयोगिकत्व-घटादिप्रतियोगिकत्वो-भयसत्त्वेन घटादिनिष्ठघटाद्यभावस्य लक्षणाघटकत्वात्। न च स्वस्मिन् संयोगेन स्वविशिष्टबुद्ध्यनुदयादन्यत्र घटविशिष्टबुद्धिमात्र-नियामके घटसंयोगे घटप्रतियोगिकत्वमात्रं घटेऽन्यविशिष्टबुद्धि-मात्रनियामकसंयोगे च तदनुयोगिकत्वमात्रमिति व्यभिचार-निरूपकघटानुयोगिकत्व-तत्प्रतिकत्वोभयं न कुत्रापि संयोगे-ऽस्ति। न हि समवायेन संयोगाधिकरणत्वमेव संयोगानुयोगित्वं येन घटसमवेतसंयोगमात्रस्यैव घटानुयोगिकत्वं स्यात्, तथा सति-तत्सम्बन्धानुयोगिताया एव तद्विशिष्टबुद्धिविषयताप्रयोजकत्वेन स्वस्मिन्नपि स्वविशिष्टबुद्ध्यापत्तेर्दुर्व्वारत्वात् किन्तु सम्बन्धान्तरमेवेति वाच्यम्। येन सम्बन्धेन घटेऽन्यविशिष्टधीस्तेनैव सम्बन्धेनान्यत्र घट-विशिष्टबुद्धिजननादेकस्यैव संयोगे घटानुयोगिकत्व-घटप्रतियोगिक-त्वयोरावश्यकत्वात् यस्मिन् सम्बन्धे यत्प्रतियोगिकत्वविशिष्टे यदनु-

योगिकत्वं तत्सम्बन्धेन तस्यैव तत्र विशिष्टप्रमितेः स्वप्रति-
योगिकत्वविशिष्टे च संयोगे स्वानुयोगिकत्वानुपगमेन स्वस्मिंस्तेन
सम्बन्धेन स्वविशिष्टप्रमापत्त्यनवकाशादिति चेन्न, संयोगेनाधि-
करणांशे आधेयस्यैव विशिष्टधीर्जन्यते न तु आधेयांशे आधारस्य
च, आधाराधेयभावानापन्नयोर्वृत्त्यनियामकसंयोगिनोः संयोगेन
विशिष्टबुद्धेरप्रामाणिकत्वात्, आधेयत्वानुपस्थितिकालीने भूतले
घट इत्यादिप्रत्यये घटाद्यंशे भूतलादेः प्रकारत्वेऽपि आधेयताया-
एव संसर्गतोपगमात् न तु संयोगमात्रस्य, एवं सति वृत्त्य-
नियामकस्य गगनादिसंयोगस्य सम्बन्धत्वानुपपत्तिर्विशिष्टबुद्धि-
नियामकस्यैव तथात्वादिति चेत्, का क्षतिः, एवञ्च येन
संयोगेन अन्यत्र घटविशिष्टबुद्धिर्जन्यते घटस्य तत्संयोगाश्रया-
नाधारत्वेन घटेन तेनाऽन्यविशिष्टबुद्धिर्जन्यते इति संयोगमात्र-
एव तत्प्रतियोगिकत्व-तदनुयोगिकत्वोभयाभावव्यापकत्वात् । यथा
यस्य घटस्याधोऽवस्थितपटे येन संयोगेन विशिष्टबुद्धिर्जनिता
तेनैव च संयोगेन पटेन समं परिहृत्य स्थापिते तद्घटे पटविशिष्ट-
बुद्धिरपि जन्यते तत्र संयोगे घटप्रतियोगिकत्व-घटानुयोगिकत्वो-
भयस्यावश्यकतया संयोगेन घटसाध्यके तद्घट-तत्पटान्यतरत्वादा-
वतिव्याप्तिर्दुर्वारैवेति चेदेवं सति साध्यतावच्छेदकसम्बन्धानु-
योगितासामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वविशिष्टसम्बन्ध-
निरूपितत्व-हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभाव एव
विवक्षणीय, यस्मिन् यद्विशिष्टबुद्ध्यनुदयेन यत्प्रतियोगिकत्ववि-
शिष्टसंयोगनिरूपितत्वस्य तन्निष्ठानुयोगिताऽवच्छेदकत्वम्, तत्प्रति-

एतादृशरीत्या उक्तकल्पपरिष्कारेऽपि प्रतियोगिमद्भेदे हेतु-पर्य्याप्त्यवच्छेदकावच्छिन्नानुयोगिताकत्वस्याग्रिमकल्पे विवक्षणे इदमाकाशं आकाश-घटोभयत्वादित्यादावतिव्याप्तेर्दुर्व्वारत्वात् आकाशत्वाद्यवच्छिन्नभेदस्य दर्शितहेतुपर्य्याप्त्यवच्छेदकतदुभय-वृत्तिधर्मावच्छिन्नेऽसत्त्वात् प्रतियोगिवृत्तिधर्मस्य भेदाधिकरणता-नवच्छेदकत्वात्। न च व्यासज्यवृत्तिधर्मसाध्यके ईदृशी रीति-रुपादेया नान्यत्रेति वाच्यम्। आकाशत्वादेराकाश-घटादौ व्यासज्य-वृत्तित्वभ्रमदशायां तदवच्छिन्नभेदस्य प्रत्येकं हेत्वधिकरणवृत्तित्व-ग्रहेऽपि आकाश-घटोभयत्वादिहेतुना आकाशत्वाद्यनुमित्युत्पत्त्या तन्निर्व्वाहाय तत्रापि साधनपर्य्याप्त्यवच्छेदकावच्छिन्नाधिकरण-ताकप्रतियोगिमद्भेदघटितव्याप्तिज्ञानहेतुताया वाच्यतया तत्रा-प्यनुमित्यौपयिकव्याप्तिप्रसङ्गापत्तेः तस्माद्वह्नित्वादिसाध्यकं द्रव्य-त्वाकाशत्वादिकं सद्धेतुरेव, द्रूमे वह्वस्तित्वादित्यादावव्याप्ति-वारणाय च पर्य्याप्त्यतिरिक्तस्वरूपसम्बन्धेन प्रतियोग्यधिकरण-त्वावच्छिन्नभेद एव हेतुमति विवक्षणीयः न तु प्रतियोग्य-वच्छिन्नभेदः, प्रतियोगिमद्वृत्तिधर्म्मवत्त्वं वा, तेन प्रत्येकावृत्तिवहु-त्वाद्यवच्छिन्नभेदमादाय तदभावस्य न प्रतियोगिवैयधिकरण्यमित्येव सारम्। इदन्तु वोध्य, साध्यतावच्छेदकावच्छिन्नाभावनिरूपित-त्वविशिष्टसाध्यवन्निष्ठतदधिकरणताभिन्नहेतुमन्निष्ठाधिकरणताकत्व-मेव 'प्रतियोगिव्यधिकरणहेतुसमानाधिकरणेति प्रतीकार्थः, महा-कालो घटवान् महाकालत्वादित्यादौ च नैतादृशविशेषणाक्रान्ता-भावासिद्धिः कालिकसम्बन्धावच्छिन्नपटाद्यभावस्यैव तथात्वात् हेतु-

मन्निष्ठतदधिकरणतायां साध्याभावाधिकरणताभिन्नत्वेन निवि-
भेदसत्त्वादित्युभयाभावघटितप्रतियोगिवैयधिकरण्यानुधावनं दीधि-
तिकृतामफलमेव, एवञ्च प्रतियोगिवैयधिकरण्यस्य यादृशप्रति-
योगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत इत्यादिकमेव
निर्व्वचनेऽननुगमात् प्रतियोगितावच्छेदकताभावकूटनिवेशे व्-
याप्तिर्दुर्ज्ञेया इति दूषणमनवकाशमिति दिक्।

दीधितिः।

स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे तु निरुक्तप्रतियो-
गितानवच्छेदकत्वघटितसाध्याभावप्रतियोगितासामान्ये यत्स-
[illegible] तद्धर्मावच्छिन्नत्वोभयाभाववत्त्वेन सम-
[illegible] तद्धर्मावच्छिन्नस्य व्यापकत्वं वाच्यम्। गगनाग-
[illegible] साध्यत्वादौ गगनादे-
[illegible] प्रतियोगितावच्छेदकत्वं दुर्वचम्। [illegible]
[illegible] प्रतियोगि[illegible]
[illegible] जातिविशेषे वह्निधूमा-
[illegible] प्रतियो-
[illegible] वृत्तिमत्त्वमपि [illegible]।

[illegible]

[illegible]

अन्यथा तेषां परमार्थसत्त्वानुपपत्तिः तस्य कालवृत्तितारूपत्वात्, एवं कारणत्वानुपपत्तिश्च तस्य पूर्व्वकालवृत्तिताघटितत्वात् अवृत्तित्वप्रवादश्च तत्र कालिकातिरिक्तसम्बन्धेनावृत्तित्वपरः, इत्थञ्च कालिकसम्बन्धसामान्ये गगनादिप्रतियोगिकत्व महाकालानुयोगिकत्वोभयाभावोऽपि दुर्लभ इति तदभावेऽपि प्रतियोगिवैयधिकरण्यं दुर्घटमतः कालिकसम्बन्धेन विश्वस्य वृत्तित्वपक्षे कल्पान्तरमाह, 'स्वरूपेति, यद्यपि गगनादेः कालिकादिसम्बन्धेनासम्बद्धत्वेऽपि ईश्वरज्ञानं विषयितासम्बन्धेन घटवन्नित्यज्ञानत्वादित्यादावव्याप्तिः पूर्व्वकल्पे दुर्न्निर्व्वारा वस्तुमात्रस्यैव हेतुमति ईश्वरज्ञाने विषयितासम्बन्धेन सम्बद्धत्वात् तत्र तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः, तथापि वृत्त्यनियामकसम्बन्धेन व्यापकत्वानभ्युपगन्तृणां तत्र तादृशाभावाप्रसिद्धेरदोषतया कालिकसम्बन्धेन गगनादेर्वृत्तिमत्त्वपक्षे तेन सम्बन्धेन घटादिसाध्यकमहाकालत्वादावव्याप्तिरेव कल्पान्तरानुसरणबीजतयोपदर्शिता ।

केचित्तु साध्यतावच्छेदकविशिष्टप्रतियोगिकत्वघटितत्वावच्छिन्नाभावविवक्षणे घटवन्नित्यज्ञानत्वादित्यादौ नाव्याप्तिप्रसङ्गः पटत्वादिविशिष्टनिरूपितायामीश्वरज्ञानानुयोगिकविषयितायां साध्यतावच्छेदकघटत्वादिविशिष्टप्रतियोगिकत्वविरहात् उपदर्शितत्वावच्छिन्नभावसत्त्वेन पटत्वावच्छिन्नाभावस्यैव लक्षणघटकतया अव्याप्तिविरहात् पूर्व्वकल्पे न तत्र दोष. । न चोक्तत्वावच्छिन्नाभावविवक्षणे महाकालो घटवान् काल-

मन्निष्ठतदधिकरणतायां साध्याभावाधिकरणताभिन्नत्वेन विशि-
भेदसत्त्वादित्युभयाभावघटितप्रतियोगिवैयधिकरण्यानुधावनं दीधि-
तिकृतामफलमेव, एवञ्च प्रतियोगिवैयधिकरण्यस्य यादृशप्रति-
योगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत इत्यादिक्रमेण
निर्व्वचनेऽननुगमात् प्रतियोगितावच्छेदकत्वाभावकूटनिवेशे च
व्याप्तिर्दुर्ज्ञेया इति दूषणमनवकाशमिति दिक् ।

दीधितिः ।

स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे तु निरुक्तप्रतियो-
ग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्स-
म्बन्धावच्छिन्नत्व-यद्धर्म्मावच्छिन्नत्वोभयाभावस्तेन सम्ब-
न्धेन तद्धर्म्मावच्छिन्नस्य व्यापकत्वं बोध्यम् । समवाय-
सम्बन्धेन मेयसामान्याभावस्य सामान्यादौ सत्त्वान्मेय-
त्वादेरप्यभावप्रतियोगितावच्छेदकत्वं सुलभम् । अतएव
समवायसंसर्गकत्वेन द्रव्यत्वादिप्रतियोगिकत्व-गुणाद्यनु-
योगिकत्वोभयसत्त्वेऽपि द्रव्यं जातेरित्यादौ वह्नि-धूमो-
भयस्मात् वह्निरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियो-
गिकत्वविरहेऽपि च नातिव्याप्तिरित्यपि वदन्ति ।

गादाधरी विवृतिः ।

[illegible]

अन्यथा तेषां परमार्थसत्त्वानुपपत्तिः तस्य कालवृत्तितारूपत्वात्, एवं कारणत्वानुपपत्तिश्च तस्य पूर्व्वकालवृत्तिताघटितत्वात् अवृत्तित्वप्रवादश्च तत्र कालिकातिरिक्तसम्बन्धेनावृत्तित्वपरः, इत्यञ्च कालिकसम्बन्धसामान्ये गगनादिप्रतियोगिकत्व महाकालानुयोगिकत्वोभयाभावोऽपि दुर्लभ इति तदभावेऽपि प्रतियोगिवैयधिकवत्त्वं दुर्घटमतः कालिकसम्बन्धेन विश्वस्य वृत्तित्वपक्षे कल्पान्तरमाह, 'स्वरूपेति, यद्यपि गगनादेः कालिकादिसम्बन्धेनासम्बद्धत्वेऽपि ईश्वरज्ञानं विषयितासम्बन्धेन घटवन्नित्यज्ञानत्वादित्यादावव्याप्तिः पूर्व्वकल्पे दुर्निर्व्वारा वस्तुमात्रस्यैव हेतुमति ईश्वरज्ञाने विषयितासम्बन्धेन सम्बद्धत्वात् तत्र तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः, तथापि वृत्त्यनियामकसम्बन्धेन व्यापकत्वानभ्युपगन्तृणां तत्र तादृशाभावाप्रसिद्धेरदोषतया कालिकसम्बन्धेन गगनादेर्वृत्तिमत्त्वपक्षे तेन सम्बन्धेन घटादिसाध्यकमहाकालत्वादावव्याप्तिरेव कल्पान्तरानुसरणबीजतयोपदर्शिता ।

केचित्तु साध्यतावच्छेदकविशिष्टप्रतियोगिकत्वघटितत्वित्वावच्छिन्नाभावविवक्षणे घटवन्नित्यज्ञानत्वादित्यादौ नाव्याप्तिप्रसङ्गः पटत्वादिविशिष्टनिरूपितायामीश्वरज्ञानानुयोगिकविषयितायां साध्यतावच्छेदकघटत्वादिविशिष्टप्रतियोगिकत्वविरहात् उपदर्शितत्वित्वावच्छिन्नभावसत्त्वेन पटत्वावच्छिन्नाभावस्यैव लक्षणघटकतया अव्याप्तिविरहात् पूर्व्वकल्पे न तत्र दोष. । न चोक्तत्वित्वावच्छिन्नाभावविवक्षणे महाकालो घटवान् काल-

वाच्यम् । व्याप्यवृत्तिसाध्यकेऽपि साध्यस्य अव्याप्यवृत्तित्वभ्रमदशायामनुमितिनिर्व्वाहाय प्रतियोगिवैयधिकरण्यविषयकज्ञानस्य हेतुताया: स्वीकरणीयतया तत्रापि प्रतियोगिवैयधिकरण्यप्रसिद्धेरावश्यकत्वात् अन्यथा प्रतियोगिवैयधिकरण्याघटितव्यापकताज्ञानस्य दुर्घटत्वात्, 'अव्याप्यवृत्ति किमपीत्यादेरपि अव्याप्यवृत्तित्वेन ज्ञात किमपि व्यापकं न स्यादित्यर्थः । वस्तुतस्तु एतत्क्षणान्यक्षणवृत्तित्वविशिष्टप्रमेयवान् कालपरिमाणादित्यादेः कालिकाव्याप्यवृत्तितया तत्र प्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकतया तत्रैवाप्रसिद्धिनिबन्धनाव्याप्तेः कल्पान्तरानुसरणं सङ्गतमित्याहुः । तच्चिन्त्यं, परमेश्वरज्ञानानुयोगिकप्रमेय-घटत्वावच्छिन्ननिरूपितविषयितायां साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गताया साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वस्य घटत्वाद्यवच्छिन्नप्रतियोगिकत्वस्य च सत्त्वेन प्रमेयवन्नित्यज्ञानत्वादित्यादौ घटत्वाद्यवच्छिन्नाभावे प्रतियोगिवैयधिकरण्यस्य दुर्घटतया अव्याप्तेरुक्तरीत्या वारणासम्भवात् । न च शुद्धप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वस्य त्वित्वावच्छिन्नाभावप्रतियोगितया विवक्षणात् प्रमेयघटत्वाद्यवच्छिन्ननिरूपितविषयितानिरूपकत्वस्य च घटत्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकघटत्वादिना शुद्धेनानवच्छिन्नत्वात् तादृशविषयितायामुक्तत्वित्वावच्छिन्नाभावोऽक्षत एवेति वाच्यम् । एवं सति परमेश्वरज्ञानस्य प्रमेयत्वादिसहितघटत्वावच्छिन्नविषयतामात्रेणैव तस्य सार्व्वज्ञनिर्व्वाहे शुद्धघटत्वाद्यवच्छिन्ननिरूपितविषयतायास्तत्र मानेऽप्रामाणिकतया शुद्धघटत्वाद्यवच्छिन्नसाध्यके

नित्यज्ञानत्वादिहेतौ शुद्धघटत्वाद्यवच्छिन्नाभावस्यापि प्रतियोगि वैयधिकरण्यसत्त्वेनाव्याप्तेः ईश्वरज्ञानानुयोगिकविषयितासामान्ये शुद्धघटत्वाद्यवच्छिन्नप्रतियोगिकत्वविरहेण विषयितासामान्ये तित्वावच्छिन्नाभावस्याक्षतत्वात्। अस्तु वा ईश्वरज्ञानेऽपि शुद्धघट त्वावच्छिन्नविषयिता तथापि तद्घटत्वावच्छिन्नसाध्यके प्रमेय त्वसहिततद्घटत्वेनैव यज्ज्ञानं तद्घटं विषयीकरोति तादृशज्ञान मात्रवृत्तिहेतुकस्थलेऽव्याप्तेर्दुरुद्धरत्वात् तद्घटविषयकेऽपि ज्ञाने तद्घटानधिकरणकालावच्छेदेन तद्घटत्वावच्छिन्नाभावसत्त्वात् तादृशाभावस्य च शुद्धतद्घटत्वरूपप्रतियोगितावच्छेदकावच्छिन्न-प्रतियोगिकत्वं तज्ज्ञानानुयोगिकविषयितायां नास्तीति तत्रोक्त तित्वावच्छिन्नाभावसत्त्वेन प्रतियोगितावच्छेदकविशिष्टव्यधिकरण-त्वात्। 'स्वरूपसम्बन्धेन' कालिकसम्बन्धेन, 'निरुक्तप्रतियोग्यन-धिकरणेति प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदका-वच्छिन्नानधिकरणेत्यर्थः। एवञ्च स्वावच्छिन्नत्व-साध्यतावच्छेदक-सम्बन्धावच्छिन्नत्वोभयाभाववत्तादृशप्रतियोगितासामान्यको यो धर्मस्तदवच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्नानुमित्यौपयिक-व्याप्तिरिति पर्यवसितं, घटवान् महाकालत्वादित्यादौ समवाया-दिना घटाद्यभावीयप्रतियोगितैव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिरूपिका प्रसिद्धा तादृशप्रतियोगितासा-मान्ये च कालिकसम्बन्धावच्छिन्नत्वाभावादेव निरुक्तोभयाभाव-वत्त्वमक्षतमिति लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ संयोगा-दिना घटाद्यभावप्रतियोगितायाः समवायादिना धूमाद्यभाव

प्रतियोगितायाञ्च धूमत्वाद्यवच्छिन्नत्व-साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावसत्त्वेऽपि साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नाभावप्रतियोगिताया अपि निरुक्तप्रतियोगितासामान्यान्तर्गतत्वेन तदुभयसत्त्वान्नातिव्याप्तिः, धूमादिसमानाधिकरणस्य समवायादिना वह्न्याद्यभावस्य संयोगादिना घटाद्यभावस्य च प्रतियोगितायां साध्यतावच्छेदकधर्म्मावच्छिन्नत्व-तादृशसम्बन्धावच्छिन्नत्वयोरेकैकसत्त्वेऽपि एकैकाभावेन द्वित्वावच्छिन्नाभावसत्त्वात् लक्षणसमन्वयः। यद्यपि तादृशाभावीयसाध्यतावच्छेदकधर्म्मावच्छिन्नप्रतियोगितासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमात्रस्याभावनिवेशेऽपि सामञ्जस्यं इदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वत्वाद्यवच्छिन्नभेदादिप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविरहमादाय प्रमेयसामान्यसाध्यके संयोगेन जन्यत्वविशिष्टघटादिहेतौ साध्यतावच्छेदकावच्छिन्नभेदस्य संयोग-समवाय-कालिकविशेषणतासम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य च हेतुमत्यसम्भवेऽपि विषयितासम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य नित्यज्ञानमात्रवृत्तिहेतौ च संयोगसम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य तद्वति प्रसिद्धा तदीयसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायामुक्तसम्बन्धावच्छिन्नत्वस्य विरहमादाय लक्षणसमन्वयसम्भवात्। तथापि हेतुमति सर्व्वैरेव सम्बन्धैः साध्यं वर्त्तते न तु कस्यामपि तादृशाभावप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वमिति भ्रमदशायामप्यनुमितेरानुभविकतया साध्यतावच्छेदकावच्छिन्नत्वेन तादृशाभावप्रति-

सम्बन्धेन व्यापकतास्वीकारे तादृशसम्बन्धस्याभावप्रतियोगितानव-च्छेदकत्वे प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धेन प्रतियोगिता-वच्छेदकानधिकरणहेत्वधिकरणकाभावप्रतियोगितावच्छेदकतासा-मान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व-तादृशरूपावच्छिन्नत्वोभ-याभावस्य विवक्षणीयतया सामञ्जस्यात् तथाहि विषयितादिसम्ब-न्धेन साध्यताया सद्धेतौ तत्सम्बन्धावच्छिन्नावच्छेदकताकसाध्यवद-भावो न प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छे-दकानधिकरणहेत्वधिकरणकः अपि त्वन्यसम्बन्धेन साध्यादिमद-भावस्तत्सम्बन्धेनान्यावच्छिन्नस्याभावो वा तादृशः तत्प्रतियोगि-तावच्छेदकतायाञ्च उभयाभावसत्त्वाल्लक्षणसमन्वयः, तत्सम्बन्धाव-च्छिन्नसाध्यके व्यभिचारिणि च तादृशसम्बन्धेन साध्यवदभावो-ऽपि तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयसत्त्वेन नाति-व्याप्तिः। वह्निमान् धूमादित्यादौ तु संयोगादिना घटादिमद-भावः समवायादिना वह्न्यादिमदभावश्च लक्षणघटकस्तत्प्रति-योगितावच्छेदकतायाञ्चोभयाभावसत्त्वाल्लक्षणसमन्वयः. धूमवान् वह्नेरित्यादौ तु साध्यतावच्छेदकसम्बन्धेन साध्यवतोऽभावोऽपि तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयस्यैव सत्त्वान्नाति-व्याप्तिः. अन्यत्तत्त्वं त्वयमूह्यम्।

पूर्व्वकल्पे दोषान्तरमपि दर्शयति, 'अतएवेति पूर्व्वकल्पं परित्यज्यैतत्कल्पावलम्बनादेवेत्यर्थः', समवायस्य उभयवत्त्वे हेतुः 'एकत्वेनेति, 'उभयसत्त्वेऽपीत्यनेन द्रव्यत्वाभावे हेत्वधिकरण-गुणादौ उभयाभावघटितप्रतियोगिवैयधिकरण्यासम्भवः सूचितः।

[illegible] सामान्याभावे च [illegible]-
[illegible]-
[illegible]
[illegible] । इत्यत एव स्फटिकादौ [illegible]-
[illegible] तत्र [illegible] साक्षात् तत्र सत्त्वे [illegible]प्रतियोगि-
[illegible]   स्फटिकाद्यनुयोगिकसंयोगादिघटित-
[illegible] साक्षाल्लौहित्यप्रतियोगि-
कसमवायेन [illegible] प्रतियोगितावच्छेदकत्वं
साक्षात्परम्परासाधारण प्रतियोगिप्रतियोगिकत्वस्यानुगत [illegible]
तादृशस्य तस्य निवेशे पर्वतानुयोगिकवह्निसंयोगा-
देरपि धूमादेः परम्परासम्बन्धघटकत्वसम्भवेन धूमादिप्रति-
योगिकतया वह्निधूमाद्यभावेऽपि प्रतिबन्धकत्वानुपपत्तिः ।
न च तादृशसंयोगे संयोगत्वपुरस्कारेण साक्षाल्लौहित्यप्रति-
योगिकत्वविरहेऽपि साक्षात्तावच्छेदकसम्बन्धतावच्छेदकसमवायि-
संयोगत्वपुरस्कारेण तत्प्रतियोगिकत्वं स्वीक्रियत इति वाच्यम् ।
मानाभावात् समवायस्य तत्प्रतियोगिकतयैव तद्घटितपरम्प-
राया सम्बन्धतोपपत्तेः, किञ्चिद्रूपेणापि संयोगादेर्लौहित्यादि-
प्रतियोगिकत्वेऽपि संयोगादिना किञ्चित्समवायिनिरूपितत्वविशि-
ष्टसंयोगादिना वा साक्षात्सम्बन्धात्मकेन स्फटिकादौ लौहित्यादि-
विशिष्टबुद्धेर्भ्रमत्वानुपपत्तेः प्रमात्वापत्तेश्च, यादृशसम्बन्धे यत्प्र-
कारप्रतियोगिकत्व-यद्विशेष्यानुयोगिकत्वोभयाभावस्तादृशसम्बन्धेन
तत्प्रकारक-तद्विशेष्यकज्ञानं भ्रम इति तल्लक्षणात् तज्ज्ञानाच्च-

सम्बन्धघटकविशेषणांशे तादृशसम्बन्धेन साध्याधिकरणरूपहेत्व- धिकरणव्यक्त्यनुयोगिकविशेष्यीभूतसम्बन्धप्रतियोग्यनुयोगिकत्वघ-- टितोभयसत्त्वात् व्यभिचारनिरूपकाधिकरणहेत्वधिकरणानुयोगि- कविशेष्यीभूतसम्बन्धस्य चाप्रसिद्धेः साध्याभावस्य लक्षणाघट- कत्वादभावान्तरस्यैव लक्षणघटकत्वात्। न च परम्परासम्बन्ध- घटकविशेष्यांशे हेत्वधिकरणानुयोगिकत्व-परम्पराघटकविशेषणी- भूतसम्बन्धवन्निरूपितत्व-निरुक्तप्रतियोगिकसम्बन्धवन्निरूपितत्वाना- दयागासभावनिवेशान्न दोषः समवायिसमवेतत्वसम्बन्धेन जाति- साध्यकमेयत्वादौ कालिकविशेषणतावत्समवेतत्वसम्बन्धेन द्रव्य- त्वसाध्यक-द्रव्यवृत्तित्वे स्वसमवायिसंयोगसम्बन्धेन लौहित्यसाध्यक- जात्याद्य?युक्तद्रव्यमात्रवृत्तिहेतुके व्यभिचारिणि साध्याभावसप- हाय दयागासभावप्रतियोगित्वेन निवेशः एवञ्च कालिक- विशेषणतादिघटितसामानाधिकरण्यसम्बन्धेन घटसाध्यकमहा- कालवृत्तित्वादौ गगनाभावस्य संग्रहः गगनादिनिरूपितकालिक- सम्बन्धाप्रसिद्धावपि तन्निरूपिततादात्म्य-विषयितादिसम्बन्धवन्नि- रूपितत्वप्रसिद्ध्या त्रित्वावच्छिन्नाभावसौलभ्यादिति वाच्यम्। स्वीयकालिकसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन जन्यज्ञानादेः साध्यत्वे व्यभिचारिणि कालवृत्तित्वादिहेतावतिव्याप्त्यापत्तेः। व्यभिचारनिरूपकाधिकरणप्रलयत्वादिनिष्ठायाम् उक्तसम्बन्ध- घटकविषयताया कालिकसम्बन्धवन्निरूपितत्व-साध्यीयविषयता- सम्बन्धवन्निरूपितत्वयोः सत्त्वेनाधेयतासामान्ये दर्शितत्रित्वावच्छि- न्नाभावासत्त्वेन साध्याभावस्य प्रतियोगिवैयधिकरण्यानिर्वाहात्।

पितेति सचानुपयुक्त एवेति वाच्यं। परम्परासम्बन्धावच्छिन्ना-
भावस्य हि प्रतियोगितावच्छेदकसम्बन्धता परम्पराघटकयाव-
द्वस्तुषु विशेष्य-विशेषणभावापन्नेषु पर्य्याप्ता, विशिष्टसाचात्-
सम्बन्धावच्छिन्नाभावस्य तु तादृशसम्बन्धता विशेष्य-एव पर्य्याप्ता
विशेषणन्तु सम्बन्धविधया अवच्छेदकतायामवच्छेदकत्वमेव
न तु तदन्तर्भावेन सम्बन्धविधया प्रतियोगित्वावच्छेदक-
त्वस्य पर्य्याप्ति', इत्थमरीत्यैवाभाववैलक्षण्यनिर्व्वाहात् तथाच
परम्परासम्बन्धेन यत्र साध्यता तत्र परम्पराघटकयावद्वस्तुषु
पर्य्याप्तावच्छेदकताकत्वरूप साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं
निवेशनीयम् उक्तस्थले चाधिकरणविशेषणीभूतसमवायस्य प्रति-
योगितावच्छेदकतायामेवावच्छेदकतया प्रतियोगिताया तदन्तर्भा-
वेन पर्य्याप्तावच्छेदकताकत्वाभावान्नाव्याप्तिरिति दिक् । संयोग-
त्वावच्छिन्नस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि वह्नि धूमोभय-
वान् वह्नेरित्यादौ नातिव्याप्तिरिति योजना, अयं भावः प्रत्येकं
संयोगत्वावच्छिन्नस्य द्वित्वावच्छिन्नप्रतियोगिताकत्वविरहेण वह्नि-
धूमोभयवान् धूमादित्यत्र संयोगसम्बन्धसामान्ये वह्नि-धूमोभयत्वा-
वच्छिन्नप्रतियोगिताकत्व-द्वित्वधिकरणानुयोगिकत्वोभयाभावसत्त्वात्
तादृशोभयत्वावच्छिन्नाभावोऽपि संयोगेन प्रतियोगितावच्छेदकाव-
च्छिन्नव्यधिकरणतया लक्षणघटक इत्यव्याप्तिः स्यादत. संयोगे-
नोभयसाध्यकस्थले प्रतियोगितावच्छेदकावच्छिन्नत्वं परित्यज्य
प्रतियोगितान्वयप्रतियोगिकत्वमेव निवेशनीयं तथाच वह्नि-
धूमोभयवान् वह्नेरित्यादावपि वह्नि-धूमोभयत्वावच्छिन्नाभावस्य

यथासंख्येन च स्खलद्द्वयेऽतिव्याप्त्यव्याप्ती योजयन्ति, इदमत्रावधेय घटद्वयवद्भूतलमित्यादौ द्वित्वोपलक्षितघटादिवैशिष्ट्य तद्विशिष्ट-वैशिष्ट्यं वा भासते आद्ये एकघटादिमत्यपि तत्प्रसङ्ग.। न च द्वित्वोपलक्षितस्यापि व्यक्तिद्वयस्यैव वैशिष्ट्यद्वय तत्र भासते इति नातिप्रसङ्ग इति वाच्यम्। एकस्मिन्नपि धर्म्मिणि भेदभ्रमेण द्वित्व-भ्रमात् तत्प्रकारकप्रतीतावुभयभानानियमात् तादृगबुद्धेर्द्वित्व-विशिष्टाभावज्ञानविरोधित्वानुपपत्तिश्च विशिष्टवैशिष्ट्यज्ञानस्यैव विशिष्टाभावबुद्धिविरोधित्वात्, द्वितीये संयोगसंसर्गकतादृशज्ञान-मात्रस्यैव भ्रमत्वापत्ति संयोगरूपवैशिष्ट्ये द्वित्वावच्छिन्नप्रति-योगिकत्वविरहात् तस्मात् द्वित्वादिविशिष्टप्रतीतौ संयोगमात्रं न सम्बन्धः अपि तु द्वित्वावच्छिन्ननिरूपिताधिकरणतैव, अधि-करणता च पदार्थान्तरमधिकरणस्वरूप वा उभयथैव निरूपक-भेदेऽपि निरूपकतावच्छेदकद्वित्वस्यैक्यात् तदैक्यमिति संयोगप्रति-योगितावच्छेदकत्ववत् न तत्प्रतियोगितावच्छेदकत्वस्य द्वित्वेऽनुप-पत्तिरित्यपीयम् एवञ्च वह्नि-धूमोभयत्वावच्छिन्नसाध्यके संयोगा-वच्छिन्नाधिकरणताया एव साध्यतावच्छेदकसम्बन्धत्व तत्र चोभय-त्वावच्छिन्नप्रतियोगिताकत्वसत्त्वान्नाव्याप्तिप्रसक्तिः अन्यथा द्वितीय-कल्पेऽपि प्रतियोगितावच्छेदकावच्छिन्ननिरूपितप्रतियोगितावच्छेदकसम्बन्धानुयोगित्वनिवेशात् उभयत्वावच्छिन्नप्रतियोगिक-संयोगाप्रसिद्धा संयोगेनोभयत्वावच्छिन्नसाध्यके व्यभिचारिणि तत्सम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताया लक्षणा-घटकत्वेनातिव्याप्तिर्दुर्निवारत्वात्। यत्तु पर्वतो वह्निमान् इत्या-

मकानुयोगः। न चैवं संयोगिन्यपि संयोग एवाधारतास्तु सचानुयोगितासम्बन्धेनाधारपदप्रवृत्तिनिमित्तमिति संयोगस्य द्विष्ठत्वेऽपि नाधेये तद्व्यवहार इति वाच्यं। संयोगीयसमवायातिरिक्ताया: आधेयव्यावृत्तानुयोगिताया: स्वीकारे तस्या एव संयोगिनिरूपिताधिकरणतात्वोपगमेनातिरिक्ताधारताया निष्प्रत्यूहत्वात्। न च तत्र संयोगिप्रतियोगिकत्वं कल्पनीयमिति गौरव. भवन्मतेऽपि संयोगे तत्समवेतत्वातिरिक्तस्य तत्प्रतियोगिकत्वस्य कल्पनीयतया साम्यात् अन्यथा भूतलादे. स्वसमवेतघटादिसंयोगानुयोगितया आधारतापत्ते। एतेन संयोगिन्याधेयतापि संयोग एव प्रतियोगितासम्बन्धेन तस्याधेयपदप्रवृत्तिनिमित्ततया आधारे न तद्व्यवहार इत्यपि निरस्तं। आधेयनिष्ठाधारव्यावृत्तपदार्थान्तरकल्पनाया आवश्यकत्वात्, आधाराधेययो: संयोगानुयोगित्व-प्रतियोगित्वकल्पने विपरीतकल्पनाया अपि बाधकाभावाच्चेति दिक्(१)।

न चैवं संयोगिन्यपि संयोग एवाधारतास्तु स चानुयोगितासम्बन्धेनाधारपदप्रवृत्तिनिमित्तमिति समवायवत्संयोगस्यापि सम्बन्धत्वं दुर्वारं स च स्वानुयोगिन्येव धर्म्मस्य विशिष्टप्रमानियामक, अत संयोगसंसर्गक घटोऽभूतलवानित्यादिबुद्धेर्न प्रमात्वं भूतले घट इत्यादिबुद्धौ च स्वनिष्ठसंयोगप्रतियोगित्वं धर्म्मो धर्म्मिसंसर्गतया भासत इति वाच्यम्। संयोगो धर्म्म एव धर्म्मिणि संसर्ग धर्म्म एव तदनुयोगित्व धर्म्मिणि तु तत्प्रतियोगित्वमिति भूतले घट इत्यादावेव संयोगस्य सम्बन्धतया भानं घटवद्भूतलमित्यादौ तु स्वनिष्ठसंयोगप्रतियोगित्वं धर्म्मिणि धर्म्मसम्बन्ध इत्यस्यापि सुवचत्वेन विनिगमनाविरहात् तस्य तु संयोगेन धर्म्मत्व धर्म्मित्वयोरेव धर्म्म-धर्म्मिणोर्धर्मि धर्मसम्बन्धयो संयोगावच्छिन्नत्वेन सम्बन्धान्तरेण

सत्तानुयोगः। न चैवं संयोगिन्यपि संयोग एवाधारतास्तु सचानुयोगितासम्बन्धेनाधारपदप्रवृत्तिनिमित्तमिति संयोगस्य द्विष्ठत्वेऽपि नाधेये तद्व्यवहार इति वाच्य। संयोगीयसमवायातिरिक्ताया: आधेयव्यावृत्तानुयोगिताया: स्वीकारे तस्या एव संयोगिनिरूपिताधिकरणतात्वोपगमेनातिरिक्ताधारताया निष्प्रत्यूहत्वात्। न च तत्र सं योगिप्रतियोगिकत्वं कल्पनीयमिति गौरव. भवन्मतेऽपि संयोगे तत्समवेतत्वातिरिक्तस्य तत्प्रतियोगिकत्वस्य कल्पनीयतया साम्यात् अन्यथा भूतलादे. स्वसमवेतघटादिसंयोगानुयोगितया आधारतापत्तेः। एतेन संयोगिन्याधेयतापि संयोग एव प्रतियोगितासम्बन्धेन तस्याधेयपदप्रवृत्तिनिमित्ततया आधारे न तद्व्यवहार इत्यपि निरस्तं। आधेयनिष्ठाधारव्यावृत्तपदार्थान्तरकल्पनाया आवश्यकत्वात्, आधाराधेययो: संयोगानुयोगित्व-प्रतियोगित्वकल्पने विपरीतकल्पनाया अपि बाधकाभावाच्चेति दिक्(१)।

न चैवं संयोगिन्यपि संयोग एवाधारतास्तु स चानुयोगितासम्बन्धेनाधारपदप्रवृत्तिनिमित्तमिति [illegible] द्रष्टव्यं न च [illegible] योगित्वेन धर्मेण विशिष्टप्रमानियामक, [illegible] विशिष्टप्रमात्वं भूतले घट इत्यादिबुद्धौ च [illegible] धर्मि- [illegible] इति वाच्यम्। संयोगो धर्म एव धर्मिणः [illegible] धर्म एव तदनुयोगित्वं धर्मिणि तु [illegible] भूतले घट इत्यादौ [illegible] [illegible] भानं [illegible] [illegible]

गदाधरी विवृतिः।

प्रतियोगित्वावच्छेदकत्वादेः स्वरूपसम्बन्धरूपतया सम्बन्धत्वेन तन्निवेशे सम्बन्धत्वस्य नियमघटिततया अनवस्थेत्याशङ्का निरस्यति, 'प्रतियोगित्वादिश्चेति, सम्बन्धविशेषोऽपि न सम्बन्धत्वेन लक्षणघटकः अपि तु प्रतियोगितात्वादिना कुत्रचित् सम्बन्धविधया स्वरूपत एवेत्यर्थः। ननु तत्सामानाधिकरण्यं तत्सम्बन्धिसम्बन्धित्वं तत्र च सम्बन्धत्वेनैव सम्बन्धनिवेश इत्याशङ्काह, 'सामानाधिकरण्येऽपीति, 'संयोगत्वादिनैवेति, साधनतावच्छेदकादिभेदेनेव सम्बन्धतावच्छेदकभेदेनापि व्याप्तिभेदस्येष्टत्वादिति भावः। साध्यसामानाधिकरण्यशरीरे साध्यवत्संयुक्तत्वादिरूपहेतौ. सम्बन्धस्य प्रकारतया तस्यैव संयोगत्वादिना निवेशः, साध्यसम्बन्धस्य च धर्म्मंशे तत्संसर्गविधयैव लाघवेन निवेशात्तस्य स्वरूपत एव निवेशः सम्भवति जात्यतिरिक्तस्यापि संसर्गतया भाने स्वरूपतोऽपि तदुपगमादित्यवधेयम्। सम्बन्धत्वनिवेशेऽपि च न क्षतिरित्याह, 'दर्शितश्चेति, 'नियमाघटितमिति तत्प्रतियोगिकत्वविशेष एव तदीयसम्बन्धत्वं न तु तदीयविशिष्टबुद्धिनियामकत्व, अतीन्द्रियसम्बन्धे जनकत्वरूपनियामकत्वासम्भवात् विषयत्वरूपनियामकत्वनिवेशे व्याप्तेरेवानन्तर्भावात् प्रमेयमात्रेऽतिप्रसङ्गाच्च। न च विशेष्यतान्यतत्प्रकारतानिरूपितविषयताया एव विवक्षणीयतया नातिप्रसङ्ग इति वाच्यम्। एवं सति संयोगादिना द्रव्यत्वादिभ्रमविषयतामादाय तस्यापि तत्सम्बन्धत्वापातात्। न च विषयतायां

सम्बन्धप्रतियोगिकत्वनिवेशान्नातिप्रसङ्ग इति वाच्यम्। [illegible]

तत्सम्बन्धानुयोगिविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपतया [illegible]

त्वघटितत्वात्, एवं तदनुयोगिकत्वविशेष एव तत [illegible]

त्वमिति भावः। इत्यत्र सामान्यतः सम्बन्धघटितसा [illegible]

सम्बन्धत्वरूपं सामानाधिकरण्यं साध्यवदनुयोगिकप्रतियो [illegible]

प्रतियोगितासम्बन्धेन साध्यवदनुयोगिकवत्त्वं वा तत्र [illegible]

तादिना तद्घटितत्वात् साध्यवदनुयोगिकसंयोगप्रतियोगि [illegible]

[illegible] तदेव व्याप्तिघटकं वाच्यम् [illegible]

[illegible] सम्बन्धनिवेशेनैव [illegible]

[illegible] संयोगादिना [illegible]

[illegible]

[illegible] वाचितम्। [illegible]

ण्यतिप्रसङ्गात्। 'भावाभावसाधारण इति, भावेनापि घटे घटत्वाभावो नास्ति घटो न घटभिन्न इति प्रतीतिजननादिति भावः। तदवच्छिन्नेऽभावपदस्य रूढिशक्तिः परिभाषैव वा अतो न भावोऽभाव इत्यवयवव्युत्पत्त्या तद्वर्गाप्रत्ययेऽपि न क्षतिः। 'स्वरूपसम्बन्धविशेष इति अभावे तत्स्वरूपप्रतियोगिनिरूपितानुयोगित्वनामा सम्बन्धविशेष इत्यर्थः। न चाभावत्वस्य स्वरूपत्वेऽननुगमादनुगतप्रत्ययानुपपत्तिः, तदनुगमकरूपान्तराभ्युपगमात् पदार्थान्तरत्वेऽपि निरूपकभेदेन सम्बन्धान्तरवत्तद्भेदस्यावश्यकतया अनुगमकरूपान्तरापेक्षणात्। यत्तु प्रतियोगिनिरूपितसम्बन्धानामननुगमेऽपि प्रतियोगिधर्म्मितावच्छेदकस्य नञ्पदप्रवृत्तिनिमित्ताखण्डधर्म्मान्तरस्य सत्त्वाद्घटो नास्ति पटो नास्तीत्याद्यनुगतप्रतीतिनिर्व्वाह इति, तन्न साधीयः, घटादौ पटाद्यभावादेः कालिकसम्बन्धस्यापि स्वरूपतया तत्संसर्गकप्रतीतितो घटाभावो नास्तीत्याद्यनुयोगितासंसर्गकप्रतीतिवैलक्षण्याय संसर्गतावैलक्षण्यस्यावश्यकतया संसर्गतावच्छेदकधर्म्मविशेषस्वीकारस्य तन्निर्व्वाहकस्यावश्यकत्वात् तेनानुगतीकृतानुयोगिताया एव संसर्गतावद्धर्म्मितावच्छेदकताया अपि सम्भवेनाभावनिष्ठाखण्डधर्म्मान्तरे मानाभावात् नञ्पदप्रवृत्तिनिमित्तताया अपि तस्या एवोपगमात्। अथ नास्तीत्यादावनुयोगितारूपसम्बन्धविशेषप्रकारेणाभावभानोपगमे तदंश एव स्वनिरूपितत्वसम्बन्धेन प्रतियोगिनः प्रकारत्वसम्भवादभावांशे तत्सम्बन्धेन प्रतियोगिनो भाने मानाभावादनुयोगितायाः सम्बन्धत्व-

साभावमादायातिप्रसङ्ग इति शुद्धतादृशावच्छेद्यत्वत्वावच्छिन्नाभाव एव निवेशनीयः शुद्धतादृशावच्छेद्यत्वत्वावच्छिन्नत्वमपि तदतिरिक्तानवच्छिन्नत्वमिति विशेषणानवस्थाप्रसङ्ग इत्यपि परास्तं, इत्यलमप्रस्तुताधिकजल्पनया। यदि चान्योन्याभावात्यन्ताभावसाधारणमभावत्वं नैकं प्रमाणाभावात् अतएव संसर्गाभावोऽन्योन्याभावश्च नञर्थ इत्यनेन तयोः पृथगेव नञर्थत्वमुक्तं, तथाच संसर्गाभावप्रतियोगितायां तादात्म्यसम्बन्धावच्छिन्नत्वस्यान्योन्याभावप्रतियोगितायां संसर्गावच्छिन्नत्वस्याभावादुभयाभाववत्प्रतियोगितागर्भलक्षणातिव्याप्तिरित्यत आह, 'तदपि वेति, 'तदपि' तादृशाभावत्वमपि, 'नोपादेयं' हेतुसमानाधिकरणांशे विशेषणतया न निवेशनीयं, 'प्रयोजनाभावादिति, (१) स्वावच्छेदकविशिष्टानधिकरणहेतुमन्निष्ठत्वमात्रपुरस्कारेणाभावं निवेश्य तदीयत्वेन प्रतियोगितानिवेशादेव सर्व्वसामञ्जस्यादिति भावः। प्रसङ्गात् प्रतियोगित्वादीनां पदार्थान्तरत्वं व्यवस्थापयति, 'विषयेति, 'तत्त्व' विषयतात्वं, प्राचीनैकदेशिभिर्विषयताया अतिरिक्तपदार्थत्वोपगमात् दृष्टान्तत्वेन तदुपन्यासः, यथा विषयताया विषयरूपत्वे द्रव्यत्वावच्छिन्नघटादिविषयकज्ञानात् घटत्वावच्छिन्नतद्विषयकज्ञानस्य वैलक्षण्यविरहादवैलक्षण्यापत्तिः, न च द्रव्यत्वघटत्वयोरपि तत्र विषयतया तद्वैलक्षण्यादेव वैलक्षण्यमिति वाच्यं। तावतापि द्रव्यत्वेन घटविषयकाद्घटत्वेन च पटविषय-

(१) प्रयोजनविरहादित्यत्र प्रयोजनाभावादिति क्वचित् दीधितिपुस्तकपाठो वर्त्तते तमनुसृत्यैव प्रयोजनाभावादिति पाठ उद्धृतो भट्टाचार्य्येणेत्यनुमीयते।

प्रतियोगितानामवैलक्षण्यापत्तिः घटत्वादेः प्रतियोगित्वन्यूनवृत्तितया तदवच्छेदकत्वानुपपत्तिः घटाद्यभावस्य पटादिसाधारण्येन पटादावपि तत्प्रतियोगितापत्तिश्च इत्यादियुक्त्या प्रतियोगित्वमप्यतिरिक्तं सिध्यति, एवमधिकरणत्वं नाधिकरणस्वरूपमाधेयस्वरूपं वा भूतले घटसंयोगदशायामिव परम्परासंयुक्तभूतलसत्त्वदशायामपि इदानीं भूतलं घटवदितिप्रत्ययप्रसङ्गात्। संयोगरूपत्वे आधेयत्वस्य तुल्ययुक्त्या तद्रूपतया आधारत्वाधेयत्वयोरभेदप्रसङ्गेन वैपरीत्येनाधाराधेयभावप्रत्ययप्रसङ्गादिति तदप्यतिरिक्तपदार्थः, सम्बन्धत्वमपि क्लृप्तपदार्थान्तर्भावेन दुर्वचमिति पदार्थान्तरमेवेति भावः। आदिपदादभावत्वादिपरिग्रहः, इदन्तु बोध्यं, अभावत्वं प्रतियोगित्वाद्यतिरिच्यते तदभावस्य तत्प्रतियोत्वनियमात्। न चैवं घटादेर्घटादिभेदाभावत्वापत्त्या घटादिमति भूतले घटभेदो नास्तीत्यादिप्रतीत्यापत्तिरिति वाच्यं। संसर्गावच्छिन्नप्रतियोगितायामेवाभावाभावत्वरूपतोपगमात् घटादिभेदस्य घटत्वात्यन्ताभावसमनियतत्वेन तदभिन्नतया घटत्वादौ तदीयसंसर्गावच्छिन्नप्रतियोगितासत्त्वात् तेनैव तदभावप्रत्ययात्। न चैवमपि घटभेदादेर्घटत्वाद्यभावत्वानुपपत्तिस्तदप्रतियोगित्वादिति वाच्य। अत्यन्ताभावत्वात्मकानुयोगिताविशेषस्यैव प्रतियोगितानतिरिक्तत्वोपगमादिति।

इति महामहोपाध्याय-श्रीगदाधरभट्टाचार्यविरचितायामनुमानदीधितिविवृतौ सिद्धान्तलक्षणदीधितिविवृतिः समाप्ता।

भावप्रतियोगितानिरूपिततादृगवच्छेदकत्वाभाववत्तादृगसाध्यतावच्छेदकत्वेनेति तदर्थः, सम्भवत्तादृशप्रतियोगितावच्छेदकताकधर्म्मापेक्षया गुरुत्वं प्रमेयधूमत्वादिस्तादृगप्रतियोगितावच्छेकत्वाभावसाधकं, तस्य तत्साधकत्वोपष्टम्भकव्याप्तिमाह. 'सम्भवतीति तस्मिन्निति पूरणीयं, तथाच लघुधर्म्मे तादृशावच्छेदकत्वस्य सम्भवे इत्यर्थः, 'गुरौ तदभावात्' तादृशावच्छेदकत्वाभावनियमात्, तथाच सम्भवत्तदवच्छेदकताकधर्म्मापेक्षया यो गुरुः स न तदवच्छेदक-इतिव्याप्तेरिति पर्य्यवसितार्थः । सम्भवत्तदवच्छेदकताकत्वञ्च तदवच्छेदकत्वबाधकशून्यत्वं, बाधकञ्चावच्छेद्यप्रतियोगितापेक्षया अधिकदेशवृत्तित्वं न्यूनवृत्तित्वञ्च, अतो महानसीयवह्न्याद्यभावप्रतियोगितायां वह्नित्वादेरधिकदेशवृत्तितया अवच्छेदकत्वबाधकसत्त्वात्तदपेक्षया गुरोरपि महानसीयवह्नित्वादेरच्छेदकत्वनिर्व्वाहः, जात्याद्यत्यन्ताभावस्य समवेतसामान्याभावाद्यभिन्नतया समवेतादिसामान्यवृत्तितत्प्रतियोगिताभिन्नजात्यादिमात्रवृत्तितत्प्रतियोगित्वे मानाभावात् लघुसमवेतत्वादेरेव तदभावप्रतियोगितावच्छेदकत्वं न तु जातित्वादेः, एवं घट-पटान्यतरत्वावच्छिन्नाभावप्रतियोगितान्यूनवृत्तिघटत्वादेर्न्यूनवृत्तित्वरूपबाधकसत्त्वात्तदपेक्षया गुरोरन्यतरत्वादेरवच्छेदकत्वनिर्व्वाहः । सत्तात्वादौ विशिष्टसत्तात्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकतायामुक्तबाधकासत्त्वेऽपि प्रतियोगितानिरूपकाभावविरोधितानवच्छेदकत्वमेव तद्बाधकं, तद्विरोधितानवच्छेदकस्य तत्प्रतियोगितावच्छेदकत्वे तदवच्छिन्नवति तदवच्छिन्नाभावसत्त्वप्रसङ्गात् । यत-

कसमवेतत्वाद्यपेक्षया गुरोर्जातित्वादेर्भेदप्रतियोगितावच्छेदकतया च व्यभिचारात् । ननु मेयधूमत्वं स्वावच्छिन्नधर्म्मिविशेषणतापन्नमेयत्वसहितधूमत्वं सामानाधिकरण्यसम्बन्धेन मेयत्वसहितधूमत्वं वा उभययैव तदवच्छिन्नसाध्यके नातिव्याप्तिप्रसक्तिः शुद्धधूमत्वस्यावच्छेदकत्वे तादृशेऽनवच्छेदकताया दुर्घटत्वात् एकदेशपर्य्याप्तवृत्तेर्व्यासज्यवृत्तिधर्म्मावच्छिन्नानुयोगिताकाभावस्येव विशेष्यपर्य्याप्तवृत्तेर्विशेषणान्तरवैशिष्ट्यावच्छिन्नानुयोगिताकाभावानभ्युपगमात्, शुद्धवह्नित्वादौ धूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वापर्य्याप्तेर्मेयवह्नित्वादौ तदनवच्छेदकत्वसौलभ्येन मेयवह्निमान् धूमादित्यादावव्याप्तिविरहादित्यरुचेः कम्बुग्रीवादिमत्त्वानुधावनं । न चैवं मेयधूमत्वावच्छिन्नसाध्यकेऽतिव्याप्त्यभिधानमत्यन्तासङ्गतमिति वाच्यं । व्यासज्यवृत्तिधर्म्मावच्छिन्नानुयोगिताकाभावाभ्युपगमेन नानाव्यक्तिदण्डाद्यवच्छिन्नस्य व्यापकतानिर्व्वाहाय प्रतियोगितावच्छेदकापर्य्याप्तविधेयतावच्छेदकतापर्य्याप्तिरनवच्छेदकान्तार्थ इत्याशयेन वा तदभिधानात् । कम्बुग्रीवादिमत्त्वञ्च घटत्वव्यञ्जकसंस्थानविशेषस्तस्य च घटत्वापेक्षया गौरव संस्थानस्य विजातीयावयवसंयोगरूपस्यानन्त्यात् अननुगमकजातिविशेषसापेक्षत्वाच्च घटत्वस्य चैकजातिरूपस्य निर्व्विशेषणकस्यावच्छेदकत्वे लाघवादिति । न च घटसामान्याभावप्रतियोगिताया संस्थानविशेषस्यानवच्छेदकत्वेऽपि तत्तत्संस्थानवदभावकूटप्रतियोगितासु प्रत्येक तेषामवच्छेदकत्वमावश्यकं तन्नातिप्रसक्तस्य घटत्वस्यावच्छेदकत्वासम्भवादित्यनुगत-

रूपावच्छिन्नेष्वपि तेष्वनवच्छेदकत्वं दुर्घटमिति तदवच्छिन्नसाध्यके नातिव्याप्तेरवकाश इति वाच्यं। तत्तत्संस्थानवत्तत्तद्घटाभावप्रतियोगितायामपि घटनिष्ठतद्व्यक्तित्वस्यैव साक्षात्सम्बन्धेनावच्छेदकत्वसम्भवात् परम्परासम्बन्धेन स्वसमवायिसमवेतत्वात्मकेन तत्तत्संयोगानां गौरवेणानवच्छेदकतया तादृशसम्बन्धेन संस्थानविशेषावच्छिन्नघटादिसाध्यके व्यभिचारिहेतावतिव्याप्तेर्दुर्वारत्वात्। ननु मृत्पाषाणादिघटसाधारणं घटत्वं नैकं मृत्त्व-पाषाणत्वादिना सङ्करप्रसङ्गादिति तत्तज्जातिव्याप्यं नानैव तथाच तथाविधसकलघटानुगमकसंस्थानविशेषावच्छिन्नप्रतियोगितायां न स्वरूपतोघटत्वस्यावच्छेदकतासम्भवः न्यूनवृत्तित्वात् नाप्यनुगमकरूपान्तरावच्छिन्नस्य, तादृशरूपान्तरप्रवेशेन गौरवादित्यरुचेर्घ्राणग्राह्यगुणत्वानुधावन, घ्राणग्राह्यत्व घ्राणग्रहणयोग्यता गुणत्वन्यूनवृत्तिघ्राणग्राह्यजातिरूपा सा चातीन्द्रियेऽपि गन्धे इति न गन्धत्वस्य दर्शितरूपवत्सामान्याभावप्रतियोगितासमनैयत्यानुपपत्तिः, तादृशयोग्यतामात्रस्योपादाने गन्धत्व सौरभत्वादिरूपायास्तस्याः स्वरूपतोहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतया तादृगजातित्वावच्छिन्नाया अप्यनवच्छेदकत्वं दुर्लभमिति तद्विशेष्यतया गुणत्वनिवेशन, द्रव्यत्वादिहेतुकस्थले च गुणत्वस्य शुद्धस्यापि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वासम्भवाद्विशिष्टगुणत्वस्य गन्धत्वसमनियतस्य तादृशप्रतियोगितानवच्छेदकत्वमक्षतमेवेत्यतिव्याप्तिसङ्गतिः। अथवा घ्राणग्राह्यगुणत्व व्याप्यगुणत्वव्याप्यजातिमत्त्वसम्बन्धेन घ्राणजसाक्षात्कार-

विषयतावत्त्वमेव, गुणत्वव्याप्यजातिघटितसम्बन्धलाभाय गुणपदं न तु गुणत्वमपि विशेष्यतया विवक्षितं । एतेन गुणत्वस्य निरुक्त-जातित्वावच्छिन्नगन्धत्वादिविशेष्यतया विवक्षितत्वे स्वरूपतो गन्ध-त्वादेः गुणत्वविशेषणतायामप्यतिव्याप्तिसङ्गतेस्तादृशजातित्वाव-च्छिन्नस्य विशेषणत्वानुधावनं निर्बीजमिति दूषणमनवकाशं, घ्राणग्राह्यगुणत्व यथाश्रुतमेव ग्राह्यगन्धत्वरूपलघुधर्म्मसमनियत-तया न प्रतियोगितावच्छेदकमित्यपि वदन्ति । यत्तु अनवच्छेदकत्वं स्ववच्छेदकाविषयकप्रतीतिविषयत्व तथाचावच्छेदकताघटकसम्ब-न्धेन विशेष्यांशे स्ववच्छेदकप्रकारकप्रतीतिभिन्ना साध्यतावच्छेदकता-घटकसम्बन्धेन यादृशधर्म्मप्रकारिका प्रतीतिस्तादृशधर्म्मावच्छिन्न-सामानाधिकरण्यं व्याप्तिरिति पर्य्यवसितं, एवञ्च प्रमेयधूमत्वादि-प्रकारकप्रतीतेर्धूमत्वादिप्रकारकतानियमात् प्रमेयधूमत्वादि[illegible] साध्येऽतिव्याप्तिपरीहारः सम्भवति न च [illegible]-गुणत्वाद्यवच्छिन्नसाध्यके, गन्धत्वादिपक्षदिपर्[illegible] सुरभित्वादिकसविषयीभूतत्वापि च गन्धत्वादिकं [illegible] शसाध्यतावच्छेदकप्रकारकप्रतीतिसम्भवादिति [illegible] त्वा दण्डिमान्द्रव्यत्वादित्यादावतिव्याप्ति [illegible] र्यातत्त्वैव [illegible] तिसम्भवात् । अत्र प्रतियोगितावच्छेदक[illegible] प्रकारकप्रतीतिविषय[illegible] [illegible] [illegible] [illegible]

[illegible]

[illegible] [illegible] त्वात्तावतिप्रसङ्गात् । [illegible] परास्तम् । [illegible] प्रतियोगि-ताकाभावेऽपि न निस्तारः । लघुरूपसमनियतगुरुरूपेण साध्यतायां सर्वत्रैवाव्याप्ति. तादृशतद्धर्मावच्छिन्नत्वाप्रसिद्धे-रितिचेन्न,

---

अनुमानदीधितिविवृतिः ।

'अनतिरिक्तवृत्तित्वमिति स्वव्यापकतत्कत्वमित्यर्थं', तच्छून्या-वृत्तित्वविवक्षणे समवायेन प्रमेयसाध्यके व्यभिचारिण्यतिप्रसङ्गात्

प्रमेयसामान्याभावप्रतियोगिताशून्याप्रसिद्धा प्रमेयत्वादेस्तादृशा-
वच्छेदकत्वानिर्वाहात्, महानसीयत्वादिविशिष्टवह्नित्वाद्यवच्छिन्न-
साध्यके धूमादौ वह्नित्वादेर्महानसीयवह्न्याद्यभावप्रतियोगिता-
शून्यवह्न्यन्तरवृत्तितया विशिष्टेऽपि तत्र तच्छून्यावृत्तित्वस्य दुर्घट-
तया अतिप्रसङ्गाच्च । सत्तावत्त्वात् मेयत्वादित्यादावतिव्याप्तिश्च
तत्र सत्तावदभावप्रतियोगिताशून्ये साध्यतावच्छेदकताघटकसम्ब-
न्धेन हेतोरप्रसिद्धेः. स्वव्यापकतत्त्वनिवेशने च विशिष्टस्या-
विशिष्टस्य वा यादृशस्यावच्छेदकत्वमभिमतं तादृशस्यैव स्वपदे-
नोपादेयतया विशिष्टवह्नित्वादिकं प्रति च विशिष्टवह्न्याद्यभाव-
प्रतियोगितायाः व्यापकत्वस्याक्षतत्वेन तादृशस्यावच्छेदकत्वोप-
पत्तेः । इत्थं यद्यत् स्व तत्त्वाभावकूटस्य च साध्यतावच्छेदक-
विशेषपरता बोध्या अतः स्वत्वाननुगमेनैकसामान्याभावनिवेशा-
सम्भवात् यत्किञ्चिदेकावच्छेदकनिष्ठावच्छेदकत्वाभावमादायाति-
प्रसङ्गस्य नावकाशः । न च स्वपदस्य तत्तद्व्यक्तिपरतया अवच्छे-
दकनिष्ठतत्तद्व्यक्तित्वेनैव पर्यवसितं अवच्छेदकत्वं तथा च विशेषणा-
वच्छिन्ननिष्ठव्यक्तित्वस्यापि विशेष्यपर्याप्ततया विशिष्टवह्नित्वादे-
रवच्छेदकत्वे शुद्धस्याप्यनवच्छेदकत्वदुर्निवारमिति वाच्यं । शुद्धस्य
विशेषणान्तरसहितस्य वा यादृशस्याधिकरणता प्रतियोगितादि-
व्यापकतान्तर्निविष्टा तादृशरूपपर्याप्तावच्छेदकतापर्याप्तत्वविव-
क्षितत्वस्य साध्यतावच्छेदकविशिष्टत्वोपगमात् मेयधूमत्वादि-
पर्याप्तायाः अभावप्रतियोगितावच्छेदकतायाः अप्रसिद्धावपि तद्घा-
विधाया विषयतावच्छेदकतायाः प्रसिद्धा प्रतियोग्यनवच्छेदकत्वात्,

'तथाविधेति ताहृशप्रतियोग्यनधिकरणहेतुमद्वृत्तीत्यर्थः, 'यत्किञ्चित्पद तत्तद्व्यक्तित्वेनाभावनिवेशलाभाय, प्रत्येकस्यापि तथाविधाभावस्य सकलस्य नैकतावच्छेदकत्वघटकता किन्त्वेकैकस्यैवेति स्फोरणाय 'एकपद', ताहृशप्रतियोगितासामान्यशून्यावृत्तित्वं स्वव्यापकतावच्छेदकताहृशप्रतियोगितात्वकत्वमतोन पूर्व्वोक्तदोषः । 'अतएव' ईहृशावच्छेदकत्वस्य मूलाभिप्रेतत्वादेव, 'अतिरिक्तेति सामान्याभावस्य विशेषाभावकूटातिरिक्तत्वानभ्युपगम इत्यर्थः, 'धूमत्वादेरपीति, विशेषाभावकूटान्तर्गतमेकमभावमुपादाय धूमत्वादौ निरुक्तावच्छेदकत्वोपादानासम्भवादितिभाव. । 'तत्साधनमिति सामान्याभावस्यातिरिक्तत्वव्यवस्थापनमित्यर्थः,'सङ्गच्छत इति स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे विशेषाभावकूटातिरिक्तसामान्याभावानभ्युपगन्तृमतेऽपि विशेषाभावीयप्रतियोगिताकूटस्यैव सामान्यधर्म्मावच्छिन्नतया धूमत्वादेरपि वह्न्यादिसमानाधिकरणधूमादिविशेषाभावप्रतियोगितावच्छेदकत्वेनातिव्याप्त्यप्रसक्त्या सामान्याभावपार्थक्यव्यवस्थापनस्य तल्लक्षणप्रस्तावे अनुपयुक्ततापत्तेरितिभावः । नचातिरिक्तसामान्याभावाभावे उक्तरीत्या अतिव्याप्तिविरहेऽपि य एव वह्न्यभावाह्रदादौ वह्निर्नास्तीतिबुद्धिं जनयन्ति प्रत्येक धूमसमानाधिकरणाना तेषां प्रतियोगितावच्छेदकत्व वह्नित्वेऽप्यस्तीत्यव्याप्तिर्दुर्वारैवेति तत्साधनसङ्गत्या न्पष्टत्वासङ्गतिरिति वाच्य । हेत्वधिकरणवृत्तित्वावच्छेदेन यादृशधर्म्मावच्छिन्नत्वविशिष्टप्रतियोगिताकत्व अभावे ताहृशत्वस्य साध्यतावच्छेदकविशेषणता स्वीकृत्य ताहृशव्याप्तेर्वारणसम्भवात् न हि धूमाधि-

वृत्तिधर्म्मावच्छिन्नप्रतियोगितायाः प्रत्यक्षमपि प्रतीतेरव्याप्तञ्च-वृत्तितया स्वपर्य्याप्त्यधिकरणपर्य्याप्तत्वं प्रतियोगितायां निवेश्यापि वह्नित्वादावतिप्रसङ्गवारणासम्भव इत्यवधेयं। प्रतियोगिता-धर्म्मिकोभयाभावघटितव्याप्तिपक्षे मेयधूमवान् वह्नेरित्यादावति-व्याप्तिर्न सम्भवति साध्यतावच्छेदकमेयधूमत्वादिरूपगुरुधर्म्मावच्छिन्नत्वस्य कुत्रापि प्रसिद्धिविरहेण तद्घटितोभयाभावा-प्रसिद्धेरिति तन्मते मेयवह्निमान् धूमादित्यादावव्याप्तिमाह, 'लघु-रूपेति, 'तादृशतदवच्छिन्नत्वाप्रसिद्धेरिति तादृशसाध्यतावच्छेद-कावच्छिन्नत्वाप्रसिद्धेरित्यर्थः, विषयितासम्बन्धस्य वृत्त्यनियामक-त्वेनाभावप्रतियोगितानवच्छेदकतया तादृशसम्बन्धावच्छिन्नाभाव-प्रतियोगितायां तत्प्रसिद्धिरित्यस्य वक्तुमशक्यत्वात् अन्यथा मेय-धूमवान्वह्नेरित्यादावतिव्याप्तेरेव तादवस्थ्यात् इति भावः।

अनुमानदीधितिः।

प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विव-क्षितत्वात्। स्वसमानवृत्तिकस्यावच्छेदकं ग्राह्यं तत्त्वञ्च स्वपर्य्याप्त्यधिकरणपर्य्याप्तिवृत्तिकत्वं, यावत्त्वादिकन्तु न तथा, पर्य्याप्तिश्चायमेकोघट इमौ द्वाविति प्रतीति-साक्षिकः स्वरूपसम्बन्धविशेष एव, द्वित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नाव्याप्तिः, घटकस्यावच्छेदकत्वं स्वरूपसम्बन्धविशेषः,

एवञ्च यद्धर्म्मावच्छिन्नेत्यत्र यद्धर्म्मान्यूनवृत्तिधर्म्मावच्छिन्नेति वक्तव्यं तेनोक्ताव्याप्तिनिरासः ।

अनुमानदीधितिविवृतिः ।

'प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्येति, तथाच धूमादिसामान्याभावप्रतियोगितायाः प्रतिधूमादिकं भिन्नत्वेऽपि तत्प्रतियोगितावच्छेदकधूमत्वादेरैक्येन स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकतत्कत्वाद्यात्मकस्वव्यापकतत्कत्वरूपं तदनतिरिक्तवृत्तित्वं धूमत्वादावचतमेवेति भावः। न च प्रतियोगितायाः प्रतियोगिस्वरूपतामते सामान्याभावप्रतियोगितायाः विशेषाभावप्रतियोगितातो न भेदः प्रतियोगिनामभेदात् तथाच वह्निमान् धूमादित्यादावव्याप्तिर्दुर्व्वारा धूमसमानाधिकरणविशेषाभावप्रतियोगिताकूटे वह्नित्वादेरवच्छेदकत्वात्तस्य च तदनतिरिक्तवृत्तित्वादिति वाच्य। सामान्याभाव-विशेषाभावयोः प्रतियोगित्वाभेदेऽपि सामान्याभावीयप्रतियोगितात्वेनैव सामान्यधर्म्मावच्छेद्यत्वात् हेतुसमानाधिकरणाभावप्रतियोगितात्वावच्छिन्नावच्छेदकानतिरिक्तवृत्तित्वविवक्षणेनाव्याप्तिनिरासात् स्वव्यापकतत्कत्वमित्यत्र स्वस्य व्याप्यता साध्यतावच्छेदकताघटकसम्बन्धेन, प्रतियोगितावच्छेदकस्य व्यापकता प्रतियोगितावच्छेदकताघटकसम्बन्धेन बोध्या तेन सम्बन्धसामान्येन धूमत्वादिकं प्रति समवायादिना धूमत्वादेरव्यापकत्वेऽपि समवायादिना वह्नित्वं प्रति कालिकादिसम्बन्धेन घटत्वादेर्व्यापकत्वेऽपि च न क्षतिः। दखि-

मान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगिताच्छेद-
कैकदण्डादौ दण्डाद्यन्तरसमानाधिकरणभेदप्रतियोगितावच्छेद-
कत्वेऽपि तत्तद्दण्डादिसमानाधिकरणाभावप्रतियोगितानवच्छेदक-
त्वस्याक्षततया सर्व्वत्रैव दण्डादिव्यक्तौ प्रतियोगितावच्छेदका-
नतिरिक्तवृत्तित्वमव्याहतमिति नातिव्याप्तिः दण्डाद्यवच्छिन्नसाध्य-
कसद्धेतावीदृशरीत्या अव्याप्तिरिति तु नाशङ्कनीयं दण्डादौ साध्ये
परम्परासम्बन्धेनाखण्डस्य दण्डत्वादेरेव साध्यतावच्छेदकताया
स्वीकृतत्वात् । नन्वेवमपि हेतुसमानाधिकरणाभावप्रतियोगिताव-
च्छेदकवह्नि-घटोभयत्वाद्यनतिरिक्तवृत्तितया वह्नित्वादेरवच्छेद-
कत्वं दुर्व्वारमेव । न चोभयत्वादेरुभयादिपर्य्याप्ततया प्रत्येकं
तदत्यन्ताभावस्तदवच्छिन्नभेदश्च वर्त्तते अयमेकोन द्वाविति
सर्व्वजनसाधारणानुभवस्य दुरपह्नवत्वात् तादृशप्रतीतेरेकत्वादौ
द्वित्वाद्यवच्छेदकत्वाभावावगाहित्वोपगमे मूलावच्छिन्नो वृक्षो न
कपिसंयोगीत्यादिप्रतीतेरपि मूलादौ कपिसंयोगाद्यवच्छेदकत्वा-
भावावगाहितास्वीकारापत्तेः । यदि तत्र बाधकाभावात्
वृक्षाद्यधिकरणककपिसंयोगाद्यभावो विषयस्तदा प्रकृतेऽपि एक-
त्वाद्यवच्छिन्नाधिकरणकद्वित्वाभावादिविषयकत्वं दुर्व्वारमेव
एकत्वावच्छिन्ने द्वित्वादिसत्ताप्रत्ययानुदयेन बाधकविरहस्य तुल्य-
त्वात् प्रत्येकमुभयादौ द्वित्वाभावादिसत्त्वेऽपि द्वित्वादेर्द्वित्वा-
भावाद्यनुयोगितानवच्छेदकतया द्वौ न इतिप्रतीतेर्दुर्वचत्वा-
त्वात् द्वित्वादिसामानाधिकरण्यमात्रेण तदभावप्रत्ययस्य भ्रम-
त्वात् नञ्पदेनान्वयितावच्छेदकावच्छेदेनाभावबोधनात् द्वित्वादि-

स्वसमानवृत्तित्वनिवेशनमफलं । न चाव्याप्यवृत्तिवर्त्तावच्छि-
न्नप्रतियोगिताकभेदस्याव्याप्यवृत्तितामते संयोगेन दण्डादेरेव
साध्यतावच्छेदकता तत्र व्यभिचारिहेतुके हेतुसमानाधिकरणा-
भावप्रतियोगितावच्छेदकदण्डादिकमादाय दण्डादिरूपसाध्यता-
वच्छेदके पारिभाषिकावच्छेदकत्वं व्यापकताशरीरे प्रतियोगिता-
वैयधिकरण्यानिवेशे न स्यादिति वाच्यं । अव्याप्यवृत्ति-
दण्डादिकमादाय दण्डादेः पारिभाषिकावच्छेदकत्वासम्भवेऽपि
व्यभिचारनिरूपकाधिकरणवृत्तिकिञ्चिद्व्यक्त्यवृत्तित्वरूपं हेतुसमा-
नाधिकरणाभावप्रतियोगितावच्छेदकमादाय दण्डादेः साध्यताव-
च्छेदकस्य तथात्वोपपादनसम्भवात् तद्वृत्तौ साध्ये तद्वृत्ति-
त्वावच्छिन्नभेदस्य कल्पस्यसम्भवादिति ध्येयं । ननु किमिदं
समानवृत्तिकत्वं, यद्यन्यूनानतिरिक्तवृत्तित्वं तदा धूमनिरू-
पितवृत्तित्वान्तरनिवेशवैफल्यं स्यान्न्यूनवृत्ति यद्गगनादिनिरूपितवृत्ति-
त्वस्य स्वकिञ्चिन्न्यूनत्वात् तादृशतादृशदण्डभेदत्वादिकमादाय दण्ड-
त्वादेरवच्छेदकत्वापत्तिश्च दुर्वारा यदि चैतद्दोषनिरासाय
तत् तत्र स्वनिरूप्यानन्यवृत्तित्वानन्यवृत्तित्वनिरूपकत्वं
हित्वादौ च वह्नित्वादिनिरूपितसमानवृत्तिकत्वं वह्नित्वादेर-
व्याप्यवृत्तित्वात् इत्युच्यते तदापि वह्नि धर्मान्तरम् धूमादि
त्वादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकवह्नि-धूमवद्-
वृत्तित्वादन्यतिरिक्तवृत्तिकत्वात् साध्यतावच्छेदकत्वादि पारिभाषि-
कावच्छेदकत्वापत्तिर्दुर्वारैव इति वह्नित्वादेरवच्छेदकत्वस्य साध्य-
वृत्तित्वं निरुक्तसमानवृत्तिकत्वस्य व्यभिचारित्वं च,

प्रमात्वापत्तिराकाशत्वादिसामानाधिकरण्येनात्माकाशोभयत्वादि-
पर्य्याप्तिसत्त्वात् अतस्तत्र धर्म्मितावच्छेदकघटत्वाद्यवच्छिन्न-
पर्य्याप्तेरेव विषयत्वमङ्गीकार्य्यं तथाचाव्यासज्यवृत्तेरपि द्वित्वादि-
पर्य्याप्त्यवच्छेदकत्वमायातमिति व्यासज्यवृत्तिधर्म्मस्याव्यासज्यवृत्ति-
समानवृत्तिकत्वं दुर्व्वारमेव। नचानेकवृत्तेरपि व्यासज्यवृत्तिधर्म्म-
पर्य्याप्त्यवच्छेदकत्वमास्तां तादृशधर्म्मस्य च नाव्यासज्यवृत्ति-
पर्य्याप्त्यवच्छेदकत्वं किन्त्वेकमात्रवृत्तेरेवेतीति न व्यासज्यवृत्त्य-
व्यासज्यवृत्त्योरेकधर्म्मावच्छिन्नपर्य्याप्तत्वप्रसङ्ग इति वाच्यं। घटो
द्रव्यमित्यादिप्रतीत्या तथाविधघटत्वाद्यवच्छेदेन द्रव्यत्वादि-
पर्य्याप्त्यवगाहनादेकमात्रवृत्तेरेवाव्यासज्यवृत्तिधर्म्मपर्य्याप्त्यवच्छेद-
कत्वमित्युक्तसम्भवात्, तत्र घटत्वादिसामानाधिकरण्येनैव
द्रव्यत्वादिपर्य्याप्तिर्भासते न तु तदवच्छेदेनेत्युक्तौ घटौ द्वौ घट-
इत्यादावपि द्वित्वादौ घटत्वादिपर्य्याप्त्यवच्छेदकताभाने विवाद-
सम्भवेनाव्यासज्यवृत्तिधर्म्मपर्य्याप्तेरवच्छिन्नत्वस्यैवासिद्धिप्रसङ्गाद्द्रव्य-
त्वादिपर्य्याप्त्यवच्छेदकाप्रसिद्ध्या तदवच्छेदकत्वघटितव्याप्तिप्रस-
ङ्गात्। न च स्वपर्य्याप्त्यवच्छेदकताव्यापकावच्छेदकताकपर्य्याप्ति-
कत्वमेव विवक्षणीयं व्यासज्यवृत्तिपर्य्याप्त्यवच्छेदके एकमात्रवृत्ति-
धर्म्मे व्यासज्यवृत्तिपर्य्याप्त्यवच्छेदकतानिरूपणात् तथा च व्यासज्य-
वृत्तिपर्य्याप्त्यवच्छेदकताव्यापकत्वमिति [illegible] व्यासज्यवृत्त्यव्यासज्य-
वृत्त्योर्न समानवृत्तिकता इति वाच्यं, एवं [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible]

[illegible]

[illegible] दुर्वा-

[illegible] वाच्यम्। [illegible]

[illegible] द्वित्वादिपर्याप्ति [illegible] अवगाहनात् प्रकृते [illegible]

व्यासज्य [illegible] नियमेनातिप्रसङ्गविरहात्।

भवात्, अव्यासज्यवृत्तिघटत्वादीनां पर्याप्त्याख्यसम्बन्धान्तरे मानाभावः समवायादिसम्बन्धेनैवोपपत्तेः। न च समवायसम्बन्धेन पटादावपि घटत्वादिबुद्धिप्रसङ्ग इति प्रतिनियतप्रतियोगिकपर्याप्ति-सम्बन्धस्वीकार इति वाच्यम्। प्रतिनियतप्रतियोगिकैकविध-सम्बन्धेनैवोपपत्तेर्द्विविधसम्बन्धसिद्धेः कथमप्यसम्भवात्, एवं द्वित्वा-देरपि पर्याप्ति-समवायादिरूपसम्बन्धद्वयकल्पनमयुक्तं अनेकवृत्ति-धर्मावच्छिन्नैकविधसम्बन्धेनैव निर्वाहात्। न चायमेको द्वित्व-सम्बन्धीति प्रतीतेरेकमात्रवृत्तिधर्मावच्छेदेनापि द्वित्वादेः सम्बन्धा-